# MADRAS GOVERNMENT ORIENTAL SERIES

No. CLIII

देवकेरलम् (चन्द्रकलानाडी)

अच्युतप्रणीतम्

द्वितीयो भागः द्वितीयोंऽशः

# DEVA KERALAM

(CANDRAKALĀNĀDĪ)

S
294.167
Ac 99.II,2D

VOLUME II PART II

# MADRAS GOVERNMENT ORIENTAL SERIES

Published under the authority
of the
Government of Madras

*General Editor:*

T. CHANDRASEKHARAN, M.A., L.T.,
Curator, Government Oriental Manuscripts Library,
Madras.

No. CLIII

# देवकेरलम् (चन्द्रकलानाडी)

## द्वितीयो भागः द्वितीयोऽङ्गः

# DEVA KERALAM

## (CANDRAKALĀNĀḌĪ)

Vol II part II

EDITED WITH INTRODUCTION

By

**T. S. RANGANATHA JOSYAR**

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY
MADRAS.

1956

**Price Rs. 6—12—0**

Library IIAS, Shimla
S 291 167 Ac 99 I D-Ac 99.II.
00006434

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 6434
Date 15/10/65
SIMLA

Printed at
RATHNAM PRESS,
Madras - 1.

S
291.167
Ac 99 II, 2 D

## INTRODUCTION

The present volume of Devakeraḷam is the continuation of Part I of Volume II published during the financial year 1955-56. Though the pages are given a fresh numbering, the numbering of the verses in this volume is a continuation from the previous part.

This edition is based upon a paper manuscript bearing D. No. 13776 preserved in the Government Oriental Manuscripts Library. The size of the manuscript is 12¼ × 9¾". It contains 335 pages with 20 lines on each page. It is in Telugu character and in good condition.

Devakeraḷam forms a very important work from the point of view of predictive astrology. It refers to various Aṁśas numbering about 150 for each of the Lagnas and gives the future for a person born in that particular Aṁśa. This Aṁśa is different from the Aṁśa Lagna and is given a separate name. Each Lagna is divided into 150 Aṁśas. Unless the correct Aṁśa of the Lagna of a person is known it is not possible to make use of this work.

There are other Nāḍī works also in this Library like Bhṛgu Nāḍī or S'ukra Nāḍī copied on paper in 27 volumes and Dhruva Nāḍī which is in 27 palm leaf bundles. The latter was purchased some three years ago and they are being transcribed on paper. It is hoped that these works also will be taken up for publication in due course.

MADRAS, 30—6—1956.

T. CHANDRASEKHARAN,
*General Editor,*
*Madras Government Oriental Series,*

# ❋ आमुखम् ❋

भो महाशयाः ! इतः पूर्वं राजकीयप्राच्यलिखित-पुस्तकालयाध्यक्षपादानां साहाय्यात् देवकेरलाख्ये (चन्द्रकलानाडी-ग्रन्थे) पूर्वभागः प्रकाशित इति भवद्भिर्विदितमेव । अधुना त्वनेक-भागात्मके देवकेरले द्वितीयभागः प्रकाश्यते । पूर्वभागस्य प्रणेता अच्युत इति ज्ञायते । भागस्यास्य तु निर्माता वेंकटेश इति च ज्ञायते । ग्रन्थपरिशीलनाच्च ज्ञायते वेंकटेशोऽच्युतस्यान्तेवासी स्यादिति ॥

पूर्वभागासंकलिता इतरग्रन्थानूदिता बहवो दुरूहा विषया अस्मिन् भागे परिदृश्यन्ते । अपि च ग्रहाणामंशकानां च संयोगात् राजयोगादिमहायोगाः संभवन्तीति सूरिणा कथ्यते । नित्यानित्यकारकसंबन्धेन जायमानानि फलानि, द्वादशभाव-फलानि, विशेषेण पञ्चग्रहयोगाज्जायमानाः केचन महायोगाश्च प्रतिपाद्यन्ते । शनिराह्वोः परस्परयोगात्, गुरोरतिचारात् शनेः भौमक्षेत्रस्थित्या च लोके अतिवृष्टिमहावात्यावग्रहादिभ्यः संभूयमाना भयंकराः संभवाश्च वर्ण्यन्ते सूरिवर्येण । फलमीदृशं तु मन्मथनाम-संवत्सरे, आश्वयुजकृत्तिकामासे विशेषेण दक्षिणदिशि प्रत्यक्ष-मस्माभिरनुभूतमेव । एतादृशानुभवयोग्या बहवो विषयाः प्रति-पाद्यन्तेऽस्मिन् भागे कविना ॥

अपि च केषुचिज्जातकेषु द्वित्रिचतुर्ग्रहा उच्चाः सन्ति । तथापि ते महाकष्टमनुभवन्ति । पर्यालोच्यमाने अस्य कारणं न दृश्यते ग्रन्थान्तरेषु । कारणं तु कथ्यते कविना अस्मिन् भागे द्वित्रिचतुर्ग्रहेषु उच्चेषु सत्स्वपि, एको ग्रहो यदि नीचो भवेत्तदानी-

मेव शुभफलानि भवेयुः । नो चेत् नेति वर्ण्यते कविना । अयमभिप्रायो गर्गाचार्यप्रोक्त इति कथ्यते । अपि च जातकेषु षष्ठाष्टमद्वादशस्थानगतानां ग्रहाणां फलं शून्यमेव दृश्यते । भागेऽस्मिन् षष्ठाष्टमद्वादशस्थानगतानां तत्तद्भावाधिपानां फलं विशेषेणोच्यते । लग्नात्, चन्द्रात्, कारकग्रहाच्च षष्ठाष्टमद्वादशभावाधिपाः केन्द्रे, उच्चे, स्वक्षेत्रे वा अन्योन्यदृष्टियुक्ता यदि भवेयुस्तदा महायोगाः संभवेयुरिति चोच्यते । अयमपि विषयो लोकानुभवयुक्तो दृश्यते ॥

अपि च, ग्रन्थेऽस्मिन् शत्रुक्षयार्थं स्वर्णपरशुदाननवदुर्गापूजादिशान्तिप्रकाराश्च वर्ण्यन्ते । एतादृशा बहवो दुरूहा विषया दृश्यन्ते अस्मिन् भागे । ग्रन्थमिमं ज्यौतिषिका यदि पठेयुस्तदानीं तेषां बुद्धिविकासो भवेत् । नात्र संशयलेशोऽप्यस्ति । अल्पज्ञेन मया यथाशक्ति परिशोध्यायं भागः, प्रकाश्यते । यदि दोषाः स्युस्तर्हि तान् दूरीकृत्य मामनुगृह्णन्तु सहृदयाः तेभ्यश्च मदीय प्रणामानैकास्सन्तु ॥

भागस्यास्य प्रकटनविषये सहायभूतेभ्यः राजकीयप्राच्यलिखित पुस्तकालयाध्यक्षपादेभ्यः सविनयं मदीयां कृतज्ञतां निवेद्याहं विरमामि ॥

इत्थं

टी. एस्. रङ्गनाथशर्मा

# विषयानुक्रमणिका


| विषयः | पृष्ठाङ्कः |
|---|---|
| धनुर्लग्ने चम्पकांशः | 1 |
| चरलग्ने धनञ्जयांशः | 22 |
| कटकलग्ने कुबेरांशः | 33 |
| चरलग्ने क्षमांशः | 43 |
| वृषभलग्ने वित्तांशः | 53 |
| कल्पद्रुमादिमहायोगाः | 61 |
| चरलग्ने परमेश्वरांशः | 64 |
| वृश्चिकमकरलग्नयोः सुरांशः | 72 |
| वृश्चिकलग्ने दुर्भगांशः | 77 |
| स्थिरलग्नचतुष्टये निशाकरांशः | 94 |
| वृश्चिकलग्ने विश्वांशः | 101 |
| तुलालग्ने ऐन्दवांशः | 128 |
| तुलालग्ने निशाकरदुर्भगांशः | 137 |
| विश्वम्भरांशः | 138 |
| कुम्भलग्ने अङ्गदांशः | 139 |
| धनुर्लग्ने वारुणांशः | 148 |
| धनुर्लग्ने उरगांशः | 166 |
| कुम्भलग्ने दर्दुरांशः | 178 |
| मकरलग्ने सचिवांशनाडीफलम् | 185 |
| मीने शनिकेतू | " |
| मीनलग्ने कुन्दांशः | 195 |
| कन्यालग्ने सुरांशः | 208 |
| मीनलग्ने कमलांशः | 209 |
| तुलालग्ने निर्मलांशः | 217 |
| कटकलग्ने कुटिलांशः | 230 |
| वृषभशुक्रराजयोगनाडीफलम् | " |

| | |
|---|---|
| तुलालग्ने इन्द्रांशः | 235 |
| मीनलग्ने शीतलांशः | 245 |
| शनिशुक्रफलम् | ,, |
| धनुर्लग्ने मेषशनिकोकिलांशफलम् | 255 |
| धनुर्लग्ने धावांशशनिफलम् | 256 |
| मेषलग्ने अचलांशनाडीफलम् | 264 |
| कुम्भलग्ने मालांशः | 272 |
| कन्याबुधसोमलतांशनाडीफलम् | 279 |
| वृश्चिकलग्ने चन्द्रत्रिकोणभावफलम् | 287 |
| कटकलग्ने धनदांशफलम् | 290 |
| तुलालग्ने मनोहरांशः | 294 |
| गर्भोत्पत्तिलक्षणम् | ,, |
| तुलालग्ने इन्द्रयोगः | 297 |
| अवतारयोगः | 299 |
| हरिहरब्रह्मयोगः | ,, |
| महालक्ष्मीयोगः | 300 |
| कुबेरयोगः | 301 |
| काहलयोगः | 302 |
| शङ्खयोगः | 303 |
| भेरीयोगः | ,, |
| पुत्रभावः | 304 |
| मत्स्ययोगः | 305 |
| कलानिधियोगः | ,, |
| रुद्रासनयोगः | 306 |
| कर्मसाम्राज्ययोगः | 309 |
| अखण्डसाम्राज्ययोगः | 310 |
| चामरयोगः | 312 |
| गुरुदशाफलम् | 316 |
| कूर्मयोगः | ,, |

| | |
|---|---|
| शनिदशाफलम् | 323 |
| मिथुनलग्ने कामिन्यंशः | 325 |
| योगसारावली | 332 |
| अनुबन्धः | 340 |
| ग्रहाणां स्वरूपकथनम् | 342 |
| चन्द्रस्य षष्ठ्यंशः | 345 |
| दैवज्ञलक्षणानि | 347 |
| अंशकविवरणम् | 348 |

श्रीः

॥ वेङ्कटेशप्रणीतम् ॥

# देवकेरळम् ( चन्द्रकलानाडी )

## द्वितीयभागे द्वितीयोंऽशः

—:*:—

### ॥ धनुर्लग्ने चम्पकांशः ॥

चम्पकांशे धनुर्लग्ने चोत्तरांशे प्रजायते ।
विप्रजन्मासुखी नित्यं [1]पञ्चमोऽयं प्रकीर्तितः ॥ २६५२ ॥

अथ वा च द्वितीयः[2] स्याद्रक्तवर्णः शुभाकृतिः ।
कुग्रामे जननं [3]चैति नदीप्रान्ते पुरीषु च ॥ २६५३ ॥

मिथुनांशे धनुर्लग्ने चापद्रेकाण[4]जस्तथा ।
भाग्येशे गुरुसंयुक्ते बाल्ये पितृविनाशवान् ॥ २६५४ ॥

पश्चाद्भ्रातृविहीनः स्याज्ज्येष्ठभ्रातृप्रियः सुखी ।
बाल्ये दारिद्यमापन्नो ज्येष्ठभ्रातृसमन्वितः ॥ २६५५ ॥

मातामहीगृहे वासं मातृसौख्यं क्वचित् सुखम् ।
पूर्वभागे प्रजातस्तु[5] चतुर्थः परिकीर्तितः ॥ २६५६ ॥

सीमन्तपुत्र [6]इत्याहुः क्वचित् पक्षान्तरे मतः ।
चम्पकांशे पूर्वभागे शनित्रिंशांशजस्य[7] च ॥ २६५७ ॥

वनप्रान्ते प्रसूतिः स्याद्विप्रजन्मसुखं[8] भवेत् ।
महानदीप्रात्यदेशे जननं चाग्रहारके ॥ २६५८ ॥

---

1. पञ्चमे गर्भजातकम्
2. द्वितीयं
3. चेति
4. जातके
5. प्रजातस्य चतुर्थे गर्भजातकम्
6. पुत्रम्
7. जातके
8. सुखी

प्राक्पश्चिमवी[1]थ्योर्वा दक्षिणे भाग [2]एव च ।
उत्तरांशे तथा विन्द्यान्मध्य[3]खण्डोद्भवस्य च ॥ २६५९ ॥

जन्माब्दे पितृनाशः[4] स्याच्चम्पकांशे न संशयः ।
नीचे भौमांशगे सूर्ये भृगुतेन समन्विते ॥ २६६० ॥

देशान्तरे नदीप्रान्त्ये पितुर्मरणमादिशेत् ।
सम्पद्दशान्ते जननी मध्ये वा मृतिमा[5]प्नुयात् ॥ २६६१ ॥

पूर्वभागे तृतीयांशे मातृ[6]वंशविवर्धनम् ।
कनिष्ठभ्रातृसिद्धिः स्याच्चम्पकां[7]शोद्भवस्य च ॥ २६६२ ॥

उत्तरांशे मातृवंशे बाल्ये वासं विनिर्दिशेत् ।
क्लेशजीवनमित्याहुः शूद्रप्रभुवशात् सुखम् ॥ २६६३ ॥

ग्रन्थान्तरे—

चम्पकांशे धनुर्लग्ने बाल्ये शूद्रप्रभुप्रियम् ।
पर[8]गेहे निवासं च भ्रातृमूलात् कचित् सुखम् ॥ २६६४ ॥

भाग्यारूढे धनुर्लग्ने भाग्ये[9]यावत् फलैर्युते ।
तावद्वर्षात् परं भाग्यं योगवान् कीर्तिमान् भवेत् ॥ २६६५ ॥

आरूढे राहुदोषेण बाल्येऽल्पसुखबुद्धिमान् ।
कालान्तरे चम्पकांशे स्वबुद्ध्यायुक्तिमान् गुणी ॥ २६६६ ॥

विद्याभ्यासं [10]च लभते वेदाध्ययनवर्जितम्[11] ।
चम्पकांशे राजसेवी कोपी क्षिप्रप्रसादवान् ॥ २६६७ ॥

राजद्वारे प्रसिद्धश्च[12]ह्युपायात् कार्यसाधकः ।
राजप्रकृतिमान् धीरो रागी दुष्टस्वभाववान् ॥ २६६८ ॥

---

1. वीथीषु
2. जातकम्
3. खण्डस्य जातके
4. नाशं
5. आदिशत्
6. मातृदाय व्यवधनम्
7. शस्य जातके
8. गृहेनिवासंस्यात्
9. प्रकुर्वीत
10. यानैः
11. वर्जितः
12. वपायात्

स्वपक्षवादी परकार्यदक्षः
श्रीचम्पकांशे परकार्यसक्तः ।
सुलोचनस्तीक्ष्णमतिः प्रसिद्धः
समीरपैत्यामयदेहवान् स्यात् ॥ २६६९ ॥

चापे मेषांशगे चन्द्रे [1]स्वगम्यागमनोत्सुकः ।
गूढकामातुरः प्राज्ञश्चम्पकांशे[2] प्रजायते ॥ २६७० ॥

पापवारे चम्पकांशे धीरः साहसकार्यवान् ।
कोपी क्षिप्रप्रसन्नात्मा स्वभुजार्जितभाग्यवान् ॥ २६७१ ॥

राजवित्तापहारी स्याद्बृहन्नेत्रः [3]सुरूपान् ।
स्थूलकेशः प्रसन्नात्मा देवब्राह्मणपोषकः ।
उत्तरांशे फलं सत्यं हरिशङ्करभक्तिमान् ॥ २६७२ ॥

ग्रन्थान्तरे—

सत्पात्रदानप्रियकार्यदक्षः
श्रीचम्पकांशे बहुमानपूज्यः ।
प्रहृष्टचेता मृदुदेहपुष्टिः
कालान्तरे भाग्यसुपुण्यभाक् स्यात् ॥ २६७३ ॥

पूर्वभागे [4]महापापी देवब्राह्मणपोषकः ।
सदा रोषमदोन्मत्तश्चपात्रव्ययडाम्भिकः ॥ २६७४ ॥

चम्पकांशे पूर्वभागे कामी विषयलोलुपः ।
स्वभावमानकार्येषु[5] दुष्टकृत्यः शठो भवेत् ॥ २६७५ ॥

तमोगुणप्रधानश्च पूर्वभागेशठः खलः ।
नीचकार्यरतो नित्यं नीचसेवी दुरात्मकः[6] ॥ २६७६ ॥

---

1. अगम्या
2. अंशस्य जातके
3. स्वरूपवान्
4. महत्पापं
5. कांणि
6. दुरात्मनः

उत्तरांशे धनुर्लग्ने हरिभक्तिविशेषवान् ।
कलत्रद्वयवान् रागी ज्येष्ठभ्रातृवियोगवान् ॥ २६७७ ॥

चम्पकांशे धनुर्लग्ने [1]ह्युत्तरांशे प्रजायते ।
एकभ्रातृयुतः श्रीमान् पितृश्रेष्ठः [2]सुपुत्रवान् ॥ २६७८ ॥

पितृस्थानाधिपे नीचे स्वपितुः[3] क्लेशजीवनम् ।
पितामहानुजः कश्चिद्योगप्राबल्यवान् सुखी ॥ २६७९ ॥

पितृव्याधिपतौ शुक्रे नीचे स्वोच्चांशसंस्थिते ।
स्वपि[4]त्रधिकसौख्यं स्यात् पितृव्यैको न संशयः ॥ २६८० ॥

पितृष्व[5]सृद्वयं चैव ह्येका पुत्रवती भवेत् ।
पितृभावफलाध्याये चम्पकां[6]शोद्भवस्य च ॥ २६८१ ॥

पितृव्यफलविस्तारं सङ्ख्यालक्षणमुच्यते ।
पितृस्थानाधिपे [7]सूर्ये स्थिरांशे शुभराशिगे ॥ २६८२ ॥

लग्नाद्द्वादशगे मन्दे सीमन्तशिशुनाशनम् ।
पश्चात् पुत्र[8]श्चिरंजीवी मितसन्तानवान् भवेत् ॥ २६८३ ॥

सम्पद्वाये चम्पकांशे शूद्रप्रभुसमाग[9]मम् ।
बाल्ये देशान्तरं गत्वा निषादप्रभुराज्यके[10] ॥ २६८४ ॥

नगरे देहजाड्यं [11]च ज्वरपीडाभयं क्वचित् ।
पश्चात् स्वदेशमासाद्य मासमेकं ज्वराद्भयम् ॥ २६८५ ॥

पश्चादारोग्यमाप्नोति विवाहोत्सवमादिशेत् ।
सम्पद्वाये तृतीयांशे लग्नाधिपतिभुक्तिषु ॥ २६८६ ॥

---

1. उत्तरांशे
2. सुपुत्रवान्
3. पिता
4. स्वपिता
5. पितृष्वसा द्वयं चेति एका
6. अंशस्य जातके
7. भौमे
8. चिरायुष्यं
9. समागमे
10 राज्यगे
11. स्याज्ज्वरपीडा

चम्पकांशे विवा[1]हश्च षोडशाब्दात् परं भवेत् ।
मध्यान्तरे राहुभुक्तौ मायाब्दा[2]दौ च वत्सरे ॥ २६८७ ॥

विवाहोत्सवकार्याणि चम्पकांशेनसंशयः ।
पूर्वभागे चम्पकांशे द्वादशाब्दे विवाहवान् ॥ २६८८ ॥

राहुदोषवशाद्विघ्नं विंशाब्देनात्रसंशयः ।
विवाहानन्तरं भाग्यं राजद्वारे सुभाग्यवान् ॥ २६८९ ॥

उत्तरांशे फलं सत्यं प्रत्यक्षं देवकेरलम् ।
बाल्ये सम्पद्दशाकाले स्वाश्रितप्रभुनाशनम् ॥ २६९० ॥

तद्वर्गे वा [3]मृतिश्च स्याद्राजपुत्रवशात् सुखम् ।
काञ्चीपिनाकिनीम[4]ध्ये देशे राजान्तरं भवेत् ॥ २६९१ ॥

सम्पद्दाये मध्यखण्डे स्वराजक्लेशमादिशेत् ।
सम्पद्दाये मध्यखण्डे ज्येष्ठभ्रातुर्म[5]हत् सुखम् ।
अनाचारवशाद्व्याधिर्मध्ये मध्ये प्रपीडयेत् ॥ २६९२ ॥

कृष्णागोदावरीमध्येयवनप्रभुपट्टणे ।
[6]विप्रो प्राबल्यमापन्नो द्वादशाब्दे भविष्यति ॥ २६९३ ॥

दशवर्षात् परं [7]चैव त्विदं फलमुदाहृतम् ।
लाभाधिपदशाकाले विंशाब्दे शुभमादिशेत् ।
द्वात्रिंशाब्देऽथ वा चेति दारसौख्यं विनिर्दिशेत् ॥ २६९४ ॥

सम्पद्दशान्ते बुधभुक्तिकाले
केत्वन्तरे वाथ सुतोत्सवः[8] स्यात् ।
तत्पूर्वभागे मृतिमाकरोति
श्रीचम्पकांशे शुभसंप्रजातः ॥ २६९५ ॥

---

1. विवाहं स्यात्
2. मायाब्दादि....वत्सरे
3. मूर्ति चेति राज
4. मध्ये
5. महासुखम्
6. ब्राह्मणप्रबलं चेति
7. चेति इदं
8. सुतोत्सवं स्यात्

ज्येष्ठपत्न्याश्च [1]जातानां पुत्राणां नाशमीरयेत् ।
[2]एकपुत्रश्चिरायुष्मान् ह्यायुष्मत्यौ द्विपुत्रिके ॥ २६९६ ॥

दारान्तरे [3]जातपञ्चपुत्रीपुत्रसमन्वितः ।
द्विपुत्रकन्यकैका[4]स्तु लभन्ते दैर्घ्यमायुषः ॥ २६९७ ॥

चम्पकांशे धनुर्लग्ने [5]ह्युत्तरांशोद्भवस्य च ।
[6]इत्थं च ऋतुसङ्ख्याकाः पुत्रीपुत्राश्चिरायुषाः ॥ २६९८ ॥

अन्यान्तरे पञ्चसङ्ख्या [7]द्वौ पुत्रौ कन्यकात्रयम् ।
दीर्घायुर्योग[8] इत्याहुः केचित्पक्षैकपुत्रवान् ॥ २६९९ ॥

दारत्रयं पूर्वभागे मध्यख[9]ण्डोद्भवस्य च ।
[10]उक्तस्य त्वेकपुत्रस्य राजयोगं विनिर्दिशेत् ॥ २७०० ॥

पूर्वखण्डे दरिद्रः स्यादेकोद्वा[11]हो द्विकन्यकः ।
कन्य[12]के वुद्धियुक्ते च विद्याभागेन जीवतः ॥ २७०१ ॥

उत्तरांशे मध्यखण्डे द्विपुत्रौच [13]त्रिकन्यकाः ।
[14]दीर्घायुषा इति प्रोक्तं चम्पकांशोद्भवस्य च ॥ २७०२ ॥

एकपुत्रमपुत्र[15]स्य दत्तपुत्रप्रदो भवेत् ।
कलत्रद्वयमित्याहुः पूर्वखण्डैकपुत्रवान् ॥ २७०३ ॥

चम्पकांशे धनुर्लग्नेह्युत्तरां[16]शोद्भवस्य च ।
पापे शुक्रे पूर्वखण्डे पाण्ड्यदेशेप्रभोर्विपत् ॥ २७०४ ॥

---

1. सन्तानं बहुत्वं
2. एकपुत्रं चिरायुष्यं पुत्रिकाद्वयमीरितम् ।
3. पञ्चसङ्ख्या
4. स्युर्दीर्घमायुर्भविष्यति
5. उत्तरांशस्य जातके
6. आद्यस्य ऋतुसङ्ख्यानि पुत्रीपुत्रचिरायुषम् ।
7. द्विपुत्रः कन्यकामयम्
8. योगं
9. खण्डस्य जातके
10. एकपुत्रमिति प्रोक्तं
11. उद्वाहद्विकन्यका
12. कन्यका च पटुःप्रद्धीर्विद्वान् जीवनवान् भवेत्
13. कन्यकात्रयम्
14. दीर्घमायुरिति प्रोक्तं चम्पकांशस्य जातके
15. स्यात्दत्तपुत्र
16. उत्तरांशस्य जातके

मीनेऽर्कनन्दने काले तत्त्रिकोणस्य सप्तमे ।
चोलदेशे [1]ब्वरिष्टं स्यान्मण्डलाधिपतेर्विपत् ॥ २७०५ ॥

सिंहे शनिस्थिते काले पाण्ड्यदेशप्रभोर्मृतिः ।
[2]जनकस्येष्टदेशे च ह्यराजकमिति स्मृतम् ॥ २७०६ ॥

विपद्दाये पाण्ड्यदेशे स्त्रीराज्यं च शुभाधिकम् ।
[3]ब्राह्मणः प्रबलः स्याच्चतत्काले भाग्यमादिशेत् ॥ २७०७ ॥

[4]जनकस्येष्टतद्राज्ये चम्पकांशे सुभाग्यवान् ।
नरवाहन[5]युक्तश्च क्षेमदाये न संशयः ॥ २७०८ ॥

सम्पद्दाये तृतीयांशे गोचरे दशमे गुरौ ।
लोके धान्यक्षयादीनि [6]ह्यनावृष्टिर्भविष्यति ॥ २७०९ ॥

म्लेच्छप्राबल्यमित्याहुर्विपद्दायेनसंशयः ।
सम्पद्दाये तृतीयांशे विपद्दाये न संशयः ॥ २७१० ॥

विपद्दाये मध्यखण्डे ज्येष्ठभ्रातृविनाशनम् ।
स्वराजद्वेषमित्याहुर्विप्रमूलाद्विरोधवान् ॥ २०११ ॥

स्थानच्यु[7]ति र्मनस्तापं दक्षिणे गमनं तथा ।
यातायातं [8]च लभते विपद्दाये न संशयः ॥ २७१२ ॥

प्रत्यक्षभाग्याधिप[9]तेर्दशायां
स्थानच्यु[10]र्ति मित्रविरोधिदुःखम् ।
तदन्यभूपालसकृत्प्रसादं
शुभाशुभं क्लेशफलं च [11]दद्यात् ॥ २७१३ ॥

---

1. अरिष्टं
2. स्वपितारिष्टदेशः स्यात्
3. ब्राह्मणप्रबलं चेति तत्काले
4. स्वपितारिष्ट
5. इत्याहुः
6. अनावृष्टिः
7. च्युतिर्मनस्तापं दक्षिणे याक्रमादिशेत् ।
8. प्रकुर्वीत
9. आधिपतिः
10. च्युतिर्मित्र
11. दद्युः

नीचग्रहदशाकाले कुत्सितप्रभुसेवया ।
जीवनं कानने वासमल्पसौख्यं विनिर्दिशेत् ॥ २७१४ ॥

पश्चाद्राजान्तरस्नेहं ग्रामान्तरनिवासवान् ।
क्षेमदाये फलं सत्यं विपद्दाये शुभाशुभम् ॥ २७१५ ॥

दशान्ते क्लेशकार्याणि पुत्रपीडा भविष्यति ।
सन्तानोत्पत्तिनाशः[1] स्यात् स्वपुत्रस्य शुभं क्वचित् ॥ २७१६ ॥

क्षेमाधिपदशाकाले चम्पकां[2]शोद्भवस्य च ।
नूतनप्रभुसन्मानमर्थलाभं शुभाधिकम् ॥ २७१७ ॥

प्रबलोद्योगकार्याणि ब्राह्मणस्नेहमादिशेत् ।
चम्पकांशे क्षेमदाये बाल्यस्नेहप्रभोर्मृतिः ।
[3]स्वसेवितनृपक्लेशं तत्पुत्रस्य वशाद्[4]व्यथाम् ॥ २७१८ ॥

भूमीशकार्येण मनोविचारं
चतुर्थदाये मलिनं कृतज्ञः ।
वर्षत्रयं क्लेशफलं ददाति
पश्चात् सुसौख्यं शुभशोभना[5]प्तिम् ॥ २७१९ ॥

[6]स्वाश्रमाश्रितभूमिपतेश्चराज्ये
दायादि[7]वर्गाः समरोत्सुकाः स्युः ।
कोशादिनाशं [8]चतुरङ्गनाशं
चतुर्थदाये [9]फलमाहुरार्याः ॥ २७२० ॥

नष्टरा[10]ज्याद्धनप्राप्तिरष्टाविंशतिवत्सरे ।
स्वप्रभोश्च मनःसौख्यं तदूर्ध्वं[11] क्षेममादिशेत् ॥ २७२१ ॥

---

1. नाशं स्यात्
2. अंशस्य जातके
3. स्वमेवस्वपति
4. व्यथा
5. शोभनाप्तिः
6. स्वसेवकाश्रितनृपालराज्ये
7. कानां
8. मुनयो वदन्ति
9. बलम्
10. राज्यधन
11. तदूर्ध्वे

अमात्यजनसम्मानं विप्रस्नेहं शुभाधिकम् ।
यत्नकार्यार्थसिद्धिं[1] च गेहे कल्याणमादिशेत् ॥ २७२२ ॥

योगे चत्वारिंशोऽब्दे चत्वारिंशति[2]वासरे ।
चम्पकांशे शुभाधिक्यं धनुर्ल[3]ग्नोद्भवस्य च ॥ २७२३ ॥

रन्ध्राधिपदशाकाले त्रयस्त्रिंशतिवत्सरे ।
एकोनचत्वारिंशेऽब्दे प्रभुनाशं विनिर्दिशेत् ॥ २७२४ ॥

स्वराजपुत्रदेहार्तिः पञ्चत्रिंशतिवत्सरे ।
देहकार्श्यं [4]च लभते प्रत्यग्दाय इदं फलम् ॥ २७२५ ॥

स्वशत्रुजनना[5]शश्च पाण्ड्यदेशे भविष्यति ।
चम्पकांशे क्षेमदाये चत्वारिंशात् परं [6]श्रियम् ॥ २७२६ ॥

नरवाहनभूषाप्तिं[7] राजयोगं द्विवत्सरे ।
ग्रन्थान्तरे द्विवर्षे [8]च योगप्राबल्यमादिशेत् ॥ २७२७ ॥

क्षेमदाये तृतीयांशे योगं प्राप्नोति भूरिशः ।
गेहेशे लाभराशिस्थे कर्मभाग्येशसंयुते ॥ २७२८ ॥

क्षेत्रगोधान्यवृद्धिः स्यात् क्षेमदाये सुभाग्य[9]वान् ।
अनायासेन [10]च लब्धविशालगृहलाभवान् ॥ २७२९ ॥

तत्पूर्वे नीचदोषेण बहुगेहनिवासवान् ।
परगेहे निवासं[11] च गृहेशे नीचसंयुते ॥ २७३० ॥

चत्वारिंशात् परं सौख्यं गृहे क्षेत्रधना[12]गमम् ।
आरूढे राहुदोषेण प्रत्यग्दाये मनोव्यथा ॥ २७३१ ॥

---

1. सिद्धिश्च
2. वत्सरे
3. लग्नस्य जातके
4. प्रकुर्वीत
5. नाशं स्यात्
6. श्रियः
7. भूषाप्तिः
8. स्याद्योगप्राबल्यं
9. भाग्यकृत्
10. लभ्यन्ते
11. निवासश्च
12. धनाय ते

अल्पयोगमिति ख्यातं चम्पकां[1]शोद्भवस्य च ।
गार्हस्थ्यजीवनं [2]चैति प्रत्यब्दाये शुभाशुभम् ॥ २७३२ ॥

लग्नाद्भाग्यं गते राहौ तदीशे नीचराशिगे ।
क्लेशं क्षेमदशान्त्यादौ[3] दुर्निमित्तवशाद्विपत् ॥ २७३३ ॥

स्वगेहे विषसर्पादिदर्शनेन मनोव्यथा ।
क्षेमदाये सुभाग्यं स्याद्ग्रहशङ्काप्रपी[4]डिता ॥ २७३४ ॥

दारशङ्कानिवृत्तिः स्याद्विप्रमूलात् सुसौख्य[5]वान् ।
लग्नाद्भाग्यं गते राहौ नीचे स्वोच्चांशगे भृगौ ॥ २७३५ ॥

सूतिकागृहदोषेण भार्यामरणमादिशेत् ।
प्रत्यब्दाये पूर्वखण्डे वेदचत्वारिवत्सरे ॥ २७३६ ॥

दारारिष्टमिति प्रोक्तं क्षिप्रेणोद्वाहमादिशेत् ।
प्रत्यक्तार दशाकाले स्वभुक्तौ दारनाशनम् ॥ २७३७ ॥

द्वितीयोद्वाहमाप्नोति चम्पकांश[6]समुद्भवः ।
दारारिष्टात् परं किंचिद्भाग्यक्षीणं विनिर्दिशेत् ॥ २६३८ ॥

स्वमित्रपशुनाशः[7] स्यात् पाण्ड्यदेशे धनक्षयः[8] ।
पश्चात् स्वग्रामकार्याणि यत्नकार्यार्थसाधनम् ॥ २७३९ ॥

क्लेशाव[9]स्थायां पुत्रेशे दीनावस्थाग्रहैर्युते ।
तद्दशायां [10]महाक्लेशो ह्युपर्युपरि जायते ॥ २७४० ॥

पापदाये चम्पकांशे [11]त्वशुभं प्राप्नुयाद् ध्रुवम् ।
शुभदाये शुभाधिक्यं राजामात्यप्रसादतः[12] ॥ २७४१ ॥

---

1. अंशस्य जातके
2. चेति
3. शान्त्यादि
4. पीडयेत्
5. सौख्यकृत्
6. अंशस्य जातके
7. नाशं
8. क्षयम्
9. क्लेशावस्थे सुताधीशे दीनावस्थ
10. महत् क्लेशम्
11. अशुभं
12. प्रसादकृत्

पापदाये पापभुक्तौ [1]स्वशुभं प्राप्नुयाद्ध्रुवम् ।
राजामात्यविरोधादि विप्रद्वेषं विनिर्दिशेत् ॥ २७४२ ॥

चम्पकांशे धनुर्लग्ने [2]ह्युत्तरांशसमुद्भवः ।
मित्रद्विजविरोधेन राजद्वारे विरोधवान् ॥ २७४३ ॥

पापदाये पापभुक्ताविदं फलमुदाहृतम् ।
चम्पकांशे राहुदाये राजयोगो[3] भवेद्ध्रुवम् ,
प्रत्यग्दाये विचारः[4] स्यादादायादधिकव्ययम् ॥ २७४४ ॥

प्रत्यग्दशा[5]न्त्ये च ह्यतीव सौख्यं
सुक्षे[6]त्रधान्याधिकभाग्यवृद्धिः ।
श्रीचम्पकांशे फणिराजकाले
स्वमित्रपुत्रात्मसुयोगभाक् स्यात् ॥ २७४५ ॥

प्रत्यब्दाये तृतीयांशे शत्रुप्राबल्यशोकवान् ।
स्वजनात्स्वजनक्लेशं योगभङ्गं विनिर्दिशेत् ॥ २७४६ ॥

प्रत्यग्दाये चम्पकांशे स्वपुत्रस्य सुतोत्सवम् ।
द्वित्रिसङ्ख्या विनाशः[7] स्यात् पुत्रक्लेशं विनिर्दिशेत् ॥ २७४७ ॥

पश्चाददृष्टयत्नेन [8]स्वसूनोश्च चिरायुषम् ।
स्वपुत्रिकासुसन्ता[9]ना प्रत्यग्दाये दरिद्रिणी ॥ २७४८ ॥

दशान्ते पुत्रसन्ता[10]ना ह्यल्पसौख्यवती भवेत् ।
सुताधिपदशाकाले चम्पकांश[11]समुद्भवः ॥ २७४९ ॥

---

1. अशुभं
2. उत्तरांशस्य जातके
3. योगं
4. विचारं
5. शान्त्यादि
6. क्षेमदायाधिक
7. विनाशं
8. स्वपुत्रसुतमायुषम्
9. सन्तानं
10. सन्तनमल्प
11. अंशस्य जातके

दारान्तरे सुसन्तानं दशान्ते पुत्रलाभवान् ।
भाग्ययोगाभिवृद्धि[1] च शत्रुनाशं विनिर्दिशेत् ।
पुण्यतीर्थफलप्राप्तिरष्टचत्वारिवत्सरे ॥ २७५० ॥

प्रत्यग्दाये चम्पकांशे वातरोगप्रपीडितः ।
तद्दोषपरिहारार्थं प्रायश्चित्तं विधीयते ॥ २७५१ ॥

गुरुः—

समीरपैत्त्यामय[2]हेतुकर्म-
प्रशान्तये द्रोणतिलप्रदानम् ।
श्रीरामसेतौ तिलदीपदानं
श्रीचम्पकांशे शुभहेमपात्रे ॥ २७५२ ॥

भृगुः—

हेमपात्रे [3]तिलज्योतिर्दशनिष्कप्रमाणतः ।
तदर्धेन[4] कृतं चैव प्रतिमासमदक्षिणाम् ॥ २७५३ ॥

अशेषरोगशान्त्यर्थं तिलदानमवश्यकम् ।
रामसेतौ स्वजन्मर्क्षे प्रदोषे शनिवा[5]सरे ॥ २७५४ ॥

सर्वपापविनिर्मुक्तो रोगनाशं[6] लभेद्ध्रुवम् ।
दशनिष्कस[7]मद्रव्या तिलज्योतिषि दक्षिणा ।
तदर्धं तिलदा[8]नस्य दक्षिणाभागमादिशेत् ॥ २७५५ ॥

ग्रन्थान्तरे:—

स्वर्णपात्रं प्रकुर्वीत निष्कद्वयप्रमाणतः ।
तिलज्योतिःप्रदा[9]नेन रोगी रोगात् प्रमुच्यते ॥ २७५६ ॥

---

1. वृद्धिः स्यात्
2. देहकर्म
3. तिला
4. वा समं चेति
5. शनिवारके
6. नाश विनिर्दिशेत्
7. समद्रव्यं तिलज्योतिश्च
8. दानं स्यात्
9. दानं स्यात् दक्षिणाम्

मनुः—

रहस्यकृतपापानि ज्ञानाज्ञा[1]नकृतानि च ।
तिलदानेन[2] नश्यन्ति प्रत्यक्षं देवकेरलम् ॥ २७५७ ॥

स्वगृह्योक्तविधानेन शान्तिं कृत्वा यथाविधि ।
चम्पकांशे रामसेतौ शनिपार्थनमादिशेत् ॥ २७५८ ॥

पाराशर्ये—

[3]देहेशे रिपुरन्ध्रगेऽपि च तथा पापैर्युते वीक्षिते
जातस्तत्र स्वपूर्वकर्मजनितैरोगैर्मुहुर्पीड्यते ।
रोगाणां प्रशमायचोदितमिदं सेतौ शनिपार्थनं ।
कार्यं काञ्चननिर्मितस्य विधिवद्दानं तिलज्योतिषः ॥ २७५९ ॥

शुभग्रहयुते भौमे नीचग्रहसमन्विते ।
दशान्ते सौख्यमित्याहुः राहुदाये [4]शुभान्विते ॥ २७६० ॥

व्ययाधिपतिदोषेण दशान्ते पुत्रपीड[5]नम् ।
क्रूरमासे मनस्तापं चोलदेशेऽप्यरिष्ट[6]दम् ॥ २७६१ ॥

स्वराजन्यजना[7]नां तु रोगशोकादिसंभवम् ।
कुम्भे राहुस्थिते काले मिथुनान्ते शनौस्थिते ॥ २७६२ ॥

लोके धान्यक्षयादीनि चोलदेशेऽप्यरिष्टकृत् ।
कुलीरेऽर्कयुते काले चोलभूपतिनाशनम् ॥ २७६३ ॥

---

1. ज्ञानस्य हेतुना 2. विनश्यन्ति
3. व्याधिगुण्यसमुत्थेति शुभावलोकात्
पापेक्षितेन च शुभाशुभैश्च कृच्छ्रात्तुदुस्त-
ग्रहोत्तमनुनागृहपूर्वयाश्च
दानोचितोक्तबलिभिश्च मयश्च रोगात् ।
4. स्थिय:न्विते 5. पीडकृत्
6. अरिष्टकृत् 7. जनापदैः

कलहेन [1]विचारः स्यात् स्वप्रभोश्च विशेषतः ।
अपमृत्युभयप्राप्तिः शान्त्या शान्ति प्रयास्यति ॥ २७६४ ॥

जीवे पञ्चमपर्याये लग्नादित्रय[2]संस्थिते ।
[3]उच्चांशे भाग्यवृद्धिः स्याच्चम्पकां[4]शोद्भवस्य च ॥ २७६५ ॥

चापे गुरुस्थिते काले गेहे कल्याणसंभ्रमः[5] ।
राजप्रीतिमवाप्नोति चम्पकांश[6]समुद्भवः ॥ २७६६ ॥

[7]सिंहे च राहौ च दशाविपाके
भाग्योत्तमं भूपतिमैत्र[8]जन्यम् ।
स्वपुत्रभाग्यं मुनयो वदन्ति
श्रीचम्पकांशे शनिरुच्चभागे ॥ २७६७ ॥

साधनेशदशाकाले स्वभुक्तौ व्याकुलं महत् ।
कलहेन विनिर्गत्य ग्रामान्तरनिवासवान् ॥ २७६८ ॥

सिंहे शनिस्थिते काले पाण्ड्यदेशप्रभोर्मृतिः ।
कुलीरे [9]विषमृत्युं च राज्यक्षोभं विनिर्दिशेत् ॥ २७६९ ॥

संसप्तकस्य दोषेण देशे राजा[10] कलापवान् ।
औत्तर्ये कल[11]हेनैव देशारिष्टं भवेद्ध्रुवम् ॥ २७७० ॥

भाग्यराहुदशाकाले पुत्रभाग्यं [12]महत् सुखम् ।
चम्पकांशे श्रियोऽवा[13]प्त्या प्रतिबन्धविमोचनम् ॥ २७७१ ॥

---

1. विचारे
2. आदिशेत्
3. पञ्चांशे
4. अंशस्य जातके
5. संभ्रमम्
6. अंशस्य जातके
7. सिंहस्थिते राहु
8. मैत्रमाहुः
9. वृषमृत्युश्च
10. राज्ञो
11. कलहं चेति
12. महासुखम्
13. अवाप्तिः

निस्यान्नदानपुण्येन लभते नात्र संशयः ।
सिंहारूढे धनुर्लग्ने [1]सिंहे राहौ धनाढ्यवान् ॥ २७७२ ॥

तद्दशायां [2]महायोगं सचिवो दण्डनायकः ।
राजद्वारे प्रसिद्धश्च सर्वाध्यक्षः स्वतन्त्रवान् ।
पञ्चाशद्वत्सरं योगं पाण्डयदेशेनसंशयः ॥ २७७३ ॥

स्वर्भानुदाये गुरुभुक्तिकाले
श्रीचम्पकांशे शुभशोभनानि ।
पुत्रोत्सवं [3]वा मुनयो वदन्ति
स्वभुक्तिमध्यान्तफलं त्विदं च[4] ॥ २७७४ ॥

मन्दभुक्तौ विशेषः[5] स्याद्द्विपञ्चाशात् परं शुभम् ।
पुत्रप्राबल्यमाप्नोति चम्पकांश[6]समुद्भवः ॥ २७७५ ॥

अन्तर्दशातिमार्गेषु [7]फलविस्तारनिर्णयः ।
भावाध्याये [8]वदिष्यामि साधनेशदशाफलम् ॥ २७७६ ॥

लग्नाधिपदशाकाले क्षेमदायन्त्यवत् फलम् ।
पुत्रपौत्राभिवृद्धिश्च चम्पकांशे सुभाग्यवान् ॥ २७७७ ॥

लग्नाधिपदशाकाले लग्नाधिपतिभुक्तिषु ।
अपमृत्युभयप्रासिरेकसप्ततिवत्सरे ॥ २७७८ ॥

राहुदाये द्वित्रिवारमपमृत्युभयं तथा ।
सहोदरीमनस्ता[9]पो दशासन्धौ भविष्यति । २७७९ ॥

दशारिष्ट[10]फलानि स्यू राहुप्रार्थनमादिशेत् ।
कालच[11]क्रदशारीत्या मध्ये मध्ये भवत् सुखम् ॥ २७८० ॥

---

1. सिंहराहु
2. राहुयोगं
3. स्यान्
4. स्यात्
5. विशेषं
6. अंशस्य जातके
7. फलं
8. कनिष्ठेति
9. मनस्तापं दशासन्धि
10. समानं स्यात्
11. चक्रायुषारीत्या मध्ये पुण्ये च मध्यमे

अपमृत्युभयं किंचिच्छान्त्या शान्तिं प्रयास्यति ।
क्ष्माधिपदशाकाले [1]त्वेकाशीतिसमे तथा ॥ २७८१ ॥

स्वपितारिष्टमाप्नोति चापत्संन्यासवान् [2]मृतिम् ।
संन्यासाद्ब्रह्मणः स्थानं चम्पकांशे न संशयः ॥ २७८२ ॥

चम्पकांशे धनुर्लग्ने प्रत्यग्दाये मनोऽन्यथा ।
योगभङ्ग [3]इति प्राहुः पशुधान्यार्थनाशनम् ॥ २७८३ ॥

उत्तरांशे प्रजातस्य प्रत्यग्दाये पराधिगे ।
क्लेशकाल इति प्राहू राहुः चारवशादन्यथा ॥ २७८४ ॥

रन्ध्रे शनिस्थिते काले द्वितीये राहुसंस्थिते ।
गोचरेऽल्पसुखं [4]चैति ग्रामारण्यकलापनम् ॥ २७८५ ॥

पाण्ड्यदेशे [5]त्वरिष्टं स्यात् सेनाधिपति[6]विग्रहः ।
ब्राह्म[7]णः प्रबलं चैति बहुद्रव्यव्ययं सुखम् ॥ २७८६ ॥

[8]यदा हि मन्देन युतश्च केतु-
स्तदा भवेद्भूपतिघोरयुद्धम् ।
तथा भवेत्तस्करसैनिकैर्वा
दाहादिकृत्यं जननाशनं च ॥ २७८७ ॥

कुलीरेऽर्कसुते काले पाण्ड्यदेशस्य राड्विपत् ।
तद्द्वारि प्रमुखक्लेशं प्रजापीडार्थनाशनम् ॥ २७८८ ॥

---

1. एकाशीति च वत्सरे
2. मृति
3. भङ्गम्
4. चेति ग्रामारण्यकलापकृत्
5. अरिष्ठं
6. विड्वरम्
7. ब्राह्मणप्रबलं चेति
8. केतुः शनैश्चरसंगमनं च काले
चोरभटानलदाहकृत्यम् ।
क्षितिपतिमरदेशक्षोभं
क्वचिद्भवेज्जननाशनम् ॥

ग्रन्थान्तरे—

गते कुलीरेऽर्कसुते धरित्री
संपूर्णसस्या[1]दिफलान्वितापि ।
[2]यदा हि पञ्च च खेचरास्तदा
मन्देन युक्तास्त्वतिकष्टदाः स्युः ॥ २७८९ ॥

पञ्चाशद्वत्सरे काले राहुचकेऽसुतार्चिते ।
संसप्तकस्य दोषेण प्रजाक्षोभं विनिर्दिशेत् ।
पञ्चग्रहसमायोगे दुर्भिक्षं नृपनाशनम् ॥ २७९० ॥

राजपीडां[3] च तत्काले लोक उत्पातमादिशेत ।
शनिक्षेत्रेऽथ वा व्याधिश्चन्द्रक्षेत्रे जलागमः[4] ॥ २७९१ ॥

संसप्तकस्य दोषेण राज्ञामन्योन्य[5]विग्रहः ।
तदभावेऽर्धनाशः[6] स्यान्मध्यदेशजनावधि ॥ २७९२ ॥

चोलदेशे विशेषः[7] स्यान्मण्डलाधिपतेर्विपत् ।
दशासन्धौ फलं चैति चम्पकां[8]शोद्भवस्य च ॥ २७९३ ॥

देशकालविपर्यासं साधने[9]शस्त्रभुक्तिषु ।
पुत्रादिदेहपीडा स्यात् कूरमासे न संशयः ॥ २७९४ ॥

गुरुचारवशात् सौख्यं धनु[10]र्लग्नोद्भवस्य च ।
दशासंधौ[11] फलं चैति स्वगृहे शुभशोभनम् ॥ २७९५ ॥

राजद्वारे शुभं विन्द्याद्यत्नकार्यार्थसिद्धिमान् ।
अष्टमाधिपतौ चन्द्रे मेषांशे लग्नकेन्द्रगे ॥ २७९६ ॥

---

1. सस्यान्वितफलान्वितः स्यात्
2. पश्चोत्तमायाश्चजनान्त्यकाच्च सर्वावियोजां च विनाशनीयः
3. पीडाथ वा चेति
4. जलागमम्
5. युद्धकृत्
6. नाशं स्यान्मध्यदेशे
7. विशेषं
8. अंशस्य जातके
9. सधने च
10. धनुर्लग्नस्य जातके
11. संधिफलं चेति

अमलायोगजातस्तु[1] चन्द्रदाये सुभाग्यवान् ।
चन्द्रांशाधि[2]पतेर्दाये योगः स्याद्वत्सरद्वयम् ॥ २७९७ ॥

मध्यान्ते क्लेशमित्याहू राहुदाये सुभाग्यवान् ।
राहुभुक्तौ मनस्तापं मित्रप्रभुजनामयम् ॥ २७९८ ॥

राजान्तरप्रसादेन योगप्राबल्यमादिशेत् ।
[3]सिंहराहुदशाकाले स्वभुक्तौ व्याकुलं महत् ॥ २७९९ ॥

स्वर्भानुराशिगे सूर्ये दुष्टमासे[4] ज्वराद्भयम् ।
अथ वा [5]ह्युदरव्याधिः स्वपुत्रादिजनामयम् ॥ २८०० ॥

पुत्रोत्सवफलं विन्द्याच्छुभमासे महत् सुखम् ।
विचित्राम्बरभूषाप्तिं[6] धनलाभं सुशोभनम् ॥ २८०१ ॥

राहुभुक्तौ फलं चैति चम्पकां[7]शोद्भवस्य च ।

राहुदशाप्रवेशः[8]- जन्मादिमासः ४९ दिनम् १० ।

घ-५२.

दशेशाक्रान्तराशीशो नीचो[9] दीनफलप्रदः ।
आ षष्ठेशाधमं विन्द्यादुच्चाधिपशुभाशुभम् ॥ २८०२ ॥

[10]चन्द्रे धनुषि मेषांशे चम्पकांशोद्भवस्य च ।
प्रत्यब्दाये दारहानिर्योगभङ्गो[11] ह्यतः परम् ॥ २८०३ ॥

दशारम्भे[12] च दारेशे पापयुक्तेऽल्पसौख्यवान् ।
[13]तद्भुक्तौ च फलं चैव भूगृहक्षेत्रनाशनम् ॥ २८०४ ॥

---

1. जातस्य
2. अधिपतौ दाये योगं
3. सिंहे
4. मासाज्ज्वरात्
5. उदरव्याधिः
6. भूषाप्तिर्धनलाभं
7. अंशस्य जातके
8. प्रवेशम् जन्मादिमासम्
9. नीचे
10. मेषांशे चन्द्रे धनुषि चम्पकांशस्य जातके
11. भङ्गमतः
12. दशारम्भस्य दारेशे पापे सुखं स्वल्पं
13. भूगृहक्षेत्रनाशनम्

राजद्वारे कलापं [1]च मित्रद्वेषं विनिर्दिशेत् ।
दारशब्दो[2] वर्णपरश्चतुर्थस्थानमित्यपि[3] ॥ २८०५ ॥

वृषभांशे वृषे भौमे दशायां मध्यभागगे ।
वैष्णवब्राह्मणद्वेषं राजद्वारे मनोव्य[4]थाम् ॥ २८०६ ॥

पशुधान्यविना[5]शेन निरुद्योगविचारवान् ।
उत्तरार्धे फलं सत्यं क्लेशः स्याद्वत्सरत्रयम् ॥ २८०७ ॥

शन्यङ्गारकसंदृष्टे दशारम्भ[6]गृहे व्यथा ।
[7]देहे वातोपद्रवं वा ह्यग्निमान्द्यप्रपीडनम् ॥ २८०८ ॥

निरापवादकार्य[8] च तद्दशायां फलं स्मृतम् ।
दशारम्भफलग्रन्थे [9]विस्तृतं चम्पकांशके ॥ २८०९ ॥

[10]षष्ठेशस्य फलाध्याये फलविस्तार उच्यते ।
प्रत्यग्दाये फलं नास्ति क्षेमदाये महत् सुखम् ॥ २८१० ॥

साधने योगमित्याहुः प्राबल्यं मनुरब्रवीत् ।
दशेशाक्रान्तनक्ष[11]त्राज्जन्मर्क्षान्तं च गुण्यते ॥ २८११ ॥

सप्तभिर्गुणितं चैव [12]त्वष्टभिर्भागमाहरेत् ।
रो[13]गं लाभं क्रमेणैव ग्रहाणामष्टधा गतिः ॥ २८१२ ॥

तद्भे[14]देन च तत्कार्यं गतिभेदं फलं स्मृतम् ।
दशेशऋक्षमारभ्य भुक्ते[15]शर्क्षे च गुण्यते ॥ २८१३ ॥

---

1. स्वान्मित्र
2. शब्दं वर्णपरं च
3. इत्यर्थः
4. मनोव्यथा
5. विनाशेन
6. दशारंभे
7. देहवातोत्तरं किंचिदग्निमान्द्यप्रपीडितम् ।
8. कार्याणि
9. विस्तारे
10. षष्ठदाये फलं चेति मार्गे विस्तारमादिशेत् ।
11. नक्षत्रं जन्मर्क्षादि
12. अष्टभिः
13. रोगलाभं क्रमश्चैव
14. तद्भेदार्या च
15. शार्क्षान्त

सप्तभिर्गुणितं कृत्वा [1]ह्यष्टभिर्भागमाहरेत् ।
रोगं लाभं तथाध्वानं बन्धनं धनमेव च ॥ २८१४ ॥

ऐश्वर्यमर्थनाशं च ह्यपमृ[2]त्युं तथा वदेत् ।
सर्वनाडीफलं सत्यं योजयेत् कालवित्तमः ॥ २८१५ ॥

दुश्चिक्यं च गते केतौ बुद्धिमान् सहजो भवेत् ।
तदीशो बलवान् यस्य सङ्गीतप्रियवल्लभः ॥ २८१६ ॥

तपःस्थानगते राहौ तदीशे लग्नराशिगे ।
सुराचार्येण संदृष्टे हरिशङ्करभक्तिमान् ॥ २८१७ ॥

चन्द्रलग्नाधिपे षष्ठे भूसुतेन निरीक्षिते ।
अथ वा गुरुसंदृष्टे सानुजो जनभाग्यवान् ॥ २८१८ ॥

सौम्यांशकगते भौमे [3]लग्नेशेन समन्विते ।
अथ वा गुरु[4]संदृष्टे कोपी क्षिप्रप्रसादकः ॥ २८९१ ॥

ग्रन्थान्तरे—

दीनेत्वा[5]लोचनश्रीमान् बाल्यस्नेहजनप्रियः ।
उष्णवायुप्रपीडान्वेत् पापपुण्यं समं भवेत् ॥ २८२० ॥

अष्टमाधिपतौ केन्द्रे पूर्णायुर्योगभाग्यवान् ।
पुत्रशोकमवाप्नोति बाधादिकलहं तथा ॥ २८२१ ॥

सुतेशाक्रान्तराशीशे[6] कर्मस्थाने शुभेक्षिते ।
तद्दोषो विलयं यातिगिरिर्वज्रहतो यथा ॥ २८२२ ॥

---

1. अष्टभि
2. अपमृत्युश्चजायते
3. व्ययेशेन
4. गुरुदृष्टिः स्यात्
5. दीनाया
6. राशीशः कर्मस्थाने शुभेक्षणे

[1]स्वर्क्षे वाहनस्थानेशे स्वांशे वा बलसंयुते ।
नरवाहनवान् भोगी त्यागी सर्वजनप्रियः ॥ २८२३ ॥
वाहनत्रय[2]संयुक्तो जीवान्तं सौख्यवान् भवेत् ।
पापदृष्टिवशान्मध्ये मध्ये [3]भङ्गस्तु योगस्य ॥ २८२४ ॥
[4]व्ययभावगतैः पापैः कर्तरीयोगसंभवः ।
क्रूरकार्यरतो दक्षो बन्धुवर्गे प्रपीडितः ॥ २८२५ ॥
मेषकोणगते चन्द्रे पाताले भृगुनन्दने ।
[5]श्रीगौरीयोगविख्यातो भवेद्राजसमो नरः ॥ २८२६ ॥

[6]श्रीगौरीयोगे च भवेत् प्रजातो
नरोऽतिभोगी रिपुमर्दनश्च ।
त्यागी महानीति[7]परः प्रतापी
[8]ह्युत्साहशूरो जनरक्षकश्च ॥ २८२७ ॥

नित्यं लालयति स्वदारतनयान् [9]कुम्भेऽथ वा वृश्चिके
श्यामः स्थूलकटिर्विशालनयनः सौन्दर्ययुक्तोऽलसः ।
भोगी स्यान्नरवाहनाढ्यः हिबुके शुक्रे शशाङ्के स्थिते
त्यागी मत्स्ययवाङ्कुशाङ्कितकरः श्रीगौरियोगोद्भवः ॥ २८२८ ॥

देवब्राह्मणसाधुपूज्यनिरतः [10]पृष्ठे च पार्श्वेऽङ्कितः
त्यागी योगमनाः प्रभुः ककुद्वान् सौन्दर्यदारात्मजः ।
सेनानाथसुखी दृढाङ्गरसिको बाहुप्रतापोन्नतः
सर्वज्ञो रसचित्तभोग[11]रसिकः श्रीगौरियोगोद्भवः ॥ २८२९ ॥

— :*: —

1. वाहनस्थानाधिपतिस्वांशे स्थितफलम् ।
2. त्रयवान् युक्तो
3. योगस्तु भङ्गकृत्
4. अशुभं व्ययगैस्संस्थैः
5. स्त्रीसेवी
6. श्रीमांश्च
7. परैःप्र तापैः
8. उत्साह
9. कुम्भांशके वृश्चिके
10. पृष्ठाश्च पार्श्वाङ्कितः
11. भोगि

## ॥ राशिदशारम्भफलम् ॥

शुद्धपापद[1]शामेषे शुभग्रहसमन्विते ।
[2]मेषूरणगते जीवे कीर्तिमान् धनवान् भवेत् ॥ २८३० ॥

पापद्वये वेश्मगते महदैश्वर्यखण्डितः ।

## चरलग्नम् धनञ्जयांशः ॥

भाग्याद्भाग्यपकर्मपौ च मिलितौ स्वक्षेत्रनीचोच्चगौ[3]
[4]लग्नेशो बलसंयुते शुभखगैरालोकिते संयुते ।
भूपालप्रभवो[5] भवेदथ महाराजेन तुल्यस्थिति
र्यद्वास्याद्बहुरत्नधान्यकनकाद्यैश्वर्यलक्ष्मी[6]पतिः ॥ २८३१ ॥

लग्नात् कर्माधिनाथे शशितनयगृहे स्वोच्चमित्रांशगे वा
व्यापाराजीवनं स्याद्यदि जनितनरो राजकार्यप्रवेशी[7] ।
विप्रश्चेद्राजपूज्यः सकलगुणनिधिर्वैश्यमूलाद्धनाढ्यो
[8]लोके प्रख्यातकीर्तिर्यदि जनितनरो राजतुल्यप्रभावः ॥ २८३२ ॥

धनञ्जयांशे पूर्वार्धे कुलीरे चन्द्र[9]संस्थिते ।
शूद्रजन्मा सुखी नित्यं द्विती[10]योऽयं प्रकीर्तितः ॥ २८३३ ॥

अथ वा च तृतीय स्याज्ज्येष्ठभ्रातृयुतो भवेत्
पश्चाद्भ्रा[11]तृस्वसॄणां तु बहुत्वं च विनिर्दिशेत् ॥ २८३४ ॥

उत्तरांशे प्रजात[12]श्च नवमोऽयं प्रकीर्तितः ।
[13]दशमश्च भवेत् पुत्रो रक्तवर्णशरीरवान् ॥ २८३५ ॥

---

1. दशान्मेष........
2. रणगे जीवे कीर्तिसम्पत् करिष्यति
3. नीचोच्चगे
4. लग्नेशान्वयशादिनोदिककालभं गते वीक्षिते।
5. प्रभवं
6. लक्ष्मीपतेः
7. प्रवेशः
8. अयं पादो मातृकायां न दृश्यते
9. जायते
10. द्वितीये गर्भजातके
11. भ्रातुश्च भ्रात्री च
12. प्रजातस्य नवमे गर्भजातकम्
13. दशमे समवाप्नोति रक्त

धनञ्जयांशे जातस्तु[1] पूर्वार्धे कृशदेहवान् ।
उत्तरार्धे स्थूलकायः श्रीमान् वाग्मी दयापरः ॥ २८३६ ॥

धनञ्जयांशे कृशदीर्घदेहः
कामी सदा भ्रातृविरोधभाक् स्यात् ।
अल्पाशनो तामसकृत्यकृच्च
तमोगुणी[2] सात्त्विकवच्च दृष्टः ॥ २८३७ ॥

काश्यपः—

धनञ्जयांशे पूर्वार्धे लग्ने शनिनिरीक्षिते ।
तमोगुणस्वभावः स्यात् सर्वदा दुर्बलो भवेत् ॥ २८३८ ॥
उत्तरार्धे सात्त्विकः स्याद्राजसप्रकृतिर्भवेत् ।
आरोगी दृढभाग्यश्च[3] ब्रह्मांशे राजपूजितः ॥ २८३९ ॥
धनञ्जयांशे पूर्वार्धे वणिग्वृत्त्या [4]च जीवितः ।
उत्तरार्धे तथा विन्द्याद्व्यवसाये प्रसिद्धिमान् ॥ २८४० ॥
सत्यानृते वणिग्भावं पूर्वार्धे धनधान्यवान् ।
[5]शिशोश्च जननात् पश्चाज्जनकश्च सुभाग्यवान् ॥ २८४१ ॥

स्थानच्युतिं[6] जन्मदशाविपाके
दुर्भिक्षकालं जनशोकमाहुः ।
श्रीचोलदेशे नृप[7]तेश्च मृत्युं
राजान्तरं म्लेच्छकलापनं[8] च ॥ २८४२ ॥

कुबेरांशे चरे लग्ने [9]ह्युत्तरांशोद्भवस्य च ।
जन्मदाये पाण्ड्यदेशे मण्डलाधिपतेर्विपत् ॥ २८४३ ॥

---

1. जातस्य
2. गुणो सात्त्विकवांश्च तुष्टः
3. भाग्यश्चेद्
4. वृत्त्यादिजीविते
5. जातस्य जननात् पश्चाज्जनकस्य सुभाग्यकृत्
6. च्युतिर्जन्म
7. नृपतिश्च वेधा
8. लापमाहुः
9. उत्तरांशस्य जातके

जन्मलग्नाधिपे चन्द्रे तुलांशे शनिवीक्षिते ।
त्रिग्रहोच्चे प्रजातस्तु[1] धनवांश्च न संशयः ॥ २८४४ ॥

नीच[2]ग्रहाभावकाले राजयोगो न विद्यते ।
राजतुल्यसुभाग्यं स्याद्भ्रातृमूलाद्धनान्वितः ॥ २८४५ ॥

धनञ्जयांशे धनिकः प्रतापी
तातांबिकासौख्यसुभूषणाप्तः[3] ।
उर्वीचरः सत्यवचश्च लुब्धो
शुभग्र[4]हेथर्ऽतुरगूढवान् स्यात् ॥ २८४६ ॥

क्रोधात्मा चित्तविभ्रंशी[5] स्त्रीलोलो भ्रातृवञ्चकः ।
आत्मकौटिल्यवान्नित्यं लग्नेशे शनिवीक्षिते ॥ २८४७ ॥

[6]अत्याग्रहीदुर्मतिमांक्रोधी सात्त्विक[7]वञ्चकः ।
बहुज्ञातिजनैर्युक्तः कुबेरांशे प्रजायते ॥ २८४८ ॥

[8]शुभैश्चतुभिर्बलिभिर्धनभाग्यायकर्मभिः ।
संपूर्णवित्तः[9] सततं कुबेर इव जायते ॥ २८४९ ॥

कुबेरांशे पूर्वभागे लग्नेशे शनिवीक्षिते ।
[10]पूर्वपश्चिमवीथ्योश्च सोमस्य दिशि जायते ॥ २८५० ॥

नदीप्रान्ते पुरे ग्रामे प्रसूतिश्च[11] भविष्यति ।
वनस्थलनिवासं [12]च जननं वा भविष्यति ॥ २८५१ ॥

उत्तरांशे नदीप्रान्ते नगरे जन्मवासवान् ।
तत्पिता राजसेवी स्यात् पूर्वार्धे राजवल्लभः ॥ २८५२ ॥

---

1. प्रजातस्य
2. भावदशाश्चेति राजयोगस्य विघ्नकृत्
3. भूषणाप्तिः
4. ग्रहोऽर्थातुर
5. विभ्रंशः
6. आशालुः
7. सात्त्विकवत् प्रणः
8. भावे
9. वित्तं
10. प्राक् पश्चिमवीथी स्यादुत्तरे भागजातकम् ।
11. प्रसूतिर्गेहमाप्नुयात्
12. स्याज्जननं चाथ वा यदि

पितामहाधिपे भौमे स्वोच्चे द्विग्रहसंयुते ।
भाग्याधिपेन संदृष्टे पितामह[1]श्चिरायुषः ॥ २८५३ ॥

तद्देशाधिप[2]तिर्बाल्ये ह्यतिदारिद्र्यसंयुतः ।
पितामहश्च दीर्घायुर्बहुभ्रातृयुतो भवेत् ॥ २८५४ ॥

धनञ्जयांशे पूर्वार्धे भारकश्च पितामहः ।
क्लेशजीवनमाप्नोति पुत्रमूलश्रियान्वितः ॥ २८५५ ॥

काश्यपः—

पूर्वार्धे भारकश्चैव समुद्रप्रान्तवासवान् ।
वार्धके सौख्यमाप्नोति [3]ह्युत्तरांशे सुभाग्यवान् ॥ २८५६ ॥

धनञ्जयांशे कटके विलग्ने
पितामहस्तान्त्रिककर्मसक्तः ।
[4]शिवार्चनाद्वा कुचरित्रयुक्तो
मध्ये सुभाग्यं रतिमात्रवान् स्यात् ॥ २८५७ ॥

तान्त्रिक[5]कर्मदोषेण भार्यारिष्टं विनिर्दिशेत् ।
बहुकालमपत्नीको दारिद्र्यं प्राप्नुयाद्ध्रुवम् ॥ २८५८ ॥

तत्पिता धनिकश्चैव वेश्यास्त्रीपुत्रपुत्रिमान् ।
तस्य दोषवशाच्चैव दारिद्र्यं स्वपितामहः ॥ २८५९ ॥

पुण्यतीर्थवशाद्भाग्यं शिवानुग्रहधर्मवान् ।
शिवलिङ्गप्रति[6]ष्ठात्वं पितामहफलं वदेत् ॥ २८६० ॥

धनञ्जयांशे पूर्वार्धे पितामहः सुपुण्यवान् ।
स्वपुत्रसहितश्चैव गङ्गा[7]स्नानात् परं सुखम् ॥ २८६१ ॥

---

1. चिरायुषम्
2. पतौ बाल्ये अति
3. उत्तांशे
4. पिता
5. को वारदोषेण
6. प्रतिष्ठस्य
7. यात्रात्

दारिद्र्यमोचनं [1]चैति वंशो भाग्याभिवृद्धिदम् ।
पुत्रपौत्रस[2]मृद्धिश्च कौबेरांशोद्भवस्य च ॥ २८६२ ॥

पितामहस्य पुण्येन स्वपिता कीर्तिमान् सुधीः ।
बहुसोदर[3]युक्तोऽपि ह्येकभ्रातृयुतो भवेत् ॥ २८६३ ॥

मन्दांशगे सुताधीशे कुबेरां[4]शोद्भवस्य च ।
पितामहश्च[5] धर्मात्मा कुबेरांशोद्भवस्य च ॥ २८६४ ॥

उत्तरांशे प्रजातस्य पितामहश्च[6] धर्मकृत् ।
गङ्गायात्राफलं नास्ति शिवलिङ्गप्रति[7]ष्ठावान् ॥ २८६५ ॥

भावाध्यायेषु विस्तारं पितामहफलं [8]तथा ।
पूर्वभागे विशेषः[9] स्यान्नाडीयोगे क्वचित् क्वचित् ॥ २८६६ ॥

कुबेरांशे पूर्वभागे सम्पद्दा[10]येऽन्त्यभागके ।
[11]विपन्नक्षत्रदशादौ पितामहमृतिं वदेत् ॥ २८६७ ॥

जन्मादिद्वादशाब्दान्ते षोडशाब्दाद् द्विवत्सरे ।
पितामहस्य निर्याणं ज्येष्ठ[12]भ्रातृविवाहके ॥ २८६८ ॥

पाठान्तरे—

[13]कुबेरांशोत्तरे भागे जातस्योद्वाहतः परम् ।
जन्मादिद्वादशे वर्षे ज्येष्ठ[14]भ्राता विवाहितः ॥ २८६९ ॥

अथवा षोडशाब्दे वा तत्पूर्वे मनुवत्सरे ।
पितामहस्थानगते [15]च राहौ
तदीश्वरे स्वोच्चगते बलाढ्ये

---

1. चेति वंशो भाग्याभिवृद्धिकृत्
2. समर्थश्च कौबोरांशस्य जातके
3. जनैर्युक्त एक
4. अंशस्य जातके
5. महस्य धर्मात्मा कुबेरांशस्य जातके
6. पितामहस्य
7. प्रतिष्ठकृत्
8. समम्
9. विशेषं
10. दाये दशान्त्यगे
11. विपद्दाये
12. भ्रातृविवाहकृत्
13. .......जात
14. भ्रातृविवाहकृत्
15. चरराहु

शुभान्विते शोभनदृष्टियु[1]क्ते ।
नरो भवेदामरणान्तसौख्यः ॥ २८७० ॥

पितृस्थानाधिपे जीवे केसरीयोग[2]संयुते ।
कुवेरांशे प्रजातस्य जनकश्च[3] सुभाग्यवान् ॥ २८७१ ॥

[4]शिशोश्च जननात् पूर्वं दारिद्र्येण च कर्शितः ।
पश्चात् सौख्यमवाप्नोति गृहे लक्ष्मीकटाक्षवान् ॥ २८७२ ॥

स्वपिता श्यामवर्णश्च[5] स्थूलकर्णः सुबुद्धिमान् ।
राजद्वारे प्रसिद्धश्च देवब्राह्मणपोषकः ॥ २८७३ ॥

वैदिकाचारवान्नित्यं स्वसुतस्थापको भुवि ।
स्वपि[6]तुर्भ्रातृपुत्रस्तुह्येकश्चातिसुखी[6] भवेत् ॥ २८७४ ॥

स्वजातिधर्म[7]कार्येषु निर्णेता च भविष्यति ।
पितृस्थानाधिपे जीवे स्वोच्चे कुजनवांशगे ॥ २८७५ ॥

सूर्यात्मजेन संदृष्टे वातरोगप्रपीडितः ।
किंचित् कालमनाचारी[8] पश्चाद्वैदिकमार्गकः ॥२८७६ ॥

आदौ शैवप्रियश्चैव पश्चाद्वैदिकवान् सुधीः ।
बहुभ्रातृयुतो मानी स्वपितृ[9]भ्रातृपोषकः ॥ २८७७ ॥

बाल्ये दारिद्र्यसंयुक्तः स्वभुजार्जितभाग्यवान् ।
[10]देशे केरले सञ्चारं विवाहानन्तरं सुखम् ॥ २८७८ ॥

पुत्रोत्सवात् परं सौख्यं पुत्रमूलात् सुभाग्यवान् ।
धनञ्जयांशे पूर्वार्धे जनकस्य महत् सुखम् ॥ २८७९ ॥

---

1. पाते
2. जातके राशिगे
3. जनकस्य सुभाग्यकृत्
4. जातस्य
5. स्यात्
6. स्वपिता भ्रातृपुत्रश्च कश्चिदिति सुखं
7. कार्याणि निर्णयं च विनिर्दिशेत्
8. अनाचारं पश्चाद्वैदिकमार्गकृत्
9. स्वपिता
10. केरले देश

राजद्वारे सुकीर्तिश्च बहुगेहनिवासकृत् ।
मध्ये भाग्य[1]समृद्धश्च वनस्थलगतः सुखी ॥ २८८० ॥

वनान्तरप्रमुद्वारे कीर्तिमान् बन्धुपोषकः ।
सात्त्विको गुणवान् रागी पुरग्रामाग्रगीर्भवेत् ॥ २८८१ ॥

उत्तरांशे च जनकः सोदरभ्रातृवैरवान् ।
तस्य दोषवशात् क्लेशं रोगी पुत्रवियोगवान् ॥ २८८२ ॥

पूर्वभागे क्वचिच्चैव भ्रातृमूलाद् द्विभार्यकः[2] ।
विभागकाले [3]सन्तापो जनकस्य न संशयः ॥ २८८३ ॥

धनञ्जयांशे पूर्वार्धे [4]कुजे शुक्रनिरीक्षिते ।
मध्ये बन्धुविरोधेन राजोपद्रववान् पिता[5] ॥ २८८४ ॥

गार्ग्यः—

धनञ्जयांशे जनकस्य सौख्यं
पुत्रोत्सवानन्तरभाग्य[6]वृद्धिम् ।
सुभ्रातृ[7]वृद्धिं मुनयो वदन्ति
वनान्तरे ग्रामपुरे निवासम्[8] ॥ २८८५ ॥

नानादेशप्रसिद्धश्च [9]बहुव्यापारवान् पिता ।
सन्मार्गवृत्ति[10]निरतः कालान्तरसुभाग्यवान् ॥ २८८६ ॥

गुरुद्वयप्रियो मानी सदाशिवपुराणवित् ।
जनकस्य फलं विन्द्यात् [11]कुबेरांशोद्भवस्य च ॥ २८८७ ॥

क्रमात् पञ्चमगे राहौ [12]यस्यां नाड्यां प्रजायते ।
स्वपिता[13]गुरुनिन्दावान् गुरुदृष्टिविवर्जिते ॥ २८८८ ॥

---

1. समृद्धिः
2. भार्यवान्
3. सन्तापं
4. बले
5. पितुः
6. भाक्स्थात्
7. भ्रात्र
8. निवासः
9. पितुः
10. आचारः कालान्तरमुदाहृतम्
11. अंशस्य जातके
12. यस्य नाडी
13. स्वपिता गुरुनिन्दास्युर्गुरुदृष्टिविवर्जितः

पितृस्थानाद्गुरुस्थानं [1]पञ्चमं मनुरब्रवीत् ।
तत्र राहुश्च केतु[2]र्वा स्वपित्रोश्च गुरुद्वयम् ॥ २८८९ ॥

वेदान्तशास्त्रतत्त्वज्ञो धीरः शिवपुराणवित् ।
कौबेरांशे पितृव्यस्य [3]पुत्रोऽपि ज्ञानवान् भवेत् ॥ २८९० ॥

पितृव्याधिपतौ शुक्रे [4]यावद्विन्दुभिरन्विते ।
तावत् सङ्ख्यापितृ[5]व्याश्च दीर्घायुषा भवन्ति हि ॥ २८९१ ॥

काश्यपः—

[6]गतेऽन्यदेशं जनके जायते पितृसोदरः ।
मेषाद्यंश[7]भुक्तसङ्ख्याः पितृव्याश्च भवन्ति हि ॥ २८९२ ॥

धनञ्जयांशे पूर्वार्धे कुलीरे च प्रजायते ।
मुनिसङ्ख्याः पितृ[8]व्याश्च ऋतुसङ्ख्याथ वा [9]स्मृताः ॥ २८९३ ॥

[10]एका पितृष्वसा चैव ह्यपुत्रासा त्वमङ्गली ।
सदा क्लेशवती चैव बहुकालं सुजीवति ॥ २८९४ ॥

ग्रन्थान्तरे—

पितृष्वसा सदा [11]क्लिष्टा तद्भर्ता पापचेतनः ।
पुत्रशोकवती चैव पुत्रिकाशोक[12]संयुता ॥ २८९५ ॥

उत्तरांशे प्रजातस्य भगिनीद्वयवान् पिता ।
एका वैधव्यमाप्नोति [13]ह्येका पुत्रवती भवेत् ॥ २८९६ ॥

भावाध्यायेषु विस्तारं पितृव्यस्य फलं वदेत् ।
धनञ्जयांशे पूर्वार्धे पितृ[14]व्यैकश्चिरायुषः ॥ २८९७ ॥

---

1. ....मनुरब्रवीत्
2. केतुश्च स्वपिता च
3. तत्पुत्र
4. यासङ्ख्याविन्दुसंयुते
5. पितृव्यस्य दीर्घमायुश्च विन्दिति
6. पितृदेशान्तर....च
7. मेषाद्यंशस्य सङ्ख्यानि पितृव्यस्य विनिर्दिशेत्
8. पितृव्यस्य
9. भवेत्
10. पितृष्वसा एकमेव पुत्रभाव अमङ्गली ।
11. क्लेशी
12. एव च
13. एका
14. पितृव्येकचिरायुषम्

स्वपिता मध्य[1]मायुश्च पितृव्यैकस्तथा भवेत् ।
तीर्थयात्रामवाप्नोति [2]पितृयैकअपुत्रकः ॥ २८९८ ॥

पितृव्यौ [3]द्वौ भवेतां वा ह्येको वा भवति ध्रुवम् ।
अपत्नीकस्तथा विन्द्याद्वार्धके पितृसोदरः ॥ २८९९ ॥

पितृव्यभावान्मदने स्वर्भानौ[4] शशिजांशके ।
[5]पितृव्यभार्या चोन्मदं पूर्वपापस्य हेतुना ॥ २९०० ॥

सर्वज्येष्ठः पितृयश्च[6] कुबेरांशे दरिद्रवान् ।
[7]बहुपुत्रा भविष्यन्ति द्विभार्यश्चैकपुत्रकः ॥ २९०१ ॥

सर्वज्येष्ठपितृव्यस्य [8]ह्यनुजश्च सुपुत्रवान् ।
तद्भ्राता पापकर्मात्मा कोपीवाधिकशोकवान् ॥ २९०२ ॥

कामी सर्वज्ञवान् रागी मध्ये भाग्यसमृद्धिमान् ।
तान्त्रिकाचारदोषेण दारिद्र्यं वार्द्धके [9]व्यथाम् ॥ २९०३ ॥

पितृ[10]व्याणां च यः कश्चिद् द्विभार्यापुत्रपुत्रिमान् ।
वन्ध्या[11]युक्तो मृतिं चैति ह्यायुषान्तं सुसौख्यवान् ॥ २९०४ ॥

[12]सर्वजेष्ठपितृव्यस्तु भ्रातृद्वेषी सुवञ्चकः ।
तस्य पापवशात् क्लेशं वार्द्धके भाग्यनाशनम् ॥ २९०५ ॥

पुत्रमूलादनर्थं स्यात् स्थानच्युतिमनोव्यथे[13] ।
भावाध्याये पितृव्यस्यदशामार्गे विशेषतः ॥ २९०६ ॥

[14]विस्तारेण फलं प्रोक्तं नाडीयोगे क्वचित् क्वचित् ।
मातृस्थानाधिपे शुक्रे साधग्रहसमन्विते ॥ २९०७ ॥

---

1. आयुष्यं पितृव्येकः
2. पितृव्येकः
3. द्वावह स्यातामेको
4. स्वर्भानु
5. पितृभार्या च उन्मादं
6. पितृव्यस्य
7. पुत्रकश्च बहुत्वं स्याद
8. तस्यानुज
9. व्यथाम्
10. पितृव्यस्य
11. आयुषोमृतिश्चेति आयुषान्तं सुसौख्यकृत
12. सर्वाज....पितृव्यस्य
13. मनोव्यथा
14. विस्तारमाप्नोति नाडीयोगे क्वचिद्भवेत्

भाग्याधिपेन संदृष्टे [1]कुबेरांशोद्भवस्य च ।
माता गुणवती पूता भर्तृप्रीति[2]युता सदा ॥ २९०८ ॥
बहु[3]पुत्रीसमेता च भ्रातृभ्रात्रीसमन्विता ।
सुवस्त्रभूष[4]णै र्युक्ता किंचिद्रोगशरीरिणी ॥ २९०९ ॥
घनञ्जयांशे भृगुजे भूसुतेन समन्विते ।
सदा सौख्यवती माता भर्तृपूर्वं मरिष्यति ॥ २९१० ॥
मातुलाधिपतौ जीवे शन्यङ्गारकवीक्षिते ।
कारके भृगुसंयुक्ते दीर्घायुश्चैकमातुलः ॥ २९११ ॥
कुबेरांशे मातुलः स्याद्भाग्ये सौख्य[5]युतः सुखी ।
[6]दारिद्र्यक्लेशवांश्चान्त्ये स्वल्पसन्तानवान् भवेत् ॥ २९१२ ॥
मातृष्वसा पुत्रवती [7]भर्तृभाग्ययुता सदा ।
घनञ्जयांशे जननी [8]त्वेकभ्रातृसमन्विता ॥ २९१३ ॥
नेत्ररोगी [9]सदा क्लेशी गुणवान् भाग्यवान् भवेत् ।
स्फुटाक्षमातुलश्चैव कुबेरां[10]शोद्भवस्य च ॥ २९१४ ॥
मातृष्वसा भाग्यवती पुत्रीपुत्र[11]युता भवेत् ।
मातामहाधिपे सौम्ये शुक्राङ्गारकसंयुते ।
मातामहस्य गार्हस्थ्यं मातुलस्य दरिद्र[12]ताम् ॥ २९१५ ॥

मातामहः भ्रातृजनैर्विरोधं
[13]दारिद्र्ययुक्तोऽपि च मातुलश्च ।
[14]तत्कर्मदोषेण भवेद्दरिद्रतां
घनञ्जयांशे [15]मुनयो वदन्ति ॥ २९१६ ॥

---

1. कुबेरांशस्य जातके
2. सदाशुभम्
3. बहुपुत्रीवती चैव
4. भूषणायुक्त
5. प्रदः सुखी
6. क्लेशदारिद्र्यं
7 सुभाग्यं क्लेशमिवाहायुरार्या
8. अल्पानुजसमातुला
9. नेत्ररोगी........
10. अंशस्य जातके
11. सुखी
12. दरिद्रवान्
13. स्वमातुलः पुत्रदरिद्रमेति ।
14. मातामहा पापवशाद्दरिद्रं
15. मुनिवाक्यमाहुः

उत्तरांशे मातुलश्च धनिकः कीर्तिमान् भवेत् ।
मातृष्वसा च [1]दारिद्र्यं तत्पुत्रो वा न संशयः ॥ २९१७ ॥

मातामहादि[2]वंशस्य भावाध्याये सुविस्तरम् ।
सोदरस्य फलं [3]वक्ष्ये कुबेरांशोद्भवस्य च ॥ २९१८ ॥

भ्रातृस्थानाधिपे सौम्ये [4]तद्भावे केतुसंस्थिते ।
कारके स्वोच्चराशिस्थे दशसङ्ख्याः सहोदराः[5] ॥ २९१९ ॥

अथ वा रुद्र[6]सङ्ख्याश्च कुबेरांशोद्भवस्य च ।
पञ्चसङ्ख्या[7]श्चायुष्मन्तो वेदसङ्ख्यास्तथैव च ॥ २९२० ॥

धनञ्जयांशे जातस्य ज्येष्ठ[8]भ्राता द्विभार्यकः ।
ज्येष्ठभ्रातृ[9]सुतस्थाने पापाक्रान्ते प्रजायते ॥ २९२१ ॥

धनञ्जयांशे जात[10]श्चेदेको वन्ध्यापतिर्भवेत् ।
ज्येष्ठ[11]भ्राता पापयुक्तः पुरा ब्राह्मणशापवान् ॥ २९२२ ॥

सर्वज्येष्ठभ्रातृनाथे नीचांशे [12]कुजसंयुते ।
जन्मान्तरे विप्रपत्नी [13]सङ्गदोषी भवेन्नरः ॥ २९२३ ॥

तस्य [14]पापवशाद्भार्या पुत्राभावा प्रचक्षते ।
श्वशुरश्चेन्महापापी पिण्डादी नात्र संशयः ॥ २९२४ ॥

ज्येष्ठभ्रातृ[15]भावनाथे गुरुणा च निरीक्षिते ।
द्रव्यार्जनसमर्थश्च रोगी मातृप्रियो भवेत् ॥ २९२५ ॥

---

1. दरिद्रं स्यात्
2. तद्वंशे भावाध्याये सुविस्तरेत्
3. चेति कुबेरांशस्य जातके
4. तत्पदे
5. सहोदरः
6. सङ्ख्यानि कुबेरांशस्य जातके
7. चिरायुश्च वेदसङ्ख्या च एव च
8. भ्रातृद्विभार्यवान्
9. सुतारूढे
10. जातस्य
11. भ्रातृसमाप्नोति
12. कुळसंयुते
13. पापग्रस्तो
14. भार्यवशात् पापमपुत्रत्वं
15. भ्रातृपदादेशे गुरुर्वाथ

पितृप्रियश्च सन्तोषी वेश्यास्त्री सङ्गपापवान् ।
दत्तपुत्रयुतश्चैव महारोगेण कर्शितः ॥ २९२६ ॥

धनञ्जयांशे [1]जातस्य ज्येष्ठभ्राता च दत्तवान् ।
पुत्रस्वीकारमाप्नोति ज्येष्ठ[2]भ्राता तथैव च ॥ २९२७ ॥

कन्यांशकगते [3]राहौ भार्गवेण समन्विते ।
धनञ्जयांशे जातस्य ज्येष्ठभ्राता अपुत्रकः ॥ २९२८ ॥

एको मृतप्र[4]जायुक्तो धूर्तभार्यासमन्वितः ।
एकपुत्रयुतश्चैव सदा पुत्रविचारवान् ।
कालान्तरे दत्त[5]पुत्रो राजसप्रकृतिर्भवेत् ॥ २९२९ ॥

—(:०:)—

## कटकलग्ने कुबेरांशः

कुम्भांशे कटके लग्ने कुबेरां[6]शसमुद्भवः ।
[7]द्विसोदरयुतो वाग्मी पुत्रस्वीकारवान् भवेत् ॥ २९३० ॥

सर्वज्येष्ठसुतश्चैव [8]ह्यगम्यागमनोत्सुकः ।
कालान्तरे च तद्दोषं स्वपिता[9]महद्धेतुना ॥ २९३१ ॥

तस्य दोषोपशान्त्यर्थं सेतुस्नानं विनिर्दिशेत् ।
[10]कुटुम्बेन युतश्चैव शान्तिं कुर्याद्यथाविधि ॥ २९३२ ॥

तिलदानं प्रकुर्वीत सर्वज्येष्ठसुतस्य च ।
आयुरारोग्यसन्तानं लभते नात्र संशयः ॥ २९३३ ॥

---

1. पुत्रस्य ज्येष्ठभ्रतुश्च
2. भ्रातुश्च चादिशेत्
3. राहुः
4. प्रजस्यान्ते
5. पुत्रे
6. अंशस्य जातके
7. सोदरः सद्वयो
8. अगम्या
9. स्वपिता....हेतुना
10. कुटुम्बपूर्वमाप्नोति

एकश्च[1] भ्रातृसन्तानवृद्ध्यर्थं भानुवासरे ।
सेतुमूले [2]मृतश्चेति पुत्रीमांश्च न संशयः ॥ २९३४ ॥

मनुः—

कुबेरांशे कनिष्ठस्तु[3] कश्चित् सन्तानविघ्नवान् ।
तस्य दोषोपशान्त्यर्थं सेतौ भानुव्रतं चरेत् ॥ २९३५ ॥

माघमासे भानुवारे [4]सप्तमीतिथिसंयुते ।
[5]अर्कस्य प्रतिमां दद्यात् काञ्चनीं वस्त्रसंयुताम् ॥ २९३६ ॥

तिलदानं प्रकुर्वीत शतब्राह्मणभोजनम् ।
पश्चात् सन्तानमाप्नोति दीर्घमायुश्च विन्दति ॥ २९३७ ॥

तथा भावी दत्तपुत्रो दीर्घमायुश्च विन्दति ।
कुबेरांशे पूर्वभागे सोदरश्च द्विभार्यकः[6] ॥ २९३८ ॥

[7]एकभार्यो पुत्रयुक्तो द्विभार्यो दत्तपुत्रवान् ।
धनञ्जयांशे पूर्वार्धे[8] बालकौ द्वौ च नश्यतः ॥ २९३९ ॥

सहोदरीद्वयं विन्द्याद्बाल्यारिष्टं विनिर्दिशेत् ।
[9]भगिन्यौ द्वे चिरायुष्ये एका रोगवती भवेत् ॥ २९४० ॥

एका दारिद्यमाप्नोति [10]जायेते यमलौ सुतौ ।
[11]जायेतां द्वे च सोदर्यौ पुत्रपुत्रीसमन्विते ॥ २९४१ ॥

[12]किंचिद्भ्रातृफलं वक्ष्ये कुबेरांशोद्भवस्य च ।
रक्तवर्ण[13]शरीरी च बाल्ये दुष्टस्वभाववान् ॥ २९४२ ॥

---

1. एकस्य
2. मृतिं चेति
3. कनिष्ठस्य
4. सप्तम्यातिथयो यदि
5. सूर्योयुक्तव्रतं चेति प्रतिमावस्त्रदानकृत् ।
6. भार्यवान्
7. एको वा ज्येष्ठभार्यस्य द्वयं चेद्दत्तपुत्रवान् ।
8. बाल्ये द्वौ पुत्रनाशनम्
9. भगिनीद्वयमायुष्यम्
10. यमलः पुत्रिणी भवेत्
11. सोदरीद्वयमित्याहुः पुत्रपुत्रीसमन्विता ।
12. कश्चिद्भ्रातृफलं वक्ष्ये कुबेरांशस्य जातके ।
13. शरीरं स्याद्बाल्ये

पश्चात्त[1]पस्वी ज्ञानी च शिवपूजाग्रणीर्भवेत् ।
पुराणधर्म[2]श्रोता च बाल्ये मातृप्रियः सुखी ॥ २९४३ ॥

उत्कृष्टधर्मवान्नित्यं वैदिकाचार[3]संयुतः ।
मृतप्रजाबहुत्वं च [4]ह्यल्पपुत्रयुतो भवेत् ॥ २९४४ ॥

भ्रातृशोकेन सन्तप्तः [5]ह्यन्तःकापट्ययुक्तिमान् ।
कंचित्कालमस्वतन्त्रः पश्चात् स्वातन्त्र्यभाग्यवान् ॥ २९४५ ॥

[6]श्रीयुक्तश्च महाभोगी धूर्तस्त्रीनायको भवेत् ।
[7]तद्दारवंशे पापात्मा पाषण्डाचारतत्परः ॥ २९४६ ॥

काश्यपः—

कुम्भांशे कटके लग्ने [8]कुम्भराश्यंशजस्तथा ।
सहोदरभ्रातृभार्यावंशे पापबहुत्ववान् ॥ २९४७ ॥

तस्य पापवशाद्भ्राता पुत्रा[9]भावो मृतप्रजः ।
भ्रातृणां [10]चैव सर्वेषां भार्यावंशस्य लक्षणम् ॥ २९४८ ॥

दारस्थानाधिपे मन्दे स्वोच्चे वा मकरांशगे ।
[11]उद्वाहमेको लभते कुबेरांशोद्भवस्य च ॥ २९४९ ॥

सम्पद्दाये [12]विवाहः स्याद्बहुस्त्री सङ्गवान् भवेत् ।
गूढकामातुरः श्रीमान् दारेशे स्वोच्चराशिगे ॥ २९५० ॥

[13]पञ्चत्रिंशाब्दपर्यन्तं गूढकामातुरः सुखी ।
ग्रन्थान्तरे कुबेरांशे पञ्चचत्वारिंवत्सरे ॥ २९५१ ॥

---

1. तपो बहुज्ञानी
2. धर्मश्रवणं
3. वर्तिनः
4. अल्प
5. अन्तः
6. श्रीमानश्च
7. तद्भार्य
8. कुम्भे राश्यंशजातके
9. भावमृतप्रजा
10. चेति सर्वस्य
11. एकोद्वाहमवाप्नोति कुबेरांशस्य जातके
12. विवाहे
13. आ पञ्चत्रिंश

जन्मादिविंशतेः पश्चात् परस्त्रीसङ्गदोषवान् ।
कामस्थानं गते शुक्रे भृगुतेन समन्विते ॥ २९५२ ॥

बहुकामातुरश्चैव [1]ह्यसौ पापयुतो भवेत् ।
तत्र [2]सौम्ये कुबेरांशे वार्धके नष्टवीर्यवान् ॥ २९५३ ॥

तन्मूलाद्व्याकुलं चैव मध्ये मध्ये क्वचित् क्वचित् ।
लग्नात् पञ्चमगे शुक्रे [3]ह्युष्णरोगयुतो भवेत् ॥ २९५४ ॥

वीर्यनाशमवाप्नोति कामवृद्धिं[4] क्वचित् क्वचित् ।
स्वभार्या श्यामवर्णा स्यादल्पभ्रातृसमन्विता[5] ॥ २९५५ ॥

[6]बहुसोदरियुक्ता च बहुकालं सुमङ्गली ।
कुम्भांशे कटके लग्ने[7] कुबेरांशोद्भवस्य च ॥ २९५६ ॥

श्वशुरः स्यालकश्चैव[8] पापदारिद्र्यसंयुतौ ।
स्यालकस्यविशेषः[9] स्यादगम्यागमनोत्सुकः ॥ २९५७ ॥

अल्पसन्तानमाप्नोति स्यालकस्य फलं [10]स्मृतम् ।
पुत्रस्थानाधिपे भौमे कुम्भांशे गुरुवीक्षिते ॥ २९५८ ॥

धनञ्जयांशे [11]जातस्तु बहुपुत्रयुतो भवेत् ।
[12]पुत्रमध्ये त्वेककस्तु दरिद्रश्चाल्पपुत्रवान् ॥ २९५९ ॥

विवाहानन्तरं [13]कश्चित्क्लिष्टग्रन्थिव्रणान्मृतः ।
[14]पुत्रस्थानाधिपे भौमे शनिसंयुक्तवीक्षिते ॥ २९६० ॥

---

1. असौ
2. सौम्य कुबेरांशे वार्धके वीर्यनष्टवान्
3. अर्करोगप्रदो
4. वृद्धिः
5. समन्वितः
6. बहुत्वं च
7. अंशस्य जातके
8. चेति पापदारिद्र्यवान् सदा
9. विशेषं
10. वदेत्
11. जातस्य बहुपुत्रप्रदो भवेत्
12. दारिद्र्यवंशमाप्नोति एका अल्पप्रजा स्मृता ।
13. कश्चि पुत्रग्रन्थिव्रणे मृतिः
14. पुत्रारूढप्रदाधीशे शन्यङ्गारकवीक्षिते

स्वपुत्रौ द्वौ [1]द्विभार्यौ च ह्येको शङ्कापपीडितः ।
[2]द्विभार्यो ह्येकभार्यो वा कुबेरांश समुद्भवः ॥ २९६१ ॥

पूर्वभागे प्रजातस्तु[3] ग्रहपीडाप्रपीडितः ।
उत्तरांशे सुतारिष्टबाहुल्यं भवति ध्रुवम् ॥ २९६२ ॥

पूर्वभागे क्वचिच्चेति स्वपितुः[4] पापहेतुना ।
पुत्र[5]नाशनिवृत्त्यर्थं सेतुस्नानं [6]समाचरेत् ॥ २९६३ ॥

[7]तिलदानं रोगहरं तीर्थाचरणमादिशेत् ।
क्षीराभिषेकं गोदानं तिल[8]धेनुं तथैव च ॥ २९६४ ॥

[9]कुर्याद्रामेश्वरे दानं सुतशङ्कानिवारणम् ।
धनञ्जयांशे पूर्वार्धे कुलीरे च प्रजायते ॥ २९६५ ॥

द्विपुत्रो धनिकः श्रीमान् कलत्रद्वयवान् भवेत् ।
लग्नात् पञ्चमगे पापे [10]यस्यां नाड्यां प्रजायते ॥ २९६६ ॥

दत्तपुत्रद्वयोर्मध्य एको [11]भाग्योत्तमोत्तमः ।
[12]इतरो भाग्ययुक्तस्तु गार्हस्थ्ये धनवान् भवेत् ॥ २९६७ ॥

पुत्रशोकफलप्राप्तिर्वार्धके च न संशयः ।
मध्यपादे [13]रिवदं सत्यं कुबेरांशोद्भवस्य च ॥ २९६८ ॥

लग्नात् पञ्चमगे राहौ तत्पदाष्टमगे शनौ ।
पुत्रस्तु[14] भ्रान्तिमाप्नोति पुत्रिकाक्लेशमादिशेत् ॥ २९६९ ॥

---

1. भार्यस्य एका
2. द्वयं चेदेकभार्यस्य कुबेरांशस्य जातके ।
3. जातस्य
4. पिता
5. पुत्रशंसा
6. निरीक्षिते
7. तिलदानवशाद्रोगं
8. धेनुश्च एव च
9. रामेश्वरे दानमेति सुतशङ्काधिकारणम् ।
10. यस्यनाडी
11. भाग्योत्तमोत्तमम्
12. इतरस्य द्वयं चेति
13. इदं सत्यं कुबेरांशे प्रजायते
14. पुत्रस्य

भावाष्टवर्गे विस्तारं स्वपुत्रफलनिर्णयम् ।
नाडीग्रन्थे कचिच्चेति लक्षणानि विनिर्दिशेत् ॥ २९७० ॥

ग्रहांश[1]स्थितरीत्या च लग्नांशे कुम्भसंस्थिते ।
तदीशे स्वोच्चराशिस्थे योगवान् रोगवान् भवेत् ॥ २९७१ ॥

विलग्नारूढगे शुक्रे भाग्येशेन निरीक्षिते ।
धनञ्जयांशे पूर्वार्धे कामी गुप्तधनाढ्यवान् ॥ २९७२ ॥

विलग्नांशकगे भौमे षष्ठेशे लग्नकेन्द्रगे ।
लग्नाधिपेन संदृष्टे रोगी दुर्बलदेहवान् ॥ २९७३ ॥

त्रिंशद्वर्षात् परं चेति [2]देहे मेहविकारवान् ।
अग्निमान्द्यं [3]च लभते ह्यङ्गरोगप्रपीडितः ॥ २९७४ ॥

कामारूढपदे मन्दे कर्मेशे गुरुवीक्षिते ।
सत्कर्मपूजा[4]विघ्नं च कोपी गुप्तधनाढ्यवान् ॥ २९७५ ॥

गुप्तद्रव्यः सुभूषाढ्यः कुलीरे गुरुसंस्थिते ।
कुम्भांशगे प्रजातस्तु[5] वातप्रकृतिदेहवान् ॥ २९७६ ॥

यस्य जन्मसमये शशिलग्नात्
[6]सद्ग्रहो यदि च कर्मणि स्थितः ।
तस्य कीर्तिरमला भुवि तिष्ठे-
दायुषोऽ[7]न्तमविनाशितसम्पत् ॥ २९७७ ॥

केसरीयोगजातस्तु[8] कुलीरांशे धनी भवेत् ।
[9]चन्द्रे पापयुते दृष्टे ह्यन्तःकपटवान् सदा ॥ २९७८ ॥

---

1. आतकारीत्या
2. देहमेह
3. प्रकुर्वीत अंशरोग
4. विघ्नः स्यात्
5. प्रजातस्य
6. सद्ग्रहे
7. आयुषोत्तम
8. जातस्य
9. चन्द्रपापयुते दृष्टे अन्त।

जन्मसम्पद्विपत्क्षेमदशायां च यथोत्तरम् ।
भाग्यवृद्धिमवाप्नोति प्रत्यग्दाये विशेषतः ॥ २९७९ ॥

शनिद्वितीयपर्याये प्रत्यग्दाये [1]घने स्थिते ।
जननी मृतिमाप्नोति मकरे पितृमारकम् ॥ २९८० ॥

ततः पश्चाद्भ्रातृशोकं पितृव्यारिष्टसंभवम् ।
ज्ञातिवर्गे मृतिं [2]चैव षट्त्रिंशाब्दात् परं वदेत् ॥ २९८१ ॥

रन्ध्रेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
पितामहस्य निर्याणं विपद्दाये भविष्यति ॥ २९८२ ॥

सर्वज्येष्ठपितृव्यस्य मारकं च ततः परम् ।
विपद्दाये कुलीरांशे सिंहादौ नात्रसंशयः ॥ २९८३ ॥

मकरे वृषभे सिंहे तुलायां तत्त्रिकोणगे ।
अतीव क्लेश[3]कालः स्यात् स्फुटयोगं गते शनौ ॥ २९८४ ॥

क्षामक्षोभादिकार्याणि देशाधिपतिनाश[4]नम् ।
सम्पत्तारदशान्त्यादौ[5] विपद्दाये शुभाधिकम् ॥ २९८५ ॥

जनकस्य सुतप्राप्तिः क्षेमदाये विशेषतः ।
लग्नाच्चतुर्थगे मन्दे निशाकरनिरीक्षिते ॥ २९८६ ॥

[6]अम्महोदररोगाच्च जनकस्य मृतिं वदेत् ।
पित्रार्जितधनप्राप्तिः प्रत्यग्दाये शुभान्तरे ॥ २९८७ ॥

चत्वारिंशात् परं लाभं स्वन्तत्रो धनवान् सुधीः ।
त्रिचत्वारिंशतः पश्चाद्भ्रातृद्वेषकलाप[7]वान् ॥ २९८८ ॥

---

1. धनस्थिते
2. विन्द्यात्
3. कालं
4. नाशकृत्
5. शान्त्यादि
6. महोदरजलरोगेण जनकस्य
7. कलापकृत्

तत्काले [1]कृतिमेणैव पुत्रशोको भविष्यति ।
भाग्यारूढपदाधीशे स्वोच्चे भृगुसमन्विते ॥ २९८९ ॥

जन्मप्रभृति सम्पन्नः कुलीरांशे सुभाग्यवान् ।
पुत्रस्थानं गते [2]राहौ दशायां पुत्रनाशनम् ॥ २९९० ॥

विप्लवेन धनच्छेदं पश्चात् सौख्यं विनिर्दिशेत् ।
विपद्दाये सुत[3]प्राप्तिं त्रयोविंशात् परं लभेत् ॥ २९९१ ॥

कुबेरांशे विपद्दाये [4]ह्यादौ सन्तानलाभवान् ।
[5]आमध्यमाद्विपत्तारमत्यगृक्षदशावधि ॥ २९९२ ॥

सन्तानोत्पत्ति[6]कालं स्यात् कुबेरांशोद्भवस्यच ।
पश्चात् पुत्रश्रियं विन्द्यात् साधनेशदशासुखम् ॥ २९९३ ॥

पुत्रप्राबल्यमाप्नोति कनिष्ठभ्रातृसौख्य[7]वान् ।
तत्पुत्रस्य श्रियं विन्द्यात् स्वपुत्रद्वेषसंभवः[8] ॥ २९९४ ॥

[9]अष्टमेशदशाकाले फलमेवमुदाहृतम् ।
अन्तर्दशादिमार्गेषु फलं विस्तारमादिशेत् ॥ २९९५ ॥

धनञ्जयांशे पूर्वार्धे फलनिर्णयमादिशेत ।
अष्टमाधिपतौ मन्दे स्वोच्चे वा स्वनवांशके ॥ २९९६ ॥

लग्नेशे चरराशिस्थे दीर्घायुर्योगमाप्नुयात् ।
कुम्भांशे कटके लग्ने कुबेरां[10]शोद्भवस्य च ॥ २९९७ ॥

मध्यपूर्णान्तपर्यन्तमायुर्दायं विनिर्दिशेत् ।
कुबेरांशे पूर्वभागे सततिः परमायुषः ॥ २९९८ ॥

---

1. कृत्रिमश्चेति
2. राहु
3. प्राप्तिः
4. आदौ
5. विपद्दशामध्यमेति प्रत्यगदशायार्धमवधिः ।
6. कालं स्यात् कुबेरांशस्य जातके
7. सौख्यकृत्
8. संभवम्
9. अष्टाधिक
10. कुबेरांशस्य जातके

पञ्चाशद्वत्स[1]रादूर्ध्वं चक्रसन्धिः प्रवर्तते ।
देहायासं प्रकुर्वीत तत्काले शान्तिमाचरेत् ॥ २९९९ ॥

प्रत्यग्दशान्ते कुजभुक्तिकाले
चन्द्रान्तरात्यादिमनोविकारम् ।
स्वदेह[2]कार्श्यं मुनयो वदन्ति
धनञ्जयांशे [3]जनितस्य पुंसः ॥ ३००० ॥

समीरणांशे तच्छान्तिनिर्णयं च विनिर्दिशेत् ।
स्वर्भानुकुजजीवार्कप्रतिमां कारयेत् पृथक् ॥ ३००१ ॥

स्वगृह्योक्तविधानेन शान्तिं कुर्याद्विचक्षणः ।
उत्तरांशे कालमृत्युरेकपञ्चाशवत्सरे ॥ ३००२ ॥

पूर्वांशे [4]ह्यपमृत्युश्च शान्त्या शान्तिं प्रयास्यति ।
लग्नात् केन्द्रगते चन्द्रे तुलांशे मेषराशिगे ॥ ३००३ ॥

सूर्यात्मजेन संदृष्टे दशासंधौ महद्भयम् ।
प्रत्यग्दशासंधिकाले [5]ह्यपमृत्युस्तथा भवेत् ॥ ३००४ ॥

उत्तरांशे काल[6]मृत्योर्नाड्योर्द्वयोश्च संदेहः ।
शान्तिक[7]र्माणि सिध्यन्ति ह्युत्तरांशोद्भवस्य च ॥ ३००५ ॥

प्रत्यग्दायान्तमारभ्य साधनेशस्य भुक्तिषु ।
पूर्वार्धे देहजाड्यं स्यात् कुबेरां[8]शोद्भवस्य च ॥ ३००६ ॥

षष्ठाधिपपदे सूर्ये तत्त्रिकोणे शनिस्थिते ।
निशाकरेण संदृष्टे क्षयरोगार्दितो नरः ॥ ३००७ ॥

उत्तरार्धे [9]दीर्घरोगी कुबेरांशसमुद्भवः ।
हृद्रोगी हिबुके मन्दे [10]ह्युदरव्याधिसंभवम् ॥ ३००८ ॥

---

1. वत्सरात् पश्चाच्च
2. कार्यं
3. भवति प्रसूतः
4. अपमृत्यु
5. अपमृत्युस्तथाश्रितः
6. मृत्युः सन्देहद्वयनाडिषु
7. कर्माणि सिध्यान्ति उत्तरांशस्य जातके
8. अंशस्य जापके
9. बहुत्वं स्यात् कुबेरांशस्य जातके
10. उदरव्याधि संभवम्

पश्चादारोग्यमाप्नोति सर्वनाडीफलं वदेत् ।
भाग्याधिपदशाकाले द्विपञ्चाशात् परं सुखम् ॥ ३००९ ॥

स्वपुत्रः प्रबलं [1]चैति जातकस्तु सुधर्मकृत् ।
धनञ्जयांशे पूर्वार्धे पाके जीवे सुखाधिकम् ॥ ३०१० ॥

स्वान्तर्दशां विना सौख्यं जीवनं स्यान्न संशयः ।
प्रत्यग्दशान्तमारभ्य पाके जीवस्य भुक्तिषु ॥ ३०११ ॥

पितृव्योऽरिष्टमाप्नोति स्वपुत्रशिशुनाश[2]नम् ।
धनञ्जयांशे पूर्वार्धे सततिः परमायुषः ॥ ३०१२ ॥

उत्तरांशे ह्येकषष्टिः परमायुश्च विन्दति ।
एकपञ्चाशगे वर्षे [3]ह्येकषष्टिसमेस्तथा ।
[4]अन्त्यात् पूर्वं मृतिं चैति कुबेरांश[5]समुद्भवः ॥ ३०१३ ॥

काश्यपः—

चन्द्रांशकत्रिकोणेषु मासे निर्याणसंभ्रमम् ।
चरराशिगते चन्द्रे तस्मिन् मासे मृतिं वदेत् ॥ ३०१४ ॥

मनुः—

चन्द्रांशराशिगे सूर्ये तत्त्रिकोणेऽथ वा यदि ।
[6]कुबेरांशे च निर्याणं पूर्वभागे न संशयः ॥ ३०१५ ॥

चन्द्रलग्नाद्व्ययारूढे पापाक्रान्ते प्रजायते ।
लोकान्तरसुखं नास्ति गुरुदृष्टौ[7] क्वचित् क्वचित् ॥ ३०१६ ॥

गजकेसरियोगेन [8]स्वल्पज्ञानयुतो भवेत् ।
फलं लोकान्तराध्याये निर्णयं भवति ध्रुवम् ॥ ३०१७ ॥

---

1. चेति जातस्य
2. नाशकृत्
3. एकषष्टिश्च वर्षके
4. समात्
5. अंशस्य जातके
6. कुबेरांशस्य
7. गुरुदृष्टिः
8. क्वचित् ज्ञानप्रदो

निर्णयं समवाप्नोति कुबेरांश[1]समुद्भवः ।
प्रस्ताराष्टकवर्गेषु फलं विस्तारमादिशेत् ॥ ३०१८ ॥

—(:०:)—

## चरलग्ने क्षमांशः ।

सिंहे क्षमांशगे सूर्ये पूर्वभागे प्रजायते ।
विप्र[2]जन्मा सुखी नित्यं द्वितीयोऽयं प्रकीर्तितः ॥ ३०१९ ॥

ज्येष्ठभ्रातृवि[3]नाशः स्यात् पश्चाद्भ्रातृयुतो भवेत् ।
वनान्तरे पुरे वासो[4] जननं भवति ध्रुवम् ॥ ३०२० ॥

जूकांशे [5]खचरे चन्द्रे क्षमांशे पूर्वभागगे ।
वनान्तरेऽग्रहारे [6]वा जननं नात्र संशयः ॥ ३०२१ ॥

काश्यपः—

नदीतीरेऽग्रहारस्य कानन[7]प्रान्त्यदेशके ।
जननं वासमित्याहुः क्षमांशे भाग्यवान् सुधीः ॥ ३०२२ ॥

दक्षिणोत्तर[8]वीथ्योश्च गेहे पश्चिमद्वारके ।
वीथ्यन्ते जननं [9]चैति पूर्वद्वारगृहेऽपि वा ॥ ३०२३ ॥

उत्तरांशे नदीप्रान्ते [10]पूर्वपश्चिमवीथ्योश्च ।
जननं दक्षिणे भागे [11]जीर्णयुक्तगृहे तथा ॥ ३०२४ ॥

क्षमांशे चोत्तरे भागे [12]चतुर्थो भवति ध्रुवम् ।
अथ वा सप्तमो[13] वापि पश्चाद्भ्रातृविहीनवान् ॥ ३०२५ ॥

---

1. अंशस्य जातके
2. विप्रजन्मसुखी नित्यं द्वितीये गर्भजातके
3. नाशं स्यात् पश्चाद्भ्रातृप्रदं सुखम्
4. वासं
5. आचरे
6. अग्रहारे च
7. प्रान्तमेव च
8. वीथीषु पश्चिमद्वारगेहगे
9. चेति पूर्वद्वारगृहेषु च
10. प्राक् च पश्चिमवीथिषु
11. नाराचप्रान्तमादिशेत्
12. चतुर्थे गर्भजातके
13. सप्तमे

चापे क्षमांशगे चन्द्रे मेषे सिंहे च वा यदि ।
पश्चाद्भ्रातृविहीनश्च ज्येष्ठभ्रातृसमन्वितः ॥ ३०२६ ॥

पूर्वभागे प्रजातस्तु[1] कनिष्ठभ्रातृभ्रात्रिमान् ।
श्यामवर्णशरीरः स्यात् स्वपिता वेदपारगः ॥ ३०२७ ॥

क्षेमांशे चोत्तरे भागे बाल्ये पितृविनाशवान् ।
ज्येष्ठभ्रातृवशात् सौख्यमल्पकालं विनिर्दिशेव ॥ ३०२८ ॥

क्षेमांशे चोत्तरे भागे रक्तवर्णशरीरवान् ।
जन्दाये [2]महाक्लेशं पित्ररिष्टं विनिर्दिशेत् ॥ ३०२९ ॥

स्वज्येष्ठभ्रा[3]तुरुद्वाहकाले तत्पूर्वमेव वा ।
सन्निपात[4]ज्वरान्मृत्युः स्वपितुर्नात्र संशयः ॥ ३०३० ॥

पश्चाद्भ्रातृ[5]सहोदर्योरन्यत्रोद्वाहकृत् सुधीः ।
बाल्ये दारिद्र्यमापन्नः पितामहवियोगवान् ॥ ३०३१ ॥

सिंहे क्षेमांशगे चन्द्रे क्षेमांशे [6]च पितुः पितुः ।
पूर्वभागे जन्मदाये जन्माब्दे नाशमीरयेव ॥ ३०३२ ॥

क्षेमांशे [7]चरे चन्द्रे पूर्वभागे विवाहवान् ।
परान्ननियमे निष्ठः स्वभुजार्जितवित्तवान् ॥ ३०३३ ॥

बहुकालं ब्रह्मचर्यं स्वपितामह [8]आचरेत् ।
पश्चाद्विवाहमाप्नोति वार्धके दारनाशवान् ॥ ३०३४ ॥

पूर्वभागे मध्यखण्डे क्षेमांशे स्वपितामहः ।
दरिद्रवृत्तिः पश्चाज्ञी बहुकालमभार्यकः[9] ॥ ३०३५ ॥

---

1. प्रजातस्य
2. महत् क्लेशं पित्रारिष्टं
3. भ्रातृ उद्वाहकाले तत्पूर्वमेव च
4. ज्वरं मृत्युः स्वपिता नात्र
5. सहोदर्य अन्यत्रोद्वाहवान्
6. स्वपितामहः
7. आचरे
8. लक्षणम्
9. अपमिवान्

पुत्रशोकेन सन्तप्तः सोदरभ्रातृशोकवान् ।
स्वज्येष्ठभगिनीभर्तृगेहे वास[1]युतः सुखी ॥ २०३६ ॥

भगिनी भर्तृमूलेन सौख्यं [2]चैति पितामहः ।
वैश्यमूलाद्धनप्राप्तिं [3]नियमान्नयुतो भवेत् ॥ २०३७ ॥

[4]स्वपक्वान्नं च पापघ्नं सौख्यदं चापराश्रयम् ।
काशीवासे[5] सुखं पुण्यं गार्ग्यस्य वचनं मतम् ॥ २०३८ ॥

क्षेमांशगे पूर्वभागे [6]मध्यखण्डोद्भवस्य च ।
पिता[7]महोऽन्ननियमादापत्संन्यासवान् मृतः ॥ २०३९ ॥

वेदाब्दे जन्मदायेषु चतुष्पाज्जीवहेतुना ।
पितामहस्य [8]निर्याणमापत्संन्यासकालके ॥ २०४० ॥

ग्रन्थान्तरे दशा[9]सन्धौ पञ्चमाब्दान्त आदिके ।
षष्ठाब्दे च महत्क्लेशं स्वपितामहनाशनम् ॥ २०४१ ॥

पूर्वभागे मध्यखण्डे क्षेमांशे [10]जनितस्य च ।
सहोदरी [11]समाङ्गल्या स्वभर्त्रानुगमिष्यति ॥ २०४२ ॥

पितामहानुजः कश्चिदग्रहारे निवासवान् ।
कुग्राम[12]वासं लभते तत्पुत्रश्च सुपुत्रवान् ॥ २०४३ ॥

समांशगे नीचनाथे पूर्वभागे पितामहः ।
[13]कंचित् कालं भैक्षभोजी ब्रह्मचर्याश्रमे [14]तथा ।
मध्ये सौख्यं [15]च लभते भ्रातृपुत्रविनाशवान् ॥ २०४४ ॥

---

1. प्रदः
2. सौख्यं चे...पिता
3. प्राप्तिरन्ननेमप्रदो भवेत्
4. परान्ननेमपापघ्नं परआश्र सुखावहम् ।
5. काशिवास
6. खण्डस्य जातके
7. महान्ननेमेन आपत्
8. निर्याणं आपत्संन्यासमादिशेत्
9. संधिपञ्चमाब्दान्तमादिकम्
10. स्वपितामहः
11. सुमङ्गल्यं स्वभर्तानु
12. वासमित्याहुः तत्पुत्रस्य
13. भिक्षाशनंकचित् कालं
14. आश्रमेषु च
15. विजानीयात्

विदेशवासी स्वपितामहश्च
परान्न[1]निष्ठव्रतयाचकश्च ।
स्ववार्धके भ्रातृवियोग[2]दुःखी
स्वपुत्रमूलाद्धनलाभवान् स्यात् ॥ ३०४५ ॥

पितामहस्यालकश्च धर्मशास्त्रप्रवर्तकः ।
राजद्वारे प्रसिद्धश्च [3]वैदिकाचारतत्परः ॥ ३०४६ ॥

क्रोध[4]भार्यायुतः श्रीमान् पुत्रपुत्रीसमन्वितः ।
वार्धके नेत्रहानिः स्यात् स्मार्तविद्या [5]सुजीवकः ॥ ३०४७ ॥

[6]कोपना दुष्टशीला च पितामहसहोदरी ।
तद्भर्ता पापकार्येण वार्धके क्लेश[7]जीवकः ॥ ३०४८ ॥

स्यालकस्य सुताधीश अपुत्रांशस्थले यदि ।
पितामहस्यालकस्य वंशक्षीणं विनिर्दिशेत् ॥ ३०४९ ॥

कर्मलोपवशात् पापं स्वपितामहस्यालकः ।
इह[8]जन्मन्यपुत्रश्च भार्यापुत्रविनाशवान् ॥ ३०५० ॥

प्रेतकार्ये मन्त्रलोपपापान्नाशः प्रजायते ।
वंशक्षयमवाप्नोति भार्यारिष्टं विनिर्दिशेत् ॥ ३०५१ ॥

नारदः—

पुरग्रामउपाध्यायी [9]अपरे पातकं लभेत् ।
[10]पापेन वंशःक्षीणः स्याच्छुभकार्ये न दोषवान् ॥ ३०५२ ॥

पितामहस्यालकभावयोगे
फलाफलं कर्मविचित्रमाहुः ।

---

1. नेम
2. दुःख
3. भानोराचार
4. क्रोधभार्य
5. च जीवनम्
6. कोपी दुष्टस्वभावश्च
7. जीवनम्
8. जन्मे सुपुत्रस्य
9. अपरे पातकं स्मृतम्
10. वंशक्षयमिति प्राहुः शुभ

विस्तार[1]भावं मुनयो वदन्ति
क्षेमांश[2]नाड्यां तु कचित् फलं च ॥ २०५३ ॥

क्षेमांशे जनकः श्रीमान् श्रौतस्मार्तप्रवर्तकः ।
वेदाध्ययनसंपन्नो बहुशिष्य[3]प्रशिष्यवान् ॥ २०५४ ॥

स्वक[4]र्मणि प्रियो मानी ज्येष्ठभ्रातृवियोगवान् ।
विद्याजीवनवान् रागी गूढकार्यप्रवर्तकः[5] ॥ २०५५ ॥

राजद्वारे प्रसिद्धश्च विप्रमूलाद्धनार्जितः ।
स्वपित्रार्जितसंपन्नः स्वभार्या[6]निरतः सुखी ॥ २०५६ ॥

पुत्रोत्सवात् परं भाग्यं क्षेत्रगोधान्यभाग्यवान् ।
पूर्वभागे पितुः श्रेष्ठो बहुपुत्रार्थमित्रवान् ॥ २०५७ ॥

पितृमूलाद्धनप्राप्ति[7] राजपत्नी प्रियोभवेत् ।
तन्त्राध्यक्षः सुखी नित्यमिष्टि[8] वैदिककर्मवान् ॥ २०५८ ॥

वातप्रकृतिदेहश्च पैत्याधिकशरीरवान् ।
तयो[9]राधिक्यदोषेण बाहुमूले विचारवान् ॥ २०५९ ॥

नेत्रपीडा[10]युतश्चैव मध्ये मध्ये ज्वरं कचित् ।
अथ वा बाहुमूले च पीडावान् धनवान् सुधीः ॥ २०६० ॥

क्षेत्रगोधान्यवान् रागी वेदाध्ययनजीवनः ।
भ्रातृभ्रात्रीविवाह[11]कृद्द्रव्यार्जनसमर्थकः ॥ २०६१ ॥

एवंभूतस्य जनको जन्मदाये ज्वरा[12]द्भयम् ।
दैवज्ञविप्रमूलेन पुरापुण्यस्य हेतुना । २०६२ ॥

---

1. विस्तारमाहुर्मुनयो
2. नाडीफलं चेति कचिद्वदन्ति
3. प्रतिष्ठवान्
4. स्वसत्कर्म
5. प्रवर्तवान्
6. भार्ये
7. प्राप्तिः
8. नित्यमिष्ट
9. तयोर्मध्ये विगलिते
10. करश्चैव
11. विवाहश्च द्रव्यार्जन
12. विपत्

विद्या[1]दानं प्रकुर्याच्च ज्वररोगनिवर्तये ।
पूर्व[2]भागे च जनको दीर्घमायुर्न संशयः ॥ ३०६३ ॥

चन्द्रलग्नशुभाधीशे भूसुते रविसंयुते ।
स्वपिता शिवभक्तश्च शिवपूजा[3]व्रती भवेत् ।
गुरुदेवप्रसादेन पुत्रप्राप्त्या[4] सुभग्यवान् ॥ ३०६४ ॥

शिव[5]व्रतध्यानफलेन तस्य
क्षेमांशनाडी जनकस्य भाग्यम् ।
स्यात् पूर्वभागे [6]जनितस्यतस्य
सुपुत्रपौत्रार्थ[7]सुखं च नित्यम् ॥ ३०६५ ॥

क्षमांशगे निशानाथे स्वपिता धार्मिकः सुखी ।
पञ्चाक्षरमहामन्त्रं[8]जप्त्वा भक्ति पुरस्सरम् ॥ ३०६६ ॥

पुत्रोत्सवादि [9]संतोषी गेहे लक्ष्मीकटाक्षवान् ।
सिंहे क्षमांशगे चन्द्रे [10]ह्येक एव पितुर्गुरुः ॥ ३०६७ ॥

वेदाध्ययनसंपन्नो भ्रातृशोक[11]युतो भवेत् ।
कालान्तरे पुत्रतापं [12]लभते स्वपितुर्गुरुः ॥ ३०६८ ॥

प्रपितामहस्य [13]पुत्र्याभर्तातु पापचेतनः ।
पुत्रशोकव्रती चैव पुत्रिकाक्लेशमादिशेत् ॥ ३०६९ ॥

प्रपितामहस्य पुत्री भावे फलमिति स्मृतम् ।
[14]तत्पुत्री भर्तृपापेन बहुपुत्रविनाशनम् ॥ ३०७० ॥

---

1. दानवशाद्रोगी ज्वरगण्ड
2. भागस्य
3. व्रतो
4. प्राप्तिः
5. व्रतोध्यानफलप्रदस्य
6. फलमाकरोति
7. सुखे चिरायुः
8. मन्त्रं........
9. भाग्यं स्याद्गेहे
10. एकाकी स्वपिता गुरुः
11. प्रदो भवेत्
12. स्वपिता गुरुलक्षणः
13. सा पुत्री तद्भर्ता
14. तत्पुत्रिकाभर्तृपापं बहुत्वंपुत्रनाशनम्

भार्यारिष्टमिति प्राहुस्तद्वंशे फलमादिशेत् ।
पितामहस्व[1]सृभावे स्वर्भानुयुतवीक्षिते ॥ ३०७१ ॥

तत्पुत्रपापबाहुल्यं तद्वृत्चारिष्टमादिशेत् ।
क्षमांशगे निशानाथे स्वपिता बहुपुण्यवान् ॥ ३०७२ ॥

क्षमांशे स्वपिता श्रीमान् वेदाध्ययनशीलवान् ।
यष्टा वैदिककर्मात्मा बन्धुमित्रात्मपोषकः ॥ ३०७३ ॥

पुत्रमूलात् सुसन्तोषी[2] सद्विद्याकालयापकः ।
एकदारव्रतो नित्यं किंचित् पाप[3]करो भवेत् ॥ ३०७४ ॥

गूढहृत् कार्यवादी च मित्रमूलापकीर्ति[4]मान् ।
राजामात्यप्रसादेन विप्रमूला[5]च्छ्रियान्वितः ॥ ३०७५ ॥

इष्टानुजमहद्भाग्यं मध्ये सौख्यं धनागमम् ।
परान्न[6]नियमे सिद्धिं जनकश्च न संशयः ॥ ३०७६ ॥

उत्तरांशे प्रजातस्य पितृव्य[7]स्तु चिरायुषः ।
पितामहभ्रातृमूलाज्जीवनं [8]कष्टमेव हि ॥ ३०७७ ॥

पितृ[9]व्यभार्या कुटिला कुरूपा विकृताननना ।
कालान्तरे सुतप्राप्तिरुत्तरां[10]शोद्भवस्य च ॥ ३०७८ ॥

पितामहभ्रातृभार्याभावेशे कुजसंयुते ।
[11]अपत्नीकौ च द्वौ चैव पितामहसहोदरौ ॥ ३०७९ ॥

उत्तरांशे [12]ह्यपुत्रश्च पूर्वभागैकपुत्रवान् ।
पितामहस्व[13]सृपुत्री बहुकालं सुमङ्गली ॥ ३०८० ॥

---

1. स्वसाधीशौ
2. सन्तोषं
3. प्रदो भवेत्
4. कीर्तिवान्
5. मूलश्रयान्वितः
6. नेमसिद्धिः स्याज्जनकस्य
7. कश्चिदायुषः
8. क्लेशजीवनं
9. पितृभार्या च कुटिला कुरूपी
10. अंशस्य जातके
11. अपत्नीकद्वयश्चैव पितामह सहोदरा
12. अपुत्रश्च
13. स्वसा पुत्री

उत्तरांशे प्रजातस्य [1]स्वपितुर्भगिनीव्यथाम् ।
अल्पकालं भ्रातृसौख्यं पुत्रक्लेशवती भवेत् ॥ ३०८१ ॥

[2]उत्तरांशे च जनकःसोदरैकसमन्वितः ।
बहुभ्रातृयुतश्चैव सपत्नी मातृमान् भवेत् ॥ ३०८२ ॥

उत्तरांशे पितृव्यश्च[3] सदा क्लेशेन कर्शितः ।
व्यवसायपरो नित्यं ग्रामणीः पापचेतनः ॥ ३०८३ ॥

उत्तरांशे जन्मदाये जन्माब्दे पञ्चमेऽथ वा ।
स्वपितारिष्टमाप्नोति पूर्वभागे प्रपी[4]डितः ॥ ३०८४ ॥

पूर्वभागे [5]भेदमातुर्जन्मदाये महत् सुखम् ।
तृतीय[6]सोदरोत्पत्त्या जनकश्च श्रियान्वितः ॥ ३०८५ ॥

स्वपिता यत्न[7]कार्येषु राजद्वारेऽनुकूलवान् ।
[8]मित्रानुकूल्यं लभते तन्मूलात् पितृसौख्यवान् ॥ ३०८६ ॥

प्रभुद्वारि जनक्लेशं पूर्वाश्रितजनावधि ।
नूतनप्रबलं [9] चैति तृतीयाब्दे न संशयः ॥ ३०८७ ॥

तृतीयाब्दान्तमारभ्य [10]योगः स्याद्द्वित्रिवत्सरम् ।
[11]स्वपितुर्मित्रभाग्याप्तिः पूर्वालोचनहेतुना ॥ ३०८८ ॥

राज[12]पत्न्या ह्यरिष्टं च तद्द्वारप्रमुखावधि ।
तत्पुत्रप्रबलं [13]चैति पाण्ड्यदेशेनसंशयः ॥ ३०८९ ॥

---

1. स्वपिता भगिनीव्यथा
2. अंशस्य जनक एकभ्रातृ
3. पितृव्यस्य
4. प्रपीडकृत्
5. वेदमातृ
6. सोदरोत्पत्तिजनकश्च श्रियान्वितम्
7. कार्याणि
8. मित्रप्राबल्यमिलाहुस्तन्मूलात् पितृसौख्यकृत् ।
9. चेति
10. योगं
11. स्वपितामित्र
12. राजपत्नी अरिष्टस्य तद्दूरे प्रमुखेविपत्
13. चेति

यवनाधिपते मृत्युर्वृषभांशे शनिस्थिते ।
मिथुने धान्यनाशं [1]च लोके दुर्भिक्षमादिशेत् ॥ २०९० ॥

जन्मप्रभृति सन्तोषं विप्रमूलाद्धनागमम् ।
भाग्यवृद्धिमवाप्नोति दशान्ते क्लेशमादिशेत् ॥ २०९१ ॥

सम्पद्दाये जन्मदेशे क्लेशं सर्वजनावधि ।
कलहेन [2]विचारः स्यात् प्रभुवर्गे ह्यरिष्टकृत् ॥ २०९२ ॥

[3]स्वपितुर्मित्रसामन्तो पञ्चमाब्दे प्रपीड[4]नम् ।
प्रभुवर्गे शिशुक्लेशं राजपुत्रीविनाशनम् ॥ २०९३ ॥

सप्तमासे पञ्चवर्षे स्वपिता ज्वर[5]पीडितः ।
[6]षष्ठाब्दे च विचारं च सोदरोत्पत्तिमादिशेत् ॥ २०९४ ॥

दशान्ते सोदरोत्पत्तिर्गर्भाधानमथापि वा ।
विद्यारम्भात् परं [7]चैव षष्ठाब्दे नात्र संशयः ॥ २०९५ ॥

क्षमांशाधिपतौ शुक्रे [8]स्वसितेन निरीक्षिते ।
उदरव्याधिमान् बाल्ये पितृमूलात् सुसौख्यवान् ॥ २०९६ ॥

सोदराः सप्ततेषां द्वौ प्रबलौ भाग्यशालिनौ ।
आयुष्मन्तौ[9]भ्रातरौ द्वौ विद्याबुद्धिसमन्वितौ ॥ २०९७ ॥

वेदशास्त्र[10]प्रवीणौ च राजद्वारे सुपूजितौ ।
लग्नाद्व्ययगते चन्द्रे चन्द्राद्व्ययगते भृगौ ॥ २०९८ ॥

श्रौतस्मार्तप्रवीणश्च क्षमांशे वेदपारगः ।
धार्मिकोऽत्यन्तमेधावी वसुवर्षात् परं सुधीः ॥ २०९९ ॥

---

1. स्यल्लोके
2. विचारं स्यात् प्रभुवर्गे अरिष्टकृत्
3. स्वपिता मित्र
4. पीडकृत्
5. ज्वरगण्डवान्
6. षष्ट्यब्दे च विचारं स्यात्
7. चेति षष्ट्यब्दे
8. असितेन
9. भ्रातृद्वय चिरायुष्यं बुद्धिमान् विद्यवान् भवेत् ।
10. प्रवीणश्च राजद्वारे सुपूजितः

मन्दांशकगते शुक्रे बाल्ये मन्दगतिर्भवेत् ।
सम्पद्दाये सप्तमाब्दे ऋतुवर्षात् परार्धगे ॥ ३१०० ॥

ब्रह्मोपदेशकर्माणि चौलं पञ्चमवत्सरे[1] ।
पूर्वभागे तृतीयाब्दे पञ्चमाब्दे च वा यदि ॥ ३१०१ ॥

क्षमांशे चौलकर्माणि भ्रातुश्चैव विनिर्दिशेत् ।
क्षमांशे [2]ह्युवरे भागे चौलोपनयनं शुभम् ॥ ३१०२ ॥

अष्टमाब्दे त्वेक[3]काले पूर्वभागे पृथक् पृथक् ।
सिंहे तुलांशगे चन्द्रे भार्गवे [4]त्वसितांशगे ॥ ३१०३ ॥

ऋतुवर्षाब्दपर्यन्तमुदरामयरोगवान् ।
तद्दोषपरिहारार्थं [5]शुक्रस्य प्रार्थनां वदेत् ॥ ३१०४ ॥

लक्ष्मीस्तोत्रं प्रकुर्वीत पिण्याकबलिमाचरेत् ।
पिण्याकान्तबलिं चैव सप्तविंशद्दिनानि च ॥ ३१०५ ॥

तिल[6]दानेन चारोग्यमुदरव्याधिनाशनम् ।
मीने तुलांशगे चन्द्रे सिंहे तत्त्रिकोणगे ॥ ३१०६ ॥

बालारिष्टभयप्राप्तिर्जन्मदाये न संशयः ।
जीविते दीर्घमायुष्यं सोदरभ्रातृमान् सुखी । ३१०७ ॥
पित्रार्जितधनप्राप्तिर्विद्यावान् बुद्धिमान् भवेत् ।

—(:o:)—

1. वत्सरम्
2. उत्तरे
3. त्वेकमिति
4. असितां
5. प्राथनमादिशेत्
6. दानवशाद्रोग्यं

## वृषभलग्ने वित्तांशः

वित्तांशे वृषभे लग्ने पूर्वभागे प्रजायते ।
विप्र[1]जन्मा सुखी नित्यं रूपवान् मतिमान् भवेत् ॥ ३१०८ ॥

महानदीप्रान्तदेशे [2]त्वग्रहारे प्रसूतिमान् ।
अयं [3]तुरीयपुत्रो वा पञ्चमो वा विनिर्दिशेत् ॥ ३१०९ ॥

सोदरभ्रातृमान् वाग्मी सहोदरसमन्वितः ॥ ३११० ॥

[4]वित्तांशजातो वृषपूर्वभागे
नित्यं धनैकार्जनतत्परः स्यात् ।
संप्राप्तनिक्षेपउदारभागः
शिवस्यपादाम्बुरुहेऽतिभक्तः ॥ ३१११ ॥

[5]लग्नाधिपे वा शुभखेटयुक्ते
स्वयोग्यवृत्त्या धनमाददाति ।
सत्पात्रदानं कुरुते सुभोगी
वेदोक्तमार्गेण [6]शिवार्चनं च ॥ ३११२ ॥

लग्ने [7]वर्गोत्तमे चन्द्रे रन्ध्रे लग्नांशगे गुरौ ।
ग्रामणीर्धनधान्यादिकीर्तिमान् पशुमान् भवेत् ॥ ३११३ ॥

जन्मदाये पिता बाल्ये धनलाभ[8]शुभान्वितः ।
मातादेहभयं व्याधिं शान्त्या शान्तिं प्रयास्यति ॥ ३११४ ॥

उपरांशे प्रजा[9]तस्तु तृतीयोऽयं प्रकीर्तितः ।
जन्मदाये मातृहानिर्द्वितीयोद्वाहवान् पिता ॥ ३११५ ॥

---

1 जन्मा सुखी
2. अग्रहारे
3. चतुर्थगर्भे च
4. वित्ताधिपांशे समुपेतिजन्म
5. लग्नेऽथ नाथे शुभखेचरश्चेत्
6. शिवः प्रसन्नः
7. तुलांशगे
8. शुभावहम्
9. स्यात् तृतीये गर्भमादिशेत्

पूर्वभागे पितृव्यस्य कलत्रद्वयमादिशेत् ।
वेदशास्त्रादिसम्पन्नो [1]विनयी च निरामयः ॥ ३११६ ॥

ग्रन्थान्तरे गर्ग[2]मते वित्तांशे जनितस्य च ।
स्वपिता च पितृव्यश्च कलत्रद्वय[3]संयुतौ ॥ ३११७ ॥

रागी [4]च स्वपिता विद्वानिष्टिवैदिककर्मवान् ।
शिवपूजारतो नित्यं [5]रुद्राध्यायविधानतः ॥ ३११८ ॥

पितृव्यभवने चन्द्रे भूसुतेन निरीक्षिते ।
पितृष्वसैका विधवा बहुकालं सुजीवति ॥ ३११९ ॥

एका सुमङ्गली नित्यं दारिद्र्येण च कर्शिता ।
वित्तांशनाडीजातस्य पितामहकुलक्षयः[6] ॥ ३१२० ॥

मातृवंशं तथा विन्द्यात् पितृ[7]व्यश्च चिरायुषः ।
दारान्तरे सुतप्राप्तिर्दुर्दानप्राप्तिमान् सुखी ॥ ३१२१ ॥

पितृव्यस्य फलं सत्यं स्वपिता सौख्यवान् भवेत् ।
लग्नाष्टमगते जीवे बहुग्रहसमन्विते ॥ ३१२२ ॥

दुष्प्रतिग्रहबाहुल्यं तद्वंशे नात्र संशयः ।
वृषभे यदि षष्ट्यंशे जातो विद्वान् सुखी धनी ।

दुरान्नभो[8]क्ता सततं दुष्प्रतिग्रहसंयुतः ॥ ३१२३ ॥

स्वतन्त्रशीलो द्विजदेवभक्तो
[9]धीरः प्रगल्भो बहुशास्त्रवेत्ता ।
मानी कलाकाव्यविशुद्धबुद्धि-
[10]र्मनोहरो वा वृषभे प्रजातः ॥ ३१२४ ॥

---

1. कलत्रद्वयमादिशेत्
2. गर्गहोरे वित्तांशे चैव जातके
3. द्वयवान् भवेत्
4. ज्येष्ठपिता
5. रुद्रपूजासु सात्त्विकः
6. क्षयम्
7. पितृव्येकः
8. जनादीनि दुष्प्रतिग्रहवासवान्
9. धीरात्मनः शास्त्रविदः प्रगल्भ्यः ।
10. मानोहरोमा

वृषभलग्ने जातः क्लेशसहिष्णुसुखरिपुहन्ता बाल्ये ।
[1]संप्राप्तयुवत्या ह्युदरामयवस्तिरोगदारवान् भवति ॥ ३१२५ ॥

परोपकारशीलश्च भविष्यज्ञः सुबुद्धिमान् ।
वृषभे [2]मिथुनांशे च जनितः क्षिप्रकोपवान् ॥ ३१२६ ॥

[3]वेदाध्याने प्रियः कान्तः श्रौतस्मार्तविशारदः ।
[4]कन्यांशे वा विलग्नेशे भाग्ये गुरुयुतेक्षिते ॥ ३१२७ ॥

लग्नाधिपे कुलीरांशे दिवाकरसमन्विते ।
रक्तवर्णो मध्यगात्रो भाग्यस्थाने सुभाग्यवान् ॥ ३१२८ ॥

धनिकः कृतकर्मा च प्रतिग्रहपरः सदा ।
पिशुनश्चपलो नित्यं वित्ते [5]राहौ प्रजायते ॥ ३१२९ ॥

वित्तांशगे पूर्वभागे द्वितीये राहुसंस्थिते ।
उत्तरांशे प्रजात[6]स्तु विद्या विघ्नयुतो भवेत् ॥ ३१३० ॥

पूर्वभागेऽथ विद्यावानग्रहारनिवासवान् ।
देशान्तरे महाभाग्यं स्वपिता च तथा [7]लभेत् ॥ ३१३१ ॥

शुभांशगे धने राहौ विद्यावान् धनिकः सुखी ।
पापांशे पापराशिस्थे विद्याबुद्धिविहीनवान् ॥ ३१३२ ॥

विक्रमाधिपतौ चन्द्रे मीने तौलिनवांशगे ।
भ्रातृत्रययुतो मानी भगि[8]न्यश्च तथा स्मृताः ॥ ३१३३ ॥

शेषं नाशमिति प्राहुर्ज्येष्ठ[9]भ्राता चिरायुषः ।
ग्रन्थान्तरे नारदीये [10]भगिन्यौ च सुजीवतः ॥ ३१३४ ॥

---

1. संचययुवत्यामुदरामय
2. मिथुनांशस्य जातकः
3. वेदाध्ययनरतिः कान्तिः
4. कन्यारूढे विलग्नेशे भाग्ये कवि
5. राहुः
6. प्रजातस्य विद्याविघ्नप्रदो
7. भवेत्
8. भगिनी च तथा भवेत्
9. भ्रातुश्चिरायुषम्
10. भगिनीद्वयमायुषः

एका क्लेशवती [1]नित्यं दुःखिता च तथा भवेत् ।
भ्रातृज्येष्ठ[2]श्चिरायुष्मान् देशत्यागात् परं सुखी ॥ ३१३५ ॥

भौमे यावत् फ[3]लानि स्युस्तावत् सङ्ख्याः सहोदराः ।
दीर्घायुषा [4]इति प्राहुः शेषं नाशमितीरयेत् ॥ ३१३६ ॥

सहोदरारिष्टदाये गोचरे क्रूरकालगे ।
वदेत् सहोदरक्लेशं नाडीवित्तांशज[5]स्य च ॥ ३१३७ ॥

लाभेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
[6]गते भ्रातर्यन्यदेशं मातृपीडां विनिर्दिशेत् ॥ ३१३८ ॥

बालारिष्टभयं किंचिद्यमषष्ठांश[7]जस्य च ।
क्रूरान्तरे जन्मदाये क्रूरमासे भविष्यति ॥ ३१३९ ॥

तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ।
राजतं चन्द्रमभ्यर्च्य दानं कुर्याद्यथाविधि ॥ ३१४० ॥

[8]जातकस्य जनन्याश्च ह्यायुरारोग्यमादिशेत् ।
मीने तुलांशगे चन्द्रे भूसुतेन निरीक्षिते ॥ ३१४१ ॥

[9]स्वपित्ररिष्टतःपूर्वं मातुर्मरणमादिशेत् ।
चन्द्रारिष्टोपशान्त्यर्थं स्वगृह्योक्त विधानतः ॥ ३१४२ ॥

क्रूरान्तरे मन्ददाये विधिवच्छान्तिमाचरेत् ।
तातान्विकादिसौख्याप्तिर्बालारिष्टं न विद्यते ॥ ३१४३ ॥

स्वपितृव्यसुतारिष्टं जन्मदाये नसंशयः ।
लग्ने गुरुस्थिते काले विद्यारम्भं विनिर्दिशेत् ॥ ३१४४ ॥

---

1. दुःखी
2. चिरायुष्य देशत्यागान्तरे
3. फलाः सन्ति
4. इति
5. जातके
6. मातृदेशान्तरे काले
7. जातके
8. जननी जातकश्चैव आयु
9. स्वपितारिष्ट तत्पूर्वे

जन्मलग्नांशगे जीवे मौञ्जीबन्धनमादिशेत् ।
[1]धनूराश्यंशगे जीवे लग्नेशांशत्रिकोणगे ॥ ३१४५ ॥

गोचरे जन्मदायेऽस्य सोदरोद्वाहमादिशेत् ।
मन्दे जीवान्तरे काले [2]विवांशे जनितस्य च ॥ ३१४६ ॥

उत्तरायणगे सूर्ये प्रथमोद्वाहमादिशेत् ।
[3]विवाहसमये वापि तत्पूर्वे वा ज्वरार्तिमान् ॥ ३१४७ ॥

मसूरिकाभयप्राप्तिः क्रूरमासे न संशयः ।
सुखेशस्यांशगे दाये लग्नाधिपतिभुक्तिषु ॥ ३१४८ ॥

विवांशगे प्रजातस्य दारलाभं विनिर्दिशेत् ।
[4]स्वपितुर्धनवस्त्रादिलाभो भवति नित्यशः ॥ ३१४९ ॥

जन्मदाये फलं सत्यं क्रूरभुक्तिं विना सुखम् ।

जन्मादिभावाधिपतेर्दशायां
क्रमात् त्रिषष्ठाष्टमभुक्तिकाले ।
तद्भाव[5]दुःखं च शुभेक्षितश्चेत
केन्द्रत्रिको[6]णाधिपसौख्यमेति ॥ ३१५० ॥

[7]पितृभ्रातृकलत्राणां त्रयाणां च यथाक्रमम् ।
तत्तद्भवाष्टमेशांशे त्रिकोणे वाथ वा भवेत् ॥ ३१५१ ॥

स्फुटयोगं गते मन्दे तत्तद्भावविनाशनम् ।
वृषभे यमषष्ट्यंशे जन्मर्क्षे च दशान्त्यगे ॥ ३१५२ ॥

सम्पद्दाये [8]स्वभुक्तौ वा पितृव्यस्य विनाशनम् ।
स्वपिता भगिनी दुःखं गोचरे मकरे शनौ ॥ ३१५३ ॥

---

1. धनुःराशांशगे
2. अंशश्चैव जातके
3. विवाहानन्तरे वापि तत्पूर्वेण
4. स्वपिता धन
5. दुःखमुपयाति शुभेक्षणश्चेत्
6. त्रिकोणभवनाधिप
7. पितृमातृभ्रातृवर्गे कलत्रत्रययथाक्रमम् ।
8. स्वयुक्ते

चापान्ते वाथ कुम्भे वा स्वपितुर्व्याकुलं महत् ।
पितृ[1]ष्वसुर्दुःखकालं योजयेत् कालवित्तमः ॥ ३१५४ ॥

भाग्याधिपदशाकाले महानृपतिनाशनम् ।
क्रूरान्तरे क्षामतां च लोके बहुजनावधि ॥ ३१५५ ॥

[2]स्वपितुः सौख्यमित्याहुः [3]पितामह्यास्तुनाशनम् ।
पितृव्यस्य सुतादीनां[4] देहजाड्यं विनिर्दिशेत् ॥ ३१५६ ॥

धनाधिपदशाकाले [5]वित्तांशे जनितस्य च ।
विवाहोत्सवकार्याणि लग्नाधिपतिभुक्तिषु ॥ ३१५७ ॥

जामित्रारूढगे शुक्रे कुम्भांशे रविसंयुते ।
सम्पदाये विवाहः स्यात् [6]सत्कलत्रयुतो भवेत् ॥ ३१५८ ॥

लग्नराशिदशाकाले स्वपिता सौख्यमश्नुते ।
क्रूरमासं परित्यज्य धनलाभं विनिर्दिशेत् ॥ ३१५९ ॥

धनराशिदशाकाले [7]ह्युत्तरार्धे शुभं वदेत् ।
वित्तांशगे प्रजातस्य विवाहोत्सवसंभ्रमम् ॥ ३१६० ॥

द्वितीये राहुदोषेण क्रूरराशिग्रहान्तरे ।
धनधान्यपशूनां च [8]हानिस्तत्रोपजायते ॥ ३१६१ ॥

सुताधिपदशाकाले लाभाधिपतिभुक्तिषु ।
दशान्ते वा सुतोत्पत्तिर्द्वाविंशाब्दात् परं सुखम् ॥ ३१६२ ॥

सुखराशिदशाकाले स्वप्राबल्यं महत् सुखम् ।
धनधान्यसुभूषाप्ति[9] क्षेत्रलाभं विनिर्दिशेत् ॥ ३१६३ ॥

---

1. पितृष्वसा दुःखकालं योजयेत् कालमादिशेत् ।
2. स्वपिता
3. पितामहि विनाशनम्
4. सुतादीनि
5. वित्तांशश्चैव जातके
6. सत्कलत्रप्रदो
7. उत्तरार्धे
8. हानिस्तत्र विनिर्दिशेत्
9. भूषाप्तिः

सुखराशिदशाकाले सुखाधिपतिदायके ।
कुलीरेऽर्कसुते काले [1]पित्रिरिष्टं विनिर्दिशेत् ॥ ३१६४ ॥

पितृस्थानाधिपे मन्दे [2]स्वापत्संन्यासभागगे ।
सम्पत्तारदशामध्ये [3]स्वापत्संन्यासवान् पिता ॥ ३१६५ ॥

सम्पद्दाये तृतीयांशे [4]वित्तांशे जनितस्य च ।
भाग्याधिपान्तरे काले [5]ह्याश्रमानन्तरं पिता ॥ ३१६६ ॥

मारकं [6]लभते तत्र भ्रातृसौख्यं विनिर्दिशेत् ।
विपत्ताराधिपे केतौ व्ययांशे निधने स्थिते ॥ ३१६७ ॥

तद्दशायां मनस्तापं भ्रातृद्वेषं विनिर्दिशेत् ।
मीने चन्द्रांशयोगेन [7]वित्तांशे जनितोऽपि च ॥ ३१६८ ॥

विपद्दाये [8]महद्भाग्यं गुरुभुक्तिं विना सुखम् ।
सर्वदाये चन्द्र[9]राह्वोरन्तर्दाये मनोव्यथाम् ॥ ३१६९ ॥

देहजाड्यप्रपीडादि योजयेत् कालवित्तमः ।
लग्नाधिपदशाकाले नित्यश्रीसौख्यवान् भवेत् ॥ ३१७० ॥

पुत्रोत्सव[10]शुभूषाप्तिं द्वितीयोद्वाहमादिशेत् ।
षष्ठाधिपदशाकाले क्रूरवेधमहान्तरे ॥ ३१७१ ॥

ज्येष्ठभ्रातृसुतादी[11]नामरिष्टं वा समादिशेत् ।
तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ॥ ३१७२ ॥

चन्द्रांशेशदशाकाले घनाधिपतिभुक्तिषु ।
वित्तांशगे प्रजातश्च [12]ह्यपमृत्युं समश्नुते ॥ ३१७३ ॥

---

1. पित्रा
2. आपत्संन्यासु
3. आपत्
4. वित्तांशस्यैव जातके
5. अश्रु
6. भवति प्राहुः
7. वित्तांशश्चैव जातके
8. महाभाग्य गुरुभक्तिविनात् सुखम्
9. राहु अन्तर्दाये मनोव्यथा
10. सुभूषाप्तिर्द्वितीयोद्वाहं
11. सुतादीनि अरिष्टमिति वादिशेत्
12. अपमृत्युतया श्रुतः

उत्तरांशे प्रजातस्य[1] दशामध्ये मृतिं वदेत् ।
दशादावपमृत्युश्च शान्त्या शान्ति प्रयास्यति ॥ ३१७४ ॥

अष्टमाधिपतौ [2]जीवे स्वक्षेत्रे वृषभांशगे ।
[3]वित्तांशे च प्रजातस्य पञ्चाशद्वत्सरे मृतिम् ॥ ३१७५ ॥

बुधकेत्वन्तरे काले चन्द्रांश[4]ग्रहदायके ।
मीनकुम्भतुलामासे गुरुवारे मृतिं वदेत् ॥ ३१७६ ॥

यदि जीवति पुण्येन विक्रमेशस्य दायगे ।
राहुजीवान्तरे काले कालमृत्युर्भविष्यति ॥ ३१७७ ॥

मीने तुलांशगे चन्द्रे पित्तवायुप्रपीडितः ।
देहान्ते नरकं [5]याति दुष्प्रतिग्रहहेतुना ॥ ३१७८ ॥

पूर्वाप्राद्रप्रजातश्च [6]ह्यष्टचत्वारिवत्सरे ।
चतुर्विंशेऽथ वा चेति [7]ह्यपमृत्यं च विन्दति ॥ ३१७९ ॥

अंशायुर्दाययोगेन [8]त्वेकषष्टिसमे मृतिः ।
शान्तिकांशगते चन्द्रे [9]भौमे नीचनवांशगे ॥ ३१८० ॥

मिथुने वा [10]प्रजातश्च वाममार्गप्रपूजकः ।
देवभक्तिरतो नित्यं तान्त्रिकाचारतत्परः ॥ ३१८१ ॥

वीरशैवप्रियो मानी सदा पशुपतिप्रियः ।
सोदरभ्रातृ[11]हीनश्च प्रणवोक्तप्रपूजकः ॥ ३१८२ ॥

तस्य दोषवशात्[12]क्लेशं लभते शूद्रजो ध्रुवम् ।
[13]पुत्राभावयुतश्चैव कुलटादारनायकः ॥ ३१८३ ॥

---

1. प्रजातश्च
2. काले
3. वित्तमांशे प्रजातश्च
4. फल
5. यान्ति
6. अष्ट
7. अपमृत्युस्तथाश्रितः
8. एक
9. नीचभौमे
10. प्रजातस्य वाममार्गप्रपूजवान्
11. हीनस्य प्रणवोक्तप्रपूजवान्
12. चेति क्लेशं चेच्छूद्रजातके
13. पुत्रभावतिप्रोक्तं कुलटावधु

वारस्त्रीसङ्गवान् कामी विप्रस्त्री[1]गमनोत्सुकः ।
[2]दुराचारे तीक्ष्णबुद्धिर्जातिधर्मविरोधकः[3] ॥ ३१८४ ॥

मनुः—

वेदादिपूर्वप्रणवादि [4]मन्त्रं
शिवार्चनं चापि परोपतापम्[5] ।
श्रीशाक्तिकांशे मिथुने शशाङ्के
नीचांशगे दुर्गतिकर्म[6]युक्तः ॥ ३१८५ ॥

नीचांशे मिथुने चन्द्रे तदीशेन समन्विते ।
[7]वृषलग्ने प्रजातश्च चापांशे च धनाढ्यवान् ॥ ३१८६ ॥

—: * :—

## कल्पद्रुमादि महायोगाः ।

[8]राज्याधिपे स्वोच्चगते बलाढ्ये-
शुभेन युक्ते सुतभेशयुक्ते ।
राज्येश्वरेराज्यगतेऽपि लग्न-
नाथे तु कल्पद्रुमनामयोगः ॥ ३१८७ ॥

[9]जातः कल्पद्रुमाख्ये सकलनृपवरैः स्तूयमानो बलाढ्यो
लोके प्रख्यातकीर्तिः प्रभुसमविभवः पञ्च[10]विंशाद्विवर्षात् ।
[11]द्वात्रिंशद्वत्सरान्तं वनभुवि वसतिं मण्डलस्याधिपत्यं
सेनाधित्वं नृपत्वं नृपकरकमलैः [12]प्राप्नुयात् सोऽभिषेकम् ॥ ३१८८ ॥

---

1. गमनेच्छवान्
2. आचाराग्र
3. विरोधवान्
4. मार्वं
5. पतापि
6. भाक् स्यात्
7. तुमालग्ने प्रजातश्च चापारूढे
8. उच्चगते राज्यधिपे बलाढये सुते नृपेशेन शुभेनयुक्ते
9. जाताकल्पद्रुमाढये सकलनृपपरे सूय
10. चत्वारित्रर्षान्
11. द्वात्रिंशाद्
12. अभ्यषिञ्च करोति

भाग्येश्वरस्यांशपतिः स्थिरांशे[1]
तन्नाथ[2]राशीशतदुच्चनाथाः ।
लग्नेश्वरात् केन्द्र[3]गता यदि स्यु
[4]शुक्रेण युक्तास्तु च पारिजातः ॥ ३१८९ ॥

राजा धर्मविशारदो नृपजनैर्वन्द्यो धनुश्शास्त्रवित्
कालज्ञः करुणानिधि[5]र्हि विनयी सत्पुत्रवित्तान्वितः ।
[6]सोमतुल्यजनाभिराममनयनः प्रख्यातकीर्तिर्भुवि
[7]भुक्त्वा भोगान् सुपारिजातजनितो विंशायुषान्तं तथा ॥ ३१९० ॥

[8]चन्द्रलग्नाधिपे स्वोच्चे चन्द्रारूढे शुभेक्षिते ।
मन्दारयोग [9]इत्याहुः ख्यातो वित्ते निशाकरे ॥ ३१९१ ॥

मन्दारयोगेत्रृषभे[10] विलग्ने
भूपालसेवी धनिकोवदान्यः ।
गजाश्वनाथः सुकृती गुणाढ्यो
देवद्विजाराधनपुण्यभाक् स्यात् ॥ ३१९२ ॥

कर्मेशे रिपुराशिस्थे राजसेवी सुबुद्धिमान् ।
षष्ठाधिपेन संयुक्ते षष्ठे राज्याधिपत्यवान् ॥ ३१९३ ॥

अथ वा सैनिकाध्यक्ष अमात्यजनमित्रवान् ।
दारत्रय[11]युतश्चैव भाग्यवांश्च न संशयः ॥ ३१९४ ॥

कर्मस्थानाधिपे मन्दे भाग्येशेन समन्विते ।
बहुभाग्यार्थसम्पन्नो भूपांशे भूपतिः स्मृतः ॥ ३१९५ ॥

---

1. स्थिरांश
2. राशिश्च
3. गतो यदिस्यात्
4. शुक्रेणयुक्ते यदि
5. विनयुतो यः
6. आचन्द्रात् सुगुणाभि
7. भुक्त्वाभोगसुपारिजातविभवो विंशायुषान्तंविदुः।
8. चन्द्रे
9. इत्याहुर्जाति वित्त
10. योगं मकरे
11. इतिप्रोक्त

अमात्ययोगे[1] सचिवो राजद्वाराधिकारवान् ।
भटांशगे कर्मनाथे बहुसेनाश्वनायकः ॥ ३१९६ ॥

रन्ध्राधिपेन संयुक्ते [2]स्वल्पयोगो भवेद्ध्रुवम् ।
धर्मकर्माधिनेतारौ [3]राज्यलाभाधिपौ यदि ॥ ३१९७ ॥

तयोः संबन्धमात्रेण न [4]योगो भवति ध्रुवम् ।
कर्माधिपे दरिद्रांशे सदा दारिद्र्य[5]संयुतः ॥ ३१९८ ॥

उञ्छवृत्ति[6]करोतीह भिक्षाशी वा न संशयः ।
कर्मेशे यत्र [7]कुत्रापि राजामात्यांशगस्थिते ।
षष्ठाधिपेन संयुक्ते राजसेवी सुभाग्यवान् ॥ ३१९९ ॥

कर्माधिपे कर्मगते बलाढ्ये
शुभांशगे राजसमानबुद्धिः ।
श्रीमान् [8]धनाढ्यो वृषभेऽल्पपुत्रो
मेषे प्रजातो बहुपुत्रवान् स्यात् ॥ ३२०० ॥

कर्मस्थानाधिपे जीवे केन्द्रलाभत्रिकोणगे ।
पापान्विते [9]प्रसिद्धश्च नीचे राजसुतप्रियः ॥ ३२०१ ॥

स्वोच्चे राजाश्रयं सौख्यं पित्रार्जितधनाढ्यवान् ।
द्यूनयोगे कर्मनाथे भिक्षाशी नात्र संशयः ॥ ३२०२ ॥

लाभाधिपेन संयुक्ते क्वचित् सौख्यं क्वचित् सुखम् ।
कर्मस्थानाधिपे भौमे [10]स्वोच्चांशे नीचराशिगे ॥ ३२०३ ॥

भानुक्षेत्रे [11]प्रसिद्धश्च परवित्तापहारवान् ।
मृतप्रजाबहुत्वं स्यादथवा भ्रातृशोकवान् ॥ ३२०४ ॥

---

1. योगसचिवो
2. अल्पयोगं
3. राजा
4. योगं
5. जीवनम्
6. इति प्राहुः
7. यत्रेति
8. धनाढ्ये वृषभेऽल्पपुत्रे
9. प्रसिद्धं च नीचे राजा
10. स्वोच्चे
11. प्रसिद्धिश्च

स्वमित्रबान्धवज्ञातिवित्तापहरणात् सुखी ।
कालन्तरे [1]ह्यग्निमान्द्यज्वरेण मृतिमादिशेत् ॥ ३२०५ ॥

कर्माधिपे लाभगते स्वक्षेत्रे वा सुधार्मिकः ।
एक[2]पुत्रश्चिरायुष्मान् बहुपुत्रवियोगवान् ।
ऐश्वर्यांशे क्रिये शुक्रे चरराशिचतुष्टये ॥ ३२०६ ॥

—:*:—

## चरलग्ने परमेश्वरांशः ।

चरलग्ने प्रजातश्च गौरवर्णः शुभाकृतिः ।
मेषे शुक्रे वृषे भौमे मिथुने शनिसंस्थिते ॥ ३२०७ ॥

परमेश्वरांशे जातश्च बहुवाणिज्यजीवकः[3] ।
कर्मे पापांशगे शुक्रे तदीशे लाभराशिगे ॥ ३२०८ ॥

सत्यानृतावृत्तिजीवी सोदरस्वसृभ्रातृमान् ।
शिवभक्तिरतो नित्यं तटाकोद्यानधार्मिकः ॥ ३२०९ ॥

ज्येष्ठभ्रातृसुतद्वेषी गृहकृत्यकलापवान् ।
गार्हस्थ्य[4]जीवितो नित्यं शिवार्चनपरः सुखी ॥ ३२१० ॥

वैदिकाचारसंपन्नः पित्रार्जितधनाढ्यकः ।
भार्गवारूढगे मन्दे नीचांशे पार्श्वनाडिगे ॥ ३२११ ॥

[5]दयावान् वादवान् बाल्ये कामी विषयलोलुपः ।
अनाचारी[6] कचित् काले पश्चात् सन्मार्गवृत्तिमान् ॥ ३२१२ ॥

---

5. अग्निमान्द्यं     6. पुत्री चिरायुष्यं बहुभ्रातृ
1. जीवनम्     2. जीवनं चैव
3. दा....वादवान्     4. अनाचारं

उद्वाहकाले [1]कलहः स्वपितुः क्लेशमादिशेत् ।
[2]लाभभावगते मन्दे नीचांशे द्वन्द्वराशिगे ॥ ३२१३ ॥

ज्येष्ठभ्राता महारोगी दत्तपुत्र[3]युतो भवेत् ।
भ्रातृद्वयौ पुत्रवन्तावेकः कश्चिद्द्विभार्यकः[4] ॥ ३२१४ ॥

कालान्तरे पुत्रवांश्च [5]ह्यथ वा दत्तपुत्रवान् ।
सर्वज्येष्ठानुजो [6]भ्राता बहुपुत्रार्थसंयुतः ॥ ३२१५ ॥

कालान्तरे क्षयं [7]चैति दारारिष्टात् परं मृतिम् ।
[8]देवी नामांशगे शुक्रे भाग्यांशे कर्म[9]भावगे ॥ ३२१६ ॥

बहुभाग्यार्थसम्पन्नो ज्येष्ठ[10]दारे सुपुत्रवान् ।
कनिष्ठभ्रातृमान् रागी भ्रातृद्वयविनाशवान् ॥ ३२१७ ॥

एक[11]भ्राता चिरायुष्मानीश्वरांशकगे भृगौ ।
भाग्यांशगे सुताधीशे द्वादशे शनि[12]संस्थिते ॥ ३२१८ ॥

स्त्रीप्रजा[13]बहुलाश्चैव ह्यल्पपुत्रयुतो भवेत् ।
मित्रप्रजाबहुत्वं स्यात् पुत्रद्वययुतः सुखी ॥ ३२१९ ॥

शुक्रांशाधिपतौ जीवे भूसुतेन समन्विते ।
चरलग्ने प्रजातश्च धूर्तस्त्रीनायकः सुखी ॥ ३२२० ॥

ग्रन्थान्तरे मदाधीशे नीचांशे द्वन्द्वराशिगे ।
पाशांशगे प्रजातश्च [14]ह्यपवादकलत्रवान् ॥ ३२२१ ॥

---

1. कलहं स्वपिता
2. लाभेशारूढगे
3. प्रदो भवेत्
4. भार्यवान्
5. अथवा
6. भ्रातुर्बहुपुत्रार्थपश्चकः
7. चेति दारारिष्टात् परं मृतिः
8. देवि
9. कर्मदायगे
10. भार्या
11. भ्रातृचिरायुष्यमीश्वरांश
12. जातके
13. बह्वश्चेति अल्पपुत्रप्रदो
14. अपवाद

सुतेशे लाभराशिस्थे भाग्येशेन समन्विते ।
बहुप्रजालाभमेति पुत्रद्वययुतः सुखी ॥ ३२२२ ॥

सप्तमेन तदीशेन भृगुणादारचिन्तनम् ।
नीचांशगे दारनाथे [1]दारवंशः क्षयं गतः ॥ ३२२३ ॥

लग्नात् तृतीयगे [2]राह्वावंशराशिं गते भृगौ ।
श्वशुरस्य द्विभार्यस्य दारान्तरसुतः स्मृतः ॥ ३२२४ ॥

[3]अचरांशगते शुक्रे विषनाशांशजस्य च ।
विपद्दाये विवाहः[4] स्यान्मात्ररिष्टात् परं हि वा ॥ ३२२५ ॥

ज्येष्ठभ्रातृवियोगादिक्लेशं प्राप्नोति भूरिशः ।
कर्मेशे लाभराशिस्थे भाग्येशेन समन्विते ॥ ३२२६ ॥

जन्मप्रभृति सम्पन्नो यावज्जीवान्तभाग्यवान् ।
कर्मे शुक्रे तदी[5]शे च स्वोच्चांशे गुरुसंयुते ॥ ३२२७ ॥

पुत्रमूलात् सुसन्तोषी वार्धके बहुभाग्यवान् ।
देवीनामांशगे शुक्रे तत्त्रिकोणे निशाकरे ॥ ३२२८ ॥

पापद्वयेन संदृष्टे [6]ह्यन्तः क्लेशविचारवान् ।
भ्रातृमूलेन सन्तोषी पापांशे पापवान् कचित् ॥ ३२२९ ॥

चन्द्राद्भाग्यं गते शुक्रे चापांशे मेषराशिगे ।
पापदृष्टि[7]विहीने च सदा सन्मार्गवृत्तिमान् ॥ ३२३० ॥

सेतुस्नानं त्रिवारं स्याद्गङ्गायात्राफलप्रदम् ।
अत्यन्तसुकृत[8]श्चैव स्वीश्वरांशे सुधार्मिकः ॥ ३२३१ ॥

---

1. दारवंशक्षयं
2. राहु अंश
3. अशरांशकरे शुक्रे विषनाशांशजातके ।
4. विवाहे
5. तदीशश्च
6. अन्तः
7. हीनं स्यात्
8. चेति ईश्वरांशे

देवीनाम्मश्वपर्याय [1]ईश्वरांश इति स्मृतः ।
[2]परमेश्वरी शूलिन्यौत्वीश्वरांशकसंज्ञिके ॥ ३२३२ ॥

शुक्रांशगे त्रिकोणर्क्षे स्फुटयोगं गते शनौ ।
स्वदारदेहजाड्यादि दारवंशे [3]ह्यरिष्टजम् ॥ ३२३३ ॥

भौमांशगे [4]पितृरिष्टं मातुश्च भार्गवांशगे ।
सौम्यांशगे वत्रिकोणे सोदरारिष्टमादिशेत् ॥ ३२३४ ॥

सिंहे नीचांशगे चन्द्रे मेषे पापांशगे भृगौ ।
प्रत्यग्दाये भाग्यवृद्धिः स्वप्राबल्यं भवेद्ध्रुवम् ॥ ३२३५ ॥

उत्तरार्धे विशेषं [5]च पुत्रप्राबल्यमादिशेत ।
पञ्चत्रिंशात् परं भूरि धनं संपादयिष्यति ॥ ३२३६ ॥

पञ्चविंशात् परं चैव [6]यत्किंचिद्धनलाभवान् ।
कर्मे चापांशगे शुक्रे सदाज्ञातिकलापवान् ॥ ३२३७ ॥

कालान्तरे शत्रुनाशं स्वप्राबल्यं महत् सुखम् ।
मेषान्त्यभागगे शुक्रे पञ्चमे काल[7]संस्थिते ॥ ३२३८ ॥

वार्धके ज्ञातिवित्तासिं[8] प्रत्यग्दाये परार्धगे ।
बहुव्यापारसिद्धिः स्यान्नित्यश्रीधनलाभवान् ॥ ३२३९ ॥

महादेवप्रसादेन धनलाभं दिने दिने ।
प्रत्यग्दाये मध्यखण्डे सिंहे गोचरगे शनौ ॥ ३२४० ॥

अतीव क्लेशकार्याणि यत्नकार्यार्थि[9]नाशनम् ।
बुधभुक्त्यपरार्धादियोगकाल इति स्मृतः ॥ ३२४१ ॥

---

1. ईश्वरांशमिति स्मृतम्
2. ईश्वरं नामसंज्ञिकम्
3. अरिष्टकृत्
4. पितारिष्टं जननी
5. विशेषं स्यात्
6. यत्किं च धन
7. जातके
8. आप्तिः
9. वित्तवान्

विशेषधनलाभादिगृहे गोधनसङ्कुलम् ।
बुधान्तरे सुपुत्राप्तिर्गोचरे मेषगे गुरौ ॥ ३२४२ ॥

पश्चाद्भाग्याभिवृद्धिः स्यात् प्रत्यग्दाये न संशयः ।
व्ययाधिपान्तरे काले व्ययेशे पापसंयुते ॥ ३२४३ ॥

दारपीडां मनस्तापं शिशुपीडां [1]विनिर्दिशेत् ।
लग्नात् तृतीयगे [2]राहौ दशायां भाग्यमश्नुते ॥ ३२४४ ॥

तदीशे लाभराशिस्थे परार्धे च [3]श्रियावहम् ।
षष्ठाष्टमव्यया[4]धीशभुक्तिकाले दशाव्यथा ॥ ३२४५ ॥

स्वजनारिष्टमाप्नोति ज्ञातिवर्गे विशेषतः ।
सुतेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ३२४६ ॥

प्रत्यग्दाये सोदरस्य सन्तानारिष्टमादिशेत् ।
सुतेशांशे तत्त्रिकोणे सुखेशांशत्रिकोणगे ॥ ३२४७ ॥

स्फुटयोगं गते मन्दे ज्ञातिवर्गे सुतक्षयः[5] ।
प्रभुवर्गे तथा विन्याद्दारवंशे [6]ह्यरिष्टजम् ॥ ३२४८ ॥

कलत्रदेहजाड्यादि क्षिप्रेणारोग्य[7]मश्नुते ।
दारेशांशत्रिकोणर्क्षे स्फुटयोगं गते गुरौ ॥ ३२४९ ॥

[8]चिरायुर्जायते पुत्रो देवीनामांशजस्य च ।
अर्थलाभं [9]च लभते शिवानुग्रहवान् भवेत् ॥ ३२५० ॥

ईश्वरांशे क्रिये शुक्रे प्रत्यग्दाये परार्धगे ।
बहुभार्यं [10]च लभते पञ्चत्रिंशात् परं सुखम् । ३२५१ ॥

---

1. इति स्मृतम्
2. राहु
3. श्रियावहं.
4. व्ययाधीशे अन्तर्दाये
5. क्षयम्
6. अरिष्टकृत्
7. सौख्यवान्
8. पुत्रोत्पत्तिचिरायुष्यं देवीनामांशजातके।
9. प्रकुर्वीत
10. इति प्राहुः

सूर्यकालाधिपे शुके दशमे धार्मिकः सुतः ।
कुजक्षेत्रे भाग्यवांश्च देवीनामांश[1]जस्तथा ॥ ३२५२ ॥

प्रत्यग्दाये धर्मबुद्धिः स्वपुरापुण्यहेतुना ।
उत्तरार्धे विशेषः[2] स्याल्लोके प्रख्यातकीर्तिमान् ॥ ३२५३ ॥

क्षेमदाये सुतप्राप्तिरल्पसौख्यं शुभाशुभम् ।
अस्वतन्त्र [3]इति प्राहुः सोदरस्य विवाहकृत् ॥ ३२५४ ॥

विपद्दाये पापबुद्धिः प्रत्यग्दाये सुबुद्धिमान् ।
विशेषज्ञानसिद्धिः स्याद्धर्मबुद्धिः श्रियावहा[4] ॥ ३२५५ ॥

व्यापारप्रबलं [5]चेति ह्युत्तरार्धे न संशयः ।
शुक्रान्तरे महत् सौख्यं बुधभुक्तौ दलं [6]व्यथाम् ॥ ३२५६ ॥

केतुभुक्तौ शुभाधिक्यं सौम्ये [7]पुत्रस्य शोभनम् ।
पश्चाद्भाग्याभिवृद्धिः स्याद्रविभुक्तौ शुभाशुभम् ॥ ३२५७ ॥

चन्द्रान्तरे मनस्तापं कुजभुक्तौ दलं [8]व्यथाम् ।
शुक्रांश[9]नाडीदोषेण ह्यष्टमर्क्षेश भुक्तिषु ।
[10]दारपीडां मनस्तापं स्वपुत्रादि[11]प्रपीडनम् ॥ ३२५८ ॥

कन्याशनिस्थिते काले गृहे कल्याणसंभ्रमम् ।
स्वपुत्रिकासुसन्तापं सिंहांशे शुभशोभनम् ॥ ३२५९ ॥

जन्मदेशे कलापं [12]च राजविप्लवमादिशेत् ।
दारारूढाधिपे भौमे स्वोच्चांशे स्थिरराशिगे ॥ ३२६० ॥

---

1. जातके
2. विशेषं
3. इति
4. श्रियावहम्
5. चेति उत्तरार्धे
6. व्यथा
7. पुत्रविवाहकृत्
8. व्यथा
9. नाडिदोषेण
10. दारापीडमनस्
11. पीडितः
12. स्यात्

[1]एक भार्यामवाप्नोति देवीनामांशजस्तथा ।
प्रत्यब्दाये मध्यखण्डे स्वकलत्रं तु दुर्बलम् ॥ ३२६१ ॥

देहायासं द्वित्रिवारं सूतिकावायु[2]पीडनम् ।
तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ॥ ३२६२ ॥

जन्मे शनिस्थिते काले विषनाशांश[3]जस्तथा ।
देहायासं च [4]लभते शान्त्या शान्तिं प्रयास्यति ॥ ३२६३ ॥

साधनेशदशाकाले मेषे [5]शुक्रे च संस्थिते ।
पुत्रमूलात् सुसन्तोषी गृहे गोधनसंकुलम् ॥ ३२६४ ॥

शुक्रांशेशदशाकाले देवीनामांश[6]जस्य च ।
बहुभाग्याभिवृद्धिः स्यात् स्वभुक्तौ व्याकुलं क्वचित् ॥ ३२६५ ॥

रन्ध्राधिपान्तरे काले षष्ठाधिपतिदायके ।
दारपीडां मनस्तापं पश्चादारोग्यमादिशेत् ॥ ३२६६ ॥

बुधान्तरेऽपमृत्युः स्याच्छान्त्या शान्तिं प्रयास्यति ।
शुक्रांशेशदशाकाले भोगं रोगं च निर्दिशेत् ॥ ३२६७ ॥

भाग्याधिपदशाकाले स्वभुक्तौ प्रभुनाशनम् ।
रन्ध्राधिपान्तरे काले विक्रमेन मनोव्यथा ॥ ३२६८ ॥

ईश्वरांशकगे शुक्रे मेषे पापवि[7]र्जिते ।
जन्मप्रभृति सौख्यं च यावदायुष्यभाग्यवान् ॥ ३२६९ ॥

भाग्याधिपदशाकाले पुत्रमूलेन सौख्य[8]वान् ।
[9]प्रत्यब्दशापरार्धादौ साधनेशदशासुखम् ॥ ३२७० ॥

---

1. कलत्रस्यैकमाप्नोति देवीनामांशजातके ।
2. पीडितः
3. जातके
4. प्रकुर्वीत
5. शुक्रस्य जातके
6. जातके
7. विवर्जयेत्
8. सौख्यकृत्
9. प्रत्यगीशपरार्धवि

वेधग्रहान्तरे काले क्रूरमासे [1]महाविपत् ।
नानाव्याकुलकार्याणि पश्चात् सौख्यं महत् सुखम् ॥ ३२७१ ॥

[2]मेषे चापांशगे शुक्रे कुलीरे च प्रजायते ।
जीवे कुज[3]युते काले बहुवित्तयुतः सुखी ॥ ३२७२ ॥

वार्धके नेत्र[4]रोगी च वयो मध्येऽग्निमान्द्यवान् ।
वार्धके पुत्रमूलेन [5]ह्यतिसौख्ययुतः सुखी ॥ ३२७३ ॥

[6]आयुष्मन्तौ च पुत्रौ द्वौ साधनेशदशासुखम् ।
पश्चाद् भूपतिजन्मा स्यान्मण्डलत्रयनायकः ॥ ३२७४ ॥

नैधनेशदशाकाले रन्ध्राधिपतिभुक्तिषु ।
द्विषष्ट्यब्दे [7]मृतिं चैति कुम्भादित्रयमासगे ॥ ३२७५ ॥

मेषमासे कृष्णपक्षे रन्ध्राधिपतिवासरे ।
[8]स्वपित्ररिष्टदेशेषु पुण्यक्षेत्रे भविष्यति ॥ ३२७६ ॥

चन्द्राद्भाग्यं गते शुक्रे लग्नाद्भाग्यं गतेऽथ वा ।
जात्यानुगुण्यलोकादिं सत्याचारसुभाग्यवान् ॥ ३२७७ ॥

परेश्वरांशगे शुक्रे चन्द्राद्भाग्यं गते [9]सति ।
ईश्वरांशे [10]राजयोगः पश्चाज्जन्मनि संभवेत् ॥ ३२७८ ॥

[11]जन्मनीहसुखं चैति वार्धके बहुवित्तवान् ।
[12]आयुष्मन्तौ च पुत्रौ द्वौ पुत्रिकात्रयवान् भवेत् ॥ ३२७९ ॥

---

1. महद्विपत्
2. मेष चापांशगे शुक्रे कुलीरे लग्नजातके ।
3. युतः कालो बहुवित्तप्रदः
4. पीडा
5. अतिसौख्यप्रदः
6. पुत्रद्वयं चिरायुष्यं
7. मृतं चेति
8. स्वपिता
9. बली
10. योगं पश्चाज्जन्म न संशयः
11. इह जन्मे सुखं चेति
12. पुत्रद्वयं चिरायुष्यं

महार्णवप्रान्तदेशे स्वपुत्र[1]श्च श्रियायुतः ।
धनधान्यसमृद्धिः स्यादेकभ्रातृयुतः सुखी ॥ ३२८० ॥

ईश्वरांशे फलं सत्यं शुकनाडीफलं स्मृतम् ।
[2]लग्नाधियोगजातश्च प्रजेशांशे सुभाग्यवान् ॥ ३२८१ ॥

प्रजापालनवान्नित्यं गजान्तैश्वर्ययोगवान् ।
स्थिरलग्ने प्रदेशांशे [3]लग्नयोगाधिसंभवः ।

राजवंशे सुराजास्तिरितरस्तु[4] सुभाग्यवान् ॥ ३२८२ ॥

—: * :—

## वृश्चिक मकरलग्नयोः सुरांशः

सुरांशे मकरे लग्ने पूर्वभागे प्रजायते ॥ ३२८३ ॥

विप्रजन्मा सुखी नित्यं [5]तुरीयगर्भसंभवः ।
श्रमेस्रावातुरा माता [6]पूर्वं च क्लेशसंयुता ॥ ३२८४ ॥

सुरांश[7]जस्य जननी प्रसूयेमलपुत्रकौ ।
सुरांशाधिपतौ जीवे कुम्भे [8]मेषांशके तथा ॥ ३२८५ ॥

शन्यङ्गारकसंदृष्टे योगोऽयं [9]यमलः स्मृतः ।
सिंहे मेषांशगे मन्दे चापांशे भूमिनन्दने ॥ ३२८६ ॥

[10]प्रसवे लग्नभेदः स्यात् सुरांशे यमलौ स्मृतौ ।
लग्नाष्टमगते मन्दे भूसुतेन समन्विते ।
[11]द्वितनुस्थौ च यमलौ भवतः नालवेष्टितौ ॥ ३२८७ ॥

---

1. पुत्रस्य श्रियावहम्
2. लग्नादियोगजातश्च प्रायेशांशे
3. लग्नादियोगजातके
4. इतरस्य
5. चतुर्थे गर्भजाकम्
6. सा पूर्वं क्लेशमादिशेत्
7. सुरांशकस्य जननी यमलौ पुत्रिणः सुखी
8. मेषांश जातके
9. यमलं भवेत्
10. प्रसवं लग्नभेदं
11. द्वितनुस्थैश्च यमलौ भवतः कोशवीक्षिते

मनुः—

मीनांशे मकरे लग्ने स्व[1]द्रेकाणे च जायते ।
मेषांशगे विलग्नेशे सिंहे कुजसमन्विते ॥ ३२८८ ॥

योगोऽयं यमलो नाम [2]जेष्ठोऽप्यस्य तु दत्तकः ।
बालारिष्टभयं किंचिद्वाल्ये मान्द्यप्रपीडितः ॥ ३२८९ ॥

मीनांशे मकरे लग्ने [3]सुरांशे च प्रजायते ।
सप्तमांशकगे [4]मान्दौ नवमे दत्तपुत्रवान् ॥ ३२९० ॥

तुलांशगे निशानाथे मेषांशे भानुनन्दने ।
मीनांशे मकरे लग्ने द्विमात्रोरपि पोषकः ॥ ३२९१ ॥

अन्यस्त्रीस्तन्यपानं स्यान्मीनांशे [5]जनितस्य च ।
कीटे नकांशगे [6]जातो दुर्भगांशसमन्विते ॥ ३२९२ ॥

लग्नाद्द्रेश्मगते चन्द्रे स्वमातृपितृपोषकः ।
दुर्भगांशे सुरांशे च पूर्वभाग[7]समुद्भवः ॥ ३२९३ ॥

लग्नेशे गुरुसंदृष्टे विप्रजन्मा सुखी भवेत् ।
वनान्तरपुरे जन्म[8]वीथ्योश्च यमसोमयोः ॥ ३२९४ ॥

नदीप्रान्त्यपुरे वापि [9]वारुण्यां दिशि जायते ।
[10]दुर्भगांशस्थिते सौम्ये चापांशे चन्द्रसंयुते ॥ ३२९५ ॥

चापारूढवशाद्भाग्यं [11]दृढदेहस्वरूपवान् ।
सिंहे शुक्रयुते चन्द्रे तुलांशे बुधसंयुते ॥ ३२९६ ॥

---

1. सद्रेकाणश्च जातके
2. ज्येष्ठोऽन्यस्तस्य दत्तवान्
3. सुरांशश्चैव जातके
4. मान्दि
5. जायते फलम्
6. जाते दुर्भगांशस्य जातके
7. पूर्वभागश्च जातके
8. दक्षिणोत्तरवीथिषु
9. पश्चिमे भागजातकम्
10. दुर्भगांशाधिपा
11. गूढदेह

चापे [1]राहौ प्रजातश्च बाल्ये सौख्यविहीनवान् ।
प्रत्यग्दाये महद्भाग्यं जन्मदाये क्वचित् सुखम् ॥ ३२९७ ॥

तृतीयांशे परार्धादौ[2] पितृसौख्यं विनिर्दिशेत् ।
सुरांशके क्षेमदाये [3]ह्यपमृत्युभयं क्वचित् ॥ ३२९८ ॥

भौमे गुरुयुते दृष्टे शान्त्या शान्तिं प्रयास्यति ।
दुर्भगांशे जन्मदाये केतुदोषवशाद्विपत् ॥ ३२९९ ॥

[4]तृतीयेऽब्दे क्रूरमासे शान्त्या शान्तिं प्रयास्यति ।
प्रत्यग्दाये चोत्तरांशे [5]सुरांशे च प्रजायते ॥ ३३०० ॥

कालमृत्युभयप्राप्तिः क्षेमदायेऽपमृत्युमान् ।
सुरांशे चोत्तरे भागे [6]मृगलग्नोद्भवस्य च ॥ ३३०१ ॥

सिंहे कुजयुते मन्दे [7]विंशद्वर्षे मृतिं वदेत् ।
अल्पायुर्दायमित्याहुरत ऊर्ध्वं न जीवति ॥ ३३०२ ॥

दुर्भगांशे स्थिरे लग्ने ह्युत्तरांश[8]समुद्भवः ।
केतुदोषवशारिष्टं पापे जन्म[9]दशान्त्यगे ॥ ३३०३ ॥

जन्मताराधिपे शुक्रे [10]ह्युच्चग्रहसमन्विते ।
लग्नात् षष्ठाष्टमे मृत्यु[11]र्दुर्भगांशोद्भवस्य च ॥ ३३०४ ॥

पूर्वभागे च [12]यमलौ दुर्भगांशे चिरायुषौ ।
सुरांशगे तथा विन्द्याद्गुरुदृष्टिफलं स्मृतम् ॥ ३३०५ ॥

विलग्नाष्टमकर्मेशाः केन्द्रलाभत्रिकोणगाः ।
[13]शनिस्तु बलवान् यत्र पूर्णमायुर्भविष्यति ॥ ३३०६ ॥

---

1. राहु
2. परार्धादि
3. अपमृत्युः
4. स्त्रियाब्दे
5. सुरांशश्चैव जातके
6. मकरे लग्नजातके
7. वंशाविंशे
8. उत्तरांशस्य जातके
9. दशांशके
10. उच्चग्रहसमन्वितम्
11. ऋतुरांशस्य जतके
12. यमलं दुर्भगांशे चिरायुषत्
13. शनैश्चबलवांस्तत्र

दुर्भगांशे सुखे जीवे [1]मेषे चन्द्रे तुलांशगे ।
पूर्वभागे प्रजातस्य[2] बालारिष्टं न विद्यते ॥ ३३०७ ॥

रन्ध्राधिपतिदोषेण [3]बाल्ये किंचित् प्रपीडितः ।
शशिनोऽरि[4]ष्टनाशार्थं चन्द्रप्रार्थनमादिशेत् ॥ ३३०८ ॥

शङ्खकांस्यप्रदानेन बाल्ये [5]रोगाद्विमुच्यते ।
चन्द्रकल्पोक्तमार्गेण दानं कुर्याद्विचक्षणः ॥ ३३०९ ॥

दुर्भगांशे पूर्वभागे षष्ठे चन्द्रे न दोषभाक् ।
बुधयोगवशात् किंचिच्छान्तिं कुर्याद्विचक्षणः ॥ ३३१० ॥

जन्मताराधिपे शुक्रे गुरुणा च निरीक्षिते ।
बालारिष्टशतं [6]नश्येद्दीर्घमायुश्च विन्दति ॥ ३३११ ॥

सुरांशगे तथा विन्द्यात् पूर्वभागे फलं स्मृतम् ।
तुलांशे [7]च क्रिये चन्द्रे नक्रे मीनांश[8]जस्तथा ॥ ३३१२ ॥

सुरांशगे पूर्वभागे रक्तवर्णः शुभाकृतिः ।
जन्मलग्नांशगे मन्दे वीक्षिते वा प्रजायते ॥ ३३१३ ॥

नीचांशगे विलग्नेशे तृतीये [9]गर्भसंभवः ।
जन्मांशनाडी[10]योगेन जन्माब्दे दत्तपुत्रवान् ॥ ३३१४ ॥

वन्ध्यास्त्रीदोषकावस्थां [11]लग्नेशे सकुजे गते ।
अष्टमे गुरुदृष्टिश्चेत् किंचिद्बाल्ये [12]प्रपीडितः ॥ ३३१५ ॥

---

1. मेष
2. प्रजातश्च
3. बाले
4. शशिन्यरिबिविनाशार्थं
5. रोगं
6. चेति दीर्घं
7. तुलांशेन
8. जातके
9. जातकम्
10. नाडियोगेन
11. अवस्थे लग्नेशे कुजसंयुते
12. पीडवान्

मीनारूढे विलग्नेशे सुखलाभेशसंयुते ।
वित्ते जीवे प्रजातश्च विद्यावान् बुद्धिमान् सुखी ॥ ३३१६ ॥

धनवान् राजसेवी च सुवपुः शान्तचित्तवान् ।
लग्नाद्धनगते जीवे सुखभुग् द्वित्रिभाग्यवान् ॥ ३३१७ ॥

[1]लग्नाच्चतुर्थे चाये वा जीवे भाग्ययुतः सुखी ।
वाहेशेनयुते दृष्टे नरवाहनयोगवान् ॥ ३३१८ ॥

लग्नेशे कर्मराशिस्थे वाहेशेन युतेक्षिते ।
लग्नाच्चतुर्थगे जीवे स्थिरराशौ सुवाहनम् ॥ ३३१९ ॥

मेषांशगे सुखे जीवे बाल्येऽल्पसुखवान् भवेत् ।
मध्ये भाग्यसमृद्धिं च भ्रातृमूलात् सुकीर्तिमान् ॥ ३३२० ॥

जनपरिभूते राजसेवी भोगार्थसंयुतोऽतिमतिमान् ।
मातृप्रियो मन्त्रिसमबुद्धिर्भ्रातृमान् हिबुके [2]स्थिते जीवे ॥ ३३२१ ॥

[3]मेषांशगे वा कुम्भे वा राजद्वारे स्वतन्त्रवान् ।
राजप्रतापयुक्तश्च शूरो धीरः सुबुद्धिमान् ।
नक्रांशे वृश्चिके लग्ने कुम्भे जीवे सुभाग्यवान् ॥ ३३२२ ॥

वाहनाढ्यो राजतुल्यो लिपित्रयविशारदः ।
मीनांशे मकरे लग्ने कुम्भे जीवे सुबुद्धिमान् ।
रविजेनयुते दृष्टे पुत्रशोकेन कर्शितः ॥ ३३२३ ॥

लेख्यविद्यासुनिपुणः कलत्रद्वयनाशवान् ।
क्षेमदाये महद्भाग्यं प्रत्यग्दाये सुबुद्धिमान् ॥ ३३२४ ॥

मेषांशगे घटे जीवे पापद्वयनिरीक्षिते ।
[4]मृगलग्ने प्रजातश्च क्रोधी मानी सुसात्त्विकः ॥ ३३२५ ॥

---

1. चतुर्थानचरे जीवे भाग्यप्रदः
2. हिबुके....जीवे
3. कुम्भे मेषांशजातके
4. मकरे लग्नजातस्य क्रोधमानः

ग्रन्थान्तरे [1]गर्गमते मूर्खः शूरोऽतिवित्तवान्।
श्रीमान् सदानृतः कामी [2]ह्यन्तःकुटिलबुद्धिमान्॥ ३३२६ ॥
त्यागी भोगी समानी च दयादाक्षिण्यबुद्धिमान्।
मेषांशे हिबुके जीवे सत्कलत्रद्वयः सुखी ॥ ३३२७ ॥

—।*।—

## वृश्चिकलग्ने दुर्भगांशः

साधुकाले सोमवारे [3]कीटलग्नसमुद्भवः।
लग्नात् कर्मगते जीवे भ्रातृत्रयसुपूजितः॥ ३३२८ ॥

प्रसन्नवदनः कामी स्त्रीणां च प्रियदर्शनः।
मृदुकायोऽल्पवचनः [4]सोमवारे च जायते॥ ३३२९ ॥

मन्दे लग्ने सोमवारे कोपप्रकृतिमान् सदा।
परदाररतो भोक्ता कृतघ्नः क्रूरवाग्धनी॥ ३३३० ॥

मन्दप्रकृतिवातात्मा शौर्यसाहसकृत्यवान्।
वाराधीशे तुला[5]रूढे स्त्रीलोलः सुरतप्रियः॥ ३३३१ ॥

नक्रांशे वृश्चिके लग्ने सोमवार[6]समुद्भवः।
प्रच्छन्नपापवान् रागी क्रोधी मानी सुभाग्यवान्॥ ३३३२ ॥

दुर्भगांशे पूर्वभागे ज्येष्ठभ्राता[7] प्रसिद्धिमान्।
राजद्वारे सुपूज्यश्च यमलभ्रातृमान् सुखी॥ ३३३३ ॥

सोदराः सप्त तेषां द्वौ प्रबलौ राजवल्लभौ।
[8]द्वे भगिन्यौ चिरायुष्यौ दीर्घमाङ्गल्यसंयुते॥ ३३३४ ॥

---

1. होरे
2. अन्तःकुटिलवाक्यवान्
3. वृश्चिके लग्नजातके
4. वारस्य जातके
5. तुलालग्ने
6. वारस्य जातके
7. भ्रातृ
8. भगिनीद्वयमायुष्यं बहुकालं सुमङ्गली।

स्वज्येष्ठभगिनी पूता बहुभ्रातृसमन्विता ।
पुत्रिणी पति[1]भक्ता च श्वश्रूश्वशुरसंयुता ॥ ३३३५ ॥

भ्रातृमूलात् सु[2]सन्तुष्टा भर्तृभाग्यसमन्विता ।
पितृभाग्यसमा[3]युक्ता पितृमातृप्रिया सदा ॥ ३३३६ ॥

ग्रन्थान्तरे दुर्भगांशे [4]पूर्वभागोद्भवस्य च ।
[5]आयुष्मत्यस्त्रिभगिन्यस्तत्रैका क्लेशेन कर्शिता ॥ ३३३७ ॥

सहोदरभ्रातृयोग[6]चतुष्टयमिति स्मृतम् ।
दीर्घायुर्योग [7]इत्याहुः शेषं नाशमितीरयेत् ॥ ३३३८ ॥

पितृस्थानाधिपे चन्द्रे तुलांशे मेषराशिगे ।
दुर्भगांशे पूर्वभागे पिता सोदरशोकवान् ॥ ३३३९ ॥

सोदरभ्रातृहीनश्च [8]पादे चक्राङ्कितः स्मृतः ।
वैष्णवाचारवान् किंचित् पश्चाद्वैदिकमार्गवान् ॥ ३३४० ॥

पितृस्थानाधिपे चन्द्रे निधनाधिपसंयुते ।
स्वपिता कृश[9]देही च दयासत्याभिमानवान् ॥ ३३४१ ॥

दुर्भगांशे पिता रोगी गृहच्छिद्रकलापवान् ।
पितृसौख्यविहीनश्च पितृभाग्यविहीनवान् ॥ ३३४२ ॥

मातृसौख्यविहीनश्च [10]ह्यन्यस्त्रीरन्नपानवान् ।
स्वभुजार्जितसम्पन्नो राजद्वारे प्रसिद्धिमान् ॥ ३३४३ ॥

बुधसंयुतदोषेण वैष्णवद्वेषहेतुना ।
राजद्वारेऽप[11]कीर्त्या च क्लेशं प्राप्नोति भूरिशः ॥ ३३४४ ॥

---

1. भक्तिः स्याच्छ्वश्रूश्वशुरसंयुते
2. सन्तोषी
3. युक्तः पितृमातृप्रियः सदा
4. भागस्य जातके
5. भगिनीत्रयमायुष्मेका
6. योग
7. इत्याहुः
8. बाल्ये
9. देहश्च
10. अन्यस्त्री
11 कीर्तिश्च

कुम्भारूढे विलग्नेशे सिंहे शनिसमन्विते ।
कुम्भे जीवे प्रजातस्य[1] स्वपिता राजपूजितः ॥ ३३४५ ॥

द्वितीयाब्दान्तमारभ्य जन्मदाये सुभाग्यवान् ।
मित्रमूलात् सुसन्तोषी नरवाहनयोगवान् ॥ ३३४६ ॥

लग्नारूढपदे सूर्ये [2]स्वोच्चांशे च प्रजायते ।
[3]स्वपितुर्भाग्यवृद्धिः स्यात् तृतीयाब्दे न [4]संशयः ॥ ३३४७ ॥

द्वितीयाब्दान्तमारभ्य सुयोगं पञ्चवत्सरे ।
मध्ये सुवाहप्राप्तिं च [5]कीटलग्नोद्भवस्य च ॥ ३३४८ ॥

स्वपिता दीर्घमायुष्यं पुत्रमूलेन सौख्यवान् ।
गृहेश[6]वक्रयोगेन कीटलग्नोद्भवस्य च ॥ ३३४९ ॥

[7]उच्चांशजन्मतारेशदशायां भाग्यमश्नुते ।
तृतीयांशे सुभाग्याप्तिं[8] पितृभाग्यं विनिर्दिशेत् ॥ ३३५० ॥

[9]सुरांशपूर्वभागे तु कीटलग्नोद्भवस्य च ।
उच्चग्रहांश[10]योगेन क्लेशी वन्ध्यापतिः पिता ॥ ३३५१ ॥

सोदरभ्रातृहीनश्च[11] सपत्नीभ्रातृमान् सुखी ।
भिन्नोदरस्व[12]सुर्योगं व्ययं चेति विनिर्दिशेत् ॥ ३३५२ ॥

केतुप्रकृतिमान् रागी पुराब्राह्मणशापवान् ।
सुरांशे दत्तजनकः[13] प्रतिबन्धप्रपीडितः ॥ ३३५३ ॥

---

1. प्रजातश्च
2. स्वोच्चांशस्य च जातके
3. स्वपिता भाग्य
4. संयुतः
5. वृश्चिके लग्नजातके
6. गृहेशचक्रयोगेन वृश्चिके लग्नजातके
7. उच्चांशे
8. भाग्याप्तिः
9. सुरांशे पूर्वभागे तु मकरे लग्नजातके ।
10. योगस्य क्लेश
11. हीनस्य
12. स्वसा योगं
13. जननः

अल्पभाग्यं [1]च लभते पितृमूलात् सुसौख्यवान् ।
दुष्टप्रकृतिमान् कोपी शिवार्चनपरः सुखी ॥ ३३५४ ॥

दत्तपुत्रवशात् सौख्यं वार्धके[2] श्रीधमान्वितः ।
ज्ञातिप्राबल्ययोगेन सुरांशे पितृसौख्यवान् ॥ ३३५५ ॥

लग्नात् पञ्चमगे सूर्ये [3]त्वसितेन निरीक्षिते ।
सुरांशगे प्रजातश्च पञ्चमाद्द्वित्रि[4]वत्सरम् ॥ ३३५६ ॥

अतीव क्लेशकार्याणि पितृपीडां[5] विनिर्दिशेत् ।
पितामहभ्रातृदोषं नक्षत्रेशदशान्त्यगे ॥ ३३५७ ॥

स्वपिता व्याकुलं [6]चैति जननी च तथा भवेत् ।
लग्नाष्टमगते मन्दे [7]भानौच पञ्चमस्थिते ॥ ३३५८ ॥

स्वपिता बुद्धिहीनश्च क्लेशजीवनभाग्भवेत् ।
उच्चांशक गते सूर्ये पञ्चमेशनिरीक्षिते ॥ ३३५९ ॥

स्वपिता क्लेश[8]युक्तश्च बहुकालं सुजीवति ।
शुक्रे केतुयुते जातो [9]मृगराशिगते तथा ॥ ३३६० ॥

पितामहप्रसिद्धश्च विधवागमनोत्सुकः ।
आयुष्येन भयं किंचिद्भहुसोदरिसोदरः ॥ ३३६१ ॥

उच्चांशक गते शुक्रे सोदरभ्रातृपोषकः ।
एकपुत्र[10]युतः श्रीमान् दारान्तरसुपुत्रवान् ॥ ३३६२ ॥

वार्धके क्लेशबाहुल्यं ऋणग्रस्तप्रपीडितः ।
सुरांशगे पञ्चमाब्दे मृतिं विन्द्यात् पितमहः ॥ ३३६३ ॥

---

1. प्रकुर्वीत
2. वार्धक
3. असितेन
4. वत्सरे
5. पीडा
6. चेति
7. पञ्चमे भानुजातके
8. मात्र स्याद्
9. मत्स्यलग्नेन जातके
10. शतः

अथ वा जन्मवर्षे च संन्यासे मृतिमादिशेत् ।
पुरास्वकृतपुण्येन सुरांशो [1]स्वपितुः पितुः ॥ ३३६४ ॥

आपत्संन्यासबुद्धिः स्यात् सम्पद्दाये मृतिं वदेत् ।
दुर्भगांशे पूर्वभागे [2]कीटलग्नोद्भवस्य च ॥ ३३६५ ॥

सुतेशे शनिसंयुक्ते दीर्घायुः स्वपितामहः ।
भ्रातृमूलात् सुसन्तोषी मध्ये दारवियोगवान् ॥ ३३६६ ॥

पुत्रमूलात् क्वचित् सौख्यमप[3]त्नीकश्चिरं भवेत् ।
वार्धके नेत्र[4]हानिं च ह्यापत्संन्यासमादिशेत् ॥ ३३६७ ॥

[5]शिशोश्च जननात् पूर्वं दुर्भगांशे पितामहः ।
[6]अरिष्टं लभते सोऽपि दुर्भगास्त्रीरतिप्रियः ॥ ३३६८ ॥

[7]पितामहौ द्वौ यमलौ समुत्पन्नौ तथा स्मृतौ ।
दुर्भगास्त्रीरतो नित्यं बहुकामातुरो भवेत् ॥ ३३६९ ॥

स्वपिता विधवा[8]सङ्गी दुर्भगांशोद्भवस्य च ।
[9]स्वमातरि विरोधी च वंशदोषबहुत्ववान् ॥ ३३७० ॥

लाभेशे शुभसंयुक्ते [10]दुर्भगांशोद्भवस्य च ।
ज्येष्ठ[11]भ्राता प्रसिद्धश्च वाहनत्रयभाग्यवान् ॥ ३३७१ ॥

विंशद्वर्षात् परं सौख्यं स्वपि[12]त्रधिकभाग्यवान् ।
दुर्भगांशे विपद्दाये ज्येष्ठ[13]भ्राता श्रिया युतः ॥ ३३७२ ॥

---

1. स्वपितामहः
2. वृश्चिके लग्नजातके
3. पत्निवान्
4. हानिश्च आपत्
5. जातस्य
6. अरिष्टमितिमाप्नोति
7. पितामहाद्द्वये वापि यमले योगजातके ।
8. सङ्ग दुर्भगांशस्य जातके
9. मातुरुंधतश्चेति
10. अशस्य जातके
11. भ्रातृप्रसिद्धश्च
12. स्वपिता
13. भ्रातृश्रियावहम्

नरवाहनभूप्राप्तिर्बहुसन्ताननाशवान् ।
कलत्रद्वयवान् कामी [1]ह्यन्नदानप्रदः सुखी ॥ ३३७३ ॥

पितृमातृप्रियो नित्यं सोदरभ्रातृपोषकः ।
[2]ज्येष्ठभ्राता चिरायुष्मान् यमलांशोद्भवस्य च ॥ ३३७४ ॥

लाभेशो यन्नवांशस्थे सप्तमे तत्त्रिकोणगे ।
ज्येष्ठ[3]भ्रातुर्दुर्भगांशो जन्मनक्षत्रभं विदुः ॥ ३३७५ ॥

सूर्यांशे तत्त्रिकोणेऽपि पितृनक्षत्रमुच्यते ।
सुरांशगे फलं सत्यं दुर्भगांशे तथा भवेत् ॥ ३३७६ ॥

दुर्भगांशे घने [4]राहौ भार्गवेणे क्षितेयुते ।
म्लेच्छ[5]राज्ये महद्भाग्यं म्लेच्छसेवापरो भवेत् ॥ ३३७७ ॥

[6]तदभावे म्लेच्छगोष्ठीत्यागभोगवदान्यवान् ।
परवित्तेच्छुर्हि नित्यं बहुस्त्रीसङ्गतत्परः[7] ॥ ३३७८ ॥

दुर्भगांशकगे कीटे [8]मकरांशे च जायते ।
दुर्भगास्त्रीरतो नित्यं [9]जनयिष्यति पुत्रिकाम् ॥ ३३७९ ॥

राजयोगं [10]च लभते ह्यथवा रूपवान् सुखी ।
सुरांशे च प्रजातश्च [11]ह्यनाचारी कचित् कचित् ॥ ३३८० ॥

पश्चात् पाप[12]शरीरश्च वार्धके ज्ञानवान् भवेत् ।
मृतप्रजाबहुत्वं स्यात् पुत्रद्वयसमन्वितः ॥ ३३८१ ॥

---

1. अन्नदानप्रदः
2. ज्येष्ठभ्रातृचिरायुष्यं यमले योगजातके
3. भ्रातृजन्म
4. राहु
5. राज्यं
6. तथा
7. पारवान्
8. अंशश्च जातके
9. जनयिष्यन्ति पुत्रिका ।
10. प्रकुर्वीत अथ वा
11. अनार्यारं
12. शरीरश्च

पुत्रिका च तथा विन्द्यात् सुरांशे पूर्वभागगे ।
दुर्भगांशे पूर्वभागे [1]कीटलग्नोद्भवस्य च ॥ ३३८२ ॥

पुत्रिकाद्वयमायुष्यं [2]पुत्राणां तु चतुष्टयम् ।
दीर्घायुषमितिप्राहुर्दारद्वयसुपुत्रवान् ॥ ३३८३ ॥

[3]लग्नाच्चन्द्रात् सुते मन्दे भूसुतेन समन्विते ।
सुताधिपेन संदृष्टे बहुस्त्रीपुत्र[4]संयुतः ॥ ३३८४ ॥

[5]चन्द्रसौम्यौ यदैकस्थावेकांशौ पापराशिगौ ।
ग्रहदृष्टि[6]विहीनौ च द्विसुतौ यमलौ स्मृतौ ॥ ३३८५ ॥

कुलीरे वृश्चिके मीने मकरे तत्त्रिकोणगे ।
मकरांशे प्रजातश्च [7]स पापे यमलौ स्मृतौ ॥ ३३८६ ॥

चापांशगे चान्त्यभागे मकरांशादिभागगे ।
लग्नांशगे[8] पापभागे यमलः स्यान्न संशयः ॥ ३३८७

मेषत्रिकोणगे चन्द्रे तुलांशे बुधसंयुते ।
स्थिरलग्ने प्रजातश्च यमलो भाग्यवान् सुखी ॥ ३३८८ ॥

[9]कुम्भत्रिकोणगे चन्द्रे स्वसुतेन समन्विते ।
एकांशगे [10]प्रजातश्च क्लेशी यमलसंभवः ॥ ३३८९ ॥

वित्तत्रिकोणगे चन्द्रे [11]यमलांशे च संस्थिते ।
स्थिरलग्ने [12]प्रजातश्च भोगभाग्ययुतः सुखी ॥ ३३९० ॥

---

1. वृश्चिके लग्नजातके
2. पुत्रयोगं
3. लग्नचन्द्रात्
4. पुत्रवान्
5. चन्द्रे सौम्ये यदेकस्थे एकांश पापराशिषु ।
6. विहीनस्य द्वितनौ स्यात् प्रजायते
7. पापे यमलजातके
8. लग्नांशे(ये)
9. कुम्भे
10. प्रजातस्य क्लेशी यमलजातकम्
11. यमले योगजातके
12. प्रजातस्य भोगभाग्यप्रदः

तेजस्वी मतिमान् कामी विद्वज्जनसुभाषितः ।
सेनामात्यप्रियो नित्यं नरवाहनयोगवान् ॥ ३३९१ ॥

देशान्तरे भाग्ययोगं [1]पित्रा सह गमिष्यति ।
[2]पुण्यतीर्थं गतो बाल्ये कीर्तिमांल्लोकपूजितः ॥ ३३९२ ॥

वृश्चिके यमले योगे नानाभाषाविचक्षणः ।
कोङ्कणे केरलप्रान्ते सञ्चारी धनलाभवान् ॥ ३३९३ ॥

वनान्तरे प्रभुस्नेहं बाल्ये किंचित् सुखावहम् ।
बहुक्षेत्रार्थसंपन्नो मध्ये वयसि योगवान् ॥ ३३९४ ॥

सेनामात्यद्विजस्नेहं महाराजश्रिया सुखम् ।
पुरपालाधिकारं[3] च राजामात्यप्रसादनम् ॥ ३३९५ ॥

मेषत्रिकोणगे चन्द्रे तुलांशे द्वन्द्वगे[4] तथा ।
[5]श्रीमान् सुकीर्तिमान् भोगी हेमरत्नप्रपूजितः ॥ ३३९६ ॥

युवती प्रियवान् कामी कुलस्त्रीसङ्गपापवान् ।
शुक्रे पापयुते जातो मिथुने मैथुनप्रियः ॥ ३३९७ ॥

स्वस्त्रीदोषं कचिच्चैव [6]भवेतां अग्रजौ तथा ।
षष्ठाष्टमगते शुक्रे गुरुसंयुतवीक्षिते ॥ ३३९८ ॥

बाल्ये स्वपुत्रकार्श्येन [7] वैधव्येन च कर्शिता ।
मेषत्रिकोणगे चन्द्रे तुलांशे[8] स्वपिता सुखी ॥ ३३९९ ॥

वैदिकाचारवान् कामी [9]यागकृत् पुण्यतीर्थवान् ।
जन्मदाये तृतीयांशे [10]यमलांशोद्भवस्य च ॥ ३४०० ॥

---

1. स्वपिता सहयात्रवान्
2. तीर्थप्रदो
3. कारः स्याद्राजामत्यप्रसादवान्
4. ज तके
5. कीर्तिश्रीमान महाभोगी
6. कचिच्चैव अग्रजौ च तथा भवेत्
7. अमाङ्गल्येन
8. तुलांश
9. ग्रंथिमान्
10. यमले योगजातके

स्वपिता भाग्य[1]युक्तश्च ज्येष्ठभ्रातृसुसौख्यवान् ।
सूर्यलग्नाधिपे जीवे लग्नात् केन्द्रत्रिकोणगे ॥ ३४०१ ॥

लग्नाधिपेन संदृष्टे स्वपिता राज[2]पूजितः ।
जातकस्य विशेषेण विपद्दाये श्रिया[3]युतः ॥ ३४०२ ॥

विवाहोत्सवकार्याणि गृहे लक्ष्मीकटाक्षवान् ।
बहुपुत्रार्थसम्पन्नो भ्रातृभाग्ययुतो भवेत् ॥ ३४०३ ॥

उच्चांशगे स्थिरे सूर्ये कालेशात् केन्द्रमाश्रिते ।
स्वसुतेन युते दृष्टे स्वपिता शत्रुपीडितः ॥ ३४०४ ॥

स्वदशायां महद्भाग्यं यमलांशे पितुः सुखम् ।
[4]यमलांशदुर्भगांशौ पर्यायाविति संस्मृतौ ॥ ३४०५ ॥

सुरांशगे पूर्व[5]भागो यमलांश इति स्मृतः ।
यमलांशे क्रिये चन्द्रे तुलांशे बुधसंयुते ॥ ३४०६ ॥

यमलभ्रातृमान् भोगी भ्रातृमूलात् सुभाग्यवान् ।
भावलग्नाधिपे भौमे रविजेन समन्विते ॥ ३४०७ ॥

यमलांशे प्रजातश्च मसूरीज्वर[6]भीतिमान् ।
गुरुदृष्टिवशारोग्यं द्वित्रिवारं ज्वराद्भयम् ॥ ३४०८ ।

बाल्ये व्ययभयं किंचिच्चतुष्पाज्जल[7]भीतिमान् ।
मध्ये कारागृह[8]प्राप्तिर्देशत्यागवशाद्व्यथा ॥ ३४०९ ॥

केरले क्लेशबाहुल्यं विप्लवेन विनिर्गतः ।
[9]स्थानच्युतिं द्विवारं च नानादेशेषु संचरन् ॥ ३४१० ॥

---

1. इत्याहुः 2. पूजवान्
3 श्रियावहम्
4. यमलांशे दुर्भगांशे पर्याये नाम उच्यते ।
5. भागे यमलांशमिति स्मृतम् 6. गण्डवान्
7. गन्धवान् 8. प्राप्तिर्वेग
9. स्थानच्युति

पश्चात् स्वदेशमासाद्य स्वगृहे सौख्यमश्नुते ।
शुभशोभनकार्याणि [1]ह्यादायादधिकं व्ययम् ॥ ३४११ ॥

भावलग्ने त्रिकोणेऽपि नवमे राहु[2]संस्थिते ।
जन्मदाये जन्मदेशे [3]भूपतेर्व्याकुलं महत् ॥ ३४१२ ॥

राहुप्रथमपर्याये गोचरे जन्मलग्नगे ।
जन्मान्ते व्याकुलं [4]चैति राज्ये विप्लवमादिशेत् ॥ ३४१३ ॥

जन्मदेशे नृपद्वारिसेनामात्यजनावधि ।
योगभङ्गं [5]च लभते जन्मदाये न संशयः ॥ ३४१४ ॥

[6]स्वपितुर्मित्रबन्धूनां प्राबल्यं जन्मदायगे ।
कन्याशनौ महद्भाग्यं शत्रुनाशं महत् सुखम् ॥ ३४१५ ॥

प्रबलोद्योगलाभं [7]च पितृसौख्यं विनिर्दिशेत् ।
गोचरे स्वोच्चगे जीवे तत्त्रिकोणे पितुः सुखम् ॥ ३४१६ ॥

विद्यारम्भं जातकस्तु[8] तत्काले पितृभाग्यकृत् ।
कन्याजीवे स्थिते काले [9]दुर्भगांशोद्भवस्य च ॥ ३४१७ ॥

उपनयनमित्याहुः पश्चादुद्वाह[10]मेव च ।
सुरांशे मकरे लग्ने वृश्चिके यमलांशके ॥ ३४१८ ॥

उच्चराश्यन्त्यगे जीवे चौलोपनयनं स्मृतम् ।
शुक्रे जीवान्तरे काले जीवे राह्वन्तरान्तरे ॥ ३४१९ ॥

तुलांशके प्रजातश्च शनिभुक्तौ [11]शुभं लभेत् ।
[12]कीटलग्ने प्रजातस्य जन्माब्दे दक्षिणायने ॥ ३४२० ॥

---

1. आदायात्
2. जातके
3. भूपतिर्व्याकुलं
4. चेति
5. प्रकुर्वीत
6. पिता स्नेहितादीनि
7. स्यात् पितृ
8. जातकस्य
9. दुर्भगांशस्य जातके
10. उद्वाहयोगवान्
11. शुभावहम्
12. मकरे लग्न

जीवान्तरे स्वगोत्रेषु पुत्र[1]स्वीकरणं स्मृतम् ।
जीवे कुजयुते दृष्टे व्रणपीडा क्वचित् क्वचित् ॥ ३४२१ ॥

बाल्ये कृशत्वमाप्नोति द्वितीयाब्दे प्रपीडितः ।
वन्ध्या मातामहीवंशे द्वितीयाब्दे [2]महाविपत् ॥ ३४२२ ॥

स्वजनारिष्टमाप्नोति वन्ध्या [3]माता मनोव्यथाम् ।
शन्यन्तरे शुक्रदाये [4]कीटलग्नोद्भवस्य च ॥ ३४२३ ॥

स्वमातामहसन्तापं देहालस्यं विनिर्दिशेत् ।
जननीव्याकुलं [5]चैव सुखाधिपतिभुक्तिषु ॥ ३४२४ ॥

शुक्रे मन्दान्तरे काले [6]कीटलग्नोद्भवस्य च ।
उत्तरार्धे पितुः सौख्यं गृहे कल्याणसंभ्रमम् ॥ ३४२५ ॥

स्वजन्मदेशे कलहं विचित्रं
देशान्तरे भूपतिनाशमाहुः ।
अमात्यसेनाधिप[7]योश्च वेधां
भाग्यक्षयात् स्वप्रभुशोक[8]कालम् ॥ ३४२६ ॥

शुक्रसौम्यान्तरे काले [9]कीटलग्नोद्भवस्य च ।
क्रूरमासे ज्वरभयं क्षिप्रेणारोग्यमादिशेत् ॥ ३४२७ ॥

शन्यन्तरे तृतीयांशे सोदरोत्पत्तिमेव च ।
ज्येष्ठभ्रातृविवाहादि पितृसौख्यं विनिर्दिशेत् ॥ ३४२८ ॥

तारार्केशाधिपे स्वर्क्षे नीचे वाथ प्रजायते ।
राजयोगं [10]च लभते क्षेमदाये महत् सुखम् ॥ ३४२९ ॥

---

1. पुत्रश्री
2. महाद्विपत्
3. मातृमनोव्यथा
4. वृश्चिके लग्नजातके
5. चेति
6. वृश्चिके लग्नजातके
7. पतिश्च वेधा
8. कालः
9. वृश्चिके लग्नजातके
10. प्रकुर्वीत

द्यूनाधिपदशाकाले लाभाधिपतिभुक्तिषु ।
विद्यारम्भं [1]च लभते तथोपनयनं ततः ॥ ३४३० ॥

सुरांशे [2]वृश्चिके लग्ने यमलांशोद्भवस्य च ।
जन्मदाये केतु[3]भुक्तावुपनयनमिष्यते ॥ ३४३१ ॥

दुर्भगांशे प्रजातस्य[4] लाभाधिपतिभुक्तिषु ।
महानदीप्रान्तदेशे मौञ्जीबन्धनमाचरेत् ॥ ३४३२ ॥

सम्पद्दाये शुक्रभुक्तौ [5]कीटलग्नसमुद्भवः ।
वसन्तकाले [6]चोद्वाही पितृभाग्ययुतः सुखी ॥ ३४३३ ॥

कर्माधिपदशाकाले वासदेशे नृपावधि ।
षष्ठाष्टमाधीशभुक्तौ देशे राजान्तरं भवेत् ॥ ३४३४ ॥

स्वपिता क्लेशकार्याणि वर्षमेकं मनोव्य[7]थाम् ।
[8]प्राबल्यं लभते पश्चाद् भ्रातृयोगवशात् सुखम् ॥ ३४३५ ॥

सर्वदाये सौम्यभुक्तौ भूसुतस्यान्तरेऽथ वा ।
अतीव क्लेशकार्याणि देहजाड्यं विनिर्दिशेत् ॥ ३४३६ ॥

दुर्भगांशे पूर्वभागे [9]कीटलग्नोद्भवस्य च ।
बुधान्तरे व्याकुलं स्याद्गुरुभुक्तौ कचित् कचित् । ३४३७ ॥

शन्यन्तरे श्रिया[10]युक्तो स्वप्राबल्यं विपद्दशा ।
ज्येष्ठभ्रातृविशेषं [11]च प्राबल्यं चोत्तरोत्तरम् ॥ ३४३८ ॥

---

1. प्रकुर्वीत पश्चाद्ब्रह्मोप
2. मकरे लग्ने यमले योगजातके
3. भुक्तौ नायनम्
4. प्रजातश्च
5. वृश्चिके लग्नजातके
6. उद्वाहं पितृभाग्यप्रदः
7. मनोव्यथा
8. पश्चात् प्राबल्यमित्याहुर्भ्रातृ
9. वृश्चिके लग्नजातके
10. श्रियाप्राप्तिः
11. स्यात्

[1]विपद्दशापरार्धादौ ज्येष्ठभ्राता श्रिया युतः ।
पुत्रोत्सवादिसन्तोषं पितृसौख्यं विनिर्दिशेत् ॥ ३४३९ ॥

वृश्चिकान्ते [2]चापशनौ गोचरे पितृपीडनम् ।
सम्पद्दाये क्रूरभुक्तौ पितुः पीडा भविष्यति ॥ ३४४० ॥

मीने शनिस्थिते काले मेषान्ते वृषमेऽथ वा ।
[3]दुर्भगांशजस्य चारे विपद्दाये पितुर्विपत् ॥ ३४४१ ॥

पितृभावाष्टमे जीवे [4]कीटलग्नोद्भवस्य च ।
सप्त[5]माब्दे पितरिष्टमष्टाविंशे ऽथ वा यदि ॥ ३४४२ ॥

सुखेशसंबन्धदशाविपाके
चन्द्रात् सुखे भानुसुते च काले ।
जन्मान्तरे [6]पापवशाच्च दुःखं
तातान्विकारिष्ट[7]मितिब्रुवन्ति ॥ ३४४३ ॥

तुलांशगे [8]क्रिये चन्द्रे कुलीरे गोचरे शनौ ।
क्षेमदाये [9]पितृरिष्टं मासु मेषादिषु त्रिषु । ३४४४ ॥

स्वमाता विधवा भूत्वा बहुकालं सुजीवति ।
प्रत्यग्दाये पापभुक्तौ जननीमृत्युमादिशेत् ॥ ३४४५ ॥

सुरांशे [10]वृश्चिके लग्ने पञ्चविंशतिवत्सरे ।
एकत्रिंशेऽथ वा चेति स्ववन्ध्यामातृनाशनम् ॥ ३४४६ ॥

---

1. विपद्देशपरार्धादिज्येष्ठभ्रातृश्रियावहम् ।
2. पापशनौ गोचरे पितृपीडकृत्
3. गोचरे दुर्भगांशस्य विपद्दाये पिताविपत् ।
4. वृश्चिके लग्नजातके
5. सप्तमेशे पितारिष्टमष्टविंशो
6. क्लेशमिति ब्रुवन्ति
7. इत्याहुरार्याः
8. प्रिये
9. पितारिष्टं मेषादित्रिषु मासगे
10. मकरे

[1]स्वपित्ररिष्टतः पूर्वं सुरांशेजनितस्य च ।
माता सुमङ्गली [2]मृत्युं पिता पश्चादभार्यकः ॥ ३४४७ ॥

मीनांशे [3]वृश्चिके लग्ने यमलांशोद्भवस्य च ।
[4]दीर्घायुश्चापि जननी ? भेदमाता विनश्यति ॥ ३४४८ ॥

षोडशाब्दे भेदमा[5]तुरपमृत्युभयं क्वचित् ।
ततः पश्चाद्विवाहः स्याद् द्यूनाधिपतिदायके ॥ ३४४९ ॥

सुरांशे षोडशे वर्षे [6]त्वष्टादशे च वत्सरे ।
प्रत्यक्षपितृमूलेन वदेदुद्वाह[7]कर्म च ॥ ३४५० ॥

प्रत्यब्दाये [8]पित्ररिष्टं सुरांशेजनितस्य च ।
शन्यन्तरे क्लेश[9]कालः स्वभेदपितृकर्मकृत् ॥ ३४५१ ॥

चापारूढे क्रिये चन्द्रे तुलांशे क्षेमदायके ।
स्वप्राबल्यं विशेषं [10]च भ्रातृमूलात् सुवाहनम् ॥ ३४५२ ॥

राजामात्यप्रसादेन भ्रातृयोगाभिवृद्धिमान् ।
गृहे लक्ष्मीकटा[11]क्षेण नित्यश्रीसौख्यमश्नुते ॥ ३४५३ ॥

नक्रांशे वृश्चिके लग्ने [12]यमलांशोद्भवस्य च ।
भाग्याधिपदशाकाले भ्रातृप्राबल्यमादिशेत् ॥ ३४५४ ॥

लग्नाधिपदशाकाले [13]जातकश्च श्रिया युतः ।
सन्तानोत्पत्तिमाप्नोति दारसौख्यं शुभाशुभम् ॥ ३४५५ ॥

---

1. स्वपितारिष्टतत्पूर्वं सुरांशश्चैव जातके । 2. मृत्युः
3. मकरे लग्ने यमले योगजातके
4. प्रत्यब्दिमाता दीर्घायुर्भेदभ्रातृविनाशनम् । 5. माता अपमृत्यु
6. अष्टादशवत्सरे 7 योगवान्
8. पितारिष्टं सुरांशश्चैव जातके 9. कालं स्वभेदकर्मवान्
10. स्यात् 11. कटाक्षादि
12. यमलयोगेन जातके 13. जातकस्य श्रियावहम्

शन्यङ्गारकसंयोगे दशमे गुरुवीक्षिते ।
[1]कीटलग्ने प्रजातस्य बुद्धियोगो भविष्यति ॥ ३४५६ ॥

बुद्धियोगप्रजातस्य भ्रातृप्राबल्यहेतुना ।
भाग्याधिपदशाकाले बहुभाग्यं विनिर्दिशेत् ॥ ३४५७ ॥

कर्माधिपदशाकाले पितृसौख्यं महत् सुखम् ।
जन्मदाये तृतीयांशे [2]तातादिश्रियमश्नुते ॥ ३४५८ ॥

यावदायुष्यमाप्नोति [3]तावद्भाग्यं विनिर्दिशेत् ।
बुद्धियोगे सुखे जीवे पशुधान्यसमृद्धिमान् ॥ ३४५९ ॥

नरवाहन[4]भूषाप्तिं भ्रातृमूलाच्छ्रियायुताम् ।
प्रत्यब्दाये विभागं [5]च भ्रातृद्वेषं क्वचित् क्वचित् ॥ ३४६० ॥

द्वात्रिंशे दार[6]नाशः स्यात् क्लेशं प्राप्नोति भूरिशः ।
द्वितीयोद्वाहसिद्धिः स्यात् पश्चात् प्रबलयोगवान् ॥ ३४६१ ॥

सुखेशे सिंहराशिस्थे [7]दुर्भगांशोद्भवस्य च ।
सर्वदाये मीनराशौ तत्त्रिकोणेऽथ वा यदि ॥ ३४६२ ॥

स्फुटयोगं गते मन्दे स्वप्रभोश्च [8]महाविपत् ।
[9]स्वसेवितनृपक्लेशात् क्लेशमाप्नोति भूरिशः ॥ ३४६३ ॥

कन्यादौ जन्मदेशेषु [10]राज्याधिपतिनाशनम् ।
तत्त्रिकोणेऽथ वा चेति योजयेत् कालवित्तमः ॥ ३४६४ ॥

मायाब्दान्तादिमारभ्य ज्येष्ठभ्राता श्रियान्वितः ।
रन्ध्राधिपान्तरे काले भाग्याधिपतिदायगे ॥ ३४६५ ॥

---

1. वृश्चिके लग्नजातस्य बुद्धियोगमिति स्मृतम् ।
2. तदादि
3. यावद्भाग्यं
4. भूषाप्तिर्भ्रातृमूलाक्रियावहम्
5. स्यात्
6. नाशं
7. दुर्भगांशस्य जातके
8. महद्विपत्
9. स्वसेवान्नृपतिक्लेशं
10. राजाधि

स्वजनारिष्टमाप्नोति भगिनीपुत्रनाशनम् ।
गुरुद्वितीयपर्याये वृषे मेषे महत् सुखम् ॥ ३४६६ ॥

स्वपिता नित्यसन्तोषं राजप्रीतिशुभावहम् ।
गुरुप्रथमपर्याये वृषभादौ[1] श्रियान्वितः ॥ ३४६७ ॥

द्वितीये [2]वृषभादौ वा भ्रातृप्राबल्यमादिशेत् ।
मेषत्रिकोणगे जीवे सूर्ये स्वोच्चांश[3]संयुते ॥ ३४६८ ॥

[4]स्वपितुर्देहजाड्यादि पितृवर्गे [5]महाविपत् ॥ ३४६९ ॥

ज्ञातिवर्गे कष्टकाले[6] मित्रवर्गे महत् सुखम् ।
स्वमित्रसुतसौभाग्यं वृषभादौ[7] विशेषतः ॥ ३४७० ॥

[8]बुद्धियोगे स्थिरे लग्ने गोचरे वृषभे गुरौ ।
[9]स्वपितुर्मित्रतनयः योगवान् कीर्तिमान् सुखी ॥ ३४७१ ॥

गुरुतृतीयपर्याये मिथुनान्ते कुलीरगे ।
राजद्वेषं मनस्तापमुद्योगार्थविनाशनम् ॥ ३४७२ ॥

चापान्ते मकरे काले मिरोधादि[10]मुपद्रवम् ।
स्वपुत्रदारशोकादिक्लेशं प्राप्नोति भूरिशः ॥ ३४७३ ॥

मन्दांशेशदशाकाले [11]बुद्धियोगोद्भवस्य च ।
सहोदरः क्लेशमेति पित्ररिष्टं विनिर्दिशेत् ॥ ३४७४ ॥

पितृस्थानाधिपे चन्द्रे तुलांशे मेषराशिगे ।
स्वसुतेन युते दृष्टे [12]स्वापत्संन्यासवान् पिता ॥ ३४७५ ॥

---

1. वृषभादि
2. वृषभादीनि
3. जातके
4. स्वपिता देह
5. महद्विपत्
6. कालं
7. वृषभादि
8. वृद्धियोगे
9. पिता मित्र
10. उपद्रवम्
11. बुद्धियोगस्य जातके
12. आपत्

सुखेशांशदशाकाले सप्तविंशतिवत्सरे ।
मेषे जीवे मेषमासे शुक्लपक्षे मृतिं वदेत् ॥ ३४७६ ॥

क्षेमदाये सुतारिष्टं [1]वृद्धियोगोद्भवस्य च ।
युग्मे शनिस्थिते काले पुत्रारिष्टं विनिर्दिशेत् ॥ ३४७७ ॥

मेषकन्याधनुर्मीने [2]वृद्धियोगोद्भवस्य च ।
पुत्रशोकफलप्राप्ती राज[3]विग्रहवान् क्वचित् ॥ ३४७८ ॥

राहुस्थितेशांशदाये[4] राहुभुक्तौ ज्वराद्भयम् ।
जननी क्लेशकार्याणि भ्रातृपीडा क्वचित् क्वचित् ॥ ३४७९ ॥

[5]अष्टमेशस्थितांशेश दशायां बुधभुक्तिषु ।
अपमृत्युभयप्राप्ति[6]र्कीटलग्नोद्भवस्य च ॥ ३४८० ॥

सुताधिपदशासंधिकाले स्वर्भानुभुक्तिषु ।
क्रूरान्तरान्तरे काले ज्येष्ठभ्रातृविनाशनम् ॥ ३४८१ ॥

ग्रन्थान्तरे वृद्धियोगे सुताधिपतिदायगे ।
स्वज्येष्ठभ्रातृसन्तान[7]भाग्यनाशवशाद्व्यथा ॥ ३४८२ ॥

जीवे शन्यन्तरे काले ज्येष्ठभ्रातृविनाशनम् ।
[8]कीटलग्ने प्रजातस्तु क्लेशं प्राप्नोति भूरिशः ॥ ३४८३ ॥

तत्पुत्रप्रबलं [9]चेति सुताधिपतिदायके ।
[10]प्रत्यग्दशान्त्ये सन्तापं भेदभ्रातृविनाशनम् ॥ ३४८४ ॥

दशामध्येऽप[11]मृत्युं च शान्त्या शान्तिं प्रयास्यति ।
भाग्याधिपदशान्त्या[12]दौ ज्येष्ठभ्रातृश्रिया युतः ॥ ३४८५ ॥

---

1. वृद्धियोगांशजातके
2. योगस्य जातके
3. विद्वरवान्
4. दाया
5. अष्टमस्थेशितांशे
6. वृश्चिके लग्नजातके
7. सन्तानं
8. वृश्चिके लग्नजातके
9. चेति
10. प्रत्यग्देशान्त्ये
11. मृत्युश्च
12. दशान्त्यादिज्येष्ठभ्रातृश्रियावहम्

[1]त्रिदशायोगवृद्धिं च बुद्धियोगोद्भवस्य च ।
भाग्यवृद्धिः श्रिया [2]युक्तो गृहे लक्ष्मीकटाक्षवान् ॥ ३४८६ ॥

धनाधिपदशाकाले [3]दुर्भगांशोद्भवस्य च ।
केतुभुक्त्यन्तमारभ्य शुक्रभुक्तौ मृतिं वदेत् ॥३४८७ ॥

जीवे शुक्रान्तरे काले [4]कीटलग्नोद्भवस्य च ।
अष्टपञ्चाशगे वर्षे तुलामासत्रिकोणगे ॥ ३४८८ ॥

कृष्णपक्षे शुक्रवारे प्रातःकाले मृतिं वदेत् ।
लग्नाष्टमगते शुक्रे [5]मित्रग्रहसमन्विते ॥ ३४८९ ॥

दुर्भगांशे पूर्वभागे [6]परलोको न विद्यते ।
[7]दुर्गतिं चाष्टमे शुक्रे यस्यां नाड्यां प्रजायते ॥ ३४९० ॥

व्ययाष्टमगते केतौ [8]गच्छत्येवमधोगतिम् ।
दुर्भगांशे फलं सत्यं प्रत्यक्षं देवकेरलम् ॥ ३४९१ ॥

---

## स्थिरलग्नचतुष्टये निशाकरांशः

निशाकरांशगे सूर्ये स्थिरराशिचतुष्टये ।
स्थिरलग्ने [9]प्रजातस्तु शूद्रजन्मा सुखी भवेत् ॥ ३४९२ ॥

सूर्यकालाधिपे शुक्रे [10]स्वसितेन निरीक्षिते ।
शूद्रकाले शूद्रजन्मा[11] राजयोगे तु सङ्करः ॥ ३४९३ ॥

---

1. त्रिदेशायोगवृद्धिश्च वृद्धियोगस्य जातके ।
2. श्रियावाप्तिः
3. दुर्भगांशस्य जातके
4. वृश्चिके लग्नजातके
5. पुत्र
6. रंध लोकं
7. दुर्गतिश्चाष्टमे शुक्रे यस्य नाडी प्रजायते ।
8. पतत्येव
9. प्रजातस्य शूद्रजन्म
10. असितेन
11. जन्म

जीवदृष्टियुते सूर्ये विप्रकाल[1]समुद्भवः ।
[2]विप्रजन्मा सुखी नित्यं क्षत्रियादौ यथाक्रमम् ॥ ३४९४ ॥

निशाकारांशगे सूर्ये बुधशुक्रसमन्विते ।
स्वसुतेनयुते दृष्टे [3]शूद्रजन्मेति कथ्यते ॥ ३४९५ ॥

[4]जीवनं वैश्यवृत्त्या च बाल्ये क्लेशेन कर्शितः ।
स्वपिता च तथा विन्द्यान्मध्येवयसिभाग्यवान् ॥ ३४९६ ॥

श्यामवर्ण[5]शरीरी च बहुभ्रातृविनाशवान् ।
[6]पञ्चसङ्ख्या भगिन्यश्च भविष्यन्ति चिरायुषाः ॥ ३४९७ ॥

सूर्यलग्नाधिपे मन्दे मीने कालाग्निनाडिके ।
निशाकरेण संयुक्ते सोदरभ्रातृनाश[7]वान् ॥ ३४९८ ॥

[8]भगिन्यो बहवश्चैव केचित्पक्षे ह्यसोदरः ।
बाल्ये मन्दमतिः साधुः [9]कामुको बुद्धिमान् सुखी ॥ ३४९९ ॥

यौवने बहुभाग्याप्तिर्वार्धके क्लेशवान् भवेत् ।
निशाकरांशगे सूर्ये तदीशे शनिसंयुते ॥ ३५०० ॥

अल्पविद्यो शठः कामी क्षिप्रकोपी प्रवृत्तिमान् ।
वयो मध्ये सुसामर्थ्यं कटुकाम्लरसप्रियः ॥ ३५०१ ॥

ज्ञानवान् धर्मबुद्धिश्च रजोगुणसमन्वितः ।
तामसप्रकृति[10]र्बाल्ये वयोमध्ये सुसात्त्विकः ॥ ३५०२ ॥

धर्ममार्गरतो नित्यं वैदिकाचारबुद्धिमान् ।
देवब्राह्मण[11]विश्वासी विशोपरि सुभाग्यवान् ॥ ३५०३ ॥

---

1. कालस्य जातके
2. विप्रजन्म सुखं नित्यं क्षत्रियादि
3. शूद्रजन्म इति स्मृतम्
4. जीवना वैश्यवृत्तिः स्याद्
5. शरीरं स्याद् बहुभ्रातृविनाशनम्
6. भगिनी च द्वयं चेति पञ्चसङ्ख्या चिरायुषम् ।
7. नाशनम्
8. भगिन्यां बहुभिश्चेति
9. कामुके
10. किंचित् तु
11. विश्वासं

मन्दे कालाग्निषष्ट्यंशे मलिनः क्रूरकर्मवान् ।
सम्पद्दाये महायोगं जन्मदाये [1]च दुःखितः ॥ ३५०४ ॥

[2]विप्लवेन धनच्छेदमग्निदाहेनवातथा ।
भाग्यक्षीणमवाप्नोति षोडशाब्दान्त[3]मेव च ॥ ३५०५ ॥

[4]पश्चादल्पसुखी चैव मन्ददोषो न विद्यते ।
सितांशगे विलग्नेशे ताराधिपसमन्विते ॥ ३५०६ ॥

सम्पद्दशा[5]यां नष्टं च स्वपितार्जितनाशनम् ।
वृषभे चन्द्रषष्ट्यंशे [6]शुभद्वयसमन्विते ॥ ३५०७ ॥

निशाकरांशजातश्च[7] विपद्दाये सुभाग्यवान् ।
स्वप्राबल्यं [8]च लभते क्षेमदाये फलं सुखम् ॥ ३५०८ ॥

प्रत्यग्दाये मनस्तापं दारिद्र्येण च कर्शितः ।
साधनेशदशाकाले बहुभाग्य[9]युतः सुखी ॥ ३५०९ ॥

क्षेमतार[10]दशान्त्यादौ क्लेशः स्याद्वसुवत्सरे ।
विपद्दाये धनप्राप्तिः क्षेमदाये महत् सुखम् ॥ ३५१० ॥

मीनत्रिकोणगे चन्द्रे [11]वृश्चिकांशोद्भवस्य च ।
इदमेव फलं सत्यं साधनेशदशासुखम् ॥ ३५११ ॥

पाके सौम्यदशान्त्यादौ [12]विपद्दाये सुभुक्तिषु ।
[13]ज्वरभीतिं च लभते मृतप्रायोपजीवति ॥ ३५१२ ॥

चन्द्रांशके तत्त्रिकोणे स्फुटयोगं गते शनौ ।
स्वजन्मदेश[14]नृपतिर्मृतः स्यान्नात्र संशयः ॥ ३५१३ ॥

---

1. महद्विपत्
2. वित्क्लमेन
3. आवधि
4. पश्चाल्पसौख्यसंयुक्तो मन्ददोषं
5. नष्टमेति स्वपितार्जन
6. सुखद्वय
7. जातस्य
8. प्रकुर्वीत
9. प्रदः
10. दशान्त्यादि क्लेशं
11. वृश्चिकांशस्य जातके
12. शान्त्यादि
13. गण्डं प्रकुर्वीत मृतप्रायोपजीवनम्
14. नृपतिमृतिश्चेत्

निशाकरांशगे सूर्ये वृषभे [1]च स्थिते सति ।
मूलत्रिकोणगे मन्दे [2]ह्यथ वा दृष्टिराशिषु ॥ ३५१४ ॥

चन्द्रा[3]क्रान्तर्क्षगे वापि चन्द्रांशे वा विशेषतः ।
[4]चन्द्रदृष्टेषु राशीषु स्फुटयोगं गते शनौ ॥ ३५१५ ॥

सप्तमाधिपतौ शुक्रे द्विग्रहेण समन्विते ।
[5]निशाकरांश नाड्यां तु जातश्चैव द्विभार्यकः ॥ ३५१६ ॥

[6]मायाब्दे षोडशाब्दे वा स्वसोदर्याश्च शोभनम् ।
सम्पद्राये [7]विवाहः स्यात् स्वविवाहो ह्यतः परम् ॥ ३५१७ ॥

सम्पद्राये तृतीयांशे [8]दारेशस्यांशके तथा ।
स्फुटयोगं गते जीवे प्रथमोद्वाहमादिशेत् ॥ ३५१८ ॥

मन्दांशे[9]संस्थिते चन्द्रे मीने शनियुतेक्षिते ।
षोडशाब्दात् परं [10]चैव द्विवर्षे पाणिसंग्रहम् ॥ ३५१९ ॥

दारेशांशे तत्त्रिकोणे दारजन्मर्क्षभं विदुः ।
दारेशदृष्टिराशौ तु योजयेत् कालवित्तमः ॥ ३५१० ॥

कीटांशगे निशानाथे कुलीरांशे दिवाकरे ।
सम्पद्राये [11]विवाहः स्याद्गोचरे वृषभे गुरौ ॥ ३५२१ ॥

अथ वा मिथुने वापि मेषादित्रयमासगे ।
लग्नात् सप्तमगे [12]राहौ सङ्गराशोद्भवस्य च ॥ ३५२२ ॥

---

1. कालजातके
2. अथ वा
3. चन्द्रार्कान्तर्क्षगे
4. चन्द्रेण दृष्टिराशीषु
5. निशाकरान्त्यगे नाडिजातश्चेतिद्विभार्यवान् ।
6. मायात् पञ्चदशाब्दे तु षोडशाब्दे
7. विवाहः स्यात् स्वविवाहमनः
8. दारेशांस्तस्य....गे
9. जातके
10. चेति
11. विवाहं
12. राहुसङ्गरांशस्य नाडिगे

जन्मदाये विप्लवेन स्वपितुः[1] क्लेशमादिशेत् ।
[2]पिताभह्या विनाशेन क्लेशं प्राप्नोति भूरिशः ॥ ३५२३ ॥

सम्पद्दाये शुक्रभुक्तौ केतुभुक्त्यन्तरेऽपि च ।
स्वपितृव्य[3]विनाशेन ह्यतीव क्लेशवान् पिता ॥ ३५२४ ॥

ततः पश्चाद्दरिद्रः स्यात् पितृव्यसुतनाशनम् ।
पितृव्यस्य मनस्तापो[4] भवत्यत्र न संशयः ॥ ३५२५ ॥

विक्रमाधिपतौ भौमे स्वर्भानुयुतवीक्षिते ।
पश्चात् सहोदरभ्रातृनाशं च मनुरब्रवीत् ॥ ३५२६ ॥

पितृव्यसुतभावेशे[5] राहुसंयुतवीक्षिते ।
स्वपितृव्यसुतारिष्टं विषाग्निजलहेतुना ॥ ३५२७ ॥

स्वपितृ[6]द्वेषमूलेनजिह्वाच्छेदं विनिर्दिशेत् ।
मसूरिज्वर[7]भीत्या च स्वज्येष्ठभ्रातृनाशनम् ॥ ३५२८ ॥

चन्द्रांशे जननात् पूर्वं ज्येष्ठभ्रातृविनाशनम् ।
[8]भगिन्यो बहुलाश्चैव मातुलाभावमादिशेत् ॥ ३५२९ ॥

[9]पितामहस्य भ्राता च नास्ति चन्द्रांशगे रवौ ।
पितामहस्वसाप्येका पुत्रिणीदीर्घ[10]जीविनी ॥ ३५३० ॥

[11]पितामह्यास्तु वार्धक्ये नेत्रकोशं विनिर्दिशेत् ।
दीर्घायुर्योगमित्याहुः पौत्रनाशेन कर्शिता ॥ ३५३१ ॥

---

1. स्वपिता
2. पितामहिविनाशं स्यात्
3. विनाशादि तन्मूलात् क्लेशवान्
4. मनस्तापं
5. भावेन
6. स्वपिता
7. गण्डेन
8. भगिनी बह्वश्चेति
9. भ्रातृयोगं
10. दीर्घमायुषी
11. पितामही वार्धकस्य

एकः कश्चित् [1]पितृव्येषु दुष्टपुत्रयुतो भवेत् ।
भाग्यमूलात् सुसन्तोषी [2]त्वगम्यागमनोत्सुकः ॥ ३५३२ ॥

तस्य पापवशात् क्लेशं वार्धके व्रणमादिशेत् ।
भाग्यक्षीणं [3]च लभते संपद्दाये त्विदं फलम् ॥ ३५३३ ॥

सम्पत्ताराधिपे सौम्ये दशायां च स्वभुक्तिषु ।
विद्यारम्भं [4]च लभते ह्यथ वा शुक्रभुक्तिषु ॥ ३५३४ ॥

तत्काले च पितृव्यादि[5]क्लेशं प्राप्नोति भूरिशः ।
लग्ने जीवे [6]मदे राहौ मलिनः पापचेतनः ३५३५ ॥

चन्द्रे शनियुते दृष्टे बाल्ये दारिद्र्ययोगवान् ।
विंशद्वर्षात् परं सौख्य[7]मेकयोगो न विद्यते ॥ ३५३६ ॥

विपद्दाये भाग्यवृद्धिं [8]पुत्रसौख्यं विनिर्दिशेत् ।
लग्ने केतुयुते जीवे तदीशे चन्द्रसंयुते ॥ ३५३७ ॥

सीतांशनाडिगे भाग्ये [9]योगः कुसुमनामकः ।
अचरे [10]कुसुमे योगे वित्ते चन्द्रे च संस्थिते ।
विंशोपरि महद्भाग्यं सप्तत्रिंशात् परं [11]व्यथाम् ॥ ३५३८ ॥

सूर्यलग्ने तत्त्रि[12]कोणे मकरान्ते च वा शनौ ।
विपद्दाये [13]पित्ररिष्टमत ऊर्ध्वं न जीवति ॥ ३५३९ ॥

क्लीबे शनिस्थिते काले सम्पत्तारादशान्त्यगे ।
अपमृत्युभयप्राप्तिः शान्त्या शान्तिं प्रयास्यति ॥ ३५४० ॥

---

1. पितृव्यस्य दुष्टपुत्रप्रदो
2. अगम्या
3. प्रकुर्वीत सम्पद्दाये इदं
4. प्रकुर्वीत अथ वा
5. पितृव्याधि
6. मन्दराहुः
7. एकयोगं
8. वृद्धिः
9. योगं कुसुमनामकम्
10. कुसुमयोगे वित्ते चन्द्रस्य जातके
11. व्यथा
12. कोपे मकरान्तेषु
13. पितारिष्टं

कन्यान्ते वृश्चिकादौ च [1]मेषान्त्ये वृषभादिके ।
स्फुटयोगं गते मन्दे पितृव्यस्य विनाशनम् ॥ ३५४१ ॥
लाभेशांशे तत्रिकोणे स्फुटयोगं गते शनौ ।
लाभेशदृष्टिराशौ तु मातृपीडां[2] विनिर्दिशेत् ॥ ३५४२ ॥

निशाकरांशगे सूर्ये [3]कीटलग्नोद्भवस्य च ।
क्षेमदाये मध्यखण्डे [4]मात्ररिष्टं विनिर्दिशेत् ॥ ३५४३ ॥

सुतेशे सुतभावस्थे निधनाधिपसंयुते ।
गर्भस्रावातुरा भार्या जातं जातं मृतप्रजा ॥ ३५४४ ॥

कुम्भे जीवे केतुयुक्ते सौम्ये भृगुसमन्विते ।
निशाकरांशे जातश्च[5] पुत्रवांश्च न संशयः ॥ ३५४५ ॥

[6]स्वपित्ररिष्टतः पश्चान्मात्ररिष्टाच्च पूर्वगे ।
षट्त्रिंशदब्दे दारहानिः सूचिकावात[7]रोगतः ॥ ३५४६ ॥

ततः [8]पश्चान्महत् सौख्यं क्षिप्रेणोद्वाहमादिशेत् ।
ग्रन्थान्तरे जीवयोगे चन्द्रांशे [9]जनितस्य च ॥ ३५४७ ॥

ज्येष्ठभार्या द्विसन्ताना दीर्घमायुश्च विन्दति।
शेषं नाशमिति प्राहुः पुत्री चैका चिरायुषी[10] ॥ ३५४८ ॥

योगनाडी[11]फलाध्याये नाड्यान्तुवित्तपस्य च ।
[12]आयुर्योगं च पुत्रादेः फलं विस्तरमादिशेत् ॥ ३५४९ ॥

वित्तदाये सुपुत्राप्तिर्व्यापारप्रबलं सुखम् ।
[13]चरेशयोगे त्वचरे द्विसहस्रधनाढ्यवान् ॥ ३५५० ॥

---

1. मेषान्त
2. पीडा
3. वृश्चिके कालजातके
4. मात्रारिष्टं
5. जातस्य
6. स्वपितारिष्टतः पश्चान्मात्रारिष्टं च
7. रोगिणी
8. महासौख्यं
9. नाडिजातके
10. चिरायुषम्
11. बलाध्याये धनाधिपतिनाडिषु
12. पुत्रादियोगमायुष्यं
13. आचरे चरकयोगे द्विसहस्रधनधान्यवान् ।

[1]द्वौ पुत्रौ कन्यके तस्य दीर्घमायुश्च विन्दतः ।
कर्मेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ३५५१ ॥

कर्मेशदृष्टिराशौ तु [2]भगिन्याश्च मनोव्यथा ।
[3]चक्रसन्धौ दशासन्धौ क्लेशकालं विनिर्दिशेत् ॥ ३५५२ ॥

सोदरस्य विशेषेण क्लेशं सम्पद्दान्त्यगे ।
भाग्यारूढाधिपे जीवे [4]कुसुमे योगसंस्थिते ॥ ३५५३ ॥

तस्य नाडी[5]फलाध्याये विस्तरेणाद्भुतं फलम् ।
चतुःपञ्चाशगे वर्षे [6]कीटलग्नोद्भवस्य च ॥ ३५५४ ॥

निशाकरांशे जातश्च [7]ह्यपमृत्युं च विन्दति ।
षष्ठाधिपदशाकाले मीनान्त्ये मेषगे शनौ ।
मीनकन्यालिके[8] मासे शुक्लपक्षे मृतिं वदेत् ॥ ३५५५ ॥

इति सूर्य[9]नाड्याम् इन्दुकुसुमयोगयोः विस्तारः ॥

—:*:—

## वृश्चिकलग्ने विश्वांशः

विश्वांशे वृश्चिके लग्ने गौरकान्तः सुलोचनः ।
धार्मिकोऽत्यन्तमेधावी [10]समगात्रो प्रगल्भवाम् ॥ ३५५६ ॥

पित्तप्रकृति[11]देही च वाताधिक्यशरीरवान् ।
अल्परोगी भयार्तश्च शिरोरोगी च वा भवेत् ॥ ३५५७ ॥

---

1. द्विपुत्रकन्यकास्तस्य दीर्घमायुश्च विन्दति ।
2. सहोदरि
3. सन्धिदशासन्धिः
4. कुसुमयोग
5. फलोद्योगे विस्तारे अद्भुतम् च तत्
6. वृश्चिके कालजातके
7. अपमृत्युस्तथाश्रितः
8. कन्यालिगे
9. नाडी इन्दुकुसुमयोगेनु....
10. गात्रि
11. देहश्च

विप्रजन्मा[1] सुखी नित्यं प्राज्ञो विद्वान् विचक्षणः ।
मितभाषी मातृ[2]भक्तो बाल्ये पितृविनाशवान् ॥ ३५५८ ॥

ज्येष्ठभ्रातृवशात् सौख्यं ब्रह्मचर्यादिकर्मणि ।
विदेशे भैक्षवृत्त्यासौबाल्येऽध्ययनतत् परः ॥ ३५५९ ॥

वेदाध्ययनसंपन्नो नानाशास्त्रविशारदः ।
बाल्ये दुष्टस्वभावश्च प्रसिद्धश्चैव यौवने ॥ ३५६० ॥

बाल्ये शूद्रप्रभुः [3]पीडां जीवनोद्वाहमादिशेत् ।
अंशाधिपतिदोषेण मसूरीज्वर[4]भीतिमान् ॥ ३५६१ ॥

यदि जीवति पुण्येन जलभीतिस्ततः परम् ।
भ्रातृस्थानाधिपे मन्दे नीचे रविसमन्विते ॥ ३५६२ ॥

पश्चाद्भ्रातृविहीनश्च सोदरीभ्रातृमान् भवेत् ।
चत्वारः सोदराःपञ्चसप्त वा स्युर्यथा बलम् ॥ ३५६३ ॥

द्वौ ज्येष्ठौ पुत्रवन्तौ च भार्याद्वययुतौ तथा ।
एकास्वसापुत्रवती किंचित्कालं सुमङ्गली ॥ ३५६४ ॥

पश्चाद्वैधव्यमाप्नोति सुचरित्रवती भवेत् ।
विश्वांशे वृश्चिके लग्ने चन्द्रे भानुनिरीक्षिते ॥ ३५६५ ॥

[5]जलभीतिं विनानीयात् सोदरस्य तथैव च ।
वापीकूपतटाकेषु स्ववंश्यजननाशनम् ॥ ३५६६ ॥

लग्नाधियोगे जातस्य लग्ने [6]यावत् फलैर्युते ।
तावद्वर्षात् सर्वभाग्यं धनवाहनवान् भवेत् ।
यावदायुष्यमाप्नोति तावद्भाग्यं विनिर्दिशेत् ॥ ३५६७ ॥

---

1. जन्म
2. भक्तिः
3. पीडा
4. गण्डवान्
5. जलगण्डं विजानीयात् सोदरः स्यात्तथापि च ।
6. यावत्सर्वै

विचेशे मदराशिगे बलयुते चन्द्रे कुटुम्बस्थिते
[1]भौमक्षेत्रगतेन्दुजे रवियुते मीनस्थिते भार्गवे ।
दीर्घायुर्धनवान् द्विदारसहितो ग्रामाधिपः पण्डितः
कामी भोगसमन्वितो दिवि भुवि प्रोद्दामकोलाहलः ॥ ३५६८ ॥

विद्याशाली युवतिमदनो भानुतेजाश्चिरायुः-
र्विंशत्यब्दे परशिवपदाम्भोज पूजाप्रवीणः ।
नानामन्त्रागमपरिचितो[2] वार्धके पुत्रवांश्च
श्रीमान् यानप्रमुखविभवो जायते[3] राजपूज्यः ॥ ३५६९ ॥

षष्ठे[4]शेऽष्टमगेऽरिपे निधनगे वान्योन्यदृष्टे पुमान्[5]
[6]जातस्त्रिकालवित् सुरूपवनितायुग्मप्रयुक्तः सुखी ।
हीनानन्तरजो विदेशगमनश्छिन्नाघ उन्मादवान्[7]
[8]विप्रश्चेद्धनीबाहुजो यदि धनी दाताचिरायुर्भवेत् ॥ ३५७० ॥

विश्वांशे जनितः पुमान् सुनिपुणो यष्टाखिलश्रौतवित्
सद्विद्दानपरिग्रहैक निरतः सौन्दर्यलक्ष्मीयुतः ।
दारिद्र्येण च पीडितः कतिपयः स्वकालं बहुक्लेशवान्
पश्चाद्भाग्यसमस्तभोगविभवः प्रख्यातकीर्त्या युतः[9]॥ ३५७१ ॥

विश्वांशे विष्णुभक्तश्च देवब्राह्मणपोषकाः ।
मध्ये [10]यतिप्रसादेन बहुशिष्य प्रशिष्यवान् ॥ ३५७२ ॥

मीमांसान्यायतत्त्वज्ञो नानाविधिविशारदः ।
ग्रन्थकर्ता धनी श्रीमान्द्रव्यार्जन[11]समर्थकः ॥ ३५७३ ॥

---

1. भौमे
2. परि...तो
3. जातके
4. शाष्टमेगे
5. दुष्टे
6. जातस्त्रितिवित्स्वरूपवनितायुग्मप्रदाता सुखी ।
7. कृत्
8. विप्रश्चेतधनी
9. कीर्तिप्रदः
10. यदि
11. सधर्मकः

वेदान्तशास्त्रनिपुणो राजद्वारे सुपूजितः ।
यष्टा वैदिकमार्गेण विद्याजीवनवान् भवेत् ॥ ३५७४ ॥

देवालयप्रतिष्ठादितटाकोद्यानधर्मकृत्[1] ।
अन्नदाता सुखी नित्यं पञ्चयज्ञपरायणः ॥ ३५७५ ॥

कलत्रद्वयवान् वाग्मी वार्धके बहुपुत्रवान् ।
सीमन्तपुत्रनाशः [2]स्यात् कचिद्वन्ध्यापतिर्भवेत् ॥ ३५७६ ॥

दारान्तरे सुतप्राप्तिः पुत्रीपुत्रयुतो भवेत् ।
स्वमाता विधवा भूत्वा बहुकालं सुजीवति ॥ ३५७७ ॥

[3]मात्ररिष्टात् परं भाग्यं पित्ररिष्टात् परं व्यथाम् ।
विवाहानन्तरं सौख्यं क्षेमदायेऽग्निसिद्धिमान्[4] ॥ ३५७८ ॥

[5]वाजपेयादिकर्माणि क्षेमदाये भविष्यति ।
प्रत्यग्दायेऽथवाचैव देशान्तरसुभाग्यवान्[6] ॥ ३५७९ ॥

द्वितीयोद्वाहमाप्नोति ब्राह्मणप्रभुसत्कृतः[7] ।
स्वमतस्थापको नित्यं विद्यया नव्यभाषया[8] ॥ ३५८० ॥
बाल्ये पुराणवृत्तिं च[9] महाराजपुरे वसन् ।
विद्या[10]वादे जयप्राप्तिर्द्विर्विंशोपरि सौख्यवान् ॥ ३५८१ ॥

क्षेत्रलाभं [11]च लभते ब्राह्मणप्रभुसौहृदात् ।
अग्निष्टोमादिकार्येषु[12] सिद्धिर्भवति नित्यशः ॥ ३५८२ ॥

---

1. धर्मवान् 2. नाशस्या...चित्
3. मात्रारिष्टात् परं भाग्यं पित्रारिष्टात् परं व्यथा
4. कृत् 5. दिनः कर्म
6. कृत् 7. सत्कृता
8. अनन्यतुल्यया 9. पुराणवृत्तिश्च
10. वादजयप्राप्तिर्द्विविंशात् परिसौख्कृत्
11. प्रकुर्वीत 12. कार्याणि

जन्मदाये [1]त्वनावृष्टिर्लोके दुर्भिक्षजं भयम् ।
ज्येष्ठभ्रातृमनस्तापं जननीव्याकुलं तथा ॥ ३५८३ ॥

स्वदेहायासमाप्नोति बुधभुक्तौ न संशयः[2] ।
तत्काले वृषभे मन्दे म्लेच्छप्राबल्यमादिशेत् ॥ ३५८४ ॥

[3]परच्छिद्रं च लभते राज्ञामन्योन्ययुद्धजम् ।
सम्पत्ताराधिपे सूर्ये [4]नीचग्रहसमन्विते ॥ ३५८५ ॥

क्लेशजीवनमाप्नोति ग्रामान्तरनिवासवान्[5] ।

जीवान्तरे सौख्यफलं वदन्ति[6]
[7]ततोऽल्पसौख्यं च दरिद्रतां च ।
विपद्दशायां च नितान्तकष्ट-
[8]मतीव दुःखं गृहभूमिनाशम् ॥ ३५८६ ॥

सम्पत्तारदशान्त्यादौ[9] विपद्दाये च यौवने ।
वेदाध्ययनसम्पन्नो भिक्षाशनवशात्सुखम् ॥ ३५८७ ॥

चोलदेशेऽप्यरिष्टं स्यात् संप्राप्ते[10] राष्ट्रविप्लवे ।
सम्पद्दाये मध्यखण्डे चोलभूपतिविग्रहम्[11] ॥ ३५८८ ॥

[12]राज्यक्षोभवशात् क्लेशं पाण्ड्यभूपतिहेतुना ।
पश्चात् स्वस्थ[13]समायुक्तः स्वदेशं पुनरेष्यपि ॥ ३५८९ ॥

---

1. अनावृष्टिर्लोके दुर्भिक्षडाम्बरम् 2. भविष्यति
3. परचक्रां प्रकुर्वीतराज्ञामन्योन्ययुद्धकृत् । 4. नीचे
5. कृत् 6. विदधुः
7. पश्चाल्पसौख्यञ्च दरिद्रमेति ।
8. अयं पादः मूले नास्ति 9. दशान्त्यादि
10. संप्राप्तो 11. विड्वरम्
12. राज्यप्लुष्ट 13. स्वस्थ विजानीयात्
14

[1]नष्टराज्यात् सुभूषाप्तिश्चोलदेशाधिपस्य च ।
विपद्दाये जातकश्च[2] देशान्तरनिवासवान् ॥ ३५९० ॥

शास्त्राभ्यासं [3]च लभते गृहस्थाश्रमसंयुतः ।
विद्यार्थी नगरे ग्रामे [4]ह्युहित्वा वारभोजनम् ॥ ३५९१ ॥

विपद्दाये राहु भुक्तौ भ्रातृसौख्यं धनागमम् ।
ज्वरपीडामवाप्नोति स्वजनोद्वाहसंभ्रमम्[5] ॥ ३५९२ ॥

कन्याशनिस्थिते काले विपद्दाये शुभाशुभम् ।
[6]राजर्षेस्तु प्रणाशश्च पाण्ड्यदेशे भविष्यति ॥ ३५९३ ॥

बहुसेनादि [7]युक्तस्य राजपुत्रस्य चैवहि ।
[8]राज्यप्राप्तिः सुभूषाप्तिरल्पकालं भविष्यति ॥ ३५९४ ॥

तत्पुत्रश्च[9] महासौख्यं राज्यलाभं धनागमम् ।
विवाहोत्सवमाप्नोति [10]जातकश्च प्रभोः समः ॥ ३५९५ ॥

कन्यान्ते च तुलादौ च मन्दे वक्रातिचारगे ।
देशभङ्गं प्रजाक्षोभं लोके दुर्भिक्षजं भयम्[11] ॥ ३५९६ ॥

अनावृष्टिहते देशे दुर्भिक्षं वत्सरद्वयम् ।
पश्चात्सौख्यं प्रकुर्वीत[12] विदेशे चान्तरे तथा ॥ ३५९७ ॥

काञ्चीपिनाकिनीमध्ये सैन्यनाशश्च[13] जायते ।
महायुद्धं भवेत्तत्र सेनाधिपतिनाशकृत् ॥ ३५९८ ॥

---

1. राज्यसुभूषाप्तिश्चोलभूराजके फलम्
2. जातकस्य देशान्तरनिवासववान्
3. प्रकुर्वीत गृहस्थाश्रममादिशेत्
4. उषिताचारभोजनम्
5. संक्रमम्
6. तपोन्नृपतिनाशं स्यात्
7. तस्य राजपुत्रस्य सौख्यकृत्
8. राजप्राप्तिः
9. तत्पुत्रस्य
10. जातकस्य प्रभुः समा
11 डांबरम्
12. सौख्यमवाप्नोति विदेशे चान्तरे भवेत्
13. नाशं च

देशान्तरेऽप्यरिष्टं स्याद्ग्रामाधिपतिनाशनम् ।
अशनाच्छादनेनैव[1] ज्येष्ठभ्रात्रादिनाशनम्[2] ॥ ३५९९ ॥

विंशांशे वृश्चिके लग्ने विपद्दाये शुभाशुभम् ।
कृमिद्रुम[3]फलप्राप्तिमल्पसौख्यं विनिर्दिशेत् ॥ ३६०० ॥

पूर्वार्धे [4]च महत्कष्टमुत्तरार्धे शुभाशुभम् ।
मध्यखण्डे त्वनावृष्टिर्दुर्भिक्षं च भविष्यति ॥ ३६०१ ॥

बन्धुवर्गे मनस्तापं [5]स्वदेहायाससंभ्रमम् ।
पश्चादारोग्यमाप्नोति भ्रातृपीडा भविष्यति ॥ ३६०२ ॥

लाभे शनिस्थिते काले पाण्ड्यदेशे जनावधि ।
तद्वारि प्रमुखे क्लेशं राजोपद्रवमादिशेत्[6] ॥ ३६०३ ॥

ब्राह्मणप्रभुसन्तापः[7] पाण्ड्यदेशे भविष्यति ।
[8]यवनाधिपतेर्मृत्युस्तत्पुत्रप्रबलो भवेत् ॥ ३६०४ ॥

तद्राज्ये न्यायनाशश्च[9] महायुद्धं भविष्यति ।
विंशोपरि शरे वर्षे वृश्चिकान्ते [10]शनौ स्थिते ॥ ३६०५ ॥

[11]प्रकृतेः कर्मदोषेण ह्यार्यावर्तजनावधि ।
काशीप्रयागनगरीदेवब्राह्मणक्षो[12]भकृत् ॥ ३६०६ ॥

[13]म्लेच्छाक्रान्ते च नगरे शिवद्रोहं विनिर्दिशेत् ।
[14]तद्वार्ताश्रवणं चैव दशासन्धौ भविष्यति ॥ ३६०७ ॥

---

| | | | |
|---|---|---|---|
| 1. | प्राप्तिरल्प | 2. | नाशकृत् |
| 3. | कष्टं उत्तरार्धे | 4. | अल्प |
| 5. | सदेहा | 6. | आचरेत् |
| 7. | सन्ताप | 8. | यौवनाधि |
| 9. | मान्य | 10. | शनि |
| 11. | कृतिकर्मदोषेण आर्या | 12. | शोभ |
| 13. | म्लेच्छः कान्तः प्रकुर्वीत | 14. | चेति |

विपद्दशान्त्यमारभ्य क्षेमदाये सुसौख्यवान्[1] ।
शूद्रप्रभुक्शालाभं क्षेत्रगोधान्यसङ्कुलम् ॥ ३६०८ ॥

स्वबुद्धिप्रबलं सौख्यं महाराजावलम्बनम् ।
यत्नकार्यार्थसिद्धिं च राजमन्त्रीप्रसादजम्[2] ॥ ३६०९ ॥

लग्नाधिपदशाकाले पाण्डघदेशे महत्सुखम ।
राजद्वारे[3] जनस्नेहं धनधान्याम्बरादिकम् ॥ ३६१० ॥

निधनस्थानदोषेण शुभभुक्तौ मनोव्यथाम्[4] ।
पापभुक्तौ महत्सौख्यं गृहे गोधनसंकुलम् ॥ ३६११ ॥

भ्रातृपीडामवाप्नोति राजसन्मानमादिशेत् ।
लग्नाधिपदशाकाले जीवे पञ्चमवत्सरे ॥ ३६१२ ॥

सप्तमे वाष्टमे वापि यज्ञकर्मरतः सुखी ।
पश्चाद्भवति [5]सन्तोषश्चाल्पलाभो धनागः ॥ ३६१३ ॥

भ्रातृद्वेषमवाप्नोति गृहच्छिद्रं विनिर्दिशेत् ।
पश्चिमां दिशमाश्रित्य गमन धनलाभदम्[6] ॥ ३६१४ ॥

ग्रामान्तरे [7]निवासी च शिवार्चनरतः सदा ।
मृष्टान्नदानसन्तोषं राजदर्शनसंभ्रमम् ॥ ३६१५ ॥

अयत्नेन फलं चैव[8] दारसौख्यं विनिर्दिशेत् ।
द्वाविंशाब्दात् परं चैव योगः[9] स्याद्गुवत्सरे ॥ ३६१६ ॥

---

1. कृत्
2. कृत्
3. राजद्वारजनस्नेहं धनधान्याम्बराप्तिकृत् ।
4. व्यथा
5. सन्तोषं अल्पलाभं धनागमम्
6. कृत्
7. सस्याच्चिवा
8. फलमाप्नोति
9. चेति

तन्मध्ये शुभकर्माणि कृत्वा पुण्यानि भूरिशः ।
मीनेऽर्कनन्दने काल[1] एकोनत्रिंशवत्सरे ॥ ३६१७ ॥

चोलदेशेऽ[2]प्यरिष्टंऽस्यात् पाण्ड्यभूपतिहेतुना ।
मण्डलाधिपतेर्मृत्युः समरे [3]च भविष्यति ॥ ३६१८ ॥

तस्य पुत्रस्य भार्यादेः[4] सञ्जातमरणं भवेत् ।
चोलभूपतिमूलेन देशधान्यफलं विदुः[5] ॥ ३६१९ ॥

अष्टाविंशे दशासन्धौ[6] सामान्यफलमश्नुते ।
देहायासं च लभते[7] स्वजनामयशोकवान् ॥ ३६२० ॥

पश्चादारोग्यसन्तोषं नित्यं मृष्टान्नभोजनम् ।
क्षेत्रलाभं समाप्नोति[8] पश्चादासजनावधि ॥ ३६२१ ॥

क्षेमाधिपदशाकाले स्वभुक्तौ सौख्यमश्नुते ।
स्वान्तभुक्ति विना भाग्यं[9] मध्ये किंचिद्दणं भवेत् ॥ ३६२२ ॥

त्रिंशाब्दे राहुदोषेण मित्रप्रभुवशाद्दणम्[10] ।
अन्तः क्लेशं मनस्तापं राहुभुक्तौ शुभाशुभम् ॥ ३६२३ ॥

सेनाधिपतिनाशश्च[11] पाण्ड्यदेशे भविष्यति ।
पाण्ड्यभूपतिसन्तापो[12] चोलदेशे तथैव च ॥ ३६२४ ॥

[13]अन्याक्रान्तंभवेच्चापि चोळराज्यं नसंशयः ।
मेषे शनिस्थितेकाले पाण्ड्यदेशे जनावधि ॥ ३६२५ ॥

---

1. काले
2. अरिष्टं
3. निहनिष्यति
4. भार्यादि
5. कालं फलं विदुः
6. विंशद्दशासंधिः
7. प्रकुर्वीत
8. तु व्याप्नोति
9. भुक्तौ विनायोग्यं
10. प्रभुरिवार्कवान्
11. शस्यात्
12. सन्तापं
13. क्रान्तमवाप्नोति

स्वबन्धु व्ययमाप्नोति तद्राज्याधिपतेर्विपत् ।
स्वयं कृतादनर्थः[1]स्यात्पाण्ड्यदेशाधिपस्य च ॥३६२६ ॥

मेषेशनिस्थिते काले फलमेवमुदाहृतम् ।
तद्वारि प्रमुखैः क्लेशं संचितार्थविनाशनम् ॥ ३६२७ ॥
राजद्वेषाणि कार्याणि तन्मूलाद्वेषमाप्नुयात् ।
उत्तरां दिशमाश्रित्य बहुसेनागमं तथा ।
परचक्रं प्रकुर्वीत काञ्चीदक्षिण[2]भागके ॥ ३६२८ ॥

अन्योन्ययुद्धं क्षितिपालकाना-
माकस्मिकं भूपतिवेधमाहुः ।
पाश्चात्यकांश्चाप्यवमान एति
क्लेशं वदेद्भूपतिसैन्य[3]नाशात् ॥ ३६२९ ॥

वृषे शनिस्थिते काले जातकस्य महत् सुखम् ।
धनलाभं [4]च लभते नरवाहनसंयुतम् ॥ ३६३० ॥
प्रत्यक्ताराधिपे [5]राहौ दशाकाले विलग्नगे ।
राजप्रसादमाप्नोति देशान्तरफलं वदेत् ॥ ३६३१ ॥

धनान्तरप्रभुद्वारे राहुभुक्तौ श्रियं वदेत् ।
विद्याविनोदगोष्ठी[6]भिर्वस्त्रलाभं विनिर्दिशेत ॥ ३६३२ ॥

प्रत्यक्तारदशाकाले मिथुनान्तेऽष्टमे शनौ ।
[7]मात्ररिष्टं विजानीयाच्छनि[8]भुक्तौ न संशयः ॥ ३६३३ ॥

[9]द्वात्रिंशे चोत्तरं गत्वा सकुटुम्बः सबान्धवः ।
शिष्यैः [10]परिवृतश्चापि राजामात्यप्रपूजितः ॥ ३६३४ ॥

---

1. अनर्थं
2. आदिशेत्
3. नाशम्
4. प्रकुर्वीत नरवाहनमाप्नुयात्
5. राहुदशा
6. गोष्ठी च वस्त्र
7. मात्रारिष्टं
8. शनिभुक्तिर्भविष्यति
9. द्वित्रिंशे चोत्तरं गत्वा सकुटुम्
10. वृतः

[1]आर्जयित्वा धनं भूरि ग्रामांश्चावाप्यभूरिशः ।
आहर्ता सर्वयज्ञानां कर्तान्येषां च [2]कर्मणाम् ।
सर्वसम्पत्समृद्धश्च [3]योगः स्याद्दशवत्सरे ॥ ३६३५ ॥

मध्ये वयो वा यदि राहुपाके
विश्वांशयोगे भवति प्रसूतः ।
प्राकारतो मन्दरचित्रकूटः
पर्यङ्कशय्यामणिवस्तुलाभः ॥ ३६३६ ॥

चिलाम्बरो[4] भूषणमाल्यहारो
[5]चीनाम्बरो वा यदि स्वर्णपाली ।
[6]संबन्धियुक्तः स च बन्धुभोग्यो
दिवा च रात्रौ यदि राहुपाके ॥ ३६३७ ॥

प्रत्यक्ताराधिपे केन्द्रे स्वोच्चांशे शुभदायके ।
वाहनानि धनं भूरि गृहे लक्ष्मीकटाक्षवान् ॥ ३६३८ ॥

नित्योत्सवादिसन्तोषं शुभशोभनसंभ्रमम् ।
कलांशकवशाद्भाग्यं भ्रातृसौख्यं शुभाधिकम् ॥ ३६३९ ॥

त्रिंशोपरि [7]विशेषेण प्रत्यग्दाये शुभं वदेत् ।
क्षेमदायान्तमारभ्य योगः[8] स्यान्मनुवत्सरे ॥ ३६४० ॥

सोदरस्य विशेषेण पुत्रोत्सवफलं वदेत् ।
जातकस्य कलांशेन[9] सन्तानप्रतिबन्धकम् ॥ ३६४१ ॥

---

1. अर्चयित्वा
2. कर्मणि
3. योगं
4. चिलाम्बरं
5. जीवनाम्बरो वा यदि स्वर्णपात्रम्
6. संबन्धु
7. विशेषस्तु
8. योगं
9. शेतु

तन्मूलाद् व्याकुलं चैव भाग्यकालं विनिर्दिशेत् ।
षष्ट्यंशाधिपदोषेण प्रत्यग्दाये शुभान्तरे ॥ ३६४२ ॥

समानजनशत्रुत्वं पापभुक्तौ मनो[1]ऽव्यथाम् ।
प्रत्यग्दाये मध्यखण्डे प्रथमान्त्यादि[2]भागके ॥ ३३४३ ॥

[3]शाक्तेयजनशत्रुत्वं राजद्वारे भविष्यति ।
राजामात्यविरोधी च यत्नकार्यार्थविघ्नवान् ।। ३६४४ ॥

[4]दशेशांशप्रयोगेन स्वकार्यविजयी भवेत् ।
कलांशाधिपतौ [5]शुक्रे लग्नात् केन्द्रत्रिकोणगे ॥ ३६४५ ॥

प्रत्यग्दाये तत्फलं स्यादेकत्रिंशाब्दतः परम् ।
कृष्णागोदावरीमध्ये यवनप्रभुपट्टणे ॥ ३६४६ ॥

[6]तद्द्वारि सचिवस्नेहाद् ग्रामभूम्यर्थ[7]लाभवान् ।
यवनप्रभुसन्मानं ब्राह्मणप्रभुहेतुना ।। ३६४७ ॥

[8]कार्यसिद्धिं सुखप्राप्तिं राजान्तैश्वर्यमाप्नुयात् ।
विचित्रमणिमाप्नोति स्वर्णभूषणमेव वा ॥ ३६४८ ॥

प्रत्यग्दाये फलप्राप्तिर्मध्यखण्डे विशेषतः ।
द्वात्रिंशाब्दे धनं भूरि मध्यदेशे फलाधिकम् ॥ ३६५४९ ॥

तत्रापि वसतस्त[9]स्य धनलाभो महान् भवेत् ।
देशान्तरे निवासः स्यात् सुखतो दश वत्सरान् ॥ ३६५० ॥

तद्राज्ये त्रिचतुर्वारं गमनागमनं शुभम् ।
दूरयात्राफलप्राप्ति[10]र्दक्षिणायां भविष्यति ॥ ३६५१ ॥

---

1. मनोव्यथा
2. इरशतेत्र
3. मेव च
4. देशे
5. शुक्र
6. तद्वाचि
7. लाभकृत्
8. सिद्धिः सुखप्राप्तिः
9. तस्मात्
10. पुनर्भवति दक्षिणा

अष्टमे शनिदोषेण क्रूरमासे ज्वराद्भयम् ।
मित्रशत्रुत्व[1]कार्येण ह्यन्तःक्लेशं विनिर्दिशेत् ॥ ३६५२ ॥

प्रत्यब्दाये तृतीयांशे सत्कर्मफलमश्नुते ।
मध्यखण्डान्तमारभ्य तृतीयांशे त्रिवत्सरे ॥ ३६५३ ॥

अतीव सौख्य[2]कार्यं च विशेषकृतसिद्धिदम् ।
दारान्तरं [3]च लभते महान्नृपतिसत्क्रियाम् ॥ ३६५४ ॥

अतीव श्रियमाप्नोति महादेवीप्रसादतः ।
प्रत्यब्दाये द्वादशाब्दे नित्यश्रीर्नित्यमङ्गलम् ॥ ३६५५ ॥

राजप्रसादमाप्नोति [4]ह्यधियोगवशात् सुखम् ।
प्रत्यगदाये मध्यखण्डे गोचरे नवमे शनौ ॥ ३६५६ ॥

पाण्ड्यदेशेऽ[5]प्यरिष्टं स्यात्तत्पश्चिमपुराधिपात् ।
[6]कुलीरान्त्ये च सिंहादौ पाण्ड्यदेशे जनावधि ॥ ३६५७ ॥

तद्द्वारि प्रमुखैः क्लेशमन्तश्छिद्रवशाद्व्यथा ।
औत्तर्यकलहं किंचित् कावेरीतीर [7]एव च ॥ ३६५८ ॥

तद्राज्याधिपतेः सौख्यं नष्टराज्यधनागमम् ।
तत्पश्चिमपुराधीशसैन्यनाशश्च[8] जायते ॥ ३६५९ ॥

सेनाधिपप्रसन्तान[9]योगभङ्गं विनिर्दिशेत् ।
तद्वार्ता[10]श्रवणेनैव पाण्ड्यभूपतिनाशनम् ॥ ३६६० ॥

चोलपाण्ड्यपुराधीशावन्योन्यस्नेहमाश्रितौ ।
[11]लभेते तावुभौ मृत्युं कालगत्यानुसारतः ॥ ३६६१ ॥

---

1. कार्याणि
2. कार्याणि विशेषकृतासिद्धिकृत्
3. प्रकुर्वीत महान्नृपतिसत्क्रियाः
4. अति
5. पाण्ड्यदेशेऽपि
6. कुलीराख्ये
7. तीरमेव च
8. नाशस्य
9. सन्तानं
10. श्रवणं चेति पाण्ड्यभूपतिनाशकृत्
11. पश्चादरिष्टमाप्नोति मृत्युकालवशाद्भवेत् ।

सिंहे शनिस्थिते काले [1]ह्यवन्त्यां यवनाधिपः ।
योगप्राबल्यमाप्नोति नानादेशाधि[2]पत्यवान् ॥ ३६६२ ॥

प्रत्यग्दाये परार्धेति सिंहान्त्यादित्रिराशिषु[3] ।
म्लेच्छः प्राबल्यमाप्नोति शनिचारवशात् फलम् ॥ ३६६३ ॥

शाखाभूपतियोगेन लोके [4]दुर्भिक्षजं भयम् ।
ब्रह्मण्य[5]क्षोभकार्येण बहुदेशजनावधि ॥ ३६६४ ॥

देवब्राह्मणसन्तापं देशत्यागं सुखक्षयम् ।
जातकस्य विचारः[6] स्याच्चत्वारिंशात् परं व्यथा ॥ ३६६५ ॥

प्रत्यग्दाये तृतीयांशे [7]त्वेकचत्वारिवत्सरे ।
द्विचत्वारिंशगे चैव शुक्रभुक्तिवशाद्विपत् ॥ ३६६६ ॥

मित्राप्तप्रभुसन्तापं म्लेच्छमूलादुपद्रवम् ।
[8]सर्वस्वनाशमाप्नोति जातकश्च विचारवान् ॥ ३६६७ ॥

कलहेन विनिर्गत्य स्वदेशाभिमुखे वसन् ।
शुक्रांशकस्य दोषेण नानाव्याकुल[9]संभ्रमम् ॥ ३६६८ ॥

मार्गमध्ये मनस्तापं चोरशस्त्रेण [10]पीडनम् ।
प्राणसंशयमाप्नोति [11]सर्वाभरणनाशनम् ॥ ३६६९ ॥

पश्चात् [12]स्वप्राप्तनगरे किंचिद्राज्ञा च सत्कृतः ।
अशनासदनं[13] प्राप्यमासयोः द्वयमावसेत् ॥ ३६७० ॥

---

1. अवन्ती 2. कृत्
3. राशिगे
4. डाम्बरम् 5. कालेन
6. विचारस्यात् 7. एक
8. सर्वस्वं नाशमाप्नोति जातकस्य विचारकृत् ।
9. संभवम् 10. पीडितम्
11. सर्वस्वाभरणाकृशः 12. प्राप्तिनगरं
13. अशनाखादनं प्राप्यमासद्वयरतः प्रिया

पश्चादल्पसुखप्राप्तिः पुनरेति [1]स्वमन्दिरम् ।
तद्राज्याधिपतिस्नेहं विद्यागोष्ठीधनागमम् ॥ ३६७१ ॥

धनं बहुविधं प्राप्यद्विजेभ्यः संप्रयच्छति ।
परोपकार[2]कार्येषु श्रद्धा च द्वयवत्सरम् ॥ ३६७२ ॥

द्वादशांशवशात् सौख्यं हेमाम्बरसुवाहनम् ।
ब्राह्मणप्रभु[3]योगेन लभते वाञ्छितं फलम् ॥ ३६७३ ॥

[4]पुनश्चैवोत्तरं गत्वा प्रयाणे विघ्नमाप्नुयात् ।
सर्वेषां जातके मन्दे कन्याराशित्रिकोणगे ॥ ३६७४ ॥

देशकालविपर्यासं मुनिभिः परिकीर्तितम् ।
परचक्रं [5]च लभते म्लेच्छप्राबल्यमादिशेत् ॥ ३६७५ ॥

जातकस्यज्वरं किंचित् प्रत्यग्दाये शुभान्तरे ।
बन्धुक्लेशफलप्राप्तिः स्वजनादिप्रपीडया[6] ॥ ३६७६ ॥

प्रत्यग्दाये तृतीयांशे मध्यभागे मनोव्यथा ।
[7]विप्लवेनविनिर्गत्य दक्षिणां दिशमेष्यति ॥ ३६७७ ॥

तृतीयांशस्य योगेन द्विचत्वारिंशतः परम् ।
जन्मदेशे महत् सौख्यं राजामात्यप्रसाद[8]नम् ॥ ३६७८ ॥

धनधान्यसुभूषाप्तिः पाण्ड्यदेशे क्वचिद्भवेत् ।
[9]पुत्र सत्कृतराज्ये च फलं ब्रूयात् क्वचित् क्वचित् ॥ ३६७९ ॥

तीर्थयात्रापदेशेन दक्षिणां दिशमेष्यति ।
तत्रासौ सत्कृतो राज्ञा प्रत्यग्दाये शुभान्तरे ॥ ३६८० ॥

---

1. सुमन्दिरम्
2. कार्याणि योगी स्याद् व्ययवत्सरे
3. कालेन
4. पुनश्च चोत्तरं गत्वा प्रयाणं
5. प्रकुर्वीत
6. कृत्
7. विपल्लवे
8. कृत्
9. सत्काराराज्यादि

शात्तीकराजसन्मानं नववस्त्रादि[1]संयुतम् ।
स्त्रीसौख्यं नित्यसन्तोषमीया[2]ज्ज्येष्ठादिमास्सु च ॥ ३६८१ ॥

पश्चात् [3]स्वदेशमासाद्य मुदैकाब्दं द्वयं च वा ।
कलांशकस्य दोषेण विद्यावादकलाप[4]वान् ॥ ३६८२ ॥

प्रत्यग्दाये तृतीयांशे मध्यभागे तुलाशनौ ।
कन्यान्त्यादिं[5] समारभ्य वनस्थलगतः सुखी ॥ ३६८३ ॥

तत्र राजप्रसादेन [6]कुटुम्बभरणे सुखम् ।
क्षेत्रलाभसुखं नित्यं नदीप्रान्त्ये निवासवान् ॥ ३६८४ ॥

सुतेशांशकयोगेन सन्तानोत्पत्तिनाशनम् ।
पुनश्चैवोत्तरं गत्वा दूरदेशं प्रयास्यति ॥ ३६८५ ॥

पूर्वाश्रितवशाल्लाभं हेमाम्बरधनादिकम् ।
पश्चात् [7]स्वदेशमाप्नोति धनलाभं विनिर्दिशेत् ॥ ३६८६ ॥

प्रत्यग्दशान्ते परमोच्चभागे
मन्दे सुवस्त्राभरणादिलाभम् ।
जनान्तरग्रामपुरीश[8]मूलात्
सौख्यं [9]सदा जीवनमाहुरार्याः ॥ ३६८७ ॥

सुतादिपदशाकाले जीवे पञ्चमसंस्थिते ।
स्वभुक्तौ पुत्रलाभः[10] स्याद् गृहे गोधान्यसंकुलम् ॥ ३६८८ ॥

प्रत्यग्दशासंधिकाले मित्रादिप्रभु[11]विग्रहम् ।
महानृपति[12]नाशश्च पाण्ड्यदेशे भविष्यति ॥ ३६८९ ॥

---

1. लाभकृत्
2. ज्येष्ठमासादिसौख्यकृत्
3. स्वदेशमासाद्य शब्दमेकं द्वयं मुदा
4. कृत्
5. कन्यान्त्यादि
6. कुटुम्बाभरणं
7. स्वस्तिमवाप्नोति
8. पुरी च
9. वदेज्जीवन
10. लाभ
11. विद्भरम्
12. नाश स्यात्

[1]अराजकमिति प्राहुः स्त्रीमूलात् षोडशाब्दकम् ।
[2]ब्राह्मणः प्रबलं चैति पश्चाद्राजसुतोऽपि च ॥ ३६९० ॥

कुलटा राज[3]पत्नी च विप्रान् सा धर्षयिष्यति ।
काममोहवशा[4]पन्ना राज्यं स्वं पालयिष्यति ॥ ३६९१ ॥

[5]तत्पौत्रो लभते पश्चात्तद्राज्यं वञ्चयिष्यति ।
[6]विश्वांशे च तत्फलं स्यात् शेषमन्यद्विचार्यताम् ॥ ३६९२ ॥

षष्ठाधिपदशाकाले स्वभुक्तौ सौख्यमाप्नुयात् ।
[7]चन्द्रलग्नाद्भाग्यलाभदशायां भाग्यमश्नुते ॥ ३६९३ ॥

ज्येष्ठभ्रातृकलत्रस्य देहजाड्यं भविष्यति ।
पुत्रवृद्धि[8]करा चैव धनधान्याम्बरादिदा ॥ ३६९४ ॥

जातकस्य महत् सौख्यं राजामात्यप्रसादजम्[9] ।
शुभशोभनकार्याणि भ्रातृपुत्रश्च सौख्य[10]वान् ॥ ३६९५ ॥

सुताधिपदशाकाले [11]पापभुक्तौ भवेत्तथा ।
दुःस्थे शनिस्थिते काले ज्येष्ठभ्रातृविनाशनम्[12] ।
तन्मूलाद्व्याकुलं चैव तदूर्ध्वं पुत्रलाभवान्[13] ॥ ३६९६ ॥

[14]विश्वांशयोगे मकरांशजातः
[15]प्रत्यग्दशायां च सुतेशदाये ।
पापान्तरान्त्ये धनभूमिलाभं
महानदीप्रान्त [16]इति ब्रुवन्ति ॥ ३६९७ ॥

---

1. अराजमितिसं
2. ब्राह्मणप्रबलं चेति पश्चाद्राजसुतस्य च ।
3. राजपत्नीश्च विप्रेभ्यो
4. वशापन्नो राज्यपालनमादिशेत्
5. पौत्रमाप्नोति
6. विश्विनांशे
7. चन्द्राल्लग्नदशाद्भाग्ये
8. करं चैत्र धनधान्याम्बरादिकृत्
9. कृत्
10. सौख्यदः
11. हरेत् पापोऽपि वा यदि
12. कृत्
13. कृत्
14. षष्ठाधियोगे
15. दशे वाथ
16. मिति

महानृपतिसन्मानं ब्राह्मणप्रभुमित्र[1]ताम् ।
ग्रामलाभमवाप्नोति नदीप्रान्त्ये [2]विशेषतः ॥ ३६९८ ॥

[3]जीवपाके मध्यखण्डे बहुधान्यधनागमम् ।
शुभशोभनकार्याणि पुत्रस्यैव विनिर्दिशेत् ॥ ३६९९ ॥

जीवांशकस्य दोषेण पुत्रिकाक्लेशसंभवम् ।
पश्चात् सन्तानमाप्नोति [4]योगं वै पञ्चवत्सरम् ॥ ३७०० ॥

धनाधिपदशाकाले दुस्थाने रविनन्दने ।
मित्रप्रभु[5]विनाशः स्यात्तत्पुत्रोऽल्पसुखी भवेत् ॥ ३७०१ ॥

दायादिवशमापन्नः क्लेशं प्राप्नोतिभूरिशः ।
देशान्तरे महत् सौख्यं तत्काले जातकस्य च ॥ ३७०२ ॥

धर्मसिद्धिमवाप्नोति पूर्वार्धे [6]सौख्यदो गुरुः ।
शत्रुक्षेत्रवशात् क्लेशं भ्रातृद्वेषकलाप[7]नम् ॥ ३७०३ ॥

विभागयत्नमाप्नोति स्वकार्यप्रवलो[8] भवेत् ।
[9]जीवपाके मध्यखण्डे पूर्वार्धे शुक्रभुक्तिषु ॥ ३७०४ ॥

कुम्भे शनिस्थिते काले राजद्वारे[10] भविष्यति ।
[11]स्थानच्युतिर्मनस्तापो मित्राप्तजनविग्रहः ॥ ३७०५ ॥

प्रभुवर्गेऽप[12]चारंच तन्मूलाद् व्याकुलं भवेत् ।
[13]जीवपाके परार्धे च मध्यखण्डान्त एव च ॥ ३७०६ ॥

---

1. मैत्रताम्
2. भविष्यति
3. पाके जीवे मान्य
4. स्यात् पञ्चवत्सरे
5. नाशं स्यात्तत्पुत्रोल्पसुखं भवेत्
6. गुरुसौख्यकृत्
7. कृत्
8. प्रबलं
9. पाके जीवे
10. द्वारं
11. च्युतिं मनस्तापं मित्रार्तजनविड्वरम्
12. अनचारं स्यात्तन्मूलात् व्याकुलं भवेत्
13. पाके जीवे परार्धश्च मध्यखण्डान्तमेव च ।

पुत्रोत्सवादिसन्तोषं गृहेचो[1] द्वाह संभ्रमम् ।
मीने शनिस्थिते काले [2]व्याकुलं च फलं वदेत् ॥ ३७०७ ॥

पाण्डचदेशे [3]व्यरिष्टं स्यात् सेनाधिपतिनाशनम् ।
चोलदेशे [4]विशेषेण स्वशत्रुजननाशनम् ॥ ३७०८ ॥

गुरुचारवशात् सौख्यं जातकस्य धनागमम् ।
शुभशोभनकार्याणि कृत्वा धर्माश्च भूरिशः ॥ ३७०९ ॥

[5]पूर्वाश्रितराजमूलात् क्षेत्रलाभं शुभाधिकम् ।
भ्रातृक्लेशमवाप्नोति [6]ह्युत्तरार्धे फलं तथा ॥ ३७१० ॥

पूर्वार्धे बुधभुक्तौच [7]करपादेषु रोगवान् ।
देहायासमवाप्नोति शान्त्या शान्ति प्रयास्यति ॥ ३७११ ॥

[8]जीवपाके तृतीयांशे नवांशकफलं शुभम् ।
पश्चिमां दिशमाश्रित्य [9]प्रयाणे राजदर्शनम् ॥ ३७१२ ॥

विशेषधनवस्त्राप्तिं[10] क्षेत्रलाभं विनिर्दिशेत् ।
नूतनप्रभुसन्मानं मित्रप्रभुविनाशनम् ॥ ३७१३ ॥

शुभशोभनकार्याणि गृहे सन्तानलाभ[11]वान् ।
तृतीयांशे मध्यखण्डे विशेषफलमश्नुते ॥ ३७१४ ॥

धनधान्याम्बर[12]प्राप्तिं धर्मसिद्धिं विनिर्दिशेत् ।
मेषे शनिस्थिते काले वृषभे च तथैव च ॥ ३७१५ ॥

---

1. उद्वाह
2. व्याकुलेन फलं भवेत्
3. अरिष्ट
4. विशेषस्तु
5. श्रिताद्राज
6. उत्तरार्धे फलं वदेत्
7. पादादिवाहकृत्
8. पाके जीवे
9. प्रयाणं
10. वस्त्राप्तिः
11. कृत्
12. प्राप्तिधर्मसिद्धिः

क्रूरमासे ज्वरं चैव स्वभार्यापुत्र[1]पीडनम् ।
सुताधिपदशाकाले राहुभुक्तौ मनोऽव्यथा ।
ज्येष्ठभ्रातृसुतक्लेशो[2] भविष्यति न संशयः ॥ ३७१६ ॥

स्वर्भानुभुक्तौ गुरुदायकाले
भूपालसन्मानमतीव सौख्यम् ।
ग्रामाधिपत्यं धनलाभमेति
पूर्वाश्रितब्राह्मणमन्त्रिमूलात् ॥ ३७१७ ॥

शालीवाहशके लङ्कद्वितर्काद्यकतेः परम् ।
यवनाधिपतेर्मृत्युस्तत्पौत्रः प्रबलो[3] भवेत् ॥ ३७१८ ॥

उत्तरायणगे सूर्ये सिंहस्थे देवपूजिते ।
अन्योन्ययुद्धं [4]कुरुतः चोलपाण्ड्यपुराधिपौ ॥ ३७१९ ॥

नर्मदोत्तरगे भागे बहुसेनाधनाशनम् ।
जीवे केतुयुते काले तत्त्रिकोणे शनिस्थिते ॥ ३७२० ॥

फल[5]मेवं प्रशंसन्ति लोके दुर्भिक्षजं[6] भयम् ।
पाण्ड्यदेशेऽ[7]प्यरिष्टं स्याद्राजामात्यविनाशनम् ॥ ३७२१ ॥

यस्मिन् देशे पुरे ग्रामे द्वितीयाष्टमजन्मगे ।
चतुर्थे दशमे वापि मन्दे स्वर्भानु[8]संयुते ॥ ३७२२ ॥

[9]तद्राज्ये कलहः क्षोभं शत्रुराजभयं [10]वदेत् ।
सैन्यनाशमवाप्नोति सेनाधिपति[11]विग्रहम् ॥ ३७२३ ॥

---

1. कृत्
2. क्लेशं
3. प्रबलं
4. आप्नोति चोलपाण्ड्यपुराधिपः
5. एव
6. डांबरम्
7. अरिष्टं स्याद्राजार्तिभय
8. गेऽपि वा
9. तदीशे
10. भवेत्
11. विड्वरम्

शास्त्रभूपतियोगेन देशकालफलं विदुः ।
षष्ठाधिपदशाकाले स्वभुक्तौ दक्षिणायने ॥ ३७२४ ॥

मनश्चापल्यमाप्नोति पुत्रपीडा भविष्यति ।
देहायासं मनस्तापं कलहेन विचार[1]वान् ॥ ३७२५ ॥

क्रूरमासे फलं ब्रूयादश्वलाभं विनिर्दिशेत् ।
लग्नाधियोगराशिस्थे शनौ कर्मेश[2]संयुते ॥ ३७२६ ॥

राजयोगफलप्राप्तिर्गृहे लक्ष्मीकटाक्ष[3]वान् ।
[4]लग्नेशेनेक्षितो मन्दो दशाकाले फलप्रदः ॥ ३७२७ ॥

राजवंशे तु राज्याप्तिरितरश्चेच्छु[5]भान्वितः ।
षष्ठाधिपदशाकाले स्वभुक्तौ चोत्तरायणे ॥ ३७२८ ॥

धनधान्यसमृद्धिश्च शुभशोभनसंभ्रमः[6] ।
उत्कृष्टधर्मसिद्धिश्च विधांशे प्रबलो[7] शनिः ॥ ३७२९ ॥

अग्निष्टोमफलप्राप्तिः पुत्रस्य फलमादिशेत् ।
ग्रन्थान्तरे [8]विशेषेण स्वपुत्रश्शुभशोभनम् ॥ ३७३० ॥

लक्ष्मीकटाक्षमाप्नोति जातकस्य फलं वदेत् ।
पश्चिमां दिशमाश्रित्य बन्धुमूलाच्छुभाधिकम् ॥ ३७३१ ॥

वाहनाम्बर[9]भूषाप्तिं पुत्रस्तु श्रियमश्नुते ।
विधांशे वृश्चिके लग्ने [10]पापी मन्दोऽपि सौख्यकृत् ।
स्वभुक्तौ श्रियमाप्नोति गृहे कल्याणसंभ्रमम् ॥ ३७३२ ॥

---

1. कृत्
2. संस्थिते
3. कृत्
4. लग्नेक्षिते शने राशौ
5. शुभावहम्
6. संभ्रमम्
7. प्रबलं
8. विशेषं स्यात् स्वपुत्र
9. भूषाप्तिः पुत्रस्य
10. पापे मन्दसुखसौख्य

विश्वांशयोगे रविजस्य दाये
स्वभुक्तिकाले शुभशोमना[1]सिम् ।
राजप्रसा[2]देन सुवस्त्रलाभ-
[3]मिष्टार्थसिद्धिं मुनयो वदन्ति ॥ ३७३३ ॥

नीचराशिगते मन्दे निधनाधिपसंयुते ।
देहजाड्यं [4]च लभते क्रूरमासे रुजाधिकम् ॥ ३७३४ ॥

स्वजनात्स्वजनक्लेशं भृत्यवर्गे मनोव्य[5]थाम् ।
बन्धुक्लेशफलप्राप्तिर्बुधसूर्यान्तरान्तरे ॥ ३७३५ ॥

[6]त्रिषष्ठनाथौ कुरुतोऽशुभं च
मन्दांशयोगे [7]तु महत् सुखं च ।
हेमाम्बरं स्वर्णसुभूषणाप्तिं[8]
पुत्रादिलाभं [9]बहुभाग्ययुक्तम् ॥ ३७३६ ॥

शनिभुक्तौ पाण्ड्यदेशे हताश्वो [10]सैनिकेश्वरः ।
शूद्रः प्राबल्यमाप्नोति राजपुत्रस्य [11]विग्रहः ॥ ३७३७ ॥

चोलपाण्ड्य[12]पुराधीशावन्योन्यद्वेषमाश्रितौ ।
समयुद्धं भवेत्तत्र सैन्यनाशश्च जायते ॥ ३७३८ ॥

वृषभांश[13]गते मन्दे गोचरे मिथुने स्थिते ।
सेतुप्रान्ते [14]विशेषः स्यात्तद्राज्याधिपतेर्विपत् ॥ ३७३९ ॥

---

1. आप्तिः
2. प्रसादादि
3. इष्टार्थसिद्धिः
4. प्रकुर्वीत क्रूरमासे भविष्यति
5. व्यथा
6. त्रिषष्ठवर्गे अशुभं करोति
7. महतीव सौख्यम्
8. आप्तिः
9. श्रियमाहुरार्याः
10. सहितेश्वरः
11. विद्रुरम्
12. शौअन्यो
13. शनौ कालेगोचरेमिथुनेशनौ
14. विशेषं

उत्तरां दिशमाश्रित्य कलहः[1] समुपैष्यति ।
परचक्रं [2]भवेत्तत्र शनिभुक्तौ न संशयः ॥ ३७४० ॥

पूर्वाश्रितस्य शूद्रस्य प्राबल्यं शनिभुक्तिषु ।
पाण्ड्यदेशे फलप्राप्तिरमात्यजन[3]युद्धदा ॥ ३७४१ ॥

यद्भावस्याष्टमे मन्दे यद्भावस्याष्टमेक्षिते ।
तद्भावः क्लेशमाप्नोति व्याधिना नाश[4]मेव वा ॥ ३७४२ ॥

द्राविडान्ध्रप्रदे[5]शेषु राज्ञामन्योन्यविग्रहः ।
कर्णाटकोङ्कणे देशे [6]त्वमात्यजनविग्रहः ॥ ३७४३ ॥

सुख[7]स्थाधिपो मन्दो स्वभुक्तौ देहजाड्यकृत् ।
क्रूरमासं परित्यज्य देहारोग्यं धनागमम् ॥ ३७४४ ॥

क्रूरमासे मनस्तापं देहायासं धनव्ययम् ।
राजामात्यविरोधेन क्लेशं बन्धुविनाशनम् ॥ ३७४५ ॥

पशुधान्यव्ययं चैव विप्लवेन मनोव्य[8]थाम् ।
पुत्रदारादि[9]पीडां च दुर्निमित्तं वदेत्तदा ॥ ३७४६ ॥

स्वप्रमोश्च मनस्तापं तद्द्वारस्थजनावधि ।
[10]राजकार्यविरोधेन धनधान्यमुदीरयेत् ॥ ३७४७ ॥

चन्द्रलग्नाधिपे मन्दे दशायां च स्वभुक्तिषु ।
[11]लग्नात् सुखेश्वरो यस्य कालमृत्युर्न संशयः ॥ ३७४८ ॥

सुखाधिपदशाकाले [12]पापभुक्तिर्यदा भवेत् ।
[13]पितरिष्टं विजानीयान्मित्रप्रभुविनाश[14]नम् ॥ ३७४९ ॥

---

1. कलहं
2. प्रकुर्वीत
3. विड्वरम्
4. ईरयेत्
5. प्रदेशानां राज्ञामन्योन्ययुद्धकृत्
6. अमात्यजनविड्वरम्
7. स्थानाधिपे मन्दे
8. व्यथा
9. पीडा स्याद् दुर्निमित्तं भविष्यति
10. कार्यं प्रकुर्वीत
11. सुखेश्वरो तस्य
12. हरेत् पापोऽपि वा यदि
13. पित्रारिष्टं
14. कृत्

हृद्रोगादिमनस्तापं क्षेत्रगोधान्यनाशनम् ।
चन्द्र[1]लग्नेशदोषेण फलानि परिचिन्तयेत् ॥ ३७५० ॥

पूर्वाषाढे [2]च शन्यंशे विश्वांशे जायते नरः ।
मन्ददाये मन्दभुक्तौ पितृभाग्यं विनिर्दिशेत् ॥ ३७५१ ॥

अग्निष्टोमादिसत्कर्म गृहे कल्याणसंभ्रमम् ।
[3]पुत्रश्च फलमाप्नोति जातकस्तु महत् सुखम् ॥ ३७५२ ॥

ज्येष्ठभ्रातृ[4]सुतादीनां सन्तानोत्पत्तिसंभ्रमः ।
धनधान्याभिवृद्धिः स्याद्गृहे लक्ष्मीकटाक्षवान् ॥ ३७५३ ॥

शनिभुक्तौ तुलाजीवे मध्यखण्डे धनागमम् ।
पुत्रप्राबल्यमाप्नोति पितृसौख्यं विनिर्दिशेत् ॥ ३७५४ ॥

शनौ पश्चिमदिग्भागे स्वभुक्तौ [5]स फलप्रदः ।
राजपुत्रप्रसादेन लभते [6]भूरिशो धनम् ॥ ३७५५ ॥

सुताधिपदशाकाले स्वभुक्तौ सप्तमे शनौ ।
गोचरे फलमाप्नोति गजान्तैश्वर्य[7]संयुतम् ॥ ३७५६ ॥

नीचराशिगते मन्दे तत्तीशे चन्द्रकेन्द्रगे ।
नीचभङ्गफले [8]प्राप्तिं दशायां योगमाप्नुयात् ॥ ३७५७ ॥

शनिभुक्तौ चोत्तरार्धे गजान्तैश्वर्यभाग्यवान् ।
महाराजप्रसादेन स भूरिश्रियमश्नुते ॥ ३७५८ ॥

विचित्रवस्त्राभरणार्थलाभं
राज[9]प्रसादेन च भाग्यलाभम् ।

---

1. लग्नाधिपस्तस्य
2. पूर्वाषढेन
3. पुत्रस्य फलमाप्नोति जातकस्य
4. सुताद्यादि सन्तानोत्पत्तिसंभ्रमम्
5. फलमाविशेत्
6. धनभूरिशः
7. आप्नुयत
8. प्राप्तिं
9. राजप्रसादिशुभप्रसादः

विश्वांशयोगे [1]त्वचरोद्भवस्तु
भाग्यं [2]लभेत् स्पष्टदशाफलं च ॥ ३७५९ ॥

जीवे सप्तमपर्याये कन्यादित्यमासगे ।
भाग्यकाल [3]इति प्रोक्तो विश्वांशे जनितस्य च ॥ ३७६० ॥

उत्कृष्टधर्मसिद्धिः स्यात् पुत्रस्य शुभशोभनम् ।
अतीव श्रियमाप्नोति गुरुभुक्तिवशात् फलम् ॥ ३७६१ ॥

जीवास्त[4]मनभासे च क्रूरमासे च वा यदि ।
शनिभुक्तौ विचारं [5]च देहायासं कचित् कचित् ॥ ३७६२ ॥

चतुष्षष्टिसमान्त्या[6]दौ राजामात्यप्रसादवान् ।
कर्मसिद्धिमवाप्नोति पुत्रस्य फलमादिशेत् ॥ ३७६३ ॥

वसन्तकाले रविजस्य भुक्तौ
विश्वांशयोगे शुभकर्म[7]सिद्धिम् ।
[8]म्लेच्छादिसेवाफलमाकरोति
तुलागुरौ भाग्य[9]विभूषणाप्तिम् ॥ ३७६४ ॥

कुम्भे राहुस्थिते काले मीनादित्यमासगे ।
राजसन्मानसन्तोषं विद्यागोष्ठीप्रसङ्गतः[10] ॥ ३७६५ ॥

[11]पञ्चषष्टितमे वर्षे कारकांशे शुभाशुभम् ।
पूर्वाश्रितप्रभुप्रीत्या[12]पश्चिमे फलमादिशेत् ॥ ३७६६ ॥

---

1. अचरप्रजाते
2. वदेत् स्पष्टदशाफलं स्यात्
3. इति प्रोक्तं विश्वांशे जायते नरः
4. माने माने च
5. स्याद्
6. माल्यादिराजमात्यप्रसादकृत्
7. सिद्धिः
8. म्लेच्छादिगे वा
9. इहाहुरार्याः
10. कृत्
11. वत्सरे पञ्चषष्ट्यब्दे
12. प्रीतिः

श्वेतवर्णस्वभूषादिलाभो भवति नित्यशः ।
स्वपुत्रस्य सुवाहाप्ति [1]स्त्रीसौख्यं शुभशोभनम् ॥ ३७६७ ॥

मीनशुक्रवशाच्चैव [2]रिवदं फलमुदाहृतम् ।
कुम्भे राहुस्थिते काले तत्त्रिकोणे शनिस्थिते ॥ ३७६८ ॥

स्वमित्रनृपतिक्लेशं तद्द्वारस्थजनावधि ।
पाण्ड्यदेशे [3]विशेषं च देशाधिपतिविग्रहम् ॥ ३७६९ ॥

अमात्यजनसन्तापं शूद्रः प्राबल्यमश्नुते ।
युग्मे शनिस्थिते काले कीट[4]लग्नसमुद्भवः ॥ ३७७० ॥

देहायासं [5]च लभते वातपैत्यरुगुद्भवम् ।
अन्नद्वेषं गृहच्छिद्रमादायाधिकव्ययम् ॥ ३७७१ ॥

[6]देहकार्श्यं च लभते दारपुत्रप्रपीडितः ।
लोके धान्य[7]क्षये चैव प्रजाक्षोभं शुभाशुभम् ॥ ३७७२ ॥

विध्यांशे वृश्चिके लग्ने पूर्वभाग[8]समुद्भवः ।
[9]मन्दपाके मन्दभुक्तावपमृत्युर्भविष्यति ॥ ३७७३ ॥

माता[10]ब्दे च महत् क्लेशं पित्ताधिक्यवशाद्रुजम् ।
महादेवप्रसादेन देहारोग्यं विनिर्दिशेत् ॥ ३७७४ ॥

[11]नैधनेशदशासन्धौ पुत्रश्च सुखमश्नुते ।
सन्तानोत्पत्तिसन्तापं खेदमोदं विनिर्दिशेत ॥ ३७७५ ॥

---

1. श्री 2. इदं
3. शेषं स्याद्देशाधिपति विभ्रमम् 4. लग्नस्य जातके
5. प्रकुर्वीत वातपैतोल्बणं भवेत्
6. देहकार्श्यं विजानीयाद् 7. क्षयादीनि
8. भागस्य जातके 9. पाके मन्दे मन्दभुक्तावपमृत्युस्तथाश्रितः
10. माताब्दे महतिक्लेशं पित्तादिक्यवशाद्विपत् ।
11. नैधनाधिपती सान्धिदशायां पुत्रसौख्यकृत् ।

विश्वांशे वृश्चिके लग्ने मन्दे बुधसमन्विते ।
आपत्संन्यासवांश्चैव षष्ठाधिपदशासु च[1] ॥ ३७७६ ॥

षष्ठाधिपदशाकाले [2]विश्वांशे जनितस्तथा ।
आपत्संन्यासमाप्नोति बुधभुक्तौ न संशयः ॥ ३७७७ ॥

यवनः —

शनिभुक्त्यन्त्यमारभ्य[3] मन्दे सौम्यान्तरान्तरे ।
आश्रमान्तरमाश्रित्य[4] नदीप्रान्ते मृतिं लभेत्[5] ॥ ३७७८ ॥

ग्रन्थान्तरे —

विश्वांशे वृश्चिके लग्ने [6]ह्युत्तरांशसमुद्भवः ।
शंभुपर्वतमासाद्य [7]गुहायां निवसिष्यति ॥ ३७७९ ॥

पञ्चषष्टिसमे मृत्युरुत्तरायणगे रवौ ।
नक्रे [8]सूर्ये स्थिते काले कृष्णपक्षे मृतिं वदेत् ॥ ३७८० ॥

निधनाधिपसंयुक्ते भद्रायां च तिथौ तथा[9] ।
विश्वांशे चोत्तरे भागे स्थिरलग्ने दिवं गतः ॥ ३७८१ ॥

पूर्वभागे [10]प्रजातस्य संन्यासश्च न विद्यते ।
[11]षष्ठाधिपदशामृत्युं निधनाधिपभुक्तिषु ॥ ३७८२ ॥

द्विपञ्चाशात् परं वापि[12] पञ्चपञ्चाशवत्सरे ।
अथवा सप्तपञ्चाशे शुक्लपक्षे मृतिं वदेत् ॥ ३७८३ ॥

---

1. दशेषु च
2. विश्वांशस्यैव जातके
3. भुक्त्यन्तरमारभ्य
4. इत्याहु
5. वदेत्
6. उत्तरांशस्य जातके
7. शुभायां
8. सूर्यस्थिते
9. संयुक्तौ परे भद्रतिथीषु च
10. प्रजातश्च सन्यास च
11. शेषं षष्टिदशामृत्युः
12. परं चेति

व्ययेशे स्वोच्चराशिस्थे विधांशे ब्रह्मलोकवान् ।
कैवल्यं लभते[1] चैव पूर्वभागे न विद्यते ॥ ३७८४ ॥

विपत्ताराधिपे जीवे स्वैन्दवांशसमुद्भवः[2] ।
तृतीयांशे मनस्तापं सञ्चितद्रविणव्ययम् ॥ ३७८५ ॥

चन्द्रभुक्तौ देहजाड्यमग्निमान्द्यमरोचकम् ।
सदा व्याकुलकार्यं च[3] राजन्यद्वेषमादिशेत् ॥ ३७८६ ॥

राज्येऽपि स्वात्माश्रित भूपतेश्च[4]
तत् द्वारिमुख्यप्रबलैश्च हानिम्[5] ।
कुजान्तरे क्लेशफलं तथैव[6]
[7]ह्यमात्ययोगार्थविनाशमाहुः ॥ ३७८७ ॥

चन्द्रान्तरान्त्यादि विपद्दशायां
कुजान्तरे बन्धुविरोधमेव[8] ।
स्वराजसौख्यं मुनयो वदन्ति
स्वग्रामकार्यार्थकलापनं च[9] ॥ ३७८८ ॥

यवनप्रमुखेन कुजभुक्तौ धनव्ययम् ।
ग्रामलाभमवाप्नोति [10]ह्यल्पसौख्यं विनिर्दिशेत् ॥ ॥३७८९ ॥

—:*:—

---

1. प्राप्तमित्याहुः
2. ऐन्दवांशस्य जातके
3. कार्याणि
4. स्वसेवकात्तिनृपालराज्ये
5. हानि
6. ददाति
7. अमात्य
8. आहुः
9. कलापमेति
10. अल्पसौख्यं

## तुलालग्ने ऐन्दवांशः

नीचराशिगते भौमे तुलालग्नोद्भवस्य च[1] ।
विपद्दाये धनच्छेदः कुजभुक्तौ न संशयः ॥ ३७९० ॥

स्वप्नभोश्च स्वभार्यायां[2] सन्तानोत्पत्तिनाशनम् ।
कुजभुक्त्यन्तमारभ्य राहुभुक्ताविदं फलम् ॥ ३७९१ ॥

कुजभुक्तौ क्रूरमासे [3]ह्यादायादधिकव्ययम् ।
ग्रामकार्यकलापेन सदा व्याकुलमादिशेत् ॥ ३७९२ ॥

अनावृष्टिहते देशे लोके दुर्भिक्षजं भयम्[4] ।
चन्द्रभुक्त्यन्तमारभ्य कुजभुक्तौ फलं वदेत् ॥ ३७९३ ॥

राजद्वारे जनद्वेषं कुजभुक्तौ पशुक्षयम् ।
देशान्तरे ग्रामलाभं क्रयमूलात् फलं वदेत् ॥ ३७९४ ॥

जीवे भौमान्तरे काले राजद्वारे कलापनम्[5] ।
राजन्यद्विजमूलेन यत्नकार्यार्थं नाशनम् ॥ ३७९५ ॥

देवतादर्शनं यात्रां [6]कुटुम्बसहितस्तथा ।
ज्ञानसिद्धिमवाप्नोति धर्ममूलाद्धनव्ययम् ॥ ३७९६ ॥

द्विजहोमान्तमारभ्य [7]कृत्वन्ते धर्मसिद्धिमान् ।
कुजभुक्तौ शुभं किंचिच्छुभमासे धनागमम्[8] ॥ ३७९७ ॥

पूर्वग्रामविनाशश्च[9] जीवे चन्द्रान्तरान्तरे ।
[10]इतरग्रामलाभादि कुजभुक्तौ विशेषतः ॥ ३७९८ ॥

---

1. तुलालग्नस्य जातके
2. कुलस्त्रीषु
3. आदायात्
4. डांबरम्
5. कलापकृत्
6. कुटुम्बं सङ्गमेव च
7. होमान्ते
8. धनागमः
9. विनाशस्य
10. अन्यथा

शान्तिकांशे विपद्दाये यूनाधिपतिभुक्तिषु ।
खेदमोदं च लभते[1] क्रूरमासे विना शुभम् ॥ ३७९९ ॥

मित्राप्तजनसन्तापमादायादधिकव्ययम् ।
गृहच्छिद्रकलापेन[2] प्रवासं चापि निर्दिशेत् ॥ ३८०० ॥

कुजान्तरान्तमारभ्य राहुभुक्तौ महाविपत्[3] ।
नानाव्याकुलकार्याणि चैन्दवांशसमुद्भवः[4] ॥ ३८०१ ॥

स्वप्रभोश्च सुतक्लेशं चतुष्पाज्जीवनाशनम् ।
अमात्यजनपीडां च त्रयस्त्रिंशतिवत्सरे[5] ॥ ३८०२ ॥

यवनप्रभुसन्मानं स्वप्रभोश्च धनागमम् ।
[6]गजाश्वाम्बरभूषाप्ति कुजभुक्तौ फलं वदेत् ॥ ३८०३ ॥

षष्ठाधिपदशाकाले धनाधिपतिभुक्तिषु ।
दुर्व्याज्यग्रामकार्येण [7]ह्यर्थनाशं विनिर्दिशेत् ॥ ३८०४ ॥

जीव[8]भौमान्तरे काले क्रयमूलाश्वलाभवान् ।
गजव्यापारयत्नेन [9]ह्यादायादधिकव्ययम् ॥ ३८०५ ॥

जन्मे शनिस्थिते काले नानाव्याकुलसंभवम् ।
कुजभुक्तौ फलं सत्यं राहुभुक्तौ विशेषतः ॥ ३८०६ ॥

लोके [10]त्वर्घक्षयादीनि जीवे चन्द्रान्तरान्तरे ।
कुजभुक्तौ बहुक्षामं दुःखिताः सर्वजन्तवः ॥ ३८०७ ॥

युग्मान्ते [11]त्वर्घवृद्धिः स्यादुत्तरे देहसौख्यकृत् ।
चोलदेशे प्रजाक्षोभाद्धान्यनाशं विनिर्दिशेत् ॥ ३८०८ ॥

---

1. प्रकुर्वीत
2. कलापं स्यात्प्रवासं
3. महद्विपत्
4. ऐन्दवांशस्य जातके
5. पीडा स्यात्तृतीय त्रिंशवत्सरे
6. राजाश्वाम्बर भूषाप्ति
7. अर्थ
8. भौमोत्तरे
9. आदायाद
10. अर्घ
11. अर्घवृद्धिः स्यादुत्तरे देहसौख्यकृत्

[1]गोचरे मिथुनान्त्यादौ कुलीरे रविनन्दने ।
चोलदेशे [2]त्वरिष्टं स्यात्तद्राज्याधिपतेर्विपत् ॥ ३८०९ ॥

ज्ञातिशत्रुकलापेन चोलराज्यविनाशनम् ।
राहुभुक्तौ फलं सिद्धमौत्तरं कलहं [3]वदेत् ॥ ३८१० ॥

लग्नाद्वित्तगते [4]राहौ भुक्तिकाले धनक्षयम् ।
राज्यनिष्ठुरकार्याणि राजन्यजनहेतुना ॥ ३८११ ॥

कुजान्तरान्तमारभ्य स्वराजन्यजनामयम् ।
राहुभुक्तावरिष्टं [5]च शत्रुनाशं विनिर्दिशेत् ॥ ३८१२ ॥

विपद्दाये राहुभुक्तौ क्लेशं[6]च मासविंशतौ ।
गोचरे नवमे [7]राहावैदवांशे शुभाशुभम् ॥ ३८१३ ॥

प्रभुवर्गेप्यरिष्टं च [8]स्ववंशज्ञाति नाशनम् ।
[9]त्रयस्त्रिंशान्त्यमारभ्य चतुस्त्रिंशतिवत्सरे ॥ ३८१४ ॥

[10]मन्देन संयुते राहावष्टमे मनसि व्यथा ।
कलहेन विचारं [11]च ग्रामान्तरविनाशनम् ॥ ३८१५ ॥

दारसौख्यविहीनः [12]स्याद्राहौ चन्द्रान्तरे तथा ।
स्थानच्युतिमवाप्नोति तुलालग्न[13]समुद्भवः ॥ ३८१६ ॥

नीचांशे मिथुने चन्द्रे विपद्दायान्तरान्तरे ।
राहुभुक्तौ महत् क्लेशं स्वपभोश्च विशेषतः ॥ ३८१७ ॥

---

1. मिथुनान्त्यादिमारभ्य
2. अरिष्टं
3. भवेत्
4. राहु
5. स्यात्
6. चेन्मासविंशतिः
7. राहु ऐन्द
8. स्यात्
9. तृतीयाशान्त्य
10. .......अष्टमे
11. विचारं स्याद्ग्रामान्तरविनाशकृत्
12. चन्द्रान्ते राहुभुक्तिषु
13. लग्नस्य जातके

अंशाष्टमे जन्म[1]शनेश्च दोषात्
कुजान्तरान्त्यादिमनोविकारम् ।
ग्रामान्तरे वासमिति ब्रुवन्ति
स्वर्भानुभुक्तौ स्वजनास्त[2]वेषाम् ॥ ३८१८ ॥

पाठान्तरम्—

शरीरे व्याधिमाप्नोति [3]मासानां विंशतेः परम् ।
राहुभुक्तौ महत् क्लेशं धन[4]नाशं न संशयः ॥ ३८१९ ॥

अतिवृष्टि[5]मनावृष्टिं प्रजापीडां विनिर्दिशेत् ।
ऐन्दवांशे तुलालग्ने वर्षमेकं मनोव्यथा ॥ ३८२० ॥

अतीव क्लेश[6]कार्यं च राहुभुक्तौ भविष्यति ।
कुजान्तरे[7]ऽरिष्टमेति नीचदोषवशाद्व्यथाम् ॥ ३८२१ ॥

राहुभुक्तौ वर्षमेकं क्लेशं प्राप्नोति भूरिशः ।
तद्दोषपरिहारार्थं राहुप्रार्थनमादिशेत् ॥ ३८२२ ॥

स्वर्भानुकुजजीवार्किप्रार्थने[8]न लभेत् सुखम् ।
पुराणोक्तप्रकारेण जपेन्मृत्युञ्जयं [9]मनुम् ॥ ३८२३ ॥

वर्षमेक[10]मिमां शान्तिं प्रत्यहं शिवसन्निधौ ।
जपेत् सहस्र[11]मेकं तु सर्वोपद्रवशान्तये ॥ ३८२४ ॥

तिलाक्षतैः शमीपत्रैर्बिल्वपत्रसहस्रकैः[12] ।
[13]अर्चयेन्मूलमन्त्रेण देहारोग्यार्थसिद्धये ॥ ३८२५ ॥

---

1. शनिश्च
2. वेषा
3. विंशतिर्मासतः परम्
4. धनव्ययं
5. अनावृष्टिः
6. कार्याणि
7. कुजान्तरेष्टमाप्नोति नीचदोषवशाद्व्यथा
8. च शुभावहम्
9. स्मृतम्
10. मिमं शान्ति प्रत्यहं शिवसौख्यकम्
11. सङ्ख्यानि सर्वोपद्रवनाशनम्
12. सहस्रकम्
13. नामान्तपूजमन्त्रेण देहारोग्यार्थभाग्यकृत् ।

ऐन्दवांशे तुलालग्ने [1]चोत्तरांशसमुद्भवः ।
विपद्याये राहुभुक्तौ प्रार्थनेन [2]शुभैर्युतः ॥ ३८२६ ॥

तिलज्योतित्रयं [3]दीप्त्वा प्रत्यहं शिवसन्निधौ ।
मृत्युञ्जयं जपेत् पूर्वं दीपाराधन[4]संयुतम् ॥ ३८२७ ॥

अपमृत्युभयं नास्ति सर्वशत्रुविनाशनम् ।
यत्नकार्यार्थ[5]सिद्धिं च लभते वाञ्छितं फलम् ॥ ३८२८ ॥

विपद्याये राहुभुक्तौ स्वगेहे ग्रहयज्ञ[6]कम् ।
शान्तिकर्म प्रकुर्वीत सर्वपापैः प्रमुच्यते ॥ ३८२९ ॥

तथा बाल्ये महद्दुःखं मानार्थप्राणनाशनम् ।
स्वप्नभोश्च तथा विन्द्या[7]दिमां शान्तिं समाचरेत् ॥ ३८३० ॥

वर्गोत्तमांशे [8]स्वर्भानौ विपद्याये शुभं वदेत् ।
राजामात्यप्रसादेन [9]त्विष्टसिद्धिर्भविष्यति ॥ ३८३१ ॥

पूर्वभागे राजभयं पशुधान्यार्थनाशनम् ।
राहुभुक्तौ फलं [10]सत्यमुत्तरांशे पृथक् पृथक् ॥ ३८३२ ॥

राहुभुक्तौ पाण्ड्यदेशे [11]ह्यराजकमिति स्मृतम् ।
उत्तरां दिशमाश्रित्य कलहः[12] समुपैष्यति ॥ ३८३३ ॥

मण्डलाधिपतिक्लेशं बहुसेनाश्वनाशनम् ।
[13]राहुणा संयुते जीवे तृतीयैकादशस्थिते ॥ ३८३४ ॥

---

1. उत्तरांशस्य जातके
2. शुभावहम्
3. नीलं ज्योतित्रयं चैव
4. आदिशेत्
5. सिद्धिः स्यात्
6. यज्ञकृत्
7. इदं
8. स्वर्भानु
9. इष्टसिद्धिः
10. स्यंउत्त
11. त्वराजक
12. कलहं
13. राहुवर्के गते

देशभङ्गं प्रजाक्षोभं नृपाणां समरं [1]वदेत् ।
राहुभुक्तौ पाण्डयदेशे [2]स्वराजकमिति स्मृतम् ॥ ३८३५ ॥

[3]भ्राता प्राबल्यमाप्नोति ब्राह्मणःप्रबलो भवेत् ।
नूतनप्रभुसन्मानं राहुभुक्तौ शुभाधिकम् ॥ ३८३६ ॥

अन्ते सन्तानमाप्नोति ह्यैन्दवां[4]श समुद्भवः ।
[5]भ्रातृदारगतो राहुर्दारवंशे प्रपीडकृत् ॥ ३८३७ ॥

शुभशोभनकार्याणि स्यालकस्य न संशयः ।
पितृष्व[6]सुर्देहपीडा चतुर्विंशतिवत्सरे ॥ ३८३८ ॥

ज्ञातिप्राबल्यनाशं स्यादैन्दवां[7]शोद्भवस्य च ।

मिथुनान्ते कुलीरादौ मन्दे वक्रातिचारगे ।
सेतुप्रान्ते [8]कलापेन तद्राज्याधिपतेर्विपत् ॥ ३८३९ ॥

नीचांशगे देवगुरौ [9]च मूढे
दशावसाने [10]समरोत्सुकाः स्युः ।
स्वर्भानुभुक्तौ नृप[11]चोरभीत्या
स्वदेशराज्याधिपतिश्च दुःखम् ॥ ३८४० ॥

तद्द्वारि [12]प्रमुखानां च ह्यथवा भूमिपस्य तु ।
महारोगभयप्राप्तिः शान्त्या शान्ति प्रयास्यति ॥ ३८४१ ॥

धनस्थानं गते [13]राहावन्तर्दाये धनव्ययम् ।
तदीशे नीचराशिस्थ ऋणव्याज्यकलाप[14]नम् ॥ ३८४२ ॥

---

1. भवेत्
2. अराजकम्
3. भ्रातृप्राबल्यमाप्नोति ब्राह्मणप्रबलं
4. अंशस्य जातके
5. भ्रातृदारमयो राहोः
6. पितृष्वसुः
7. अंशस्य जातके
8. कलापं स्यात्तद्राज्याधिपतिर्भवेत्
9. स्तगे च
10. उत्सुकः स्यात्
11. चोलभीति
12. प्रभुखैश्चैवं अथ वा च नृपस्य च
13. राहुरन्तर्दाये
14. कृत्

ग्रामान्तरे वासमेति क्रूरमासे मनोऽव्य[1]थाम् ।
वित्तं गते [2]यदा राहौमन्दांशे चपलोत्तमः ॥ ३८४३ ॥

अन्तःकपट[3]कार्येण धनव्ययुतो भवेत् ।
[4]जीवपाके मनस्तापं राहुभुक्तौ धनक्षयम् ॥ ३८४४ ॥

क्रूरमासं परित्यज्य राहुभुक्तौ शुभं वदेत् ।
चापे गुरुस्थिते काले ह्यैन्द्वांश[5]समुद्भवः ॥ ३८४५ ॥

धनलाभं [6]च लभते विप्रप्राबल्यमादिशेत् ।
चापारूढे तुलालग्ने ह्यैन्द्वांश[7]समुद्भवः ॥ ३८४६ ॥

क्षेमदाये महत् सौख्यं राजयोगं [8]लभेद्दृढम् ।
क्षेमभुक्तौ क्रूरमासे सञ्चितद्रविणव्ययम् ॥ ३८४७ ॥

किंचिद्व्याकुलकार्याणि ज्वरपीडां विनिर्दिशेत् ।
पूर्वभागे प्रजातस्य क्षेमदाये स्वभुक्तिषु ॥ ३८४८ ॥

संचितार्थ[9]विनाशं च स्थानाच्च च्युतिमादिशेत् ।
चन्द्रलग्नाष्टमाधीशदशायां च स्वभुक्तिषु ॥ ३८४९ ॥

[10]पितुर्वा पितृतुल्यस्य देहजाड्यं विनिर्दिशेत् ।
पितृष्वसा [11]ह्युत्तरांशे ह्यपमृत्युं च विन्दति ॥ ३८५० ॥

[12]मातृशापेन पूर्वार्धे पुत्रोत्पत्तिविनाशनम् ।
उत्तरांशे सुतोत्पत्तिंतुला[13]लग्नसमुद्भवः ॥ ३८५१ ॥

---

1. व्यथा
2. राहु मन्दांशे चपलोत्तमान्
3. कार्याणि धनव्ययफलो
4. पाके जीवे
5. अंशस्य जातके
6. प्रकुर्वीत
7. अंशाय जातके
8. भवेद्दृढम्
9. नाशश्च
10. पिता पितृसमं चेति
11. अपमृत्युस्तथाश्रितः
12. पूर्वभागे मातृशापं
13. लग्नस्य जातके

राजयोगं [1]च लभते क्षेमदाये स्वभुक्तिषु ।
क्रूरमासे परित्यज्य [2]चापजेनाश्रयं वदेत् ॥ ३८५२ ॥

उत्तरायणगे सूर्ये क्षेमदाये स्वभुक्तिषु ।
गजाश्वाम्बर[3]भूषाप्तिं धान्यलाभं विनिर्दिशेत् ॥ ३८५३ ॥

युद्धसन्नाह[4]कार्येण पश्चिमे भाग्यवान् भवेत् ।
वृश्चिके वृषभे कुम्भे [5]कुलीरे च दिवाकरे ॥ ३८५४ ॥

क्रूरमासमिति प्रोक्तमैन्दवां[6]शोद्भवस्य च ।
ग्रन्थान्तरे मेषकन्यातुला[7]कीटेषु भास्करे ॥ ३८५५ ॥

क्रूरमासमिति प्रोक्तं पूर्व[8]भागोद्भवस्य च ।
सूर्याष्टवर्गे [9]यद्राशौ शून्यः संवत्सरोऽपिच ॥ ३८५६ ॥

शुभकर्माणि मासेऽस्मिन् वत्सरे परिवर्जयेत् ।
क्रूरमासे देहजाड्यमथ वा [10]ह्यर्थनाशनम् ॥ ३८५७ ॥

राजद्वारे कलापः[11] स्याद्दणव्याज्यप्रसन्नतः ।
शुभमासे शुभाधिक्यं धनलाभं महत् सुखम् ॥ ३८५८ ॥

राजामात्य[12]प्रसादं च ह्यैन्दवांशसमुद्भवः ।
क्षेमदाये सौम्यभुक्तौ नित्यश्रीसौख्यमादिशेत् ॥ ३८५९ ॥

लग्नाद्भाग्यं गते चन्द्रे भाग्याधिपसमन्विते ।
धनलाभं [13]च लभते ह्यैन्दवांशसमुद्भवः ।
मन्दस्यान्तर्गते सौम्ये विद्या[14]गोष्ठ्या धनागमम् ॥ ३८६० ॥

---

1. प्रकुर्वीत
2. चापारूपवशाश्रयम्
3. भूषाप्तिर्धान्य
4. कार्याणि
5. कुलीरस्य
6. एन्दवांशस्य जातके
7. तुला....
8. भागस्य जातके
9. यश्शून्यं मासं संवत्सरं प्रति
10. अर्थ
11. कलापं स्याद्दणव्याज्यप्रसन्नकृत्
12. प्रसादश्च ऐन्दवांशस्य जातके
13. प्रकुर्वीत ऐन्दवांशस्य जातके
14. गोष्ठी

पशुधान्यसमृ[1]द्धिं च सन्तानप्राप्तिमादिशेत् ।
लग्नाद्भाग्यं गते चन्द्रे भाग्याधिपसमन्विते ॥ ३८६१ ॥

ऐन्दवांशे भाग्यवृद्धिं क्षेमदाये न संशयः ।
क्षेमभुक्त्यन्तमारभ्य बुधभुक्तौ [2]श्रिया युतः ॥ ३८६२ ॥

व्ययाधिपतिदोषेण पितृपीडा भविष्यति ।
क्रूरमासं परित्यज्य ह्यैन्दवांशे धनागमः[3] ॥ ३८६३ ॥

राजयोगाभिवृद्धिं च [4]यावदायुष्यमाप्नुयात् ।
इदमेव फलं सत्यं प्रत्यक्षं देवकेरलम् ॥ ३८६४ ॥

—:*:—

## तुलालग्ने निशाकरदुर्भगांशः

दुर्भगांशकगे चन्द्रे जीवे केन्द्रत्रिकोणगे ।
सुखेशे पापसंयुक्ते [5]ह्यन्यबीजप्रजातवान् ॥ ३८६५ ॥

परेण जनितो भोगी दुर्भगांशे निशाकरे ।
पूर्वभागे [6]भ्रातृहीनस्त्वेकाकी दुष्टकृत्यवान् ॥ ३८६६ ॥

उत्तरांशे भाग्यवृद्धिः [7]पितरौ दीर्घजीविनौ ।
[8]राजप्रियः सुखीवाग्मी राजस प्रकृतिर्भवेत् ॥ ३८६७ ॥

---

1. समृद्धिश्च
2. क्रियावहम्
3. धनागमम्
4. राजयोगाभिवृद्धिः स्यायावदायुष्यम्
5. अन्यद्गर्भे
6. एकाकी
7. पितृमातृचिरायुषम्
8. राज्ये

ग्रन्थान्तरे —

विचित्रांशे दुर्भगांशे [1]त्वेकमेव फलं वदेत् ।
पाराशर्यफलं सत्यं प्रत्यक्षं देवकेरलम् ॥ ३८६८ ॥

कन्यांशे वृश्चिके जीवे बुधे स्वोच्चे झषांशगे[2] ।
विप्रकाले प्रजातस्तु[3] गर्भश्रीमान् सुखी धनी ॥ ३८६९ ॥

वैश्यकाले वैश्यवृत्तिः क्षत्रियस्तु महीपतिः[4] ।
शूद्रकाले तथा विन्द्यात् संकरस्तु[5] तथैव च ॥ ३८७० ॥

—:*:—

## विश्वंभरांशः

विश्वंभरांशके जीवे रन्ध्रलाभत्रिकोणगे ।
पश्चाद्भ्रातृविहीनः स्याद्वैदभ्रातृयुतो भवेत् ॥ ३८७१ ॥

विश्वंभरांशगे जीवे गौरवर्णः शुभाकृतिः ।
श्यामवर्णशरीरश्च[6] विद्याविप्रयुत सुखी ॥ ३८७२ ॥

कीटे कन्यांशगे जीवे समगात्र प्रगल्भवाक् ।
[7]धार्मिकस्त्विङ्गितज्ञश्च धैर्यवान् सत्यवाचकः ॥ ३८७३ ॥

लेख्यको विकटश्चैव सुस्वरो मतिमान् दृढी[8] ।
राजसेवापरो नित्यं स्वपिता वृद्धिजीवकः[9] ॥ ३८७४ ॥

---

1. एगत्र फलमादिशेत्
2. बुधस्वोच्चे रुषांशगे
3. प्रजातस्य
4. क्षत्रियस्य तथा भवेत्
5. विन्द्याच्छशाङ्कस्य
6. श्यामवर्णश्चवांश्चेति प्रदस्सुखी
7. इङ्गितज्ञश्च धीरज्ञः
8. दृढम्
9. जीवनम्

मित्रर्क्षगे देवगुरौ वधांशे
सदातिकामी नृपसेवकश्च ।
विश्वंभरांशे[1] धनिकः प्रसिद्धः
[2]सापत्निमातुः सुतवत्सलश्च ॥ ३८७'१ ॥

[3]राहौ विलग्ने रविवक्रयोगे
समीरपैत्यामयदेहभाक्स्यात् ।
कालान्तरे बन्धुजनैर्विरोधी[4]
स्वमातृमूलादतिशोकभाक् स्यात् ॥ ३८७६ ॥

बाल्ये क्लेशं पित्ररिष्टं[5] भेदभ्रातृवशात् सुखम् ।
पश्चाद्विरोधमाप्नोति शूद्रमूलार्थनाशनम्[6] ॥ ३८७७ ॥

विश्वंभरांशगे जीवे लग्नेराहौ[7] प्रजायते ।
स्वमाता [8]पापकृत्येन शूद्राचारयुता भवेत् ॥ ३८७८ ॥

ज्येष्ठभार्या सुतद्वेषि स्वपिता शूद्रमित्रवान् ।
वाणिज्येन गृहं[9] भूरि धनं संपादयिष्यति ॥ ३८७९ ॥

— :*: —

## कुंभलग्ने अङ्गदांशः

अङ्गदांशे पूर्वभागे कुंभलग्न समुद्भवः[10] ।
[11]सापत्नीमातृसंजातज्येष्ठभ्रातृयुतो भवेत् ॥ ३८८० ॥

---

1. विश्वंभरांशो
2. सापत्निमातासुतवत्सलस्य
3. राहुर्विलग्ने रविदुष्टयोगे
4. विरोधं
5. पितारिष्टं
6. नाशवान्
7. राहु
8. कर्म स्याच्छूद्राचोरप्रदो
9. भवनं
10. लग्नस्य जातके
11. सापत्नीमातृजाश्चान्ये

विश्वंभरांशे लाभेशे [1]त्वंङ्गदाशोद्भवस्य च ।
भेदभ्राता सुदीर्घायुर्भगिनीद्वयसंयुतः[2] ॥ ३८८१ ॥

लग्ने [3]राहौ प्रसन्ने च लाभेशे कर्मराशिगे ।
राहुप्रकृतिमान् ज्येष्ठभ्राता च[4] पापचेतनः ॥ ३८८२ ॥

भेदभ्रातृफलं [5]सत्यं कामी विषयलोलुपः ।
शूद्राचारप्रियो नित्यं सत्यवाचा विवर्जितः ॥ ३८८३ ॥

अपात्रव्ययवान् कामी [6]ह्युष्णग्रन्थिप्रपीडितः ।
पितृवाक्यं तृणीकृत्य परवाक्यार्थतत्परः ॥ ३८८४ ॥

दासीषु रमते[7] नित्यं स्वदारद्वेषसंयुतः ।
भेदभ्रातृसुताधीशे पञ्चमे वृषभांशगे ॥ ३८८५ ॥

मृतप्रजाफलप्राप्त्या[8] सन्तानप्रतिबन्धवान् ।
अङ्गदांशे पूर्वभागे [9]भेदभ्राता ह्यपुत्रवान् ॥ ३८८६ ॥

जायते मृतिमाप्नोति पुरापातकहेतुना ।
तस्य पापोपशान्त्यर्थं सेतुस्नानं शिवार्चनम् ॥ ३८८७ ॥

षष्ठीव्रतोपवासेन सन्तानप्राप्तिमादिशेत्[10] ।
ग्रन्थान्तरे व्यासमते[11] ह्यगदांशेऽयुदाहृतम् ॥ ३८८८ ॥

भेदभ्रातृसुखं[12] नित्यं लभते नात्र संशयः ।
[13]गोपालप्रतिमां चैव कल्पोक्तेन प्रपूज्य च ॥ ३८८९ ॥

---

1. अङ्गदांशस्य जातके
2. भ्रातृसुदीर्घायु
3. राहु प्रसन्नश्च
4. प्रक्रमान् भ्रातृज्येष्ठगो
5. चेति
6. उष्णग्रन्थि प्रपीडवान्
7. दासीवश्यरतो नित्यं स्वदारद्वेष भार्यवान्
8. प्राप्तिः
9. भ्रातृ अपुत्रदम्
10. प्राप्तमाविशेत्
11. योगे उदाहृतम्
12. भेदसोदरतो
13. प्रतिमादानं कल्पोक्तस्य प्रपूजयेत्

दैवज्ञाय प्रदानेन[1] स्वायुरारोग्यपुत्रवान् ।
लाभेशांशे तत्त्रिकोणे भेद भ्रातुश्च जन्मभम् ॥ ३८९० ॥

लाभेशदृष्टिराशौतु जन्मलग्नं विनिर्दिशेत् ।
नवमेनतदीशेन स्वपितुर्जन्मभं वदेत्[2] ॥ ३८९१ ॥

सूर्यांशगे तत्त्रिकोणे योजयेत् कालवित्तमः ।
मञ्जुस्वनांशगे सूर्ये सिंहे केतुसमन्विते ॥ ३८९२ ॥

अङ्गदांशे पूर्वभागे बाल्ये पितृविनाशवान् ।
स्वपिता भ्रातृहीनश्च व्रणोपद्रवदेहवान् ॥ ३८९३ ॥

[3]जन्माधिपदशान्त्यादौ सम्पद्दाये विनिर्दिशेत् ।
मञ्जुस्वनांशगे सूर्ये जीवे विश्वंभरांशगे ॥ ३८९४ ॥

जन्मदाये [4]पितुः क्लेशं व्रणोपद्रवमादिशेत् ।
ज्येष्ठभार्यासुतद्वेषं विभागं च विनिर्दिशेत् ॥ ३८९५ ॥

सञ्चितार्थविनाशेन क्लेशं प्राप्नोति भूरिशः ।
लग्नात् पञ्चमगे भौमे भाग्येशे पापसंयुते ॥ ३८९६ ॥

स्वपिता [5]मृतिकाले च देशान्तरगतो भवेत् ।
मञ्जुस्वनांशगे सूर्ये कुम्भामे स्वपितु[6]र्मृतिः ॥ ३८९७ ॥

अजीर्णच्छर्दिमूलेन [7]स्वपिता च विनश्यति ।
असन्निधौ सूर्यलग्ने [8]भाग्यनाथेन भूसुते ॥ ३८९९ ॥
[9]षष्ठाष्टमगते वापि अङ्गदांशोद्भवस्य च ।
शुभदृष्टिविहीने [10]च मार्गमध्ये पितुर्विपत् ॥ ३९०० ॥

---

1. भुक्तिप्रधानेन आयुरारोग्य 2. स्वपिता जन्मभविदुः
3. पाके जन्मदशान्त्यादि सम्पद्दाये विनिर्दिशेत् ।
4. पिता 5. मरणे काले देशान्तरमिति स्मृतम्
6. पिता 7. स्वपुत्रस्य विनाशकृत्
8. सूर्यकारेण भूसुतः 9 ........श्चै जातके
10. विहीनेन मार्गमध्ये पिता विपत्

पापांशगे दुर्मरणं शुभांशे क्षिप्रमारकम् ।
[1]पित्ररिष्टस्य समये माता देशान्तरं गता ॥ ३९०१ ॥

विश्वंभरांशगे जीवे [2]भाग्येशस्य त्रिकोणगे ।
[3]देवताक्षेत्रयात्रासां मध्ये पितृविनाशनम् ॥ ३९०२ ॥

भङ्गदांशे पूर्वभागे कुटिलांशे निशाकरे ।
मातृभावे [4]पापयुक्ते स्वमाताकलहप्रदा ॥ ३९०३ ॥

कुटिलांशकगे चन्द्रे [5]क्लिष्टा-मातृसहोदरी ।
कुलटा [6]च दिवारात्रे पापी मातामहः स्मृतः ॥ ३९०४ ॥

मातुलाधिपतौ चन्द्रे कुटिलांशे बुधेक्षिते ।
[7]आयुष्मन्तौ मातुलौ द्वौ केचित् पक्षे विमातुलः ॥ ३९०५ ॥

[8]दुश्चरित्रवती माता भ्रातुः क्लेशेन कर्शिता ।
भेदपुत्रविरोधेन बाल्ये वैधव्य[9]माप्नुयात् ॥ ३९०६ ॥

बहुकालममाङ्गल्या[10] जननी चिरजीविनी ।
मध्यपुत्रात् सु[11]सन्तुष्टा चन्द्रनाडीफलं स्मृतम् ॥ ३९०७ ॥

[12]एवमेव स्वमातुश्च शुक्रनाडीफलं स्मृतम् ।
शुक्रनाडीफलाध्याये मातृवंश[13]फलाफलम् ॥ ३९०८ ॥

मातुलादिफलं [14]चैव विस्तरेण च कथ्यते ।
भेदभ्रातृमदाधीशे कुम्भांशे शनिसंयुते ॥ ३९०९ ॥

---

1. पिता
2. भागे शस्य
3. प्रार्थने यात्राकाले
4. महापापं
5. क्लेशे
6. चेद्दिवा केचित् पापी मातामहः स्मृतम्
7. मातुलद्वयमायुष्यं केचित् पक्षेऽथ नाशनम् ।
8. तच्चरित्रवतीमाता भ्राता
9. आदिशेत्
10. माङ्गल्यं
11. सन्तोषी
12. शुक्र
13. वंशे
14 चेति विस्तारमिति

मेदभ्रातृस्वसा चैव बहुकालं सुमङ्गली ।
कुटिलांशकगे चन्द्रे सूर्ये मञ्जुस्वनांशगे ॥ ३९१० ॥

स्वमेदभगिनी चैव बाल्ये वैधव्य[1]माप्नुयात् ।
विश्वम्भरांशगे जीवे [2]स्वङ्गदाशोद्भवस्य च ॥ ३९११ ॥

स्वमेदभगिनी चैव [3]ह्यल्पपुत्रवती शुभा ।
कुटिलांशकगे चन्द्रे [4]काचिद्भेदसहोदरी ॥ ३९१२ ॥

[5]युग्मपुत्रविनाशेन क्लेशं प्राप्नोति भूरिशः ।
तद्भर्ता रोग[6]युक्तश्च सोदरभ्रातृहीनवान् ॥ ३९१३ ॥

मध्ये [7]भाग्यवियोगेन दारिद्र्येण च कर्शितः ।
स्वमेदभगिनी भर्ता राजद्वारेऽवमा[8]नितः ॥ ३९१४ ॥

नरवाहनभूषादियोगवान् कीर्तिमान् सुखी ।
जीवांशाधिपतौ सौम्ये स्वोच्चे नीचनवांशगे ॥ ३९१५ ॥

स्वमेदभगिनीभ्राता पुत्रवान् पुत्रिमान् भवेत् ।
सम्पद्दाये जातकस्य पञ्चमाब्दात् परं [9]तथा ॥ ३९१६ ॥

अथ वा ऋतुवर्षान्ते भगिनीभर्तृभाग्यवान् ।
अङ्गदांशे जन्मदाये जन्माब्दे जन्मवत्सरे ॥ ३९१७ ॥

स्वमेदभगिनी चैव क्लेशं प्राप्नोतिभूरिशः ।
सपत्नीमातृमूलेन मेदभ्रातृमनोव्यथा ॥ ३९१८ ॥

मञ्जुस्वनांशगे सूर्ये स्वपिता पुत्रवञ्चकः ।
तस्य पापवशान्मृत्युः सम्पद्दाये न संशयः ॥ ३९१९ ॥

---

1. आविशेत्
2. अङ्गदांशस्य जातके
3. अल्पपुत्रवती सुखी
4. केचित्
5. यमलः पुत्र
6. देहः स्यात्
7. भागे
8. अवमानवान्
9. यदि

विश्वम्भरांशगे सूर्ये त्वङ्गदांश[1]समुद्भवः ।
दशवर्षात् परं मेदभ्रातृभाग्यवशात् सुखम् ॥ ३९२० ॥

जन्मदाये तृतीयाब्दे दशासन्धे[2]श्च कालगे ।
गृहच्छिद्रकलापेन क्लेशं प्राप्नोतिभूरिशः ॥ ३९२१ ॥

विश्वम्भरांशे लाभेशे लाभांशे सप्तमाधिपे ।
वसुवर्षात् परं [3]भ्राता चित्तशुद्धियुतो भवेत् ॥ ३९२२ ॥

[4]तस्य भार्या भानुवारव्रतेन श्रियमश्नुते ।
भर्तृसौख्यवती चेति बहुकालं सुमङ्गली ॥ ३९२३ ॥

मञ्जुस्वनांशे तारेशे प्रतिबन्धविमोचनम् ।
स्वदेहभ्रातृदारादिसौख्यं चेति न संशयः ॥ ३९२४ ॥

भानुव्रतोपवासेन सेतुस्नानादिहेतुना ।
मेदभ्रातृश्चित्तशुद्धिररिष्टं [5]नश्यति ध्रुवम् ॥ ३९२५ ॥

पश्चात् सन्तान[6]वृद्धिं च गार्हस्थ्यसुखजीवनम् ।
तदभावे दरिद्रः स्याद्भेदभ्रातुः स्मृतं फलम् ॥ ३९२६ ॥

मेदभ्रातृसुतारूढे सूर्ये केतुसमन्विते ।
शुभदृष्टिवि[7]हीने च प्रतिबन्धप्रपीडितः ॥ ३९२७ ॥

[8]शूद्रलेखकमूलेन भाग्यनाशेन कर्शितः ।
तस्य [9]नाशात् परं सौख्यं मेदभ्राता शुभैर्युतः ॥ ३९२८ ॥

वसुवर्षान्तमारभ्य [10]ह्यथवा दशवत्सरे ।
[11]स्वपितुर्मित्रशूद्रस्य नाशः स्यान्नात्र संशयः ॥ ३९२९ ॥

---

1. अंशस्यजातके
2. सन्धिश्च
3. भ्रातृचित्तशुद्धिप्रदो
4. भानुवारव्रतं तस्य भार्या आचार्ये
5. सत्यनाशनम्
6. वृद्धिश्च
7. हीनः स्यात् प्रतिबन्धप्रपीडवान्
8. लेखकशूद्रमूलेन
9. नाथात् परं सौख्यं मेदभ्रातृशुभवहम्
10. अथवा
11. पिता मित्रशूद्रस्य नाशस्यात्

ततः परं महत् सौख्यं भेद[1]भ्राता श्रियायुतः ।
स्वभेदभगिनी[2]भर्तुस्तत्पूर्वं योगमादिशेत् ॥ ३९३० ॥

[3]शुभभाग्याधिपे शुक्रे षष्ठे शनिसमन्विते ।
जातकस्य सुविद्याप्तिर्बहुग्रामाधिकारवान् ॥ ३९३१ ॥

लेख्यविद्यासमर्थश्च लिपित्रयसुवाचकः ।
राजयोग[4]युतो नित्यं हरिशङ्करभक्तिमान् ॥ ३९३२ ॥

जन्मादिसप्तमे वर्षे सम्पद्दाये कचित् सुखम् ।
स्वभेदभ्रातृमूलेन मौञ्जीबन्धनमादिशेत् ॥ ३९३३ ॥

विपद्दाये विवाहः[5] स्यात् स्वभुक्तौ नात्रसंशयः ।
षष्ठाब्दे [6]त्वक्षराभ्यासं सप्तमे मौञ्जिबन्धनम् ।
द्वादशाब्दे [7]विवाहं च ह्यथ वा मनुवत्सरे ॥ ३९३४ ॥

कुटिलांशे घने चन्द्रे कुटिलालोचने[8] प्रियः ।
वाचालको राजसेवी राजद्वारे सुकीर्तिमान् ॥ ३९३५ ॥

बालारिष्टभयं किंचिन्मसूरीज्वर[9]पीडितः ।
जीविते भाग्यमभ्येति जीवे विश्वम्भरांशगे ॥ ३९३३ ॥

[10]चापांशगे घने चन्द्रे जीवे केन्द्रत्रिकोणगे ।
विंशोपरिशरै[11]र्वर्षमध्ये वाहनभाग्यवान् ॥ ३९३७ ॥

स्वनाबल्यं [12]च लभते षोडशाब्दात् परं कचित् ।
एकोनविंशवर्षादौ[13] बुद्धिप्राबल्ययोगवान् ॥ ३९३८ ॥

---

1. भ्रातृश्रियावहम् 2. भर्तृतत्पूर्वं
3. शुष्क 4. प्रदो
5. विवाहं 6. अक्षराभ्यासं
7. विवाहस्याद् 8. लोचनः
9. गण्डवान् 10. चापारूढे
11. वर्षे मध्ये 12. प्रकुर्वीत षोडशाब्दे
13. वर्षादि

अयुताधिकवित्तार्ति[1] क्षेमदाये सुकीर्तिमान् ।
विपद्दाये सुवाहार्ति[2] पञ्चविंशतिवत्सरे ॥ ३९५७ ॥

ततः परं महद्भाग्यं प्रबलोद्योगजीवनम् ।
यावदायुष्यमाप्नोति तावद्भाग्यं विनिर्दिशेत् ॥ ३९५८ ॥

विधम्भरांशगे जीवे रवौ मञ्जुस्वनांशगे ।
षट्पञ्चाशे कालमृत्युः कन्यामासे [3]भविष्यति ।
अथ वा मीनमासे [4]च भौमवारे मरिष्यति ॥ ३९५९ ॥

—:*:—

## धनुर्लग्ने वारुणांशः

चापे जीवे वारुणांशे निशाकरसमन्विते ।
भूम्यात्मजेन संदृष्टे सोदरोत्पत्तिनाशवान् ॥ ३९६० ॥

वारुणांशकगे जीवे निशाकरसमन्विते ।
प्रसूतिकाले [5]वर्षश्च त्रिरात्रं वा भवेद्ध्रुवम् ॥ ३९६१ ॥

मीनांशकगते जीवे वक्रे शूद्रांशके तथा[6] ।
शूद्र[7]जन्मा सुखी नित्यं श्यामवर्णस्वरूपवान् ॥ ३९६२ ॥

पित्तप्रकृतिदेहः स्यान्मधुराम्लरसप्रियः ।
मन्दप्रकृतिमान् साधुर्गार्दभस्वरवान् सुधीः ॥ ३९६३ ॥

लग्नेशो वारुणांशस्थे स्वक्षेत्रे कुजवीक्षिते ।
बाल्ये मसूरि[8]भीत्या च मृतप्रायोपजीवति ॥ ३९६४ ॥

---

1 वित्तार्तिः 2. सुवाहार्तिः
3 मृतिं वदेत् 4. मासेषु
5. वर्षे स्यात् त्रिरात्रे वाथ वा यदि 6. जातके
7. जन्मसुखं 8. कण्डंग

मान्द्यज्वर[1]व्रणक्लेशैः पीडितोऽत्यन्तशोकवान् ।
जन्मदायेऽपमृत्युश्च तृतीयाब्दात् परं सुखम् ।। ३९६५ ।।

स्वपि[2]तुर्भाग्यवृद्धिः स्याद् बन्धुमूलाच्छ्रियागमः[3] ।
राजद्वारे सुकीर्तिश्च बहुमानावमानवान् ।। ३९६६ ।।

वारुणांशकगे जीवे तच्छत्रुगृहदायगे ।
पितृव्यारिष्टमाप्नोति राजोपद्रववान् पिता ।। ३९६७ ।।

पञ्चबिन्दुयुते जीवे वारुणांशे कुजेक्षिते ।
निधनाधिपसंयुक्ते पञ्चमाब्दे महाविपत् ।। ३९६८ ।।

पश्चात् सहोदरारिष्टं मसूरीज्वरहेतुना ।
नवमे सोदरोत्पत्ति[4] बालारिष्टे मृतिं वदेत् ।। ३९६९ ।।

वारुणांशकगे जीवे जन्मतारदशान्त्यगे ।
सोदरा [5]जनिताश्चैव भविष्यन्ति चिरायुषाः ।। ३९७० ।।

सम्पद्दाये [6]तृतीयांशे त्वायुष्मन्तं च सोदरम् ।
एकभ्रातृयुतं चैव वारुणांशफलं स्मृतम् ।। ३९७१ ।।

ग्रन्थान्तरे वारुणांशे लग्नाद्विक्रमगे शनौ ।
पश्चाद्भ्रातृविहीनः [7]स्यात् सोदर्या चैकया युतः ।। ३९७२ ।।

दुःस्थाने क्षितिपुत्रसूर्यशशिजे मन्दे तृतीयर्क्षगे
लग्ने देवगुरौ निशाकरयुते गेहे [8]स्वगौर्भार्गवे ।
[9]स्वर्भानौ दशमे यथाक्रममसौ जातः सुसौख्यो महान्
बाल्ये क्लेशयुतो वदन्ति [10]कवयो ह्यल्पप्रजासंयुतः ।। ३९७३ ।।

---

1. व्रणादीनि
2. स्वपिता
3. श्रियान्वितः
4. उत्पत्तिर्बालारिष्टे
5. जननं चेति दीर्घमायुर्भविष्यति
6. त्र्यंशे च सोदरोत्पत्तिमायुषम्
7. भगिन्येकासमन्वितः
8. शिखिः
9. स्वभानुर्दशमे यथाक्रममिदं जातः सुसौख्यो महत् ।
10. उशनादल्पप्रजासन्ततिः

[1]भ्राता चैव तथा गुणी क्षितिपतिस्तत्तुल्यभाग्यो धनी
श्रीमान् विंशति[2]वत्सरे भवति वा द्वात्रिंशदब्दे तथा ।
विद्यावादविनोदसङ्करसिको भार्यात्मजैरन्वितः
ख्यातः शास्त्रविचक्षणो दिवि भुवि प्रख्यातकीर्त्यान्वितः ॥ ३९७४ ॥

तदर्धात् परतश्चैव [3]स्वपिता सौख्यमश्नुते ।
तदर्धार्धे योगभङ्गं वसुवर्षे मनोऽन्य[4]थाम् ॥ ३९७५ ॥

वारुणांशकगे जीवे [5]त्वष्टादशच वत्सरे ।
[6]स्वपितुर्भाग्यवृद्धिः स्याद्राजान्तरवशाच्छ्रियम् ॥ ३९७६ ॥

वैष्णवप्रबले काले [7]स्वल्पसौख्यं विनिर्दिशेत् ।
वसुवर्षात् परं क्लेशं सायनाब्दे कचित् सुखम् ॥ ३९७७ ॥

निधनाधिपदोषेण षष्ठाधिपतिदायगे ।
कर्माधिपान्तरे काले स्वपिता योगभङ्गवान् ॥ ३९७८ ॥

श्रीवैष्णवजनद्वेषं बन्धुवर्गे विशेषतः ।
राजद्वारेऽवमानादिक्लेशं प्राप्नोति भूरिशः ॥ ३९७९ ॥

सोदरोत्पत्ति[8]नाशं च कर्माधिपतिभुक्तिषु ।
नवमाब्दे मनस्तापं भ्रातृक्लेशं विनिर्दिशेत् ॥ ३९८० ॥

भाग्याधिपदशाकाले तृतीयांशे महत् सुखम् ।
स्वपिता भाग्य[9]युक्तश्च राजद्वारे सुकीर्तिमान् ॥ ३९८१ ॥

भाग्याधिपे[10] षष्ठगते सुतेशेन समन्विते ।
तद्दशायां जातकस्य विद्याभ्यासं विनिर्दिशेत् ॥ ३९८२ ॥

---

1. भ्रातुश्चैव तथा भवेत्
2. वत्सरात् परमिदं
3. परतश्चेति
4. न्यथा
5. अष्टा
6. स्वपिता भाग्य
7. अल्प
8. नाशं स्यात्
9. वृद्धिः स्याद्राज
10. पः षष्ठगते

लाभाधिपदशाकाले धनाधिपतिभुक्तिषु ।
वारुणांशे प्रजातस्य [1]स्वक्षराभ्यासमादिशेत् ॥ ३९८३ ॥

[2]लग्ने जीवे सुखे शुक्रे कुम्भांशे केतुसंयुते ।
लिपित्रयप्रवीणश्च लेख्यविद्याविशारदः ॥ ३९८४ ॥

नाटकालङ्कृतौ काव्ये [3]प्रियः सङ्गीतवल्लभः ।
संस्कृतप्रियवादी च देवब्राह्मणभक्तिमान् ॥ ३९८५ ॥

असितांशे झषे शुक्रे पञ्चग्रहसमन्विते ।
लेख्यविद्यासुनिपुणो मन्दबुद्धिः क्वचित् क्वचित् ॥ ३९८६ ॥

ग्रन्थान्तरे वारुणांशे जीवे कुजनिरीक्षिते ।
विद्याविघ्नमवाप्नोति राजद्वारे सुकीर्तिमान् ॥ ३९८७ ॥

विपद्दाये राज[4]पूज्यो नरवाहनभाग्यवान् ।
स्वपि[5]त्रधिकयोगः स्याद्राजद्वारे न संशयः ॥ ३९८८ ॥

सम्पद्दाये वारुणांशे तृतीये खण्डकालगे ।
अतीव प्रबले गेहे विवाहोत्सवसंभ्रमम् ॥ ३९८९ ॥

सिंहांशगे मदाधीशे [6]शुक्रे कुम्भांशके तथा ।
स्वजन्मदेशे [7]चोद्वाहो ह्यथवा चोत्तरे भवेत् ॥ ३९९० ॥

[8]दरिद्रजां तत्त्रिकोणे दारजन्मर्क्षभं विदुः ।
[9]दारेशदृष्टिराशौ वा योजयेत् कालवित्तमः ॥ ३९९१ ॥

मकरांशकगे मन्दे मीने कुम्भांशगे भृगौ ।
वारुणांशे प्रजातश्च विवाहप्रतिबन्धवान् ॥ ३९९२ ॥

---

1. अक्षराभ्यासं
2. लग्न
3. प्रिय
4. योग्यं
5. पिताधिकयोगं
6. शुक्रकुम्भांशेजातके
7. उद्वाहं अथ वा उत्तरे विपत्
8. दरिद्रांशे तत्त्रिकोणे वार
9. दारेशे दुष्ट

[1]यस्यां नाड्यां प्रजातश्च तृतीये शनि[2]संस्थिते ।
विवाहयत्नमात्रेण विघ्नं च पापकर्मणा[3] ॥ ३९९३ ॥

द्वित्रिवारं [4]प्रयत्नेन पश्चादुद्वाहयोगवान् ।
जामाता पापदोषेण दारवंशेऽ[5]प्यरिष्टकृत् ॥ ३९९४ ॥

[6]तृतीये श्वशुरस्थाने पापाक्रान्ते च जायते ।
तस्य कन्याप्रदानेन श्वशुरस्य महाविपत् ॥ ३९९५ ॥

शुभांशे शुभसंदृष्टे विक्रमेशे[7] बलान्विते ।
[8]सदोषोऽपि विवाहश्च श्वशुरस्य शुभाशुभम् ॥ ३९९६ ॥

दारारूढ[9]गते भौमे नाड्यां तु मङ्गलांशके ।
रक्तवर्णकलत्रं स्याद्विवाहानन्तरं सुखम् ॥ ३९९७ ॥

लक्ष्मीकटाक्षवान्नित्यं गृहे गोधनसङ्कुलम् ।
उद्वाहानन्तरं [10]चैव नित्यश्रीर्नित्यमङ्गलम ॥ ३९९८ ॥

मेषांशगेऽरिगे भौमे [11]नाड्यां तु मङ्गलांशके ।
श्वशुरश्च द्विभार्यः [12]स्यादेकमातुलयोगवान् ॥ ३९९९ ॥

षष्ठाधिपदशाकाले षष्ठेशांशत्रिकोणगे ।
[13]लग्नेशे स्वांशपे वापि मातुलारिष्टमादिशेत् ॥ ४००० ॥

वारुणांशकगे जीवे [14]त्वेकमातुलयोगवान् ।
बाल्ये भ्रातृवियोगेन क्लेशं प्राप्नोति भूरिशः ॥ ४००१ ॥

---

1. यस्य नाडी
2. जातके
3. चेत् पापकर्मणः
4. प्रयत्नं स्यात्
5. अरिष्टकृत्
6. तृतीयं श्वशुरस्थानं पापाकान्तस्य राशिगे
7. विक्रमेशबल
8. सदोषकृद्विवाहं स्याच्छ्वशुरस्य
9. दारारूढाधिपे भौमे मङ्गलांशस्य नाडिगे
10. चेति
11. मङ्गलांशस्य नाडिगे
12. मातुलस्यैकयोगवान्
13. लग्नेशस्वांशपोषापि
14. एको

मातामहाधिपे भौमे [1]नाड्यां तु मङ्गलांशके ।
माता[2]महश्चिरायुष्मान् बहुभ्रातृविनाशवान् ॥ ४००२ ॥

वार्धके पुत्रशोकाप्तिं[3] किंचिद्गार्हस्थ्यजीवनम् ।
वारुणांशकगे जीवे स्वमाता चिरजीविनी ॥ ४००३ ॥

माता[4]महश्चिरायुष्मान् तथैव च पितामही ।
पितामहाधिपे भौमे मेषांशे मङ्गलांशगे ॥ ४००४ ॥

पिता[5]महः प्रसिद्धश्च सोदरी भ्रातृसंयुतः ।
उद्वाहानन्तरं भाग्यं स्वपितामहसौख्यवान् ॥ ४००५ ॥

वनान्तरपुरे [6]वासी यावदायुष्यसौख्यवान् ।
मेषांशगे सुताधीशे शशिजेन समन्विते ॥ ४००६ ॥

प्रभांशगे प्रजातस्य[7] बृहद्बीजः पितामहः ।
वृषभांशे धनुर्लग्ने तदीशे वारुणांशगे ॥ ४००७ ॥

निधनाधिपसंयुक्ते [8]पितरौ च चिरायुषौ ।
विंशोपरि सुभाग्याप्तिः पञ्चविंशे सुवाहनम् ॥ ४००८ ॥

अष्टादशे श्रियं विद्यां [9]स्वपितृयुत भाग्यवान् ।
प्रभांशे चोत्तरे भागे वारुणांशकगे गुरौ ॥ ४००९ ॥

नवमाब्दे मनस्तापं कृशं चेदष्टवत्सरम् ।
पूर्वभागे प्रजातश्च वसुवर्षात् परं सुखम् ॥ ४०१० ॥

स्वपिता भाग्य[10]वृद्धिं च ह्युद्योगं दशवत्सरम् ।
पश्चाद्दारिद्र्यमाप्नोति वसुवर्षात् परं विपत् ॥ ४०११ ॥

---

1. मङ्गलांशस्य नाडिगे
2. महश्चिरायुष्यं
3. शोकाप्तिः
4. महश्चिरायुष्यं पितामहि तथैव च
5. महीप्रसिद्धश्च
6. वासं
7. प्रजातश्च
8. पितृमातृचिरायुषं
9. पिता सह
10. वृद्धिः, स्याद्युद्योगं

उत्तरांशे प्रजातस्य[1] सायनाब्दात् परं सुखम् ।
स्वपिता बहुभाग्यार्सिं[2] भाग्याधिपदशान्त्यगे ॥ ४०१२ ॥

लग्ने जीवे सुखे शुक्रे [3]कर्मे भाग्ये न संशयः ।
स्वपिता वाहनाढ्यश्च राजद्वारे सुकीर्तिमान् ॥ ४०१३ ॥

सोदरभ्रातृमान् रागी ज्येष्ठभ्रातृवियोगवान् ।
[4]त्रिसोदराश्चायुष्मन्तो भगिन्या चैकया युतः ॥ ४०१४ ॥

सूर्यकलाधिपे मन्दे तृतीये मकरांशगे ।
धनुर्लग्ने प्रजातश्च स्वपितामहभाग्यवान् ॥ ४०१५ ॥

सूर्यलग्ने सूर्यकाले पाप[5]कान्तोद्भवस्य च ।
शुभदृष्टिविहीनस्य [6]ह्यल्पभाग्यं विनिर्दिशेत् ॥ ४०१६ ॥

चन्द्रयोगे धनुर्लग्ने तदीशे वारुणांशगे ।
भाग्याधि[7]पेकुमारांशे भाग्ययुक्तो न संशयः ॥ ४०१७ ॥

स्वपि[8]त्वधिकभाग्यार्ति विवाहानन्तरं सुखम् ।
बाल्ये सौख्यं विजानीयात् कौमारेऽल्पसुखान्वितः ॥ ४०१८ ॥

यौवने भाग्यमाप्नोति विपदाये श्रिया[9]युतम् ।
रन्ध्राधिपतिदोषेण पितृपीडा कचित् कचित् ॥ ४०१९ ॥

पितामही विना[10]शेन स्वपिता क्लेशवान् सुखी ।
कुमारांशगते सूर्ये कर्मे शनिसमन्विते ॥ ४०२० ॥

खण्डद्वयं [11]तद्दशायां योगभङ्गं विनिर्दिशेत् ।
जन्मतारादशान्त्यादौ[12] खण्डाधिपतिदायके ॥ ४०२१ ॥

---

1. प्रजातश्च  2. आर्तिः
3. कर्म
4. भ्रातृत्वयं चिरायुष्यं भगिन्येकासमन्वितः ।
5. क्रान्तस्य जातके  6. अल्प
7. भाग्याधिपकुमारांशे भाग्यपांशे  8. स्वपिताधिकभाग्यर्तिः
9. वहम्  10. विनाशादि
11. तदीशायां  12. दशान्त्यादि

निधनाधिपदोषेण सम्पद्दाये न योगवान् ।
अष्टमाधिपतौ चन्द्रे लग्नेशेन समन्विते ॥ ४०२२ ॥

वारुणांशे चक्रयोगे विपद्दाये श्रिया[1]युतः ।
राजयोगं [2]च लभते तत्समो वा सुखी भवेत् ॥ ४०२३ ॥

नरवाहनभूषाप्तिं[3] प्रबलोद्योगजीवनम् ।
सन्तानोत्पत्तिमाप्नोति सोदरी श्रियमश्नुते ॥ ४०२४ ॥

वारुणांशकगे जीवे चक्रयोग[4]समुद्भवः ।
लाभाधिपदशाकाले स्व[5]पित्रा सह यात्रिकः ॥ ४०२५ ॥

लग्नेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
सेतुयात्रा फलप्राप्तिर्लाभाधिपतिदायके ॥ ४०२६ ॥

क्षेमदाये तथा विन्द्यात् प्रत्यग्दाये तथैव च ।
सेतुयात्रात्रिवारं च गङ्गास्नानफलं [6]स्मृतम् ॥ ४०२७ ॥

लग्नात् कर्मगते राहौ गङ्गास्नानसुपुण्यवान् ।
तदभावे सेतुयात्रा त्रिवारं नात्र संशयः ॥ ४०२८ ॥

महादानफलप्राप्तिर्भाग्यकर्मेशसंयुतौ[7] ।
अग्रहारप्रतिष्ठाता[8] कीर्तिमांश्च न संशयः ॥ ४०२९ ॥

लग्नाधिपदशाकाले शुभाशुभफलं समम् ।
बुधान्तरे [9]ह्यरिष्टं स्याच्छान्त्या शान्ति प्रयास्यति ॥ ४०३० ॥

रन्ध्राधिपान्तरे काले लग्नाधिपतिदायगे ।
वारुणांशे प्रजातस्य कालमृत्युर्न संशयः ॥ ४०३१ ॥

---

1. वहम्
2. प्रकुर्वीत तत्समो वा सुखी यदि
3. भूषाप्तिः
4. योगस्य जातके
5. स्वपिता सह यात्रवान्
6. इदम्
7. संयुता
8. प्रतिष्ठावि
9. अरिष्ट

भाग्याधिपे कुमारांशे मङ्गलांशे सुताधिपे ।
वारुणांशे प्रजात[1]श्च पूर्वजन्मनि शूद्रकः ॥ ४०३२ ॥

पश्चाज्जन्म तथा विन्द्या[2]दस्मिञ्जन्मनि कीर्तिमान् ।
पितृवाक्यरतो नित्यं राजसप्रकृतिः सुखी ॥ ४०३३ ॥

[3]धर्मे च निरतश्चैव किंचित्तामसकृत्यवान् ।
लग्ने जीवे वारुणांशे भूसुतेन निरीक्षिते ॥ ४०३४ ॥

[4]रजोगुणसमायुक्तः किंचित्तामसकृत्यवान् ।
लग्ने जीवे सुखे शुक्रे तृतीये पापखेचरे ॥ ४०३५ ॥

राजमुद्राधिका[5]री च बहुदेशाधिपत्यवान् ।
सदा राजसधर्मज्ञः कीर्तिमांश्च पुराणवित् ॥ ४०३६ ॥

शिवभक्तिरतो नित्यं शिवकैङ्कर्यभक्तिमान् ।
कुमारांशकगे सूर्ये वृश्चिके कालसं[6]स्थिते ॥ ४०३७ ॥

धनुर्लग्ने प्रजातश्च हरिशङ्करभक्तिमान् ।
सन्मार्गवृत्तिमान्नित्यं वैदिकाचारतत्परः ॥ ४०३८ ॥

देवी [7]भक्तो विशेषेण धर्मपुण्यपुराणवित् ।
स्वपिता च [8]तथैव स्याद्बन्धुवर्गे सुकीर्तिमान् ॥ ४०३९ ॥

भाग्यारूढाधिपे मन्दे स्वक्षेत्रे मकरांशगे ।
अन्तःक्रोधी प्रसन्नात्मा लोभप्रकृतिमान् पिता ॥ ४०४० ॥

परोप[9]कारनिरतो वाचाधर्मपरायणः ।
पितृव्यौ द्वौ महापापी एकः पुण्य[10]युतोऽपरः ॥ ४०४१ ॥

---

1. प्रजातस्य पुरा शूद्रस्य जन्मवान्
2. इहजन्मे सुकीर्ति
3. धर्मे चेति तथा विन्द्यात्
4. राजसप्रकृतिमान्नित्यं
5. कारं स्याद्
6. जातके
7. भक्तविशेषे स्याद्
8. तथा विन्द्याद्
9. कृतवान् किंचिद्
10. प्रदो भवेत्

पितृष्वसा सुमाङ्ग[1]ल्या बहुपुत्रवती सती ॥ ४०४२ ॥

पितृष्वसा पुत्रयोगं प्राबल्यं चोत्तरोत्तरम् ।
ज्ञातिभाग्यवशात् कीर्तिं [2]नरवाहनभाक् सुखी ॥ ४०४३ ॥

वारुणांशकगे जीवे चक्रयो[3]गोद्भवस्य च ।
कुमारांशे फलं सत्यं पितृव्यौ द्वावपुत्रकौ[4] ॥ ४०४४ ॥

कालान्तरे [5]तयोरेकः सन्तानोत्पत्तिमान् सुखी ।
कुमारांशे गर्ग[6]मते पितृव्यैकः सुपुत्रवान् ॥ ४०४५ ॥

गर्गः—

वारुणांशकगे जीवे कुमारांशकगे रवौ ।
स्वपितुः[7] सोदरस्त्वेकः पुत्रवांश्च न संशयः ॥ ४०४६ ॥

वन्ध्यापति[8]र्द्वयोरेको मृतप्रजायुतस्तथा ।
कालान्तरे सुसन्तानं वृद्धगार्ग्य[9]मते स्मृतम् ॥ ४०४७ ॥

मङ्गलांशे सुताधीशे रविसौम्यसमन्विते ।
वारुणांशे प्रजातश्च [10]ह्यल्पसन्तानयोगवान् ॥ ४०४८ ॥

लग्नात्तृतीयगे मन्दे वारुणां[11]शोद्भवस्य च ।
मृतप्रजाबहुत्वं स्यादेकः पुत्रश्चिरायुषः[12] ॥ ४०४९ ॥

[13]दारद्वये सुतप्राप्तिर्वारुणांशकगे गुरौ ।
[14]आयुष्मन्तौ च पुत्रौ द्वौ पुत्रिण्यौ द्वे च जीविते ॥ ४०५० ॥

---

1. माङ्गल्यं बहुपुत्रवती सुखी
2. कीर्तिः
3. योगस्य जातके
4. पुत्रवान्
5. पितृव्येकः
6. होरे
7. स्वपिता
8. द्वयश्चेति एकः कश्चिन्मृतप्रजः
9. मतं
10. अल्प
11. अंशस्य जातके
12. चिरायुषम्
13. वजाद्वये
14. पुत्रद्वयं चिरायुष्यं पुत्रिका च तथा भवेत् ।

सुतेशे मङ्गलांशस्थे प्रभांशे चक्रयोगगे ।
दारद्वये सुतप्राप्तिर्बहुसन्तानयोगवान् ॥ ४०५१ ॥

एकोनविंशवर्षादौ[1] विपद्दाये सुपुत्रवान् ।
[2]तृतीयशनिदोषेण सीमन्तशिशुनाशनम् ॥ ४०५२ ॥

घनेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
[3]घनेशदृष्टिराशौ तु स्वप्रभोश्च [4]महाविपत् ॥ ४०५३ ॥

भाग्येशांशे सप्तमे वा द्वादशां[5]शे च जन्मभे ।
स्फुटयोगं गते मन्दे नृपतिक्लेशमादिशेत् ॥ ४०५४ ॥

भाग्याधिपदशाकाले गोचरे लग्ने शनौ ।
स्ववासदेशनृपति[6]र्मृतःस्यान्नात्र संशयः ॥ ४०५५ ॥

जन्मदाये मीनशनौ मेषान्ते वृषभेस्थिते ।
स्ववासदेशे नृप[7]तेरपमृत्युर्भविष्यति ॥ ४०५६ ॥

वृश्चिकान्ते जन्मशनौ वारुणां[8]शोद्भवस्य च ।
[9]स्वेन सेवितभूपस्य मृत्युःस्यान्नात्र संशयः ॥ ४०५७ ॥

जीवितेऽश्वादि[10]नाशः स्याद्दायादिकलहो महान् ।
सुतेशांशे त्रिकोणर्क्षे [11]स्वपितुर्जन्मभं विदुः ॥ ४०५८ ॥

सुतेशांशे त्रिकोणर्क्षे पुत्रजन्मर्क्षमं विदुः ।
राज्याधिपे मङ्गलांशे भाग्यकर्मेशसंयुते ॥ ४०५९ ॥

तद्दशायां महद्भाग्यं बुधभुक्तौ निरोधवान् ।
रन्ध्राधिपदशाकाले कर्माधिपति भुक्तिषु ॥ ४०६० ॥

---

1. वर्षादि
2. तृतीये
3. धनेशे
4. महद्विपत्
5. द्वादशांवि
6. मृतिश्चेन्नात्र
7. नृपतिरपमृत्युस्तथा श्रितः
8. वारुणांशस्य जातके
9. सेवकान्नृपमृत्युश्चेन्नात्र
10. नाशं स्याद्दायादिकलहं महत्
11. स्वपिता जन्म

सहोदरमनस्तापं राजद्वारे कलापवान् ।
स्वदारदेह[1]पीडां च क्रूरमासे विचारवान् ॥ ४०६१ ॥

स्वप्रभोश्च मनस्तापं तद्द्वारिस्थजनावधि ।
भाग्याधिपदशाकाले [2]त्विदं फलमुदाहरेत् ॥ ४०६२ ॥

प्राबल्यं वैष्णवक्लेशं बुधभुक्तौ फलं स्मृतम् ।
स्वपिता मित्र[3]वर्गेण क्लेशं प्राप्नोति भूरिशः ॥ ४०६३ ॥

पश्चात् प्राबल्यमाप्नोति शुक्रभुक्तौ पिता सुखम् ।
सिंहे शनिस्थिते काले भाग्याधिपतिदायके ॥ ४०६४ ॥

पितृव्यपुत्रिको[4]द्वाहो पितृव्यश्च प्रपीडितः ।
रन्ध्राधिपदशाकाले चापान्ते मकरे शनौ ॥ ४०६५ ॥

कलत्रदेह[5]पीडा च दारवंशे महाविपत् ।
लाभांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४०६६ ॥

लाभेश[6]दृष्टिराशौ तु मातृपीडां विनिर्दिशेत् ।
मेषान्ते वृषभे मन्दे गोचरे क्षेमदायके ॥ ४०६७ ॥

सूर्यांशमासकोणेषु[7] पितृनिर्याणमादिशेत् ।
सूर्यलग्ने सूर्यकाले सुखेशांशत्रिकोणगे ॥ ४०६८ ॥

स्फुटयोगं गते मन्दे पितृपीडां विनिर्दिशेत् ।
भाग्याधिपदशाकाले रन्ध्राधिपतिदायके ॥ ४०६९ ॥

कीटे शनिस्थिते काले स्वपितु[8]र्मनसि व्यथा ।
अपमृत्युभयप्राप्तिः शान्त्या शान्तिं प्रयास्यति ॥ ४०७० ॥

---

1. पीडादि क्रूरमासे विचारकृत्
2. इदं
3. मित्रवान् शङ्कं
4. पुत्रिकोद्वाहं पितृव्यस्य
5. पीडादि दारवंशे महद्विपत्
6. दुष्ट
7. कोणे वा
8. स्वपिता

राजयोगं च [1]लभते तत्कालेऽमात्यसंशयः ।
व्ययेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४०७१ ॥

व्ययेश[2]दृष्टिराशौ तु पितृपीडां विनिर्दिशेत् ।
तदभावे जन्मदेशे राज्याधिपतिनाशनम् ॥ ४०७२ ॥

मातृवर्गजनारिष्टमथ वा रोगपीड[3]नम् ।
स्ववासदेशनृप[4]तेरिदं फलमुदाहरेत् ॥ ४०७३ ॥

[5]जन्मेशस्य दशान्त्यादौ मिथुनान्त्याष्टमे शनौ ।
अनावृष्टिहते देशे किंचिद्दुर्भिक्षमादिशेत् ॥ ४०७४ ॥

सम्पत्तारदशान्त्यादौ[6] विपद्वाये तुलाशनौ ।
अनावृष्टिश्च महती लोके दुर्भिक्ष[7]जं भयम् ॥ ४०७५ ॥

[8]चापे जीवे वारुणांशे मिथुनान्त्यत्रिकोणगे ।
स्फुटयोगं गते मन्दे [9]ह्यनावृष्टिं विनिर्दिशेत् ।
[10]विप्लवेन मनस्तापं स्वप्रभोश्च विशेषतः ॥ ४०७६ ॥

कन्याशनिस्थिते काले चन्द्रयोग[11]समुद्भवः ।
कृष्णागोदावरीमध्ये हताश्वो हतसैनिकः ॥ ४०७७ ॥

मीनेऽर्कनन्दने काले पाण्ड्यदेशे तथा भवेत् ।
वृषभे म्लेच्छनाशः[12] स्यात् कुलीरे चोलदेशगे ॥ ४०७८ ॥

तत्त्रिकोणेऽथ वा चेति पाण्ड्यभूपतिनाशनम् ।
प्रभुस्थानाधिपे[13] सूर्ये राज्यपेन समन्विते ॥ ४०७९ ॥

---

1. महतीं
2. व्ययेशे दृष्टि
3. पीडितः
4. नृपतिरिदं
5. पाके जन्मदशान्त्यादि
6. दशान्त्यदि
7. डाम्बरम्
8. चापा जीवे
9. अनावृष्टिः
10. वित्लभेन
11. योगस्य जातके
12. नाशं स्यात्
13. प्रभुस्ताराधिपे

कर्माधिपेन संयुक्ते कुमारांशसमुद्भवः[1] ।
सुकुमार[2]शरीरी च स्थूलकायो महामतिः ॥ ४०८० ॥

बह्वश्वो नृप[3]विश्वासी महाराजप्रियः सुखी ।
[4]तद्द्वारा प्रबलश्चैव राज्याधिपतिदायके ॥ ४०८१ ॥

राजन्यद्वेषवान् किंचित् त्रिवारं राज[5]विग्रहम् ।
विपदा [6]त्वेकवारं स्यात् क्षेमदाये तथा भवेत् ॥ ४०८२ ॥

प्रत्यग्दाये [7]विशेषेण वेधकग्रहभुक्तिषु ।
षष्ठाष्टमव्ययाधीशराश्यंशे गोचरे रवौ ॥ ४०८३ ॥

वेधकस्यान्तरे काले राजोपद्रवमादिशेत् ।
कारागृहभयप्राप्तिः संचितार्थविनाशनम् ॥ ४०८४ ॥

क्लेशकालं विजानीयाद्भुक्तिमार्गेण योजयेत् ।
चापे कन्यांशगे जीवे कुम्भे [8]चन्द्रे च संस्थिते ॥ ४०८५ ॥

[9]कन्याजीवे घटे चन्द्रे तयोः पाके रूजातुरः ।
जन्मदाये जन्मभुक्तौ मृतप्रायोपजीवति ॥ ४०८६ ॥

रन्ध्राधिपदशाकाले [10]ह्यपमृत्युर्भविष्यति ।
चक्रसन्धौ दशासन्धौ काले वा गोचरे शनौ ॥ ४०८७ ॥

जीवराशि[11]गते मन्दे स्वजनारिष्टमादिशेत् ।
तुलाचक्रदशान्त्यादौ वृश्चिके चक्रदायके[12] ॥ ४०८८ ॥

---

1. कुमारांशस्य जातके
2. शरीरं स्यात्
3. नृपतिस्नेह
4. तद्द्वारप्रबलं चेति
5. विद्वरं
6. विपद्दायेक
7. विशेषं स्याद्
8. चन्द्रमिति स्मृतम्
9. कन्याजीवमिति प्राहुस्तयोः पाके ऋजातुनः ।
10. अपमृत्युस्तथा श्रितः
11. भवेत्तत्र
12. दशान्त्यादि वृश्चिके चक्रजातके

अतीव क्लेशकार्याणि कन्यान्ते तौलिगे शनौ ।
अपमृत्युभयप्राप्तिश्चक्रदानं समाचरेत् ॥ ४०८९ ॥

[1]एकोनविंशे विंशे वा ह्येकविंशतिवत्सरे ।
कालचक्रदशासन्[2]धौ वारुणांशे ह्युपद्रवः ॥ ४०९० ॥

तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ।
एकाशीतिपदं [3]चक्रं दैवज्ञाय प्रदापयेत् ।
अपमृत्युभयं नास्ति दीर्घमायुश्च विन्दति ॥ ४०९१ ॥

स्वसमानजनारिष्टं ज्ञातिवर्गे शिशुक्षयम् ।
मातामहविना[4]शेन मातुलक्लेशमादिशेत ॥ ४०९२ ॥

कुम्भे शनिस्थिते काले देहपीडां मनोव्य[5]थाम् ।
चाप[6]चक्रदशारोगं सन्तानोत्पत्तिनाशनम् ॥ ४०९३ ॥

देहे पापे देहपीडा जीवे पापे तथैव च ।
तावुभौ पाप[7]संयुक्तौ तत्कालेचदशान्त्यगे ॥ ४०९४ ॥

[8]प्राप्तायां मृतिभुक्तौ च मारकश्च न संशयः ।
विपरी[9]ते मृतिर्नास्ति देहायासाद्युपद्रवः ॥ ४०९५ ॥

कुम्भकन्या[10]धनुमीनमिथुनेषु दिवाकरे ।
प्रत्यब्दं क्रूर[11]मासश्च देहायासं क्वचित् क्वचित् ॥ ४०९६ ॥

क्रूरराशौ [12]चापयोगे क्रूरमासे भवेद्यदि ।
विशेषोपद्रवं [13]चैति योजयेत् कालवित्तमः ॥ ४०९७ ॥

---

1. विंशाब्दे एकविंशाब्दे एकोनद्विंशवत्सरे ।
2. संधिवारुणांशे उपद्रवः
3. चक्रे दैवज्ञस्य
4. नाशादि
5. व्यथा
6. चक्रं
7. योगश्च
8. मृतिभुक्तिश्च संप्राप्ते मारकस्य
9. विपरीतमृतिर्नास्ति देहायास उपद्रवम्
10. धनुर्मासे मीने मिथुनमासगे
11. मासं स्याद्
12. पाद
13. चेति

बुधास्त[1]मयकाले वा जीवास्तमयगेऽपि च ।
षष्ठाष्टमाधीशवारे देहोपद्रवमादिशेत् ॥ ४०९८ ॥

सहोदरप्रपीडादि[2]मथवा स्वजनामयम् ।
प्रत्यब्दगे क्रूरमासे य इदं फलमश्नुते ॥ ४०९९ ॥

मङ्गले मङ्गलांशस्थे कुमारांशे दिवाकरे ।
चक्रयोगे वारुणांशे [3]ह्यपमृत्युर्न विद्यते ॥ ४१०० ॥

साधनेशदशा[4]मृत्युं मेषान्ते वृषभे शनौ ।
तत्त्रिकोणेऽप[5]मृत्युं च शान्तिं कुर्याद्विचक्षणः ॥ ४१०१ ॥

ग्रह[6]चारफलं चेति त्रिग्रहांशफलं स्मृतम् ।
वृषभे च दशारम्भे तदीशे स्वोच्चराशिगे ॥ ४१०२ ॥

राजयोगं [7]च लभते विपद्दाये श्रियायुतम् ।
केतुयोगवशात् क्लेशं तृतीयांशे पराधिगे ॥ ४१०३ ॥

स्वपिता योगभङ्गं [8]च क्लेशं च विषुवत्सरम् ।
युग्मराशिफलं [9]चैवं सम्पद्दाये प्रभांशगे ॥ ४१०४ ॥

रन्ध्रेश[10]दृष्टिदोषेण स्वभावस्थं न विद्यते ।
जामित्रभवने सूर्ये दशायां मध्यखण्डगे ॥ ४१०५ ॥

स्वपिता राजसन्मानं विवाहोत्सवसंभ्रमम् ।
भाग्येशां[11]शत्रिकोणर्क्षे दशारम्भे तदीश्वरे ॥ ४१०६ ॥

लग्नाधिपेन संयुक्ते तद्दशायां शुभं भवेत् ।
चक्रयोगे वारुणांशे विशेषफलमश्नुते ॥ ४१०७ ॥

---

1. मान
2. अथ वा
3. अपमृत्युः
4. मृत्युर्मेषान्ते
5. मृत्युश्च
6. ग्रहवारफलं चेति
7. प्रकुर्वीत विपद्दाये श्रियावहम्
8. स्यात् क्लेशं स्याद्
9. चेति
10. दृष्ट
11. भाग्येशांशे त्रिकोणर्क्षे दशारंभे तदीशगे

स्वपावस्थं [1]च लभते नववाहनभाग्भवेत् ।
[2]दशां द्वादशधा कृत्वा ओजयुग्मानुसारतः ॥ ४१०८ ॥

अन्तर्दशाफलं चेति योजयेत् कालवित्तमः ।
लग्नाधिपेन सं[3]दृष्टराशौ सौख्यफलं विदुः ॥ ४१०९ ॥

भाग्य कर्मेश[4]राशीशावाक्रातौ दृष्टिराशिषु ।
वारुणांशे चक्रयोगे शुभं भवति नित्यशः ॥ ४११० ॥

सम्पद्दशान्त्यमारभ्य चतुष्केन्द्रदशाशुभम् ।
मिथुनान्ते श्रियावाप्तिः कुलीरे बहुभाग्य[5]वान् ॥ ४१११ ॥

सहोदरी [6]विवाहः स्यात् सिंहान्ते ललने गुरौ ।
राजयोगं च [7]लभते पितृमूलाच्छुभावहम् ॥ ४११२ ॥

पापाक्रान्तान्तरे काले पूर्वोक्तक्रूरकालगे ।
अतीव क्लेशकार्याणि योगभङ्गं विनिर्दिशेत् ॥ ४११३ ॥

सिंहे [8]सिंहांशके भौमे लग्नेशेन निरीक्षिते ।
तद्दशायां महद्भाग्यं [9]धनुर्लग्नोद्भवस्य च ॥ ४११४ ॥

द्वितीयोद्वाहमाप्नोति चक्र[10]योगसमुद्भवः ।
विपद्दाये तृतीयांशे पूर्वार्धे क्षेमदायगे ॥ ४११५ ॥

मकरान्ते [11]घटे मन्दे द्वितीयोद्वाहमादिशेत् ।
दशाकालादि निश्चित्य फलानि परिचिन्तयेत् ॥ ४११६ ॥

गोचरे स्फुटयोगांशे फलं योज्य विचक्षणः ।
सुताधिपदशाकाले पितृव्यस्य [12]महाविपत् ।
रन्ध्राधिपदशाकाले स्वपि[13]तुः सोदरीव्यथाम् ॥ ४११७ ॥

---

1. प्रकुर्वीत
2. दशाद्वाशरथा
3. संदृष्टे राशौ सौख्यं
4. राज्येशावाक्रान्ते
5. कृत्
6. विवाह स्यात्
7. महति
8. भौमदशाकाले
9. लग्नस्य जातके
10. योगस्य जातके
11. मकरान्ते....मन्दं
12. महद्विपत्
13. स्वपिता सोदरीव्यथा

[1]तत्तद्भावाष्टमेशांशे स्फुटयोगं गते शनौ ।
तत्तन्मारकदोषेण तत्तन्निर्याणमादिशेत् ॥ ४११८ ॥

पञ्चत्रिंशात् परं भाग्यं वारुणांश[2]समुद्भवः ।
गजान्तैश्वर्यमाप्नोति प्राधान्यं नात्र संशयः ॥ ४११९ ॥

राज्याधिपतिसन्मानं युद्धे जयति शात्रवान् ।
अतीव बहुमानादि कीर्तिमां[3]श्च न संशयः ॥ ४१२० ॥

कामेशांशपतौ सूर्ये [4]कुम्भांशे स्वांशकेऽपि वा ।
परस्त्रीगमनं किंचिद्वातरोगशरीरवान् ॥ ४१२१ ॥

कालान्तरे चित्त[5]शुद्ध्या परस्त्रीभोगवर्जितः ।
धर्ममार्गरतो नित्यं किंचिद्रोगशरीरवान् ॥ ४१२२ ॥

सर्वदा [6]रोगिणी भार्या मध्ये मध्ये क्वचित् सुखम् ।
शुक्राष्ट[7]वर्गे विस्तारं दारसौख्यफलं स्मृतम् ॥ ४१२३ ॥

चक्रयोगे वारुणांशे कुमारांशे दिवाकरे ।
मङ्गलांशकगे भौमे पञ्चषष्टिः सुजीवति ॥ ४१२४ ॥

तदर्धे देहजाड्यं स्याद् षट्त्रिंशाब्दे महाविपत् ।
[8]द्वाविंशे ज्वरपीडां च सन्तानोत्पत्तिनाशनम् ॥ ४१२५ ॥

मेषचक्रदशाकाले लग्नाधिपतिदायके ।
वारुणांशे मेषशनौ धनुर्मासे मृतिं वदेत् ॥ ४१२६ ॥

अथ वा मिथुने मासे कन्यामासेऽथ वा यदि ।
शुक्लपक्षे सोमवारे निर्याणमिति चादिशेत् ॥ ४१२७ ॥

---

1. तद्भावात् षष्ठमेशांश
2. वारुणांशस्य जातके
3. कीर्तिमांश्चेन्न
4. कुम्भकालेऽर्कयोगये
5. शुद्धिः
6. दाररोगं च
7. शुक्राज्ञ
8. विंशे द्वे ज्वरपीडादि

ग्रन्थान्तरे कुमारांशे मङ्गलांश[1]समुद्भवः ।
गुरुवारे मृतिं [2]चैति शुक्लपक्षे न संशयः ॥ ४१२८ ॥

सूर्ये करालषष्ट्यंशे कुमारां[3]शोद्भवस्य च ।
वारुणांशेशलग्नेशौ पापपुण्यसमौ स्मृतौ[4] ॥ ४१२९ ॥

पुण्यलोकं तदा विन्यात् किंचित्पक्षे [5]न लोकभाक् ।
व्ययेशे देवषष्ट्यंशे [6]नाड्यां तु मङ्गलांशजः ॥ ४१३० ॥

स्वजात्यानुगुणं लोकमन्ते ज्ञानयुतो[7] भवेत् ।
त्रिग्रहांशफलं [8]चैव प्रत्यक्षं देवकेरलम् ॥ ४१३१ ॥

—:*:—

## धनुर्लग्ने उरगांशः

उरगांशे निशानाथे सौम्ये गुरुसमन्विते ।
विप्रकाले प्रजातश्च विप्रजन्मा सुखी भवेत् ॥ ४१३२ ॥

बालारिष्टं [9]च लभते चन्द्रे कुजयुतेक्षिते ।
उरगांशे निशानाथे शूद्रकाल[10]समुद्भवः ॥ ४१३३ ॥

शूद्रजन्मा सुखी नित्यं [11]तृतीयगर्भसंभवः ।
अथ वा च [12]तुरीयः स्यात् पश्चाद्भाग्यविनाशवान् ॥ ४१३४ ॥

उरगांशकगे चन्द्रे कर्मे गुरुनिरीक्षिते ।
पूर्वभागे राहुयोगे नालवेष्टनमादिशेत् ॥ ४१३५ ॥

---

1. मङ्गलांशस्य जातके
2. चेति
3. कुमारांशस्यनाडिगे
4. लग्नेशापापपुण्यसमा भवेत्
5. पक्षेषु लोकवान्
6. मङ्गलांशस्य नाडिगे
7. सुगुणं लोकमन्ते ज्ञानप्रदो
8. चेति
9. प्रकुर्वीत
10. कालस्य जातके
11. तृतीये गर्भजातकम्
12. तृतीयं स्यात्

उत्तरांशे प्रजातस्य[1] वेष्टनं च न विद्यते ।
पूर्वभागे [2]च यत्किंचिद् गुरुदृष्टिवशात् सुखम् ॥ ४१३६ ॥

बालारिष्टभयं किंचिदुत्तरांशे क्वचित् क्वचित् ।
उत्तरांशे वनप्रान्त्ये जननं म्लेच्छपट्टणे ॥ ४१३७ ॥

पूर्वभागे पुण्यदेशे [3]त्वग्रहारे प्रसूतिमान् ।
ग्रन्थान्तरे पुण्यदेशे महादेवपुरालये ॥ ४१३८ ॥

जननं समितौ[4] प्राहुरेकाकी भ्रातृनाशवान् ।
उत्तरांशे प्रजातश्च सोदरी भ्रातृसंयुतः ॥ ४१३९ ॥

बाल्ये पितृविनाशः स्याज्ज्येष्ठभ्रातृत्रयः सुखी[5] ।
ज्येष्ठभ्राता पूर्वभागे त्वेकाकी सौख्यवान् सुखी[6] ॥ ४१४० ॥

[7]भार्यापुत्रयुतो मानी व्यापारे बहुभाग्यवान् ।
उत्तरांशे प्रजातश्च वसुवर्षे पितुर्विपत्[8] ॥ ४१४१ ॥

जीविते दशमे वर्षे [9]पित्ररिष्टं भवेद्ध्रुवम् ।
षोडशाब्दे शुभं [10]चैति ह्युरगांशे फलं स्मृतम् ॥ ४१४२ ॥

पूर्वभागे पिता[11]युष्मान् जननी रोगपीडिता ।
विपद्दाये मृतिं [12]चैति तुलांशे वृश्चिके शनौ ॥ ४१४३ ॥

उरगांशे निशानाथे दशमे राहुसंयुते ।
पूर्वभागे [13]नीलवर्णः सुशरीरः सुबुद्धिमान् ॥ ४१४४ ॥

---

1. जातश्च
2. क्वचिच्चेति
3. अग्रहारे
4. समिति
5. नाशं स्याज्ज्येष्ठभ्रभ्रातृत्रयः सुखम्
6. भ्रातृ एकाकी सौख्यवती
7. पुत्रिणी पतिभक्तिः स्याद्व्यापारे
8. पिता विपत्
9. पितारिष्टं
10. चेति उरगां
11. पितायुष्यं
12. चेति
13. वर्णे

विशालनयनो वाग्मी श्यामवर्णकलत्रवान् ।
अल्पपुत्रार्थसंपन्नो[1] ह्युरगांशे प्रसिद्धिमान् ॥ ४१४५ ॥

सिंहांशे दशमे राहौ[2] कर्मेशेन समन्विते ।
दशाधिपतिना दृष्टे बाल्ये क्लेशदरिद्रवान् ॥ ४१४६ ॥

चन्द्रांशाधिपतौ जीवे स्वक्षेत्रे स्वनवांशके ।
शनियोगे पापकर्मा[3] तामसप्रकृतिर्धनी ॥ ४१४७ ॥

उरगांशे निशानाथे पापयोगे शुभेक्षिते ।
अन्तःक्रोधी प्रसन्नात्मा हितशत्रुर्द्विकार्यवान् ।
उरगांशे निशानाथे गुरुसंयुतवीक्षिते ॥ ४१४८ ॥

पूर्वभागे शान्तबुद्धिर्विद्यावान् धनवान् सुखी ।
उत्तरांशे चौर्यकर्ता[4] परस्त्रीभोगलोलुपः ॥ ४१४९ ॥

तदभावे दुष्टभार्याहेतुमूलात् कलापवान् ।
पूर्वभागे सत्कुटुम्बे पितृभाग्यविहीनवान् ।
स्वभुजार्जितसंपन्नः पितृमातृप्रियः सुखी ॥ ४१५० ॥

भुजङ्गनक्षत्रभवो भुजङ्गो
धनान्वितः साहसिकः कृतज्ञः ।
स्वरांशके पापमतिस्त्वधर्मी[5]
स्वमित्रमोही [6]ह्यथ सर्वभक्षकी ॥ ४१५१ ॥

चतुर्थचरणे मध्ये ह्युरगांशे[7] सुहृत्त्रयी ।
पूर्वभागे वैश्यवृत्त्या ह्यन्यायार्जितवित्तवान्[8] ॥ ४१५२ ॥

---

1 संपन्नोः उ 2. राहु
3. शनियोगं पापकर्मि तामस प्रकृती धनी
4. कृत्यं 5. स्वरांशकः पापमती अधर्मा
6. अथ 7. उरगांशे सुहृत्त्रयम्
8. वृत्तिः रन्यार्जितधनाढ्यवान्

न्यायार्जितः पितृव्यस्तु ह्युत्तरांशे फलं स्मृतम्[1] ।
म्लेच्छसेवापरो नित्यं बहुव्यापारसंयुतः[2] ॥ ४१५३ ॥

ज्येष्ठभ्रातृत्रययुतो ह्युत्तरांशे द्विभार्यवान्[3] ।
पूर्वभागैकभगिनी बहुकालं सुमङ्गली ॥ ४१५४ ॥

गुरुदृष्टिफलेनैव पूर्वभागोद्भवस्य च[4] ।
उत्तरांशे प्रजातस्य[5] जननी दीर्घजीविनी[6] ॥ ४१५५ ॥

पितामहश्चिरायुष्मान् तथैव च पितामही[7] ।
पितामहमृतिश्चैव[8] वसुवार्षात् परं भवेत् ॥ ४१५६ ॥

उत्तरांशे राहुदोष[9]बहुत्वमिति कथ्यते ।
पूर्वभागे पिता चैव[10] दीर्घायुश्च न संशयः ॥ ४१५७ ॥

उत्तरांशे षोडशाब्दे पितामह्यास्तु नाशनम्[11] ।
पूर्वभागे प्रजातस्य पितामहोऽप्यरिष्टवान्[12] ॥ ४१५८ ॥

उरगांशे निशानाथे पूर्वभागे कुजेक्षिते ।
मित्रांशगे प्रजातस्य[13] मातृवंशः क्षयं गतः ॥ ४१५९ ॥

उत्तरांशे मातृवंशे प्रजावृद्धिर्महत्सुखम् ।
मातुलत्रयमित्याहुस्तेषामेको द्वि[14]भार्यवान् ॥ ४१६० ॥

सम्प्रदाये पूर्वभागे ह्यरिष्टं मातृवंशके[15] ।
संबन्धार्थविनाशेन स्वपिता ऋणशोकवान् ॥ ४१६१ ॥

---

1. न्यायार्जितपितृव्यः स्यात्
2. जीवनम्
3. भ्रातृत्रयं किंचित्
4. फलं चेति पूर्वभागणस्य जातके
5. प्रजातश्च
6. दीर्घमायुषी
7. चिरायुष्यं.......
8. मृतिं चेति
9. दोषं बहुत्वं
10. चेति
11. पितामहि विनाशनम्
12. प्रजातश्च पितामह अरिष्टकृत्
13. प्रजातश्च
14. एकः कश्चित्
15. मातृवंशे अरिष्टकृत्

उत्तरांशे भ्रातृयोगं प्राबल्यं चोत्तरोत्तरम् ।
तन्मूलादिष्टसिद्धिं च[1] विवाहादिश्रियान्विताम् ॥ ४१६२ ॥

उत्तरांशे पूर्वभागे सदा रोगकलत्रवान् ।
केतुयोगे मदाधीशे दारनेत्रे व्रणं भवेत् ॥ ३१६३ ॥

स्वपुराकृतदोषेण किंचिद्रोगकलत्रवान् ।
उत्तरांशे धूर्तभार्या त्वरोग[2]दृढशालिनी ॥ ४१६४ ॥

कुलटा चेज्जी[3]विता स्यान्मृतिं चैति पतिव्रता ।
उत्तरांशे द्विभार्यः स्यात् पूर्वभागैकदारवान् ॥ ४१६५ ॥

[4]अष्टौ पुत्रा भविष्यन्ति अथवा दश सूनवः ।
उरगांशे पूर्वभागे चन्द्रे गुरुनिरीक्षिते ॥ ४१६६ ॥

पुत्रद्वयं चिरायुष्यं पुत्रिका च तथा भवेत् ।
रुद्राहदी[5]क्षामध्ये च ह्युत्तरांशे सुवृष्टिकृत् ॥ ४१६७ ॥

पूर्वभागे राजपीडा बन्धुवर्गे विशेषतः ।
षष्ठे जीवे [6]सुरांशे च दशमे चन्द्रसंस्थिते ॥ ४१६८ ॥

नक्षत्रगण्डदोषश्च[7] नास्तीति मनुरब्रवीत् ।
उरगांशे पितायुष्मान्[8] श्वशुरस्तु विशेषतः ॥ ४१६९ ॥

पूर्वभागे जनन्यास्तु विपद्दाये मृतिर्भवेत्[9] ।
उरगांशे पूर्वभागे त्वेकविंशे पितुर्विपत्[10] ॥ ४१७० ॥

---

1. सिद्धिः स्याद्विवाहादिश्रियावहम्
2. अरोग
3. चेति मायुष्यंमृतिंचेति
4. सत्कुलं वसुसन्तानं दशसंख्याभितिस्मृतम्
5. दीक्षगे,मध्मेउत्तरांशेसुवृष्टिदम्
6. सुरांशस्य दशमे चद्रजातके
7. दोषं स्यजात्
8. पितायुष्यं श्वशरस्य
9. वदेत्
10. एकविंशे पिताविपत् ।

द्वाविंशाब्देऽथ वा चैव[1] षट्त्रिंशाब्दे न संशयः ।
सूर्यांशगे तत्त्रिकोणे शुभेशांशत्रिकोणगे ।
स्फुटयोगं गते मन्दे पितृनिर्याणमादिशेत् ॥ ४१७१ ॥

पितृव्यस्य तु विंशाब्दे मात्रारिष्टफलं वदेत्[2] ।
स्वपित्ररिष्टतः[3] पश्चाच्छ्वशुरारिष्टमादिशेत् ॥ ४१७२ ॥

कर्माधिपदशाकाले कर्मेशांशत्रिकोणगे ।
स्फुटयोगं गते मन्दे पितृनिर्याणमादिशेत् ॥ ४१७३ ॥

[4]त्रितीयांशत्रिकोणे च श्वशुरोरिष्टमाप्नुयात् ।
रन्ध्राधिपदशा[5]काले लाभाधिपतिभुक्तिषु ॥ ४१७४ ॥

मेषे शनिस्थिते [6]मृत्युं पूर्वभागे पितामहः ।
विपत्तारदशाकाले [7]स्वपरार्धे शुभावहम् ॥ ४१७५ ॥

स्वबुद्धेश्च बलेनैव[8] स्वप्राबल्यं विनिर्दिशेत् ।
उरगांशे पूर्वभागे वार्धके क्लेशमश्नुते ॥ ४१७६ ॥

साधनेशदशाकाले [9]ह्यपमृत्युभयं क्वचित् ।
उत्तरांशे प्रजातश्च धनाधिपतिदायगे ॥ ४१७७ ॥

षट्पञ्चांशे मृतिं [10]चैति प्राप्नोत्येव ह्यधोगतिम् ।
अथ कूर्मफलाध्याये [11]नाड्यां लग्नाधिपस्य च ॥ ४१७८ ॥

उरगांशे पूर्वभागे फलविस्तारमादिशेत् ।
लग्नाधिपदशाकाले पूर्वभागोद्भवस्य च[12] ॥ ४१७९ ॥

---

1. एकविंशेऽथवा चेति
2. विंशत्यब्दे पितृव्यस्य मात्रारिष्टफलं मृतिः ।
3. स्वपितारिष्टतः
4. ....श्वशुरो
5. संधि लाभाधिपति संधिषु
6. काले
7. अपरार्धे
8. प्रबलं चेति
9. अप
10. चेति पतत्येव अधोगतिः
11. लग्नाधिपति नाडिषु
12. भागस्य जातके

अपरार्धे शुभाधिवय स्यालकः प्रबलः सुखी[1] ।
लाभाधिपदशाकाले शनिभुक्तौ [2]महाविपत् ॥ ४१८० ॥

गुरुभुक्तौ मनस्तापं शुभाशुभफलं समम् ।
कर्माधिपदशाकाले वातरोगभयं क्वचित् ॥ ४१८१ ॥

धनधान्याभिवृद्धिः स्यात् स्यालकः प्रबलः सुखी[3] ।
शुक्रशन्यन्तरे काले षष्ठाधिपतिभुक्तिषु ॥ ४१८२ ॥

अतीव क्लेशकार्यादि[4] प्रत्यब्दाये फलं स्मृतम् ।
सुखेशांशे तत्त्रिकोणे व्ययेशांशत्रिकोणगे ॥ ४१८३ ॥

स्फुटयोगं गते मन्दे देशे राज्ञां कलापनम्[5] ।
अनावृष्टिहते देशे दुर्भिक्षफलमादिशेत् ॥ ४१८४ ॥

उरगांशे निशानाथे पूर्वभागे प्रजायते ।
नीचे नीचांशगे सूर्ये [6]दीर्घमायुश्च विन्दति ॥ ४१८५ ॥

एकसप्ततिवर्षाणि योगायुर्दायनिर्णयम् ।
अंशायुस्त्वेक[7]षष्टिश्च दक्षिणायनगे मृतिः ॥ ४१८६ ॥

कुळीरे वृश्चिके मासे कन्यामासेऽथ वा यदि ।
देहान्तरे पूर्वभागे पापपुण्यफलं समम् ।
पश्चादिन्द्रेश[8]नक्षत्रे शूद्रजन्मा प्रतापवान् ॥ ४१८७ ॥

उत्तरांशे [9]महापापी परलोको न विद्यते ।
पूर्वभागे मिश्रफलमुरगांशे सुखासुखम् ॥ ४१८८ ॥

—: * :—

---

1. प्रबलं सुखम्
2. महद्विपत्
3. प्रबलं सुखम्
4. कार्याणि
5. कृत्
6. दीर्घायुश्च
7. अंशायुश्चैव
8. इन्द्रांश
9. महत् पापी परलोक

## कुम्भलग्ने दुर्दरांशः

दुर्दरांशकगे जीवे शनिसंयुतवीक्षिते ।
स्थिरलग्ने प्रजातस्तु[1] ज्येष्ठभ्रातृविनाशवान् ।। ४१८९ ।।

पश्चाद्भ्रातृयुतः श्रीमान् बाल्ये क्लेशेन कर्शितः ।
कलत्रद्वयवान् रागी कोपी क्षिप्रप्रसादवान् ।। ४१९० ।।

विद्याबुद्धिरतो नित्यं मधुराम्लरसप्रियः ।
कामी मातृप्रियस्त्यागी युवतीजनवल्लभः ।। ४१९१ ।।

पित्रार्जितार्थसंपन्नः कनिष्ठभ्रातृवत्सलः ।
पितृव्यनाशवान् बाल्ये मसूरीज्वरपीडितः[2] ।। ४१९२ ।।

व्रणाङ्कितशरीरश्च [3]खण्डवायुप्रपीडितः ।
रजोगुणयुतः कामी किंचित्तामसकृत्यवान् ।। ४१९३ ।।

अभक्ष्यभक्षणं नित्यं किंचित्सात्त्विकबुद्धिमान् ।
द्रव्यार्जन[4]समर्थश्च सीमन्तशिशुनाशवान् ।। ४१९४ ।।

दारान्तरे पुत्रवृद्धिः [5]पुत्रिण्यौ द्वे च जीविते ।
पुत्रयोगं तथा विन्द्यात् सहोदरफलं तथा ।। ४१९५ ।।

मोहनांशे विलग्नेशे निधने गुरुवीक्षिते ।
बालारिष्टभयं किंचिच्छान्त्या शान्तिं प्रयास्यति ।। ४१९६ ।।

षष्ठादिमालिकायोगे [6]मेहरोगस्वरूपवान् ।
मोहनांशे प्रजातश्च परकार्यार्थवञ्चकः ।। ४१९७ ।।

पितृवाक्यरतोनित्यमग्निमान्द्यप्रपीडितः ।
परोपकारवान् रागी किंचिद्धर्मरतः सुखी[7] ।। ४१९८ ।।

---

1. प्रजातस्य
2. गण्डवान्
3. दण्डवायु
4. समृद्धश्च
5. पुत्रिकाद्वयमायुषी
6. योगरोग
7. शरीरवान्

कन्यामन्दे झषे जीवे दुर्दरांश[1]समुद्भवः ।
अल्पसन्तानमाप्नोति मृतप्रजाबहुत्ववान् ॥ ४१९९ ॥

एकपुत्रश्च दीर्घायुः[2] पुत्रिका च तथा भवेत् ।
भ्रातृस्थानाधिपे भौमे तुलांशे केन्द्रराशिगे ॥ ४२०० ॥

[3]आयुष्मत्यौ द्वे भगिन्यावेका क्लेशवती सदा ।
दुर्दरांशे खगे जीवे भगिन्येका सुमङ्गली ॥ ४२०१ ॥

कश्चित् सहोदर[4]भ्राता धूर्तस्त्रीनायकः सुखी ।
सन्तानप्रतिबन्धी च भ्रातृद्वेषयुतो[5] भवेत् ॥ ४२०२ ॥

मीने जीवे सुधर्मात्मा दुर्दरांशे सुभाग्यवान् ।
धूर्तकार्यरतो नित्यं सदा रोगशरीरवान् ॥ ४२०३ ॥

सहोदरक्षयं किंचित् कलत्रद्वयमादिशेत् ।
पुत्रवान् बुद्धिमांश्चेति द्रव्यार्जन[6]समर्थकः ॥ ४२०४ ॥

सुधांशगे निशानाथे स्वक्षेत्रे गुरुवीक्षिते ।
कुम्भलग्ने प्रजातश्च मातुरायुष्यवर्धकः[7] ॥ ४२०५ ॥

चन्द्रे यावत्फलानि स्युः[8] सूर्ये यावत्फलानि च ।
तावत्सङ्ख्याश्च पित्रोर्हि भविष्यन्ति हि सोदराः[9] ॥ ४२०६ ॥

ग्रन्थान्तरे दुर्दरांशे स्वपिता भ्रातृनाशवान् ।
कालान्तरे भाग्य[10]युक्तो बाल्ये क्लेशेन कर्शितः ॥ ४२०७ ॥

पिता मातुलगेहेषु बाल्ये [11]वसति सर्वदा ।
स्वपिता भगिनीभ्रातृस्नेहेन सुखजीवकः[12] ॥ ४२०८ ॥

---

1. दुर्दरांशस्य जातके
2. एकपुत्रचिरायुष्यं
3. भगिनीद्वयमायुष्यं
4. भ्रातृधूर्त
5. प्रतिबन्धश्च भ्रातृद्वेषप्रदो
6. सधर्मकः
7. वर्धनम्
8. फलं सन्ति
9. पिता मातः सोदरत्वमिति स्मृतम्
10. योगं
11. वासामेति स्मृतम्
12. जीवनम्

मातुलाधिपतौ चन्द्रे [1]स्वांशे गुरुनिरीक्षिते ।
मातृवंशाभिवृद्धिः स्यान्मातुलद्वययोगवान् ॥ ४२०९ ॥

दुर्दरांशकगे जीवे [2]त्वसितेन निरीक्षिते ।
कुम्भलग्ने प्रजातश्च[3] केचित् पक्षैकमातुलः ॥ ४२१० ॥

मातृष्व[4]सृद्वयं चैव ह्यन्यकालेऽधिकच्छति ।
दुर्दरांशकगे जीवे नारदीयमतेऽपि च[5] ॥ ४२११ ॥

मातुलाभावमित्याहुर्मातुर्माता[6] चिरायुषी ।
शुक्राचार्यकृते ग्रन्थे ह्यायुष्मन्तौ च मातुलौ[7] ॥ ४२१२ ॥

[8]मातुर्भगिन्यौ द्वे चैव सपुत्रैका सुजीवति ।
किंचिद्रोगवती माता [9]भ्रातृक्लेशेन कर्शिता ॥ ४२१३ ॥

कालान्तरे पुत्रयोगाद्बहुभाग्यवती [10]सती ।
[11]मीने कुम्भांशगे जीवे भाग्ये शुक्रे सुभाग्यवान् ॥ ४२१४ ॥

तद्दशायां महद्भाग्यमुत्तरांशे सुवाहनम् ।
स्वपिता भगिनीभ्रातृयोगकाले सुकीर्तिमान् ॥ ४२१५ ॥

[12]तद्द्वारा प्रबलश्चैव नरवाहनयोगवान् ।
मोहनांशे [13]लग्ननाथे मेषारूढे शुभेक्षिते ॥ ४२१६ ॥

जन्मदाये महद्भाग्यं तृतीयाब्दे शुभाधिकम् ।
स्वपितुर्भगिनी[14]भ्रातृभावेशे भाग्यराशिगे ॥ ४२१७ ॥

---

1. स्वनांशे
2. असितेन
3. स्यात्
4. मातृष्वसाद्वयं चेति कालान्तरमिति स्मृतम्
5. नारदीयस्य वाक्यगे
6. मातामहि
7. चारमिति ग्रन्थे मातुलद्वयमायुषम्
8. मातृष्साद्वयं चेति पुत्रिणी चैकमायुषी
9. मातृक्लेशेन कर्शितः
10. सुखी
11. मीनकुम्भांशगे जीवे पापे
12. तद्द्वारि प्रबलं चेति
13. मोहनांशे....मेषा
14. स्वपित भगिनी

तद्दशायां महद्भाग्यं द्वितीयाब्दे श्रियायुतम्[1] ।
मोहनांशे विलग्नेशे गुरुणा च निरीक्षिते ॥ ४२१८ ॥

[2]स्वपितुर्भगिनीपुत्रो वाहनत्रययोगवान् ।
विपद्दाये फलं पूर्णं स्वप्राबल्यं सुवाहनम् ॥ ४२१९ ॥

कन्याशनौ जन्मदेशे भूपतिक्लेशमादिशेत् ।
अमात्यजनशोकं च[3] जन्मदेशे प्रजावधि ॥ ४२२० ॥

अतिचारगते जीवे शनौ [4]वक्रक्षमागते ।
हाहाकारं जगत्सर्वं विशेषाद्दक्षिणादिशि ॥ ४२२१ ॥

व्ययेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
पुत्रनाशो भवेत्तत्र राज्याधिपतिविग्रहम्[5] ॥ ४२२२ ॥

अमात्यप्राणनाशः[6] स्यात् स्वपितृव्यप्रपीडितः ।
[7]विरुद्धायामवस्थायां लग्नेशे मोहनांशगे ॥ ४२२३ ॥

विपद्दाये [8]विरोधेन राजोपद्रवशोकवान् ।
क्षेमदाये त्रिवारं स्यात् स्थाननाशो[9] मनोव्यथा ॥ ४२२४ ॥

पश्चात् स्वस्थानमाप्नोति राजामात्यप्रसादवान् ।
चन्द्रांशाधिपतौ जीवे दुर्दरांशे [10]शनौ स्थिते ॥ ४२२५ ॥

आयुष्मन्तौ [11]मातुलौ द्वौ भगिन्यौ मातुरेवहि ।
मातुलौ द्वौ ततः [12]स्यातामथ वाप्येक एव च ॥ ४२२६ ॥

---

1. श्रियावहम्
2. स्वपिता भगिनी
3. शोकादि
4. वक्रत्वं
5. नाशमिति प्रोक्तं राज्याधिपतिविड्वरम्
6. नाशं
7. मोहनांशे ....निरोधावस्तचेत्र्गे ।
8. विरोधादिराजोपद्रवशोकवान्
9. नाशं
10. शनि
11. मातुलद्वयमायुष्यं मातृष्वसृ तथा भवेत् ।
12. पुत्रावथवाप्येकमेव च

कालान्तरे मातुलश्च भ्रातृशोकयुतो[1] भवेत् ।
[2]मातृष्वसारौद्वे घन्ये पुत्र पुत्रीसमन्विते ॥ ४२२७ ॥

एका क्लेशवती चैव भ्रातृनाशेन कर्शिता ।
सम्पद्दाये दुर्दरांशे स्वमातृभगिनीन्यथाम्[3] ॥ ४२२८ ॥

पुत्रशोकवती चैव भ्रातृशोकेन कर्शिता ।
एका सुमङ्गली चेति बहुपुत्रवती [4]सती ॥ ४२२९ ॥

पितृव्यभवने शुके [5]मेषांशे मृत्युचेष्टगे ।
[6]शिशोश्च जननात् पूर्वं स्वपिता भ्रातृशोकवान् ॥ ४२३० ॥

[7]स्वपितुर्मातुलानी च वन्ध्यायोगयुता स्मृता ।
ज्येष्ठभ्रातृविनाशेन स्वपिता क्लेशभाग्भवेत् ॥ ४२३१ ॥

विपद्दाये कनिष्ठस्य [8]नाशेन भ्रातृशोकवान् ।
दुर्दरांशकगे जीवे [9]त्वसितेन निरीक्षिते ॥ ४२३२ ॥

[10]स्वपितुर्मातुलानी तु वन्ध्यायोगयुता तथा ।
[11]क्लेशीनी मातुलवधूर्यत्किंचिद्गूढचारिणी ॥ ४२३३ ॥

मातृवंशेकलङ्कश्च[12] दुर्दरांशे न संशयः ।
पितुर्मातुल पुत्री स्यादथ वा[13] च स्वपुत्रिका ॥ ४२३४ ॥

दुर्दरांशे जारिणी स्यात् स्वमाता [14]तु पतिव्रता ।
भाग्येशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४२३५ ॥

---

1. स्याद्भ्रातृशोकप्रदो
2. द्वयश्चेति पुत्रपुत्रीसमन्वित
3. माताभगिनीन्यथा
4. सुखी
5. मेषान्त्ये
6. जातस्य
7. स्वपिता मातुलं पत्नी वन्ध्यायोगमिति स्मृतम् ।
8. स्वपिता
9. असितेन
10. स्वपिता मातुलं पत्नी वन्ध्यायोगमिति स्मृतम् ।
11. क्लेशी स्वमातुलःपत्नी
12. कलङ्कस्य
13. स्वपिततता मातुवः पुत्री अथ वा
14. पतिभक्तिनी

[1]स्वमातृभगिनीपुत्रनाशं च मनुरब्रवीत् ।
लाभेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४२३६ ॥

मातृवंशे जनारिष्टं क्लेशं प्राप्नोति भूरिशः ।
पितृष्वसृ सुतांशेशे[2] केन्द्रलाभत्रिकोणगे ॥ ४२३७ ॥

पितृष्वसृ[3]सुतः श्रीमान् सोदरीभ्रातृसंयुतः ।
भेदभ्रातृयुतो मानी पित्रार्जितधनाढ्यवान् ॥ ४२३८ ॥

द्विभार्यजनकस्यापि सोदरोत्पत्तिसंभवः[4] ।
पितृष्वसृसुतस्यापि[5] विवाहो रविवत्सरे ॥ ४२३९ ॥

वसुवर्षात् परं चैव विवाहे बहुसंभ्रमः[6] ।
पितामहाधिपे सौम्ये भाग्ये रविसमन्विते ॥ ४२४० ॥

[7]भाग्ये जीवे जातकश्च स्वपितामहभाग्यवान् ॥ ४२४१ ॥

पितामहः क्लेशजीवी ज्येष्ठभ्रातृसमन्वितः ।
भगिन्येका [8]दीर्घजीवा सोदरीभ्रातृनाशवान् ॥ ४२४२ ॥

कालान्तरे पुत्रशोकं वार्धके दारनाशनम् ।
पितामहो भ्रातृपुत्रैर्वार्धके क्लेशसंयुतः[9] ॥ ४२४३ ॥

पितामहस्वसा चैव पुत्रपुत्रीसमन्विता[10] ।
[11]शिशोश्च जननात् पूर्वं वैधव्ये मृतिमादिशेत् ॥ ४२४४ ॥

लाभे गद्यांशगे शुक्रे व्ययेशे मोहनांशगे ।
मातामहश्चिरायुष्मान् मातुर्माता[12] तथैव च ॥ ४२४५ ॥

---

1. स्वमाताभगिनीपुत्रनाशं चेत्
2. पितृष्वसा सुतांशेशौ
3. पितृष्वसासुतः
4. जनकाकाचसोदरोत्पत्तिवृद्धिकृत्
5. पितृष्वसा सुतफलं
6. चेति विवाहे बहुसंभ्रमम्
7. वित्ये जीवे जातकस्य
8. चिरायुष्यं
9. पुत्रा वार्धके क्लेशमादिशेत्
10. समन्वितः
11. जातस्य
12. चिरायुष्यं मातामहि

मातामहानुजः कश्चिद्दत्तपुत्र[1]युतो भवेत् ।
मातुलैकश्चिरायुष्मान्[2] भगिनीत्रयवान् गुणी ॥ ४२४६ ॥

सम्पद्दाये दुर्दरांशे स्वमातुलगृहे व्यथा ।
मातामहःक्लेशमेति जामात्र[3]रिष्टहेतुना ॥ ४२४७ ॥

[4]मातृष्वसा गर्भिणी तु ह्यकाले मृतिमाप्नुयात् ।
दुर्दरांशकगे जीवे मीने शनिनिरीक्षिते ॥ ४२४८ ॥

[5]मातृष्वसारौ द्वे चैव गर्भवत्यौ मरिष्यतः ।
अथ वा मातुलवधू [6]ह्यन्तर्वत्नी मरिष्यति ॥ ४२४९ ॥

तेन क्लेशेनचाप्नोति मातुर्माता मनोव्यथाम्[7] ।
विपद्दाये पुत्रशोकाद्दुःखितश्च पितामहः[8] ॥ ४२५० ॥

गदांशके सुखाधीशे हिबुके शिखि[9]संयुते ।
तद्दशायां पापभुक्तावरिष्टं मातृवंशके[10] ॥ ४२५१ ॥

मातामहारिष्टकालो[11] विपद्दाये भविष्यति ।
मदेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४२५२ ॥

मदेशदृष्टिराशौ तु मातामहविनाशनम् ।
लग्नेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४२५३ ॥

मातामहास्त्वरिष्टेन[12] मातुलस्य मनोव्यथा ।
मातृष्वसुर्भर्तृभावे पापाक्रान्ते च जायते[13] ॥ ४२५४ ॥

---

1. भ्रदो
2. मातुलस्यैकमायुष्यं
3. जामातारिष्ट
4. मातृष्वसामृतिं विन्यादन्तर्वत्नी समादिशेत् ।
5. मातृष्वसानयं किंचिद्गर्भे तस्थे मृतिं वदेत् ।
6. अन्तर्वत्नी
7. क्लेशमित्याहुर्मातामहिमनोव्यथा
8. पुत्रशोकं स्वपितामहक्लेशभाक्
9. जातके
10. भुक्तौ मातृवंशे अरिष्टकृत्
11. काले
12. मातामही अरिष्टं स्यात्
13. साभ्रातृभावे पापाक्रान्तस्य जातके

मातृष्वसा सुतन्तसा मृतपुत्रा त्वमङ्गली[1] ।
विपद्दाये दुर्दरांशे सम्पत्तारदशान्त्यगे ॥ ४२५५ ॥

इदमेव फलं सत्यं योजयेत् कालवित्तमः ।
पितुर्भगिन्या भर्ता च[2] दीर्घायुर्धनवान् सुखी ॥ ४२५६ ॥

जन्मतारदशान्त्यादौ सम्पत्तारदशाश्रियम्[3] ।
द्वितीयाब्दे फलं पूर्णं योगारम्भं विनिर्दिशेत् ॥ ४२५७ ॥

षष्ठे चन्द्रेऽष्टमे मन्दे संपद्दाये महाविपत्[4] ।
पञ्चमाब्दात् परं चेति [5]वत्सरद्वयदुःखभाक् ॥ ४२५८ ॥

बालारिष्टभयं चैव शान्त्या शान्तिं प्रयास्यति ।
[6]अरिष्टं च पितृवंशे ज्ञातिक्लेशं विनिर्दिशेत् ॥ ४२५९ ॥

बन्धुवर्गे मनस्तापं स्वपितुर्मित्रवर्गके[7] ।
भर्तीवक्लेशकार्याणां[8] सम्पद्दाये फलं वदेत् ॥ ४२६० ॥

षष्ठेशाकान्तराश्यादौ मालिकायोगजस्य च[9] ।
दारिद्र्ययोगमित्याहुर्वाश्ये क्लेशं विनिर्दिशेत् ॥ ४२६१ ॥

दारिद्र्यमालिकायोगे निधने पापखेचरे ।
शुभदृष्टिविहीने च दारिद्र्यं[10] प्राप्नुयाद्ध्रुवम् ॥ ४२६२ ॥

दारिद्र्यमालिकायोगे [11]ह्यष्टमे शनिसंस्थिते ।
वित्ते जीवे प्रजातश्च भाग्यवान् स्यान्न संशयः ॥ ४२६३ ॥

---

1. मातृष्वसेन सन्तापं मृतपुत्रामङ्गली  2. पितृष्वसा भर्तृयोगं
3. दशान्त्यादिसम्पत्ताराश्रियावहम्
4. चन्द्रेऽष्टममन्दे सम्पद्दाये महद्विपत्
5. चेद्वत्सर  6. अरिष्टं स्यात्
7. स्वपितामित्रवर्गगे  8. कार्याणि
9. राश्यादि मालिकायोकजातके  10. विहीनः स्याद्
11. अष्टमे शनिजातके

वार्धके बहुदारिद्र्यं [1]मध्ये किंचिच्छुभान्वितः ।
महाभाग्यसमृद्धश्च[2] नरवाहनभाग्यवान् ॥ ४२६४ ॥

लाभे शुक्रे घने जीवे [3]त्ववयोगशतैरपि ।
धनिकः कीर्तिमांश्चेति राजद्वारे प्रसिद्धिमान् ॥ ४२६५ ॥

विपद्दाये महद्भाग्यमुत्तरार्धे विशेषतः ।
नित्यश्रीबहुमानादिप्रबलोद्योगवान् भवेत् ॥ ४२६६ ॥

पितुष्वसुः[4] पुत्रयोगेकाले सौख्यफलं विदुः ।
क्षेमदाये विशेषः[5] स्यात् प्रत्यग्दाये दलं व्यथा ॥ ४२६७ ॥

शुभाशुभफलं [6]चैव योगं रोगं विनिर्दिशेत् ।
द्विपञ्चाशात् परं कष्टं नैधनेशदशाव्यथाम्[7] ॥ ४२६८ ॥

अपरार्धे [8]तु दारिद्र्यं पुत्रशोकं विनिर्दिशेत् ।
दशान्ते मृतिमाप्नोति दशामध्येऽपमृत्युमान् ॥ ४२६९ ॥

सम्पद्दाये सेतुयात्रां पितुः पित्रा च गच्छति[9] ।
मार्गमध्ये [10]मनोदुःखी सेतुमूले ज्वरार्दितः ॥ ४२७० ॥

तद्दोषपरिहारार्थं क्षीरकुम्भं प्रदापयेत् ।
पश्चादारोग्यमाप्नोति स्वदेशं पुनरेष्यति ॥ ४२७१ ॥

कर्मे [11]राहौ प्रजातश्च विपद्दाये सुयात्रिकः ।
पुण्यतीर्थे फलं सत्यं गङ्गास्नानफलं समम् ॥ ४२७२ ॥

दुर्दशांशकगे जीवे गङ्गायात्रासु विघ्नवान् ।
सेतुस्नानं त्रिवारं स्याद्गङ्गास्नानफलं समम् ॥ ४२७३॥

---

1. भाग्ये किंचिच्छुभावहम्
2. समृद्धिश्च
3. अवयोग
4. पितृष्वसा
5. विशेषं
6. चेति
7. व्यथाम्
8. दरिद्रं स्यात्
9. यात्रा स्वपितामहमादिशेत्
10. मनस्तापं
11. राहुप्रजातश्च विपद्दाये सुयातवान्

लाभे गदांशगे शुक्रे योगकाले गदातुरः ।
अग्निमान्द्यप्रपीडादि यातायातं त्रिवत्सरम् ॥ ४२७४ ॥

लग्नाष्टमगते मन्दे विषूचीज्वर[1]पीडितः ।
सन्निपातभयं किंचिदतिसारप्रपीडितः ॥ ४२७५ ॥

क्षेमदाय [2]इमान्येव फलान्यूह्यानि सूरिभिः ।
सर्वदाये जीवभुक्तौ कुजभुक्तौ विशेषतः ॥ ४२७६ ॥

क्रूरमासे देहजाड्यं बुधभुक्तौ क्वचित् क्वचित् ।
अन्यन्तरे क्रूरमासे अन्यस्तमनकालगे ॥ ४२७७ ॥

स्वदेहायासमाप्नोति सौम्यार्किगुरुवासरे ।
चापे गुरुस्थिते काले मेषे वा मिथुनेऽपि वा ॥ ४२७८ ॥

विपद्दाये महद्भाग्यं पित्रादि श्रियमश्नुते ।
गुरोस्तृतीयपर्याये तुलान्ते वृश्चिके गुरौ ॥ ४२७९ ॥

क्षेमदाये [3]महाघोरं राजविग्रहमादिशेत् ।
गदांशगे सुखाधीशे त्रिंशेऽब्दे पितृनाशनम् ॥ ४२८० ॥

पञ्चत्रिंशेऽथ वा चेति चतुर्विंशे [4]महाविपत् ।
चत्वारिंशे मृतामाता प्रत्यब्दाये मदे शनौ ॥ ४२८१ ॥

चापान्ते मकरे मन्दे गोचरे मिथुने गुरौ ।
कुलीरे वा मृतामाता तत्त्रिकोणे प्रपीडिता ॥ ४२८२ ॥

व्ययेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
व्ययेशदृष्टिराशौ तु सन्तानारिष्टमादिशेत् ॥ ४२८३ ॥

तत्पद्भावाष्टमेशांशे स्फुटयोगं गते शनौ ।
दृष्टिराशौ तथा चेति तत्तन्निर्याणमादिशेत् ॥ ४२८४ ॥

---

1. गण्डवान्
2. इदं चैव फलान्यूह्यानि बुद्धिमान्
3. महत् कष्टं राजविड्वर
4. महद्विपत्

मूर्त्यादिव्ययभावान्तं योजयेत् स्फुटयोगगे ।
ग्रहचारफलं सत्यं प्रत्यक्षं देवकेरले ॥ ४२८५ ॥

[1]देहे पापग्रहैर्युक्ते देहपीडां विनिर्दिशेत् ।
जीवे [2]पापे जीवबाधादशासन्धौ महाविपत् ॥ ४२८६ ॥

चक्रसन्धौ मनस्तापं योजयेत् कालवित्तमः ।
राज्यस्थानं पञ्चमं स्यान्नवमं प्रभुरु[3]च्यते ॥ ४२८७ ॥

दशमं मित्रभवनं चतुर्थं [4]बन्धुमादिशेत् ।
स्वराज्यराष्ट्रनृपते[5]र्बन्धुमित्रारिवर्गगे ।
तद्भावाष्टमेशांशफलानि परिचिन्तयेत् ॥ ४२८८ ॥

मनुः—

[6]मूर्त्यादिभावाष्टमनाथदाये
स्फुटांशगे भानुसुतेन युक्ते[7] ।
[8]सदृष्टिराशौ मरणं च वाच्यं
शुभाशुभं तत्र विचारणीयम् ॥ ४२८९ ॥

लाभे शुक्रे धने जीवे [9]भाग्यस्थे दशमे तथा ।
दुर्देशांशे प्रजातश्च[10] मालायोगे सुभाग्यवान् ॥ ४२९० ॥

महानदीप्रान्त्यदेशे नगरे भाग्यमश्नुते ।
विदेशे योगवान् भोगी नीचप्रभुनिषेवकः ॥ ४२९१ ॥

वाणिज्ये [11]मोहवान् रागी त्यागभोगवदान्यवान् ।
विपद्दाये सुखाहाप्तिः सन्तानोत्पत्तितः परम् ॥ ४२९२ ॥

---

1. देहपापग्रहे काले
2. योगे जीवबाधादशासन्धौ महद्विपत्
3. मुच्यते
4. रादिशेत्
5. स्वराजराष्ट्रनृपति
6. मूर्तादि
7. सुतेशकाले
8. सदृष्टं
9. अथ वा दशमेषु च
10. प्रजातस्य
11. मेहवान्

[1]महायोगं च लभते क्षेमदाये सुकीर्तिमान् ।
[2]जन्मभूमिं परित्यज्य नित्यश्रीसौख्यवान् सुखी ॥ ४२९३ ॥

विंशोपरि शरैर्वर्षे स्वप्रावल्यं कचित् सुखम् ।
षड्विंशाब्दात् परं भूरि धनं संपादयिष्यति ॥ ४२९४ ॥

मित्रप्रभुविनाशादि क्लेशं प्राप्नोति भूरिशः ।
राजान्तरवशाद्भाग्यं क्षेमदाये श्रियायुतम्[3] ॥ ४२९५ ॥

पुत्रिकोद्वाहसौख्याप्तिं[4] पुत्रोद्वाहं ततः परम् ।
प्रत्यग्दाये फलं सत्यं मित्रद्वेषात् परं व्यथाम्[5] ॥ ४२९६ ॥

सोदरोत्पत्तिसन्तोषं सम्पद्दाये तुलाशनौ ।
कन्याशनौ भाग्यवृद्धिर्बन्धुवर्गे विशेषतः ॥ ४२९७ ॥

[6]स्वपितुर्भगिनी भर्तृयोगकाले पितासुखम् ।
तुलाशनौ धनप्राप्तिः कन्यामध्ये शुभं कचित् ॥ ४२९८ ॥

वृश्चिकान्ते [7]स्थिते मन्दे पितामह्यास्तु नाशनम् ।
बन्धुवर्गे विचारः स्यान्मातृवंश[8]जनावधि ॥ ४२९९ ॥

सम्पद्दाये क्षाम[9]दुःखं विपद्दाये विशेषतः ।
कीटे शनिस्थिते काले महानृपतिनाशनम् ॥ ४३०० ॥

तत्त्रिकोणे चोलदेशे प्रजाक्षोभं विनिर्दिशेत् ।
[10]राज्याधिपत्योर्मध्ये तु देशे राजान्तरं स्मृतम् ॥ ३३०१ ॥

शनिनाडीफलाध्याये राज्य[11]राष्ट्रफलानि च ।
सविस्तरं[12]वर्णितानि विचित्राणि फलानि च ॥ ४३०२ ॥

---

1. योगरोगं प्रकुर्वीत
2. कुरभूमिं
3. श्रियावहम्
4. सौख्याप्तिः
5. व्यथा
6. स्वपिता
7. प.पशनौ स्वपितामहिनाशनम्
8. विचारं स्यान्मातृवंशे
9. क्षामडांग्र
10. मण्डलाधिपतौ मध्य
11. नाडीफलाध्याये राजा
12. विस्तार इति माप्नोति विचित्रफलमद्भुतम्

भाग्याधिपे तथा लाभे गदांशे विप्रकालगे ।
पुरा ब्राह्मण[1]जन्मा च पश्चाल्लौकिकजन्मवान् ॥ ४३०३ ॥

[2]विप्रजन्मान्त्यकाले च ह्याप्तसंन्यासमादिशेत् ।
तस्य पुण्यप्रभावेण पश्चाद्वैदिकजन्मवान् ॥ ४३०४ ॥

पश्चाज्जन्मान्तरे मुक्तिर्व्ययेशे गुरुवीक्षिते ।
लग्नेशाकान्तराशीशेऽशुभांशे भाग्यराशिगे ॥ ४०३५ ॥

मालांशे मालिकायोगे [3]ह्यायुर्दायमिति स्मृतम् ।
मोहनांशे विलग्नेशे [4]त्वष्टमे गुरुवीक्षिते ॥ ४३०६ ॥

चतुःसप्ततिवर्षाणि [5]ह्यंशायुरिति कथ्यते ।
योगश्चेति तदर्थः स्यादेकपर्यायसंयुतम् ॥ ४०३७ ॥

मृतिरेकोनपञ्चाशे द्विपञ्चाशेऽथ वा यदि ।
भाग्यनाथयुते जीवे मरणं चैकसप्ततौ[6] ।
गुरुनाडीफलं सत्यं प्रत्यक्षं देवकेरलम् ॥ ४३०८ ॥

— :*: —

## मकरलग्ने सचिवांशनाडीफलम् ।

### मीने शनिकेतु[7] ।

लग्नेशे सचिवांशस्थे [8]विषाख्यांशोद्भवस्य च ।
मीने केतुयुते चन्द्रे विषाख्यांशोद्भवस्य च[9] ॥ ४३०९ ॥

दुःशीला जननी [10]दुष्टा स्वकुलेषु च जारिणी ।
लग्नेशे सचिवांशस्थे भृगुतेन समन्विते ॥ ४३१० ॥

---

1. सन्मार्ग
2. ब्रह्मजन्मान्त्यकालेन ।अपत्
3. आयुर्दायम्
4. अष्टमे
5. अंशमायुश्च विन्दति
6. नाशयुते जीवे मरणं चैकसप्ततिः
7. शनिः केतुः
8. विषनाशांशजातके
9. सेतुयुते चन्द्रे विषाख्यांशस्य जातके
10. पूता

माता [1]दूषितदेहा च स्वज्येष्ठभगिनी तथा ।
विषाख्यांशकगे चन्द्रे मीने केतुसमन्विते ॥ ४३११ ॥

सहोदर्याः स्वमातुश्च जारत्वं [2]परिकल्पयेत् ।
सचिवांशे घटे मन्दे भूसुतेन समन्विते ॥ ४३१२ ॥

[3]मृगलग्ने प्रजातश्च भ्रातृवंशे कलङ्कवान् ।
भाग्येशे मिथुनांशस्थे नवमे राहु[4]संस्थिते ॥ ४३१३ ॥

निशाकरेण संदृष्टे सोदरी परपूरुषा ।
सिंहांशे मकरे लग्ने तदीशे कुजसंयुते ॥ ४३१४ ॥

[5]स्वसुता दुर्भगा भूत्वा भर्तृवाक्यं शृणोति न ।
[6]जारावस्थां गतेधीशे स्वसितेन समन्विते ॥ ४३१५ ॥

[7]आयुष्मती स्वमाता च गूढजारवती शुभा ।
सचिवांशे विलग्नेशे सुखेशेन[8] समन्विते ॥ ४३१६ ॥

मातृवंशे महद्भाग्यं स्वपिता तद्धनं[9]लभेत् ।
चापारूढे सुखाधीशे कुम्भे शनिसमन्विते ॥ ४३१७ ॥

चापे जीवे प्रजातस्य[10] पितामातुः सुभाग्यवान् ।
बहुपुत्रार्थसंपन्नोसोदरीभ्रातृ संयुतः ॥ ४३१८ ॥

ग्रन्थान्तरे विलग्नेशे [11]राजयोगग्रहैर्युते ।
[12]स्वमातुः सोदरी नास्ति माता भ्रातृसमन्विता ॥ ४३१९ ॥

---

1. शरीरदोषं स्यात् स्वज्येष्ठभगिनीस्य वा
2. सहोदरी स्वमाता च जारत्वमिति चादिशेत् ।
3. मकरे लग्नजातस्य
4. जातके
5. स्वसुता दुर्भगा भूत्वा भर्तृवाक्यं शृणोति न ।
6. जारावस्ते सुताधीशे असितेन
7. स्वमाता दीर्घमायुष्यं गुप्तचारवती
8. सुखे शनि
9. जीवनं स्मृतम्
10. प्रजातश्च
11. राजा वत्सगृहैः
12. स्वमाता सोदरी नास्ति माता भ्रातृसमन्वितः ।

चन्द्राष्टवर्गं निक्षिप्य चन्द्रे यावत्फलैर्युते[1] ।
[2]चिरायुषाः मातुलाश्च तावत्सङ्ख्या भवन्ति हि ॥ ४३२० ॥

मीनारूढे विलग्नेशे स्वोच्चांशे कुजसंयुते ।
स्वमातुः सोदराः सप्त ह्यथवा वसुसङ्ख्यकाः[3] ॥ ४३२१ ॥

[4]आयुष्मन्तौ मातुलौ द्वौ शेषं नाशमितीरयेत् ।
स्वक्षेत्रे वृषभांशस्थे लग्नेशे सचिवांशके ॥ ४३२२ ॥

मातामहः प्रसिद्धः स्यादग्रहारस्य [5]स्थापकः ।
मातुलाधिपतौ सौम्ये मकरे रविसंयुते ॥ ४३२३ ॥

[6]क्षयावस्थागेजातस्य मातुलः क्षयरोगवान् ।
वृषभांशे सुखाधीशे लग्ने शनिसमन्विते ॥ ४३२४ ॥

[7]क्षयरोगो मातृवंशे मातुलद्वयनाशनम् ।
[8]राजावस्थागे सुखेशे त्वसितेन समन्विते ॥ ४३२५ ॥

माता पुत्रवती चैव स्वकुले गूढजारिणी ।
स्वज्येष्ठभगिनी [9]चैव जायते मृतपुत्रिणी ॥ ४३२६ ॥

जारा[10]वस्थाफलं सत्यं स्वपितासोदरैर्युवः ।
[11]जारावस्थां गते भौमे पितृव्येशेऽर्किसंयुते ॥ ४३२७ ॥

[12]स्वपितृव्येषु यः कश्चिज्जारचोरशिखामणिः ।
मेहप्रकृति[13]देही च मृतसन्तानयोगवान् ॥ ४३२८ ॥

---

1. वर्गे निक्षिप्य चन्द्रे यावत्फलैर्युतम्
2. तावत्सौख्यं चिरायुष्यं मातृसोदरमादिशेत् ।
3. स्वमाता सोदराः सप्त अथवा वसुसङ्ख्यया ।
4. मातुलद्वयमायुष्यं
5. अग्रहारे प्रतिष्ठवान्
6. क्षयावस्थे प्रजातश्च
7. क्षयरोगं
8. राजावस्थे सुखाधीशे असितेन
9. चेति
10. जारावस्सफलं
11. पितृव्याधिपतौ भौमे जारावस्थेऽर्किं संयुते ।
12. स्वपितृव्यस्य
13. देहः स्यात्

पितृव्यौ द्वौ पुत्रवन्तावेकोवन्ध्यापतिर्भवेत् ।
सचिवांशे विलग्नेशे [1]विषाख्यांशोद्भवस्य च ॥ ४३२९ ॥

मुकुन्दांशकगे जीवे स्वपितृव्यचतुष्टयम् ।
[2]सूर्ये यावत्फलानि स्युस्तावत्सङ्ख्याः पितृव्यकाः ॥ ४३३० ॥

[3]आयुष्मन्तस्त्रिपितृव्याः मुकुन्दांशगे रवौ ।
मुकुन्दांशकगे सूर्ये लग्नेशे सचिवांशके ॥ ४३३१ ॥

पितामहः प्रसिद्धश्च सोदरीसोदरैर्युतः ।
पञ्चमाधिपतौ शुक्रे मकरे मिथुनांशगे ॥ ४३३२ ॥

भाग्याधिपेन [4]संयुक्ते राजसेवी पितामहः ।
विदेशवासी रागी च व्यवसायपरः सुखी ॥ ४३३३ ॥

अग्रहारेनिवासी स्यात् किंचिदुद्योगजीवनम् ।
लग्नात्तृतीयगे चन्द्रे कुम्भांशे केतुसंयुते ॥ ४३३४ ॥

[5]आयुष्मत्यस्त्रिभगिन्यो भ्रातरौ द्वौ चिरायुषौ ।
शेषं नाशमिति प्रोक्तं तत्तन्मारकदायके[6] ॥ ४३३५ ॥

भाग्यकर्माधिपौ[7] लग्ने तदीशे सचिवांशगे ।
विंशद्वर्षात् परं भाग्यं विपद्दाये सुकीर्तिमान् ॥ ४३३६ ॥

अष्टमाधिपतौ लग्ने शुभद्वयसमन्विते ।
जन्माब्दगे जन्मदाये मृतप्रायोऽपि जीवति[8] ॥ ४३३७ ॥

स्वोच्चांशगे विलग्नेशे भूसुतेन समन्विते ।
विद्याविनयसंपन्नः कोपी क्षिप्रप्रसादकः ॥ ४३३८ ॥

---

1. निषनाशांशनातके
2. सूर्यां यावत्फलं सन्ति स्वपितृ्या सादरो मृतः
3. पितृव्यत्रयमायुष्यं        4. संदृष्टे
5. भगिनीत्रयमायुष्यं भ्रातृद्वयञ्चिरायुषम् ।
6. व्ययगे        7. कर्माधिपे
8. प्रायोपजीवनम्

सचिवांशे विलग्नेशे राजद्वारे सुबुद्धिमान् ।
कलत्रद्वयवान् भोगी स्वभुजार्जित [1]वित्तवान् ॥ ४३३९ ॥

विपद्दाये महद्भाग्यं ज्येष्ठभ्रातुः शुभावहम् ।
गृहे लक्ष्मीकटाक्षेण[2] नरवाहनयोगवान् ॥ ४३४० ॥

प्रबलोद्योगवान् कामी लग्नेशे सचिवांशगे ।
[3]आयुष्मन्त्यौ द्वे भगिन्यौ सचिवांशोद्भवस्य च ॥ ४३४१ ॥

[4]स्वोच्चांशके विक्रमेशे भ्रातरौ द्वौ चिरायुषौ ।
मातुलाधिपतौ सौम्ये क्षयावस्थां[5] गते शनौ ॥ ४३४२ ॥

सचिवांशे मातुलश्च[6] क्षयरोगेण कर्शितः ।
मातुलौ द्वौ पुत्रवन्तौ पुत्रभावमिति स्मृतम् ॥ ४३४३ ॥

[7]आयुष्मान् मातुलेष्वेकः सचिवांशोद्भवस्य च ।
षोडशाब्दात् परं भाग्यं स्वज्येष्ठभगिनीसुखम् ॥ ४३४४ ॥

[8]दीर्घायुष्या पुत्रिणी च भर्तृभाग्ययुता सती ।
सचिवांशे विलग्नेशे लाभेशेन समन्विते ॥ ४३४५ ॥

स्वज्येष्ठभगिनी[9]भर्ता दीर्घायुर्भ्रातृहीनवान् ।
भेदभ्रातृयुतो मानी मृतसन्तानयोगवान् ॥ ४३४६ ॥

कालान्तरे सुतप्राप्तियोगवान् भाग्यवान् सुखी ।
सचिवांशे विलग्नेशे [10]त्वष्टादश च वत्सरे ॥ ४३४७ ॥

स्वज्येष्ठभगिनी[11]भर्ता पितृमूलात् सुखान्वितः ।
कनिष्ठभगिनीभर्ता[12] किंचिद्रोगेण कर्शितः ॥ ४३४८ ॥

---

1. योगवान्
2. कटाक्षादि
3. भगिनीद्वयमायुष्यं सचिवांशस्य जातके ।
4. .......भ्रातृद्वयचिरायुषम्
5. क्षयावस्थे विलग्नगे
6. मातुलस्य
7. मातुलस्यैकमायुष्यं सचिवांशस्य जातके ।
8. दीर्घायुः पुत्रिणी चेति भर्तृभाग्यप्रदः सुखी ।
9. भ्रातृ
10. अष्टादश
11. भर्तृपितृमूलात् सुखावहम्
12. भर्तृ

बहुसन्तानवांश्चैव ह्यल्पयोगयुतः[1] सुखी ।
मीने कुम्भांशगे चन्द्रे कुम्भे मन्दे च संस्थिते[2] ॥ ४३४९ ॥

जन्मदाये मीनशनौ जन्मदेशे नृपावधि ।
मातुलश्च[3] सुसन्तानं क्षयरोगेण कर्शितः ॥ ४३५० ॥

मातृवंशे भाग्यवृद्धिः पितुः सौख्यं क्वचित् सुखम् ।
सहोदरविवाहश्च दशान्ते[4] मौञ्जिबन्धनम् ॥ ४३५१ ॥

सम्पद्दाये विवाहश्च[5] विपद्दाये श्रियान्वितः ।
केतुवंशगे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४३५२ ॥

सचिवांशे जन्मदेशे सेनाधिपतिनाशनम् ।
कुम्भे तुलांशगे मन्दे स्थिरराशिचतुष्टये ॥ ४३५३ ॥

स्फुटयोगं गते मन्दे जन्मदेशे नृपावधि ।
तद्वारि प्रमुखैः क्लेशं मातृवंशे [6]महाविपत् ॥ ४३५४ ॥

स्वजनारिष्ट[7]मूलेन प्रबलक्लेशवान् भवेत् ।
सचिवांशे विपद्दाये मातुलज्ञातिवर्गगे ॥ ४३५५ ॥

विशेषभाग्यमित्याहुः पुत्र[8]भाग्यादिवृद्धिमान् ।
घने मन्दे शुभे [9]राहौ दारेशे पापसंयुते ॥ ४३५६ ॥

विपद्दाये दारहानिः क्षिप्रेणोद्वाहयोगवान् ।
[10]धनेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४३५७ ॥

धनेशदृष्टिराशौ तु दारहानिं विनिर्दिशेत् ।
व्ययेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४३५८ ॥

---

1. चेति अल्पयोगप्रदः
2. मन्दस्य जातके
3. मातुलस्य
4. विवाहं स्यात्
5. विवाहं स्याद्विपद्दाये श्रियावहम्
6. महद्विपत्
7. आप्नोति
8. सन्तान
9. राहु
10. धनमयांशे

व्ययेशदृष्टिराशौ तु सन्तानारिष्टमादिशेत् ।
लग्नेशांशे तत्त्रिकोणे रन्ध्रेशांशत्रिकोणगे ॥ ४३५९ ॥

स्फुटयोगं गते मन्दे मातुलारिष्टशोकवान् ।
तदभावे मातृवंशे प्रबलज्ञातिनाशनम् ॥ ४३६० ॥

बन्धुवर्गे विचारः[1] स्यात् क्रूरमासे न संशयः ।
लाभेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४३६१ ॥

जननीव्याकुलं [2]चैति मातृवर्गे ह्युपद्रवः ।
कर्माधिपदशाकाले कर्मेशांशत्रिकोणगे ॥ ४३६२ ॥

सहोदरभ्रातृपीडा स्फुटयोगं गते शनौ[3] ।
सुखेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४३६३ ॥

स्वपितुर्देहजाड्यादि दृष्टिराशौ महाविपत्[4] ।
सचिवांशे विपद्दाये सुखेशांशत्रिकोणगे ॥ ४३६४ ॥

स्फुटयोगं गते मन्दे [5]पित्ररिष्टं विनिर्दिशेत् ।
जननीव्याकुलं चैति पितृव्योऽपि तथैव च[6] ॥ ४३६५ ॥

[7]पितुश्च पितृतुल्यस्य विपद्दाये मृतिं वदेत् ।
सचिवांशकगे मन्दे मुकुन्दांशे दिवाकरे ॥ ४३६६ ॥

विपद्दाये [8]पित्ररिष्टं वृश्चिकान्त्यकगे शनौ ।
अथ वा मकरे मृत्युः क्रूराब्दे क्रूरमासगे ॥ ४३६७ ॥

स्वमाता विधवा भूत्वा बहुकालं सुजीवति ।
विपत्तारदशान्त्यादौ[9] क्षेमदाये स्वभुक्तिषु ॥ ४३६८ ॥

---

1. विचारं
2. चेति मातृवर्गे उपद्रवम्
3. योगस्य कालगे
4. स्वपिता देहजाड्यादि दृष्टिराशौ महद्विपत्
5. पित्ररिष्टं
6. चेति पितृव्यस्य तथापि च
7. पिता पितृसमो मृत्युर्विपद्दाये न संशयः ।
8. पितारिष्टं
9. दशान्त्यादि

[1]मात्ररिष्टमिति प्राहुः स्फुटयोगं गते शनौ ।
कर्मभाग्याधिपौ[2] केन्द्रे रन्ध्रेशेन समन्वितौ ॥ ४३६९ ॥

भङ्गयोग इति प्राहुरल्पभाग्ययुतः[3] सुखी ।
चतुर्विंशात् परं भाग्यं योगं [4]च ऋतुवत्सरम् ॥ ४३७० ॥

अथवा वसुवर्षाणि पश्चात् क्लेशं विनिर्दिशेत् ।
घने पापद्वययुते नवमे राहुसंस्थिते[5] ॥ ४३७१ ॥

वार्धके क्लेशमाप्नोति व्ययेशो भाग्यवान् क्वचित् ।
दारान्तरेऽल्पसन्तानं योगवान् रोगवान् भवेत् ॥ ४३७२ ॥

मृतप्रजाबहुत्वं स्याद्द्वित्रिसन्तानयोगवान् ।
[6]सुतेशरश्मिसङ्ख्याश्च भुक्तभोग्यांशकास्तथा ॥ ४३७३ ॥

तावत्पुत्रा भविष्यन्ति ह्यायुष्मन्तो न संशयः ।
क्षेमाधिपदशाकाले राजद्वारेऽवमानवान् ॥ ४३७४ ॥

सञ्चितार्थविनाशादि [7]योगयुक्तस्त्रिवत्सरम् ।
सर्वदाये जीवभुक्तौ कुजभुक्तौ च वा यदि ॥ ४३७५ ॥

अतीव क्लेशकार्याणि शनिभुक्तौ शुभाशुभम् ।
जीवान्तरान्तरे काले शनिभौमान्तरेषु च ॥ ४३७६ ॥

सर्वदाये क्रूरभुक्तौ क्रूरमासे महद्भयम् ।
[8]शुक्रदायेऽर्कभुक्तौ च स्वजनारिष्टशोकवान् ॥ ४३७७ ॥

---

1. मात्रारिष्टमिति प्राहु· स्फुटयोगांशकालगे ।
2. भाग्याधिपे केन्द्रे रन्ध्रेशेन समन्विते
3. योगमिति प्राहुरल्पभाग्यप्रतः
4. चेद्
5. द्वये योगे नवमे राहुजातके
6. सुतेशे रश्मिसङ्ख्यानि भुक्त भोग्यांशसङ्ख्यया ।
   तावत्सौख्यसुतोत्पत्तिर्दीर्घमायुर्भविष्यति ।
7. एकयोगं त्रिवत्सरम्
8. सूर्यान्तशुक्रदायेषु

स्वजन्मदेशे नृपतेः शुक्रभुक्तौ महाविपत्[1] ।
सुखेशांशदशाकाले भाग्येशांशदशान्त्यगे ॥ ४३७८ ॥

स्वजन्मदेशे नृपतिः क्लेशं प्राप्नोति भूरिशः ।
व्ययेशांशदशाकाले स्वभुक्तौ मातृवंशगे ॥ ४३७९ ॥

अतीव क्लेशकर्याणि प्रबलारिष्टमादिशेत् ।
स्वजन्मदेशे नृपतिर्मृतप्रायोपजीवति ॥ ४३८० ॥

स्वबन्धुजनविद्वेषात्[2] सेनामात्यविरोधवान् ।
लग्नाद्भाग्यं गते [3]राहौ भूसुतेन निरीक्षिते ॥ ४३८१ ॥

स्ववासदेशे नृपतिः क्रूरकृत्यस्वभाववान् ।
उग्रदण्डपरो नित्यं नित्यगानरतः[4] सुखी ॥ ४३८२ ॥

वृषभांशकगे भाग्ये कन्याराहौ[5] प्रजायते ।
विंशद्वर्षात् परं भाग्यं चतुर्विंशात् परं सुखम् ॥ ४३८३ ॥

विपद्दाये सुतोत्पत्तिर्योगः स्याद्वसुवत्सरम्[6] ।
पश्चाद्भाग्यच्युतेः क्लेशं क्षेमदाये[7] दलं व्यथा ॥ ४३८४ ॥

प्रत्यग्दाये [8]महत् सौख्यं राजान्तरवशात् सुखम् ।
पुत्रोत्पत्तिविनाशेन क्लेशं प्राप्नोति भूरिशः ॥ ४३८५ ॥

प्रत्यक्ताराधिपे चन्द्रे स्वर्भानुयुतवीक्षिते ।
केतुयुक्ते[9] फलं सत्यं शुभाशुभफलं समम् ॥ ४३८६ ॥

एकोनचत्वारिंशेऽब्दे चतुर्विंशतिवत्सरे ।
अतीव क्लेशकार्याणि मीने चन्द्रे प्रजायते ॥ ४३८७ ॥

---

1. नृपतिः शुक्रभुक्तौ महद्विपत्
2. विद्वेषं
3. राहुभू
4. उग्रकालपरो नित्यं नित्यगानप्रतः
5. कन्यारहुप्रयोगं स्याद्वसुवत्सरे
6. योगं
7. च्युतिं क्लेशक्षेमदायं
8. महासौख्यं
9. वक्रे

मीने मन्दांशगे चन्द्रे [1]विषाख्यांशोद्भवस्य च ।
त्रिंशेऽब्दे सुमहत् क्लेशं द्वात्रिंशे जातिविग्रहम्[2] ॥ ४३८८ ॥

चतुस्त्रिंशे शुभं [3]चैव क्षिप्रेण क्लेशमादिशेत् ।
राजद्वेषं द्विवारं स्यात् सञ्चितार्थविनाशनम् ॥ ४३८९ ॥

कुग्रामे वासमाप्नोति स्वस्थानच्युतिशोकवान् ।
साधनेशदशाकाले नवमे राहुसंस्थिते[4] ॥ ४३९० ॥

अतीव क्लेशदारिद्र्यं राजन्यद्वेषमादिशेत् ।
अपरार्धे कचित् सौख्यं शुभाशुभफलं समम् ॥ ४३९१ ॥

[5]दशान्ते ह्यपमृत्युश्च चन्द्रभुक्तौ महाविपत् ।
सचिवांशे [6]कर्मनाथे नैधनेशदशामृतिः ॥ ४३९२ ॥

रन्ध्राधिपदशाकाले वेधकग्रहभुक्तिषु ।
अपमृत्युभयप्राप्तिः क्रूराब्दे नात्र संशयः ॥ ४३९३ ॥

वार्धके नेत्रहानिः स्यात् सचिवांशोद्भवस्य च[7] ।
मध्ये मध्ये नेत्ररोगी ह्यथवा[8] दन्तरोगवान् ॥ ४३९४ ॥

षट्पञ्चाशत्समान्त्यादौ तथा सार्धे द्विवर्षके[9] ।
सचिवांशकगे मन्दे मीनमासे मृतिं वदेत् ॥ ४३९५ ॥

रन्ध्रेशांशकगे मन्दे क्रूराब्दे क्रूरमासगे ।
देहे जीवे [10]राहुयुते ह्यपमृत्युभयं कचित् ॥ ४३९६ ॥

रन्ध्राधिपदशासन्धौ सुमहत्[11] क्लेशमादिशेत् ।
जीवान्तरे सर्वदाये क्रूरमासे मनोव्यथा ॥ ४३९७ ॥

---

1. वृषनानांशजातके
2. महति क्लेशं द्वात्रिंशे जातिविड्वरम्
3. चेति
4. जातके
5. दशांशे अपमृत्युश्च चन्द्रभुक्तौ महद्विपत् ।
6. जीवनेशे
7. सचिवांशस्य जातके
8. रोगमथ वा
9. समान्त्यादि सार्धे द्विवर्षकेषु च
10. राहुकाले अपमृत्यु
11. सन्धिर्महति

भाग्यकर्मेशयोगेन [1]योगः स्याद्वसुवत्सरम् ।
योगरोगं [2]च लभते योगकाले रुजातुरः ॥ ४३९८ ॥
तद्दोषपरिहारार्थं चक्रदानं समाचरेत् ।
सचिवांशकगे मन्दे [3]जातस्य मृगलग्नके ।
इदमेव फलं सत्यं प्रत्यक्षं देवकेरलम् ॥ ४३९९ ॥

—:*:—

## मीनलग्ने कुन्दांशः

कुन्दांशके सुखाधीशे स्वक्षेत्रे रविसंयुते ।
कर्माधिपेन संदृष्टे मीनलग्ने सुभाग्यवान् ॥ ४४०० ॥

चन्द्रलग्नाधिपे सौम्ये कुन्दांशे गुरुवीक्षिते ।
विप्रकाले प्रजातश्च[4] पित्रार्जितधनाढ्यवान् ॥ ४४०१ ॥

कुन्दांशकगते सौम्ये [5]क्षात्रकालसमुद्भवः ।
विष्णुभक्तिरतो नित्यं महानृपतिसेवकः ॥ ४४०२ ॥

वैश्यवंशे समुत्पन्नो धातुव्यापारजीवकः[6] ।
धनधान्य[7]समृद्धश्च ब्राह्मणस्नेहवान् सुखी ॥ ४४०३ ॥

शूद्रकाले राजसेवी भूमिग्रामाधिपत्यवान् ।
व्यवसायपरो नित्यं पशुधान्यसमृद्धिमान् ॥ ४४०४ ॥

क्रूरांशगे विप्रकाले सौम्ये गुरुनिरीक्षिते ।
मीनलग्ने प्रजातश्च पश्चाद्भ्रातृविनाशवान् ॥ ४४०५ ॥

---

1. योगं
2. प्रकुर्वीत
3. मकरे लग्नजातके
4. प्रजातस्य
5. क्षत्रिये कालजातके
6. काले च तस्वादिबहुव्यापारजीवनम्
7. समृद्धिश्च

ज्येष्ठभ्रातृयुतो मानी पितृभाग्यसमृद्धिमान् ।
भेदभ्रातृयुतश्चैव सोदरभ्रातृमान् भवेत् ॥ ४४०६ ॥

कुन्दांशगे [1]मदाधीशे गुरुणा च निरीक्षिते ।
मीनलग्ने प्रजातश्च हरिशङ्करभक्तिमान् ॥ ४४०७ ॥

देवब्राह्मण[2]भक्तश्च पितृमातृप्रियः सुखी ।
राजद्वारे प्रसिद्धश्च वाहनत्रययोगवान् ॥ ४४०८ ॥

स्वपितान्दोलिकादीनि वयोमध्ये सुभाग्यवान् ।
आत्मस्तुतिपरो नित्यं परोपकृतिकार्यवान् ॥ ४४०९ ॥

[3]स्वपितुः सोदराः पञ्च भगिनीद्वयवान् सुखी ।
ज्येष्ठभ्रातृवियोगेन स्वपितुः[4] क्लेशमादिशेत् ॥ ४४१० ॥

ततः पश्चाद्विदेशेषु[5] दक्षिणे बहुभाग्यवान् ।
महतो नृपतेर्द्वारिब्राह्मणस्नेहयोगवान् ॥ ४४११ ॥

वनान्तरपुरे वासी[6] कुत्सितप्रभुसेवकः ।
वैष्णवद्वेषमूलेन [7]ह्यतीवक्लेशवान् पिता ॥ ४४१२ ॥

जन्मकाले पिता दुःखी कुन्दांशे सोमनन्दने ।
मकरांशस्य दोषेण [8]वेदवर्षे मनोव्यथाम् ॥ ४४१३ ॥

पश्चाद्भाग्याभिवृद्धिश्च[9] शत्रुनाशं विनिर्दिशेत् ।
भेदभ्रातृसुतप्राप्तिः सहोदर्या[10] महत् सुखम् ॥ ४४१४ ॥

जन्मदाये मातुलस्तु[11] सन्तानोत्पत्तिमान् सुखी ।
भेदभ्रातुर्विवाहः स्याद्भेदभ्रातृशिशुक्षयः[12] ॥ ४४१५ ॥

---

1. महाधीशे
2. भक्तिश्च
3. स्वपिता
4. स्वपिता
5. वितीशास्ति
6. वासं
7. अतीव
8. चतुरब्दं
9. स्याच्छत्रुनाशं
10. सहोदरि
11. मातुलस्य
12. विवाहं स्याद्भेदभ्रातृशिशुक्षयम्

मातामही [1]गदग्रस्ता मृतप्रायापि जीवति ।
लग्नात् सप्तमगे चन्द्रे केसरीयोगजोद्भवः[2] ॥ ४४१६ ॥

[3]आयुष्मन्तौ च पितरौ मातुलद्वयवान् भवेत् ।
सम्पत्तारदशाकाले लग्नेशांशत्रिकोणगे ॥ ४४१७ ॥

स्फुटयोगं गते मन्दे मातुलारिष्टमादिशेत् ।
जननी भ्रातृशोकेन सम्पद्दाये मनोऽव्यथाम्[4] ॥ ४४१८ ॥

मन्दे कीटान्त्यगे काले जननीव्याकुलं महत् ।
तुलाशनिस्थिते काले लग्नेशे स्वोच्चकालगे ॥ ४४१९ ॥

मिथुनान्त्यगते वापि कुन्दांशे मौञ्जिबन्धनम् ।
सुताधिपदशाकाले कुन्दांशे बहुसौख्यवान् ॥ ४४२० ॥

स्वपिता राजसन्मानं शत्रुनाशात् परं सुखम् ।
नरवाहनभूषाप्तिं नित्यं सन्तोषवान् भवेत् ॥ ४४२१ ॥

भेदभ्राता शुभं [5]चैति पितृमूलात् सुभाग्यवान् ।
स्वपितुर्मित्रवर्गेषु योगं प्राप्नोति भूरिशः ॥ ४४२२ ॥

पितृमूलादिष्टसिद्धिर्मातुलस्य शुभाधिकम् ।
सुताधिपदशाकाले कुन्दांशे [6]जनितस्य च ॥ ४४२३ ॥

स्वमातुलशिशुक्लेशो[7] मृतप्रायोपजीवति ।
स्वभेदभगिनीभर्ता[8] प्रबलोयोगभाग्यवान् ॥ ४४२४ ॥

पुत्रोत्सवात् परं चैव[9] योगवान् कीर्तिमान् सुखी ।
कुन्दांशगे सुखाधीशे रिपुनाथेन संयुते ॥ ४४२५ ॥

---

1. अरिष्टं स्यान्मृतप्रायोपजीवति
2. जातके
3. पितृमातृचिरायुष्यं
4. व्यथा
5. चेति
6. कुन्दांशस्यैव जातके
7. क्लेशं
8. भर्तृ
9. चेति

जन्मदाये पिता क्लेशी क्रूराब्दे ज्वरपीडितः[1] ।
सिंहे शनिस्थिते काले स्वपिता व्याकुलं महत् ॥ ४४२६ ॥

अतिसारप्रपीडादि सोदरोत्पत्तिनाशनम् ।
मसूरिका[2]भयप्राप्त्या मातृपीडा क्वचित् क्वचित् ॥ ४४२७ ॥

पशुधान्यविनाशेन व्याकुलं भवति ध्रुवम् ।
राहुस्थितांशगे मन्दे गोचरे तत्त्रिकोणगे ॥ ४४२८ ॥

जन्मदाये जन्मदेशे राज्याधिपतिविग्रहम्[3] ।
कन्याशनिस्थिते काले जन्मदेशे नृपावधि ॥ ४४२९ ॥

राजामात्यजनक्लेशो दशासन्धौ महाविपत्[4] ।
शुक्रान्तरे जन्मदाये सोदरोत्पत्तिमादिशेत् ॥ ४४३० ॥

स्वजन्मदेशे नृपतिर्वातरोगेण कर्शितः ।
बन्धुवर्गे मनस्तापं व्याकुलानन्तरं सुखम् ॥ ४४३१ ॥

स्वमातुलप्रपीडादि स्वपितुर्जननी[5]सुखम् ।
सम्पद्दाये श्रियोऽवाप्तिर्मेषान्ते वृषभे गुरौ ॥ ४४३२ ॥

मिथुने बहुभाग्यं स्याद्भ्रातृसौख्यं श्रियान्वितम्[6] ।
चन्द्रांशगे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४४३३ ॥

[7]स्वपितुर्देहजाड्यादि योगकाले विनिर्दिशेत् ।
विवाहोत्सवकार्याणि स्वज्येष्ठभगिनी सुखम् ॥ ४४३४ ॥

क्रूरमासं परित्यज्य कन्याशनिफलं समम् ।
तुलाशनौ भाग्यवृद्धिः कुन्दांशे चन्द्रदायगे ॥ ४४३५ ॥

---

1. क्लेशं क्रूराब्दे ज्वरपीडवान्
2. प्राप्तिर्मातृ
3. विड्वरम्
4. क्लेशं दशासन्धौ महद्विपत्
5. पीडादिं स्वपिता जननी
6. श्रियावहम्
7. स्वपिता देह

क्रूरान्तरं विना सौख्यं स्वपिता बहुभाग्यवान् ।
रन्ध्रेशांशे तत्त्रिकोणे धनेशांशत्रिकोणगे ॥ ४४३६ ॥

स्फुटयोगं गते मन्दे स्वजनारिष्टमादिशेत् ।
क्रूरान्तरे दारनाथे गुरुणा च निरीक्षिते ॥ ४४३७ ॥

दशवर्षात् परं [1]चैव द्वादशाब्दे विवाहवान् ।
ग्रन्थान्तरे मीनलग्ने स्वक्षेत्रे सोमनन्दने ॥ ४४३८ ॥

अतिबाल्ये विवाहः[2]स्यात् सम्पद्दाये शुभाब्दगे ।
अतिभाग्यकुलोद्वाही सत्कलत्रयुतः[3] सुखी ॥ ४४३९ ॥

विपद्दाये सुतोत्पत्ती राजद्वारे प्रवेशवान् ।
सम्पद्दाये [4]विद्यारम्भमक्षराभ्यासमादिशेत् ॥ ४४४० ॥

[5]लिपित्रयप्रवीणश्च काव्यनाटकशास्त्रवित् ।
गीर्वाणान्ध्रकवि र्मानी क्षेमदाये सुकीर्तिमान् ॥ ४४४१ ॥

राजयोगाभिवृद्धिः स्याद्द्वाविंशाब्दात् परं सुखम् ।
चन्द्रलग्नाष्टमाधीशदशायां पितृपीडनम्[6] ॥ ४४४२ ॥

क्राब्दे व्याकुलं [7]चैति विपत्तारदशान्त्यगे ।
मेषे शनिस्थिते काले मीनान्ते तत्त्रिकोणगे ॥ ४४४३ ॥

कुन्दांशगे प्रजातस्य पित्ररिष्टं[8] विनिर्दिशेत् ।
कुन्दांशगे शुभाधीशे क्षेमदाये स्वभुक्तिषु ॥ ४४४४ ॥

मीनान्ते मेषगे मन्दे [9]पित्ररिष्टं विनिर्दिशेत् ।
हरिणांशकगे सूर्ये कुन्दांशे जनितस्य च[10] ॥ ४४४५ ॥

---

1. चिते
2. विवाहं
3. कुलोद्वाहं सत्कलत्रप्रदः
4. विद्यारम्भः अक्षरा
5. विधि
6. कृत्
7. चेति
8. प्रजातश्च पित्रारिष्टं
9. पित रिष्ट
10. कुन्दांशश्चैव जातके

सूर्यनाडीफलं श्रेष्ठं योगायोगं विनिर्दिशेत् ।
अम्बुजांशकगे सूर्ये हरिणांशकगे गुरौ ॥ ४४४६ ॥

नाडीत्रयफलं श्रेष्ठं योजयेत् कालवित्तमः ।
कुन्दांशगे वाहनेशे कर्मे शनिनिरीक्षिते ॥ ४४४७ ॥

क्षेमदाये महद्भाग्यं वाहनत्रययोगवान् ।
अम्बुजांशफलं चिन्त्यं क्षेमदाये सुकीर्तिमान् ॥ ४४४८ ॥

शनिद्वितीयपर्याये [1]कुलीरान्त्ये च सिंहगे ।
क्षेमदाये महारोगी[2] शान्त्या शान्ति प्रयास्यति ॥ ४४४९ ॥

केतुभुक्तौ राहुदाये क्रूरांशे च प्रजायते[3] ।
सूर्यभुक्तौ [4]महाकष्टं योगरोगेण पीडितः ॥ ४४५० ॥

अम्बुजांशकगे सूर्ये सौम्ये कुन्दांशके तथा[5] ।
लाभाधिपान्तरे वापि[6] क्षेमदाये सुयोगवान् ॥ ४४५१ ॥

सुखेशान्तरगे सूर्ये गृहे लक्ष्मीकटाक्षवान् ।
राजयोगाभिवृद्धिः[7] स्याद्बहुपुत्रार्थवान् सुखी ॥ ४४५२ ॥

तुलांचक्रदशाकाले क्षेमदाये सुयोगवान् ।
बुधान्तरे सुकीर्तिः स्यात् सदा राजप्रसादवान् ॥ ४४५३ ॥

मेषत्रिकोणगे जीवे कन्याचन्द्रे सुभाग्यवान् ।
मकरांशे सुकीर्तिः स्यात् सप्तविंशात् परं सुखम् ॥ ४४५४ ॥

मीनत्रिकोणे जातश्च जीवे मेषत्रिकोणगे ।
कन्याचन्द्रे महद्भाग्यं तुलाचक्रे न संशयः ॥ ४४५५ ॥

---

1. कुलरंत्या
2. आरोग्यं
3. अंशश्चेव जातके
4. महत् कष्टं
5. जातके
6. लाभाधिपान्तरादीनि
7. प्रीतिं

योगरोगं [1]च लभते स्वबन्धुजनपोषकः ।
नित्यान्नदानवान् रागी बहुकामातुरो भवेत् ॥ ४४५६ ॥

[2]चन्द्रे कीटे वक्रयुते स्वमित्रप्रभुनाशनम् ।
राजान्तरवशाद्भाग्यं तुलाचन्द्रे सुकीर्तिमान् ॥ ४४५७ ॥

कुन्दांशकगते सौम्ये योगः स्याद्दश वत्सरम्[3] ।
क्षेमदाये मध्यखण्डे बहुभाग्ययुतः[4] सुखी ॥ ४४५८ ॥

दारेशे रविसंयुक्ते सप्तमे चन्द्रसंयुते[5] ।
कलत्रद्वययोगः स्यात् केचित्पक्षे त्रिभार्यकः[6] ॥ ४४५९ ॥

कुन्दांशगे दारनाथे धनाधिपतिदायगे ।
स्वपित्ररिष्टतः पूर्वं[7] दारारिष्टं विनिर्दिशेत् ॥ ४४६० ॥

लाभे राहुदशाकाले तृतीयोद्वाहयोगवान् ।
दारान्तरे पुत्रसिद्धिर्धनधान्यसमृद्धिमान् ॥ ४४६१ ॥

स्वक्षेत्रस्थे[8] कर्मनाथे स्वोच्चांशे बुधवीक्षिते ।
नित्यान्नदानपुण्यात्मा [9]स्वपित्रधिकभाग्यवान् ॥ ४४६२ ॥

भाग्याधिपदशाकाले शुभाशुभफलं समम् ।
क्रूरभुक्तिं परित्यज्य राजद्वारे प्रवेशवान् ॥ ४४६३ ॥

सुताधिपदशाकाले [10]ह्यतीव श्रियमश्नुते ।
कुन्दांशगे पिता योगं भेदभ्रातृशुभावहम् ॥ ४४६४ ॥

जन्मदाये [11]महाकष्टं स्वपिता व्याकुलं महत् ।
कर्माधिपदशाकाले धनाधिपतिभुक्तिषु ॥ ४४६५ ॥

---

1. प्रकुर्वीत
2. वृश्चिकाकारके चन्द्रे
3. योगं स्याद्दशवत्सरे
4. प्रदः
5. जातके
6. योगं स्यात् केचित्पक्षे त्रिभार्यवान्
7. स्वपितारिष्टतत्पूर्वं
8. स्वक्षेत्र....कर्म
9. स्वपिता
10. अतीव
11. महत् कष्टं

अपरार्धे भाग्यनाशं[1] कुन्दांशे क्लेशवान् भवेत् ।
कर्माधिपदशाकाले पूर्वार्धे सौख्यमश्नुते ॥ ४४६६ ॥

कनिष्ठभ्रातृभार्या [2]च तनयश्च प्रपीडितः ।
स्वदेहायाससन्तापः[3] स्वप्रभोश्च विशेषतः ॥ ४४६७ ॥

बुधान्तरे [4]महाकष्टं कर्माधिपतिदायगे ।
अबलांशफलं चिन्त्यं मिथुने[5] रविसंस्थिते ॥ ४४६८ ॥

चन्द्रांशेशदशाकाले [6]ह्यम्बुजांशे दिवाकरे ।
कुन्दांशगे बुधे [7]रोगी स्वभुक्तौ मारकं भवेत् ॥ ४४६९ ॥

कर्माधिपदशान्त्यादौ[8] लाभेशस्य स्वभुक्तिषु ।
चन्द्रांशमासे निर्याणं [9]स्यात् कन्यामीनयोरपि ॥ ४४७० ॥

व्ययेशारूढगे जीवे स्वोच्चांशे पुण्यलोकवान् ।
[10]स्वपितुर्ब्रह्मलोकाप्तिर्भ्रातृद्वययुतः सुखी ॥ ४४७१ ॥

चक्रसन्धिदशासन्धिकाले [11]देहप्रपीडितः ।
तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ॥ ४४७२ ॥

क्रूराब्दे क्रूरमासे च रन्ध्रेशांशत्रिकोणगे ।
[12]स्फुटयोगं गते मन्दे शान्तिं कुर्यात् प्रयत्नतः ॥ ४४७३ ॥

कन्याराशिगते चन्द्रे मकरांशे च जायते[13] ।
विपत्तारदशासन्धौ[14] शान्तिं कुर्याद्विचक्षणः ॥ ४४७४ ॥

---

1. योगं
2. भर्यादितनयस्य
3. सन्तापं
4. महत् कष्टं
5. जातके
6. अम्बुजांशे
7. भोगी
8. दशान्त्यादि
9. स्वकन्या
10. स्वपिता ब्रह्म
11. प्रपीडवान्
12. योगस्य काले वा
13. मकरांशश्च जातके
14. दशासंधि

सप्तपञ्चाशगे मृत्युः पश्चाद्ब्राह्मणजन्मवान् ।
कुन्दांशकगते सौम्ये [1]त्विन्द्रयातनवान् पिता ।
विप्रकाले फलं सत्यं प्रत्यक्षं देवकेरलम् ॥ ४४७५ ॥

—:*:—

## कन्यालग्ने सुरांशः

वर्गोत्तमे लग्ननाथे सुरांशे घनराशिगे ।
घनदांशे प्रजातश्च विप्रजन्मा [2]सुरूपवान् ॥ ४४७६ ॥

[3]गणितज्ञो राजसेवी कन्यालग्ने प्रजायते ।
सुरांशगे [4]तदीशे च द्वितीयोऽयं प्रकीर्तितः ॥ ४४७७ ॥

अथवा च तृतीयः स्याज्ज्येष्ठभ्रातृयुतः सुखी ।
कुग्रामे [5]जनितश्चासौ श्यामवर्णशरीरवान् ॥ ४४७८ ॥

वर्गोत्तमे लग्ननाथे कर्मनाथे सुरांशगे ।
स्वपिता भाग्यवान् साधुः सोदरभ्रातृहीनवान् ॥ ४४७९ ॥

सुतेशे वृश्चिकांशस्थे भूसुतेन समन्विते ।
पितामहः प्रसिद्धश्च शूद्रग्रामाधिपत्यवान् ॥ ४४८० ॥

तदभावे म्लेच्छसेवी [6]ह्यन्नदानद्विजप्रियः ।
लग्नेशांशाधिपे शुक्रे नीचांशे चन्द्रसंयुते ॥ ४४८१ ॥

म्लेच्छराज्ये शूद्रसेवी स्वपिता भाग्ययोगवान् ।
[7]पितामहस्तथैव स्यान्म्लेच्छग्रामाधिकारवान् ॥ ४४८२ ॥

---

1. इन्द्र
2. स्वरूप
3. ....कन्यालग्ने
4. तदीशश्च द्वितीये गर्भजातकम्
5. अननं चेति
6. अन्नदान
7. तथाविन्याद्

स्वसमानद्विजः शत्रुस्तन्मूलाद्व्याकुलं महत् ।
कारागृह[1]प्रवेशं च सुरांशे स्वपितामहः ॥ ४४८३ ॥

पश्चाद्भाग्याभिवृद्धिः स्यात् सेवकावृत्तिजीवकः[2] ।
लग्नेशाल्लाभगे शुक्रे नीचांशे शत्रुराशिगे ॥ ४४८४ ॥

ज्ञातिवर्गे विरोधेन क्लेशवान् स्वपितामहः ।
कुग्रामवासी स्वपिता नीचांशे भाग्यनायके ॥ ४४८५ ॥

निशाकरेण संयुक्ते म्लेच्छराज्ये सुभाग्यवान् ।
धनदांशे पूर्वभागे सुरांशे लग्ननायके ॥ ४४८६ ॥

[3]आयुष्मन्तौ च पितरौ धनधान्यसमृद्धिमान् ।
चित्रयोगे धने सौम्ये सुरांशे बहुवित्तवान् ॥ ४४८७ ॥

राजद्वारे प्रसिद्धश्च स्वपित्रधिक[4]योगवान् ।
भ्रातृत्रययुतो मानी भगिनीद्वयवान् सुखी ४४८८ ॥

शेषं नाशमिति प्राहुर्वसुसंख्याः सहोदराः[5] ।
सुरांशगे चित्रयोगे धनदांशोद्भवस्य च[6] ॥ ४४८९ ॥

सोदराः पञ्च तेषां द्वौ प्रथितौ भाग्यशालिनौ ।
लग्नांशगे तत्त्रिकोणे स्फुटयोगं गते गुरौ ॥ ४४९० ॥

सोदरोत्पत्तिकालः[7] स्यात् सम्पद्दाये पिता सुखम् ।
एका स्वसा सौख्यवती भूषिता कनकप्रभा ॥ ४४९१ ॥

मकरे पतिभक्ता स्यात् क्लेशिता च तथापरा ।
लग्नेशाद्भाग्यगे मन्दे भूसुतेन समन्विते ॥ ४४९२ ॥

---

1. प्रपीडा स्यात्
2. जीवनम्
3. पितृमातृचिरायुष्यं
4. स्वपिताधिक
5. सहोदरम्
6. धनदांशस्य जातके
7. सोदरोत्पत्तिकालं

पश्चात् सोदरहीनः स्यादल्पायुर्दायमादिशेत् ।
लग्नाधिपे तुलांशस्थे सोदरीभ्रातृसंयुतः ॥ ४४९३॥

दीर्घायुर्योगमित्याहुर्ज्येष्ठभ्राता सुकीर्तिमान् ।
भाग्यस्थानाधिपे शुक्रे कर्मनाथेन संयुते[1] ॥ ४४९४ ॥

भाग्ययोगमिति प्राहुः सत्कर्माचारबुद्धिमान् ।
धनदांशे पूर्वभागे सम्पद्दाये पिता सुखम् ॥ ४४९५ ॥

धनधान्यसमृद्धश्च[2] स्वपिता हृदि[3] शुद्धिमान् ।
सुरांशगे विलग्नेशे विप्रनाडयुद्भवस्य च[4] ॥ ४४९६ ॥

धनाधिपदशाकाले विवाहोत्सवमादिशेत् ।
पञ्चमाब्दात् परं चैव द्विवर्षे चोत्तरायणे ॥ ४४९७ ॥

ब्रह्मोपदेशकर्माणि मेषादित्रयमासगे ।
गुरुप्रथमपर्याये मेषान्ते वृषभे तथा[5] ॥ ४४९८ ॥

धनदांशे ज्येष्ठभ्रातृविवाहोत्सवमादिशेत् ।
जन्मतारदशान्त्यादि सम्पद्दाये स्वभुक्तिषु ॥ ४४९९ ॥

ज्येष्ठभ्रातृशुभं चेति मौञ्जीबन्धनमादिशेत् ।
धनदांशे पूर्वभागे चेङ्गितज्ञो[6] भवेत्पिता ॥ ४५०० ॥

सुमुखः कुशली मन्त्री वेदान्तज्ञानतत्त्ववान् ।
जातकस्य गुणं वक्ष्ये श्यामवर्णः सुबुद्धिमान् ॥ ४५०१ ॥

परोपकारनिरतः पञ्चयज्ञपरायणः ।
आस्तिकः सर्वधर्मज्ञो वदान्यो दृढसौहृदः ॥ ४५०२ ॥

---

1. भाग्यारूढाधिपे भौमे कर्मारूढप संयुते
2. समृद्धिश्च
3. कृति
4. विप्रनाड्यनुजातके
5. वृषभेषु च
6. इङ्गितज्ञवान्

लग्नेशे भार्गवांशस्थे शुक्रे नीचांशसंस्थिते[1] ।
अन्तःक्रोधी प्रसन्नात्मा किंचिल्लोभस्वभाववान् ॥ ४५०३ ॥

वित्ते सौम्ये शुभांशस्थे तेजस्वी बुद्धिमान् शठः ।
सुमुखः कुशलो धीरो विद्याबुद्धियुतः सुखी[2] ॥ ४५०४ ॥

तुलांशे तौलिगे सूर्ये वेदशास्त्रार्थतत्त्ववित् ।
यतिप्रीतिकरो नित्यं सुरांशे कर्म[3]शुद्धिमान् ॥ ४५०५ ॥

ज्येष्ठस्य पुत्राश्चत्वारः कनिष्ठस्य सुतद्वयम् ।
भ्रातृद्वयं तथा विद्याद्भगिन्यौ द्वे सजीविते[4] ॥ ४५०६ ॥

सुरांशगे चित्रयोगे वित्ते सौम्ये च जायते[5] ।
बहुग्रामाधिकारी[6] स्यात् स्वपितामहभाग्यवान् ॥ ४५०७ ॥

वसुवर्षात् परं पित्रोर्विशेषश्रीप्रदः सुखी[7] ।
कन्यालग्ने धने सौम्ये तुलांशे पापवर्जिते ॥ ४५०८ ॥

लग्नेशस्य[8] दशाकाले स्वपिता भाग्यभोगवान् ।
क्रूरयुक्तदशाकाले व्याकुलं ज्वरपीडनम्[9] ॥ ४५०९ ॥

षष्ठाब्दे सोदरोत्पत्तिः सप्तमाब्दे क्वचिद्व्यथा ।
विप्लवेन विचारः[10] स्याद्दशवर्षात्परं सुखम् ॥ ४५१० ॥

निधनाधिपसंदृष्टे वत्सरे स्वपिता सुखम् ।
ग्रामकार्यकलापेन व्याकुलानन्तरं सुखम् ।
लग्नराशिदशाकाले नवमाब्दात् परं सुखम् ॥ ४५११ ॥

---

1. जातके
2. प्रदः
3. कुलशुद्धिमान्
4. भगिनीद्वयमायुषम्
5. चित्रयोगो वित्ते सौम्यश्च जातके
6. बहुग्रामाधिकारः
7. विशेषश्रीयवान्
8. शशि
9. क्रूराश्चेद्व्याकुलं चेति ज्वरोपद्रवपीडवान्
10. विचारं

विवाहोत्सवकार्याणिस्वपितु र्भाग्यकालगो[1] ।
शुभाब्दगे शुभं नित्यं क्रूराब्दे व्याकुलं महत् ॥ ४५१२ ॥

लग्नराशिदशान्त्यादौ[2] स्वपिता कीर्तिमान् सुखी ।
धनराशिदशाकाले ह्यथवा वित्तपस्य च[3] ॥ ४५१३ ॥

सुरांशगे महद्भाग्यं गृहे लक्ष्मीकटाक्षवान् ।
द्वादशाब्दात् परं चैव[4] व्ययाधिपतिदायगे ॥ ४५१४ ॥

क्रूरमासे पितुः[5] क्लेशं क्रूरभुक्तौ न संशयः ।
व्ययाधिपे लग्नकेन्द्रे लग्नेशे धनराशिगे ॥ ४५१५ ॥

लग्नराशिदशासौख्यं व्ययराशिदशाव्यथा ।
लाभराशिदशाकाले मनुवर्षात् परं सुखम् ॥ ४५१६ ॥

क्रूरसंवत्सरं त्यक्त्वा लाभराशिदशासुखम् ।
ज्येष्ठभ्रातृसुतप्राप्तिः कनिष्ठभ्रातृसौख्यकृत् ॥ ४५१७ ॥

विवाहोत्सवकार्याणि भ्रातृमूलात् सुसौख्यवान् ।
सूर्यांशगे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४५१८ ॥

स्वपिता देहजाड्येन [6]ह्यादायादधिकव्ययम् ।
कन्यान्ते तौलिगे मन्दे सुरांशे जनितस्य च[7] ॥ ४५१९ ॥

लग्नराशिदशाकाले देशे [8]राजान्तरं भवेत् ।
लोके धान्यक्षयादीनि विप्लवेन प्रजावधि ॥ ४५२० ॥

सिंहे शनिस्थिते काले [9]स्वर्घवृद्धिः प्रजासुखम् ।
ग्रामकार्य[10]कलापेन स्वपिता व्याकुलं महत् ॥ ४५२१ ॥

---

1. स्वपिता वाक्यकालगे
2. दशान्त्यादि
3. धनाधिपदशाथवा
4. चेति
5. पिता
6. देहजाड्यादि आदाया
7. सुरांशश्चैव जातके
8. राज्यान्तरं
9. अर्घवृद्धिः
10. ग्रामकार

रन्ध्रेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
क्रूरमासे जातकस्य पित्रादीनां मनोऽन्यथा ॥ ४५२२ ॥

जीवयोगे धनप्राप्ती राजद्वारे सुखाधिकम् ।
राहुकान्तर्क्षगे जीवे स्फुटयोगं गते शनौ[1] ॥ ४५२३ ॥

विप्लवेन विनिर्गत्य ग्रामान्तरनिवासवान् ।
लाभराशिदशाकाले सुरांशे जनितस्य च[2] ॥ ४५२४ ॥

विंशद्वर्षात् परं सौख्यं स्वप्राबल्यं धनागमम् ।
क्रूराब्दं च परित्यज्य पितृसौख्यं महत् सुखम् ॥ ४५२५ ॥

कर्मराशिदशाकाले सुरांशे व्याकुलं महत् ।
अपरार्धे [3]पित्ररिष्टमापत्संन्यासवान् पिता ॥ ४५२६ ॥

सुरांशगे सप्तविंशे त्रिंशेऽब्दे जनकस्य च ।
क्रूरवत्सरदोषेण पितृपीडां विनिर्दिशेत् ॥ ४५२७ ॥

[4]कर्माधिपे शुभयुते भाग्येशेन निरीक्षिते ।
लाभराशिदशान्त्यादौ विशेषकर्म[5]सिद्धिमान् ॥ ४५२८ ॥

नित्यान्नदानसिद्धिः स्यात् स्वप्राबल्यं महत् सुखम् ।
त्रिंशोपरि शरैर्वर्षैः सोदरेण[6] विभागवान् ॥ ४५२९ ॥

अतीव श्रियमाप्नोति नरवाहनवान् भवेत् ।
भाग्यराशिदशाकाले सुरांशे बहुभाग्यवान् ॥ ४५३० ॥

दशग्रामाधिकारस्वमन्नदाने सुकीर्तिमान् ।
क्रूराब्दगे [7]महाकष्टं विप्लवेन धनव्ययम् ॥ ४५३१ ॥

---

1. योगस्य कालगे
2. सुरांशश्चैव जातके
3. पिता
4. कर्मारूढे शुभे दृष्टे
5. शान्त्यादि विशेषकृत
6. सोदरस्य
7. महत्

शुभाब्दगे धनप्राप्ति[1] प्रबलोद्योगभाग्यवान् ।
रन्ध्रराशिदशाकाले चत्वारिंशात् परं व्यथाम्[2] ॥ ४५३२ ॥

चतुश्चत्वारिंशकेऽब्दे विशेषक्लेशवान् भवेत् ।
[3]मदराशि दशाकाले मदेशे लग्नकेन्द्रगे ॥ ४५३३ ॥

स्वपुत्रोद्वाहसिद्धिः स्यात् पुत्रिणी च [4]सपुत्रिका ।
कुम्भराशिदशाकाले शुभाशुभफलं समम् ॥ ४५३४ ॥

ज्येष्ठभ्रातृवियोगेन पुत्रनाशात् परं व्यथाम्[5] ।
सुतराशिदशामृत्युः पञ्चषष्टिः सुजीवति ॥ ४५३५ ॥

ब्रह्मलोकफलं सत्यं व्ययेशे शुक्रसंयुते[6] ।
सुतराशिदशाकाले क्रूराब्दे क्रूरमासगे ॥ ४५३६ ॥

अपमृत्युभयप्राप्तिः शान्त्या शान्तिं प्रयास्यति ।
धनदांशे पूर्वभागे सुरांशे शशिनन्दने ॥ ४५३७ ॥

लाभराशिदशान्त्यादौ[7] योगवान् कीर्तिमान् सुखी ।
धननाडीफलं सत्यं प्रत्यक्षं देवकेरलम्[8] ॥ ४५३८ ॥

—:*:—

## मीनलग्ने कमलांशः

कमलांशे मीनलग्ने मेषे बुधयुते शनौ[9] ।
रक्तवर्णतनुः प्राज्ञः शत्रुतापी क्रिये शनौ ॥ ४५३९ ॥

सिंहांशगे मतद्वेषी स्वमतान्तर[10]निष्ठकः ।
कमलांशकगे मन्दे मेषे बुधसमन्विते ॥ ४५४० ॥

---

1. प्रति
2. व्याथ
3. मन्दराशि दशाकाले मन्देशे
4. स्वपुत्रिका
5. व्यथा
6. जातके
7. दशान्त्यादि
8. देवकेरले
9. शनिः
10. निष्ठवान्

विष्णुभक्तिरतो नित्यं सोदरभ्रातृहीनवान् ।
मेषे रवियुते मन्दे कमलांशे[1] च संस्थिते ॥ ४५४१ ॥

युग्मे भौमे प्रजातश्च धीरः शूरः सुबुद्धिमान् ।
देशान्तरे भाग्ययोगं [2]पञ्चमे बहुवाचकः ॥ ४५४२ ॥

अपांपत्यंशगे मन्दे धार्मिकश्च स्वकार्यकृत् ।
सर्वज्ञः सात्त्विकः क्रोधी मर्मभेदी च तापसः ॥ ४५४३ ॥

क्रूरषष्ठ्यंशगे मन्दे कमलांशे सुबुद्धिमान् ।
अन्तःकपटवान् कामी कमलायतलोचनः ॥ ४५४४ ॥

पराक्रमे स्वतन्त्रश्च परेषां व्यसनप्रदः[3] ।
क्षिप्रकोपी प्रसन्नात्मा कृशदेहस्वरूपवान् ॥ ४५४५ ॥

[4]कर्मे राहौ धने मन्दे सिंहांशे लक्ष्मियोगगे ।
कमलांशे प्रजातश्च किंचिन्मूर्खस्वभाववान् ॥ ४५४६ ॥

अन्तःक्रोधी प्रसन्नात्मा राजन्यजनमैत्रवान् ।
[5]स्वपिता भाग्ययुक्तश्च पुत्रभाग्यविहीनवान् ॥ ४५४७ ॥

स्वभुजार्जितसंपन्नो मध्ये वयसि शोकवान् ।
मेषे सिंहांशगे मन्दे [6]नाड्यां तु कमलांशके ॥ ४५४८ ॥

बाल्ये दारिद्र्यमापन्नस्त्रिंशेऽब्दे बहुभाग्यवान् ।
वातप्रकृतिदेहश्च मूर्छावायुप्रपीडितः ॥ ४५४९ ॥

सोदरक्लेशवान् रागी [7]स्वङ्गवैकल्यपुत्रवान् ।
तदभावे च [8]यमलसन्तानोत्पत्तिमादिशेत् ॥ ४५५० ॥

---

1. कमलांशश्च जातके
2. पञ्चके
3. कर्मराहु
4. क्रियः
5. स्वपिता व्यवसा सौख्यं
6. कमलांशस्य नाडिगे
7. अङ्ग
8. यमलौ

भौमांशकगते मन्दे भौमक्षेत्रेशुभान्विते ।
भातृसौख्यविहीनश्च पश्चात् सोदरहीनवान् ॥ ४५५१ ॥

कोपप्रकृतिमान् रागी मातामहमताश्रितः ।
बाल्ये चक्राङ्कितश्चैव[1] पश्चात् पितृमताश्रयः ॥ ४५५२ ॥

उद्वाहानन्तरं भाग्यं[2] विंशद्वर्षात् परं सुखम् ।
मातुलारिष्टतः पश्चात् स्वपितुर्गृहवासवान्[3] ॥ ४५५३ ॥

आयुष्मन्तस्त्रिपितृव्याः[4] मातुलद्वययोगवान् ।
मातृष्वसा भाग्यवती पितृव्यश्च द्विभार्यकः[5] ॥ ४५५४ ॥

कमलांशकगे मन्दे स्वपितृव्यचतुष्टयम् ।
[6]तेषां द्वौ पुत्रहीनौ च ह्यपरौ पुत्रसंयुतौ ॥ ४५५५ ॥

मातृष्वसुर्भर्तृभाग्यं[7] कमलांशे स्वमातुलः ।
[8]जीवनत्वमिति प्राहुः कमलांशो[9]द्भवस्य च ४५५६ ॥

कमलांशे जन्मदाये [10]क्लिष्टा मातृष्वसा व्यथाम्[11] ।
लभते भाग्यनाशं च ह्यन्यदेशे[12] पितामहः ॥ ४५५७ ॥

लग्नाच्चतुर्थगे भौमे ह्युग्रग्रह[13]समन्विते ।
जन्मदाये मातृबन्धुवंशोपद्रवमादिशेत् ॥ ४५५८ ॥

पितामही दीर्घजीवा[14] पितृव्यैकश्चिरायुषः[15] ।
पितृव्यस्य तु[16] जन्मर्क्षे मन्दांशे तत्त्रिकोणगे ॥ ४५५९ ॥

---

1. चक्राङ्कितश्चेति
2. कार्यं
3. स्वपितागृह
4. पितृव्यत्रयमायुष्यं
5. भार्यवान्
6. पुत्रहीनद्वयश्चेति पुत्रवांश्च द्वयं स्मृतम्
7. मातृष्वासा
8. जीवन चमिति
9. कमलांशस्य जातके
10. क्लेशी
11. व्यथा
12. भाग्यनाशमिति प्राहुर्देशान्तर
13. उच्च
14. चिरायुष्यं
15. चिरायुषम्
16. पितृव्यस्तुत

स्वजन्मर्क्षे पितृव्यस्य द्विभार्यश्चैक[1]पुत्रवान् ।
[2]आयुष्मत्यौ पुत्रिके द्वे शेषं नाशमितीरयेत् ॥ ४५६० ॥

पितृव्यसुतभावेशे नीचांशे स्वोच्चराशिगे ।
पितृव्यपुत्रिका क्लेशं पुत्रनाश[3] इति स्मृतः ॥ ४५६१ ॥

पितृव्याधिपतौ मन्दे सिंहांशे नीचराशिगे ।
पितृव्यश्च दुराचारी[4] राजद्वारे प्रसिद्धिमान् ॥ ४५६२ ॥

तत्पुत्रो जाड्यवान् कामी वन्ध्यास्त्रीसक्ति[5]मान् सदा ।
पीडितः प्रतिबन्धेन[6] दत्तपुत्रविनाशवान् ॥ ४५६३ ॥

द्विग्रहोच्चे शनौ नीचे कमलांशेऽद्भवस्य च[7] ।
पितृव्यपुत्रिका काचिज्जारिणी [8]स्वल्पपुत्रिणी ॥ ४५६४ ॥

दारिद्र्यवशमापन्ना मध्ये भर्तृविनाशिनी ।
कमलांशे पितृव्यस्य स्वभार्यावंश एव च ॥ ४५६५ ॥

स्त्रीप्रजायाः कलङ्कः[9] स्यात् स्वभ्रात्रा गूढकामिनी[10] ।
कमलांशकगे मन्दे शशिजेन समन्विते । ॥ ४५६६ ॥

मीनलग्ने प्रजातश्च सत्कलत्रोघनैर्युतः ।
दारवंशे कलङ्कश्च स्वदारभ्रातृपापवान् ॥ ४५६७ ॥

शूद्रस्त्रीवशमापन्नः पतितःशत्रुकृत्यवान् ।
कालान्तरे दरिद्रश्च[11] पितृद्रोही स्वपुत्रकः[12] ॥ ४५६८ ॥

---

1. द्विभार्यस्यैक
2. पुत्रिकाद्वयमायुष्यं
3. पुत्र....इति स्मृतम्
4. पितृव्यस्य दुराचारं
5. सक्तवान्....... ।
6. प्रतिबाधप्रपीडश्च
7. कमलांशश्च जातके
8. अल्पपुत्रिणी
9. स्त्रीप्रजास्त्र
10. स्वभर्ता
11. दरिद्रं स्यात्
12. अपुत्रकः

मीने नीचांशगे शुक्रे कर्मे राहौ[1] प्रजायते ।
स्वदारभगिनी क्लिष्टा[2] दुष्टा दुर्भगचारिणी ॥ ४५६९ ॥

मेषे सिंहांशगे मन्दे मीने चापांश जस्य च[3] ।
चत्वारिंशात् परं भाग्यं लक्ष्मीयोगमिति स्मृतम् ॥ ४५७० ॥

लग्नारूढे निशानाथे लग्नराशिदशाव्यथा ।
जननी क्लेशमाप्नोति मातुः सौख्यं न विद्यते ॥ ४५७१ ॥

अष्टमाधिपतौ लग्ने स्वर्भानुयुतवीक्षिते ।
गुरुदृष्टिविहीने च[4] दारारिष्टं विनिर्दिशेत् ॥ ४५७२ ॥

लग्नात्त्रिकोणगे जीवे रन्ध्रेशे लग्नकेन्द्रगे ।
लग्नराशिदशाकाले मृतप्रायोपिजीवति ॥ ४५७३ ॥

स्वपित्रधिक[5]दारिद्यं क्लेशं प्राप्नोति भूरिशः ।
पितृव्योद्वाहसौख्याप्तिः क्लेशश्च[6] ज्ञातिवर्गके ॥ ४५७४ ॥

धनाधिपे केन्द्रगते राहुसंयुतवीक्षिते ।
धनराशिदशाकाले धनलाभं[7] विनिर्दिशेत् ॥ ४५७५ ॥

कमलांशे चिप्रकाले धनेशे केतुसंयुते ।
धनराशिदशाकाले मौञ्जीबन्धनमादिशेत ॥ ४५७६ ॥

विद्यारम्भं च लभते[8] जीवनं क्लेशजीवनम् ।
स्वमातुलस्य सन्ताने[9] विप्लवेन विनिर्गते ॥ ४५७७ ॥

जन्मदेशे कलापं स्याद्राजान्तरमिति स्मृतम् ।
विक्रमाधिपतौ शुक्रे स्वोच्चे नीचांशसंस्थिते[10] ॥ ४५७८ ॥

---

1. राहु
2. क्लेशं
3. जातके
4. विहीनः स्यात्
5. स्वपिता
6. क्लेशं च
7. राशिं
8. प्रकुर्वीत
9. सन्तानं
10. जातके

तद्राशीशदशाकाले मातृवंशे वधूमृतिः ।
मातामही विनाशः[1] स्यान्मातृवंशे महाविपत्[2] ॥ ४५७९ ॥

पितृवंशे च दारिद्र्यं पितृव्यस्य कचित् सुखम् ।
सुखाधिपे धनस्थाने मीनलग्नसमुद्भवः[3] ॥ ४५८० ॥

सुखाराशिदशाकाले वदेदुद्वाहकर्मवान् ।
चतुर्थभावे[4]क्रूराः स्यु र्भूगृहक्षेत्रनाशनम् ॥ ४५८१ ॥

तत्तद्राशिदशाकाले स्थानच्युतिंविनिर्दिशेत् ।
उद्वाहानन्तरं सौख्यं ज्वरोपद्रववान् कचित् ॥ ४५८२ ॥

लग्नाच्चतुर्थगे भौमे गृहच्छिद्रकलापवान् ।
पितृपीडा भयं किंचिज्जन्मदेशे महाविपत्[5] ॥ ४५८३ ॥

विवाहानन्तरं [6]चैव स्वभार्यामातृनाशनम् ।
सुतराशिदशाकाले श्वशुरस्तु[7] विवाहवान् ॥ ४५८४ ॥

पितृव्यस्तु[8] महत्सौख्यं भ्रातृशोकेन कर्शितः ।
सुतेशे सुतराशिस्थे कर्मेशेन निरीक्षिते ॥ ४५८५ ॥

सुखराशिदशान्त्यादौ[9] राजद्वारे प्रवेशवान् ।
सुतराशिदशाभाग्यं योगं च द्वित्रिवत्सरम् ॥ ४५८६ ॥

पुत्रलाभं[10] च लभते स्वपित्ररिष्टमादिशेत् ।
मीनांशगे सुखाधीशे गुरुणा च निरीक्षिते ॥ ४५८७ ॥

तद्दशायां महत्सौख्यं राजद्वारे शुभाधिकम् ।
चतुस्त्रिंशात् परं क्लेशं चतुर्थे कुज[11]संस्थिते ॥ ४५८८ ॥

---

1. विनाशे
2. महद्विपत्
3. मीनलग्नस्य जातके
4. यस्याश्चतुर्थे
5. महद्विपत्
6. चेति
7. श्वशुरस्य
8. पितृव्यस्य
9. शान्त्यादि
10. प्रकुर्वीत स्वपिता
11. जातके

षष्ठराशिदशाकाले दारिद्र्येण च कर्शितः ।
मेषे सूर्ये मीनलग्ने दशमे राहु [1]संस्थिते ॥ ४५८९ ॥

षष्ठराशि दशाक्लेशं राजद्वारेऽवमानवान् ।
षष्ठाधिपे स्वोच्चगते भाग्यांशे बुधसंयुते ॥ ४५९० ॥

षष्ठराशिदशाकाले पुत्रिका च [2]शुभैर्युता ।
क्लेशकाले शुभं [3]चैव तूच्चराशिफलं समम् ॥ ४५९१ ॥

दशान्ते पुत्रिकोद्वाहं तृतीयांशे सुशोभनम् ।
स्वपुत्रोद्वाहसौख्यासिमिंत्रवर्गे महत्सुखम् ॥ ४५९२ ॥

उच्चक्षेत्रफलं [4]चैव तृतीयांशे फलानि च ।
नीचयोगफलं [5]चैव खण्डद्वयफलं वृथा ॥ ४५९३ ॥

मध्यखण्डान्तमारभ्य तृतीयेशत्रुनाशनम् ।
तृतीयांशे मध्यखण्डे योगवान् कीर्तिमान् भवेत् ॥ ४५९४ ॥

षष्ठराशिदशाकाले षष्ठेशांशकगे शनौ ।
[6]राहौ वा गोचरे वापि स्वशत्रुजनपीडितः ॥ ४५९५ ॥

षष्ठाष्टमव्ययेशानां स्फुटयोगं गते शनौ ।
स्वपभोश्च मनस्तापं देहायासं धनक्षयम् ॥ ४५९६ ॥

कमलांशकगे मन्दे [7]मीनलग्नोद्भवस्य च ।
सिंहराशिदशाकाले वैष्णवद्वेषमादिशेत् ॥ ४५९७ ॥

तृतीयांशे शत्रुनाशं स्वराजन्यजनावधि ।
देशे राजान्तरं [8]चैव पश्चाद्भाग्यं विनिर्दिशेत् ॥ ४५९८ ॥

कन्याराशिदशाकाले मीनलग्नो[9]द्भवस्य च ।
कमलांशे [10]प्रजातस्य बहुभाग्यं विनिर्दिशेत् ॥ ४५९९ ॥

---

1. जातके
2. शुभावहम्
3. चेतिउच्च
4. चेति
5. चेति
6. राहुर्वा
7. लग्नस्य जातके
8. चेति
9. लग्नस्य जातके
10. प्रयोगश्च

सप्तमारूढगे जीवे स्वांशे पूर्णबलान्विते ।
कमलांशे प्रजातश्च[1] नरवाहनवान् भवेत् ॥ ४६०० ॥

रन्ध्रराशिदशाकाले लक्ष्मी[2]योगोद्भवस्य च ।
पुत्रयोगाभिवृद्धिः स्यात्तृतीयांशे [3]महाविपत् ॥ ४६०१ ॥

अष्टमाधिपतौ स्वोच्चे नीचांशे गुरुवीक्षिते ।
मीनलग्ने प्रजातस्य मध्यमायुरितीरितः ॥ ४६०२ ॥

ज्ञातिवर्गे [4]मृतिश्चैव पुत्रपीडा भविष्यति ।
कूरमासे दारपीडा क्षिप्रेणारोग्यभाग्यवान् ॥ ४६०३ ॥

भाग्यराशिदशाकाले लक्ष्मी[5]योगसमुद्भवः ।
पुत्रप्राबल्ययोगेन बहुभाग्य[6]युतः सुखी ॥ ४६०४ ॥

कर्मराशिदशाकाले कर्मे [7]राहौ च संस्थिते ।
[8]लक्ष्मीयोगे मीनलग्ने कर्मराशिदशाविपत् ॥ ४६०५ ॥

तत्त्रिकोणदशाकाले मृतपायोपजीवति ।
चन्द्रराशिदशासन्धौ[9] स्वजनारिष्टशोकवान् ॥ ४६०६ ॥

कर्मराशिदशाकाले रन्ध्राधिपतिवत्सरे ।
कुळीरमासे निर्याणमथ वा तत्त्रिकोणगे ॥ ४६०७ ॥

[10]भावाधिपफलाध्याये [11]लक्ष्मीयोगोद्भवस्य च ।
शनिनाड्यांफलं स्वल्पं शुक्रनाड्यां[12] तु विस्तृतम् ।
वर्षचर्याफलादीनि योजयेत् कालवित्तमः ॥ ४६०८ ॥

॥ इति मीनलग्ने कमलांशकफलम् ॥

—:*:—

---

1. प्रजातस्य
2. योगस्य जातके
3. महद्विपत्
4. मृतिं चेति
5. योगस्य जातके
6. प्रदः सुखी
7. राहुश्च जातके
8 मीनलग्ने लक्ष्मीयोगे
9. संधि
10. भावपांश
11. योगस्य जातके
12. नाडीषु विस्तरेत्

## ॥ [1]तुलालग्ने निर्मलांशः ॥

निर्मलांशे तुलालग्ने पूर्वभाग[2]समुद्भवः ॥ ४६०९ ॥
[3]शूद्रजन्मा सुखी नित्यं [4]नवमोऽयं प्रकीर्तितः ।
मकरांशकगे चन्द्रे [5]नीचे राहुसमन्विते ॥ ४६१० ॥

लग्नेशे शनिसंयुक्ते वनप्रान्ते प्रसूतिमान् ।
तुलालग्नेऽर्किसंदृष्टे निर्मलांशो[6]द्भवस्य च ॥ ४६११ ॥

वनप्रान्ते पुरे वासं जननं च विनिर्दिशेत् ।
निर्मलांशे पूर्वभागे [7] वीथ्योस्तु यमसोमयोः ॥ ४६१२ ॥

प्राग्भागे जननं [8]चैव ह्युत्तरद्वारके गृहे ।
उत्तरांशे प्रजातस्य[9] वीथ्योस्तुचकपाशिनोः ॥ ४६१३ ॥

महानदीप्रान्त्यदेशे नगरे प्रसवो[10] भवेत् ।
निर्मले चोत्तरे भागे पञ्चमोऽयं प्रकीर्तितः[11] ॥ ४६१४ ॥

अथवा च द्वितीयः[12] स्यान्नदीप्रान्ते प्रसूतिमान् ।
निर्मलांशे सत्कुलीनः पूर्वभागे शुभाकृतिः ॥ ४६१५ ॥
उत्तरांशे श्यामतनुः कृशदेहस्वरूपवान् ।
ग्रन्थान्तरे निर्मलांशे तुलालग्नसमुद्भवः[13] ॥ ४६१६ ॥

गुरुदृष्टे[14] सुदीर्घायुः स्थूलभूतशरीरवान् ।
गुरुदृष्टिफलं पूर्णं पूर्वभागोद्भवस्य च[15] ॥ ४६१७ ॥

---

1. निर्मलांशतुलालग्ननाडीफलम्
2. भागस्य जातके
3. शूद्रे जन्मसुखी
4. नवमे गर्भे जातकम्
5. नीच
6. शस्य जातके
7. दक्षिणोत्तरवीथिषु
8. चेति द्वारगे
9. प्रजातश्चप्राक् च पश्चिमवीथिषु
10. प्रसवं स्मृतम् ।
11. पञ्चमे गर्भजातकम्
12. द्वितीयं
13. लग्नस्यजातके
14. दृष्टि
15. भागस्य जातके

प्रसूतिसमये विप्रकालज्ञौ च[1] समीपगौ ।
उत्तरांशे मन्दफलं भिषग् [2]विप्रौ समीपगौ ॥ ४६१८ ॥

[3]वसन्तः सूतिकागेहे सूतिकाले गृहे घनम् ।
निर्मले चोत्तरे भागे तुलालग्ने शनीक्षिते ॥ ४६१९ ॥

प्रसूतिकाले जननी वेदनाधिक[4]संयुता ।
पूर्वभागे क्वचिच्चेति क्षिप्रेण प्रसवः स्मृतः[5] ॥ ४६२० ॥

गुरुदृष्टिवशात् सौख्यं बालारिष्टं न विद्यते ।
सिंहे मन्दे क्रिये जीवे मेषांशे पापवर्जिते ॥ ४६२१ ॥

निर्मलांशे पूर्वभागे चन्द्रदोषः[6] क्वचिद्भवेत् ।
नीचे मन्दांशगे चन्द्रे निर्मलांशसमुद्भवः[7] ॥ ४६२२ ॥

[8]पित्ररिष्टोपशान्त्यर्थं स्वर्णदानं प्रदापयेत् ।
गां दद्यादैन्द्रनक्षत्रे बालारिष्टोपशान्तये[9] ॥ ४६२३ ॥

[10]आयुष्मन्तौ च पितरौ तुलालग्नोद्भवस्य च ।
वित्ते राहुयुते चन्द्रे तदीशे भाग्यराशिगे ॥ ४६२४ ॥

चन्द्रारिष्टोपशान्त्यर्थं राजतं चन्द्रमर्चयेत् ।
स्वर्णनागप्रदानेन बालारिष्टं न विद्यते ॥ ४६२५ ॥

निर्मलांशे पूर्वभागे चन्द्रदोषो[11] न विद्यते ।
उत्तरांशे बहुत्वं स्याद्दोषं मासत्रयं [12]वदेत् ॥ ४६२६ ॥

---

1. ज्ञान
2. चन्द्र
3. प्रसूतिके गृहे वासं सूतिकाले धने गृहे ।
4. आदिशेत्
5. प्रसवं स्मृतम्
6. दोषं
7. निर्मलांशस्य जातके
8. पितारिष्टो
9. ज्येष्ठनक्षत्रे बालारिष्टं विनिर्दिशेत्
10. पितृमातृचिरायुष्यं तुलालग्नस्य जातके ।
11. दोषं
12. स्मृतम्

पूर्वभागे कचिच्चेति शान्त्या शान्तिं प्रयास्यति ।
तुलालग्ने क्रिये जीवे मेषांशे धार्मिकः सुधीः ॥ ४६२७ ॥

स्वपिता शिवभक्तश्च देवब्राह्मणभक्तिमान् ।
कालान्तरे भाग्यवृद्धिस्तत्पुत्रद्वेषमादिशेत् ॥ ४६२८ ॥

भाग्याभिवृद्धिमान् रागी धर्मपुण्यपुराणवित् ।
निर्मलांशे पिता बाल्ये[1] भ्रातृद्वयप्रपीडितः ॥ ४६२९ ॥

स्वपितामहभाग्याप्तिःसोदरी भ्रातृसंयुतः ।
तटाकोद्यान[2]निर्माता वैदिकाचारतत्त्ववित् ॥ ४६३० ॥

लग्नाद्भाग्यं गते भौमे निर्मलांशोद्भवस्य च[3] ।
क्रूरहा स्वपिता क्रोधी भ्रातृद्वेषकलापवान् ॥ ४६३१ ॥

अस्वतन्त्रोऽल्पकालं च पश्चात् स्वातन्त्र्यभाग्यवान् ।
बाल्ये दुष्टस्वभावश्च परस्त्रीसङ्गपापवान् ॥ ४६३२ ॥

चोरकृत्यं कचित् कालं यौवने ग्रन्थिरोगवान् ।
पश्चात्तापी सुधर्मात्मा शिवलिङ्गप्रपूजकः[4] ॥ ४६३३ ॥

निर्मलांशे पूर्वभागे वयोमध्ये पिता सुखी ।
धर्मकार्यरतो नित्यं ज्ञातिद्वेषकलापवान् ॥ ४६३४ ॥

वार्धके पुत्रमूलेन बहुभाग्ययुतः[5]सुखी ।
निर्मलांशे पूर्वभागे [6]स्वपितुर्दश सोदराः ॥ ४६३५ ॥

अथ वा द्वादशश्चैव[7] दत्तपुत्रप्रदो भवेत् ।
पितृष्वसैका माङ्गल्या रोगिणी पुत्रसंयुता[8] ॥ ४६३६ ॥

---

1. भाग्ये भ्रातृद्वयमसौख्यवान्
2. धर्मात्मा
3. निर्मलांशस्य जातके
4. पश्चात्तापसुधर्मात्मा शिवलिङ्गप्रपूजवान्
5. प्रदः
6. स्वपिता दश
7. द्वादशश्चेति
8. पितृष्वसैकमाङ्गल्यं रोगी पुत्रवती सुखी ।

पितृष्वस्तृ[1]सुतः कश्चित् सपत्नीमातृयोगवान् ।
बहुभाग्यार्थसम्पन्नो भेदभ्रातृविरोधवान् ॥ ४६३७ ॥

निर्मलांशे पूर्वभागे [2]स्वपितुर्भगिनीसुतः ।
राजयोगं [3]च लभते लोके ब्राह्मण्यमुत्तमम् ॥ ४६३८ ॥

पितुः कनिष्ठभगिनीतत्सुतस्य फलं स्मृतम्[4] ।
[5]स्वपितुर्ज्येष्ठभगिनी वैधव्येन च कर्शिता ॥ ४६३९ ॥

[6]तत्पुत्रस्त्वेति दारिद्र्यमेकः कश्चिद्द्विभार्यवान् ।
निर्मलांशे पूर्वभागे लाभे [7]मन्दे च संस्थिते ॥ ४६४० ॥

स्वपितृव्यसुतौ द्वौ च स्वगोत्रे दत्तपुत्रकौ[8] ।
दुर्मार्गवृत्तिमान् कश्चिन्मित्रप्रभुबहुत्ववान् ॥ ४६४१ ॥

स्वभेदमातृकार्येण[9] पुत्रोत्पत्तिविनाशनम् ।
अदृष्टयत्ने पुत्राप्तिर्मध्ये [10]गण्डाद्विमोचितः ॥ ४६४२ ॥

भेतभ्रातृसुतद्वेषी तस्य[11] पुत्रफलं स्मृतम् ।
दारद्वयं च लभते भाग्यवान् पापचेतनः[12] ॥ ४६४३ ॥

स्वपितृव्यसुतस्थाने मन्दे चापत्रिकोणगे ।
स्वपितृव्यसुतः [13]कश्चिद्ग्रहशङ्काप्रपीडितः ॥ ४६४४ ॥

चोरकृत्ययुतो[14] नित्यं ज्ञातिवित्तापहारकः ।
तस्य दोषवशाच्चैव[15]सन्तानारिष्टमादिशेत् ॥ ४६४५ ॥

---

1. पितृष्वसा
2. स्वपिता भगिनी
3. प्रकुर्वीत
4. पिता कनिष्ठभगिनी तत्सुतस्य इदं फलम्
5. स्वपिता ज्येष्ठ
6. तत्पुत्रस्येति दारिद्र्यमेकः
7. मन्दस्य जातके
8. पुत्रवान्
9. मातृहीनेन
10. गण्डं निवर्तिमान्
11. सुतद्वेषं कश्चित्
12. प्रकुर्वीत भाग्यवान् पापचेतसः
13. कश्चिद्गृह
14. प्रवो
15. वशाचेति

भानुव्रतादिपुण्येन देहारोग्यं क्वचित् सुखम् ।
सन्तानोत्पत्तिमाप्नोति [1]ह्येकपुत्रयुतः सुखी ।
लाभे स्वोच्चांशगे मन्दे भार्गवेण समन्विते ॥ ४६४६ ॥

स्वपितृव्यसुतः कश्चिद्राजद्वारे प्रसिद्धिमान् ।
कलत्रद्वयवान् रागी पुत्रशोकेन कर्शितः ॥ ४६४७ ॥

पितृव्यद्वेषपापेन पुत्रोत्पत्तिविनाशनम् ।
कालान्तरे सुतप्राप्तिर्जन्मप्रभृति सौख्यवान् ॥ ४६४८ ॥

मध्ये वयसि सन्तापी[2] वातरोगेण कर्शितः ।
ज्ञातिद्वेषकलापेन क्लेशं प्राप्नोति भूरिशः ॥ ४६४९ ॥

निर्मलांशे पूर्वभागे स्वपितृव्यसुतस्य च ।
[3]लाभस्थशनिदोषाच्च जन्मदाये मृतिं वदेत् ।
एका कनिष्ठभगिनी समाङ्गल्या मृतिं लभेत्[4] ॥ ४६५० ॥

जन्मदाये फलं [5]चैव पितृव्यस्य तुलाशनौ ।
जीविते जन्मदायान्ते प्रबलज्ञातिनाशनम् ॥ ४६५१ ॥

सम्पद्दाये शुक्रभुक्तौ दशामध्येऽथ वा यदि ।
निर्मलांशे पितृव्यस्य नाशं च मनुरब्रवीत् ॥ ४६५२ ॥

अपरेवय[6] सिपिता विशेषज्ञानबुद्धिमान् ।
धनधान्याभिवृद्धिः स्याद्योगप्राबल्यवान् सुखी ॥ ४६५३ ॥

नवमे कुजदोषेण जन्माब्दे व्याकुली[7] पिता ।
[8]आ बाल्यं च मनस्तापं स्वपितुर्भाग्यमादिशेत् ॥ ४६५४ ॥

---

1. एकपुत्र प्रदः
2. सन्तापं
3. लाभेऽर्कनन्दने दोषाज्जन्मदाये
4. सुमङ्गल्या मृतिं वदेत्
5. चेति
6. अपरे
7. व्याकुलं
8. आधानादि स्वपिता भाग्यमादिशेत्

उत्तरांशे विशेषेण स्वपिता [1]ह्यपमृत्युमान् ।
स्वपितृव्यसुतारिष्टं प्रबलज्ञातिनाशनम् ॥ ४६५५ ॥

पूर्वभागे पिता जाड्यं क्षिप्रेणारोग्यभाग्यवान् ।
तातम्बिके सौख्ययुक्ते ज्येष्ठभ्राता शुभान्वितः[2] ॥ ४६५६ ॥

पितामहाधिपे मन्दे स्वोच्चांशे बुधसंयुते ।
पितामहः [3]प्रसिद्धश्च बहुभ्रातृसमन्वितः ॥ ४६५७ ॥

लग्नाद्द्वितीयगे [4]राहौ कर्मे सूर्ये च संस्थिते ।
बाल्ये पितामहः [5]क्लेशी दारिद्र्येण च कर्शितः ॥ ४६५८ ॥

दक्षिणोत्तरवीथीषु सञ्चारं स्वपितामहः ।
विवाहानन्तरं भाग्यं सौख्यं पुत्रोत्सवात् परम् ॥ ४६५९ ॥

तुलालग्ने निर्मलांशे ज्ञानी स्यात् स्वपितामहः ।
यौवनान्ते सुभाग्याप्तिर्वनस्थलगतः सुखी ॥ ४६६० ॥

गुरुद्वयं पूजयति[6] वैदिकाचारधार्मिकः ।
अनाचारी[7] क्वचित् काले पश्चात् सन्मार्गवृत्तिमान् ॥ ४६६१ ॥

पितामहाधिपे मन्दे शुभद्वयसमन्विते ।
निर्मलांशे पूर्वभागे निर्मलः स्वपितामहः ॥ ४६६२ ॥

भ्रातृश्रेष्ठः सुखी नित्यं सत्कलत्रैकवान् सुखी ।
बन्धुवर्गे सुपूज्यश्च सोदरभ्रातृपोषकः ॥ ४६६३ ॥

एकभ्रातृयुतो मानी सत्पुत्रधनधान्यवान् ।
निर्मलांशे पूर्वभागे गुरुणा च निरीक्षिते ॥ ४६६४ ॥

---

1. अपमृत्युकृत्
2. तातम्बिका सौख्यमेति ज्येष्ठभ्रातृशुभावहम्
3. प्रसिद्धिश्च
4. राहुकर्मे सूर्यस्य जातके
5. क्लेशं
6. गुरुद्वये सुपूज्यश्च
7. अनाचारं

प्रपितामहपुण्येन वंशे भाग्याभिवर्धनम्[1] ।
पितामहाधिकं भाग्यं ज्येष्ठभ्रात्रधिकं धनम्[2] ॥ ४६६५ ॥

जातकस्य फलं[3] चैव निर्मलांशे धनी सुखी ।
लाभे बुधयुते मन्दे भार्गवेण समन्विते ॥ ४६६६ ॥

निर्मलांशे पूर्वभागे ज्येष्ठभ्राता[4] सुयोगवान् ।
लिपित्रयप्रवीणश्च रक्तवर्णः शुभाकृतिः ॥ ४६६७ ॥

कलत्रद्वयवान् भोगी सहोदर्या बहुत्ववान् ।
निर्मलांशे ज्येष्ठभ्राता बहुव्यापारचिन्तकः[5] ॥ ४६६८ ॥

पितृवाक्यरतो नित्यं देवब्राह्मणपोषकः ।
अल्पपुत्रार्थसन्तोषी पुत्रत्रययुतो भवेत्[6] ॥ ४६६९ ॥

द्वीपान्तरेषु वस्तूनि स्वर्णव्यापारजीवकः[7] ।
सम्पद्दाये जातकश्च ज्येष्ठभ्रातृप्रियायुतः[8] ॥ ४६७० ॥

विशेषप्रबलो भूत्वा[9] गृहे लक्ष्मीकटाक्षवान् ।
उत्तरांशे प्रजातस्य[10] वयोमध्ये सहोदरः ॥ ४६७१ ॥

ज्येष्ठभ्रातृविनाशेन क्लेशं प्राप्नोति भूरिशः ।
सिंहे मन्दे तुलालग्ने ज्येष्ठभ्रातृवियोगवान् ॥ ४६७२ ॥

पापदृष्टियुते चैव[11] फलमेतद्विचिन्तयेत् ।
निर्मलांशे पूर्वभागे ज्येष्ठभ्राता चिरायुषः[12] । ४६७३ ॥

---

1 वृद्धिकृत्
2. भ्रातादिकं प्रियम्
3. चेति
4. भ्रातृ
5. भ्रातृबहुव्यापारचिन्तवान्
6. निवासवान्
7. द्वीपान्तरादिवस्तूनि स्वर्णव्यापारजीवनम्
8. जातकस्य ज्येष्ठभ्रातृप्रियावहम्
9. प्रबलं चेति
10. प्रजातश्च
11. युतश्चेति
12. भ्रातृचिरायुषम्

सहोदरीविहीनः[1] स्यात्ज्येष्ठभ्रातृविनाशवान् ।
[2]त्रिभगिन्यश्चिरायुष्यस्त्वथ वा वेदसङ्ख्यकाः ॥ ४६७४ ॥

उत्तरांशे प्रजातस्य पश्चाद्भ्राता चिरायुषः ।[3]
निर्मलांशे पूर्वभागे सन्ति द्वादश सोदराः[4] ॥ ४६७५ ॥

दशसङ्ख्याथ वा चैव[5] वेदसङ्ख्याः सहोदराः ।
[6]दीर्घायुषाः भविष्यन्ति सोदर्यौ द्वे समाङ्गस्थे ॥ ४६७६ ॥

शेषं नाशमिति प्राहुर्ज्येष्ठभ्रातृवशाच्छ्रियम् ।
ग्रन्थान्तरे निर्मलांशे पूर्व[7]भागोद्भवस्य च ॥ ४६७७ ॥

[8]त्रिभगिन्यश्चायुष्मत्यः पश्चाद्भ्रातृविनाशवान् ।
भौमे यावत् [9]फलानि स्युस्तावत्संख्याश्चिरायुषाः ॥ ४६७८ ॥

वंशे भाग्याभिवृद्धिः स्यान्निर्मलांशे सुखी धनी ।
वर्गोत्तमे विक्रमेशे सप्तमे पापवर्जिते ॥ ४६७९ ॥

ज्येष्ठ[10]भ्राताचिरायुष्मान् बहुभाग्ययुतः सुखी ।
[11]केषांचित्सोदराणां तु सन्तानोत्पत्तिनाशनम् ॥ ४६८० ॥

पुत्राभावं [12]प्राप्नुवन्ति स्त्रीप्रजाबहुसंयुताः ।
निर्मलांशे पूर्वभागे तुलालग्नो[13]द्भवस्य च ॥ ४६८१ ॥

[14]द्वे भगिन्यौ पुत्रवत्यावेका भाग्यवती शुभा ।
क्लेशिता च [15]परा चैव दारिद्र्येण च कर्शिता ॥ ४६८२ ॥

---

1. विहीनं
2. भगिनीत्रयमायुष्यं
3. प्रजातश्च पश्चाद्भ्रातृचिरायुषम्
4. सोदरा द्वादशस्य च
5. चेति
6. दीर्घायुर्योगमित्याहुर्भगिनीद्वमाङ्गली ।
7. भागस्य जातके
8. भगिनीत्रयमायुष्यं
9. यावत्फलाः सन्ति तावत्सौख्यं चिरायुषम्
10. ज्येष्ठभ्रातृचिरायुष्यं बहुभाग्यप्रदस्सुखी
11. केचित्सहोदर.......शं
12. मतिश्चेति बहुस्त्रीप्रजसंयुते
13. तुलालग्नस्य जातके
14. भगिनी द्वौ पुत्रवती एका भाग्यवती सुखी
15. परायेक

पूर्वभागे फलं सत्यं सोदर्याश्च चतुष्टयम् ।
मातृस्थानाधिपे मन्दे स्वोच्चांशे गुरुवीक्षिते ॥ ४६८३ ॥

निर्मलांशे प्रजातस्य[1] स्वमाता चिरजीविनी ।
मीने [2]चन्द्रे सिते लाभे चरलग्नोद्भवस्य च ॥ ४६८४ ॥

त्रिषडायगते मन्दे मातृवंशः [3]क्षयंगतः ।
माता गुणवती पूता भ्रातृभाग्यसमन्विता ॥ ४६८५ ॥

मातृसौख्यविहीनश्च[4] मातृभाग्यविवर्जितः ।
भेदभ्रातृयुतश्चैव[5] पितृभाग्ययुत सुखी ॥ ४६८६ ॥

उत्तरांशे प्रजातस्य[6] निर्मलांशे तथैव च ।
स्वपित्र[7]रिष्टतः मातु पश्चान्मरणमादिशेत् ॥ ४६८७ ॥

जननी मृतिमाप्नोति तुलांशे वृश्चिके शनौ ।
शनिद्वितीयपर्याये तुलान्ते मातृनाशनम् ॥ ४६८८ ॥

विपत्तारदशासंधौ[8] जननीनाशमादिशेत् ।
शनेः प्रथमपर्याये गोचरे मिथुने शनौ ॥ ४६८९ ॥

विपत्तारदृशामध्ये पितृनिर्याणमादिशेत् ।
तत्त्रिकोणेऽपमृत्युश्च शान्त्या शान्ति प्रयास्यति ॥ ४६९० ॥

[9]आयुष्मन्तौ च पितरौ पूर्वभागे न संशयः ।
उत्तरांशे प्रजातस्य[10] दशमाब्दे पितुर्मृतिः ॥ ४६९१ ॥

---

1. प्रजातश्च
2. सूर्ये सितेलाभे चरलग्नस्य जातके
3. मातृवंशे
4. विहीनं स्यान्मातृ
5. युतश्चेति पितृप्रदः सुखी
6. प्रजातश्च निर्मलांशस्य जातके
7. स्वपितारिष्टतः पूर्वे
8. विपत्तारदशासंधि
9. पितृमातृचिरायुष्यं
10. प्रजातश्च

अष्टादशेऽथवा चेति विंशाब्दे वा मरिष्यति ।
पूर्वभागे च तत्काले [1]स्वपितुर्जाड्यमादिशेत् ॥ ४६०२ ॥

ज्ञातिवर्गे [2]त्वरिष्टं स्याच्छान्त्या शान्ति प्रयास्यति ।
वित्ते राहुयुते[3] चन्द्रे शकटे च प्रजायते ॥ ४६९३ ॥

बहुविद्यार्थसंपन्न ऊहापोहपटुः सुखी ।
विद्यास्थानाधिपे मन्दे स्वोच्चांशे भृगुसंयुते ॥ ४६९४ ॥

[4]जात्यानुगुण्यविद्यार्तिमणिरत्नपरीक्षकः ।
निर्मलांशे पूर्वभागे सप्तमे देवपूजिते ॥ ४६९५ ॥

सत्कथाप्रियवान्नित्यं धर्मशास्त्रपुराणवित् ।
इष्टापूर्तसुधर्मिष्ठस्त्यागी सर्वजनप्रियः ॥ ४६९६ ॥

पितामहाधिकं भाग्यं महादान प्रदः सुखी ।
विद्यारम्भं पञ्चमाब्दे तृतीयाब्दे ज्वराद्भयम् ॥ ४६९७ ॥

बाल्ये मान्द्यज्वरादीनि मसूरीज्वरपीडितः[5] ।
तद्दोषपरिहारार्थं चन्द्रप्रार्थनमादिशेत् ॥ ४६९८ ॥

नागस्य [6]बिम्बदानेन देहारोग्यं महत्सुखम् ।
वर्गोत्तमांशगे जीवे सप्तमे दीर्घजीवितः[7] ॥ ४६९९ ॥

बालारिष्टभयं नास्ति[8] गिरिर्वंज्रहतो यथा ।
उत्तरांशे प्रजातस्य[9] बालारिष्टं भविष्यति ॥ ४७०० ॥

जीविते दीर्घमायुष्यं भावनाद्यां तु विस्तृतम्[10] ।
पूर्वभागे प्रजातश्च कमलायतलोचनः ॥ ४७०१ ॥

---

1. स्वपिता जाड्य　　2. अरिष्ट
3. राहुगते चन्द्रे शकटयोगस्य जातके
4. शान्त्यानुगुण्य विद्यार्तिमणिरत्नपरीक्षवान्
5. मसूरीज्वरगण्डवान्　　6. नागप्रतिमदानेन
7. आयुषम्　　8. बालारिष्टमिदं चेति
9. प्रजातश्च　　10. भावनार्थेषु विस्तरे

मृदुः कान्तवपुःसाधुःमधुराम्लरसप्रियः ।
वातश्लेष्मस्वभावश्च पित्तप्रकृतिदेहवान् ॥ ४७०२ ॥

द्विनामा सत्यवान् रागी किंचित्स्त्रीसङ्गपापवान् ।
शुक्रे शनियुते जातो भोगी स्याद्राजवल्लभः ।
वैश्यस्त्रीसङ्गवान् कामी पश्चात्तापाज्जितेन्द्रियः[1] । ४७०३ ॥

ज्येष्ठासुसन्तुष्टमनाः प्रजातः
स्यादल्पमित्रः कृशदीर्घगात्रः ।
शुचिर्महाबुद्धिरतीव भीरु
र्व्यथान्वितो धर्मपरायणश्च ॥ ४७०४ ॥

धर्मशास्त्रप्रियो नित्यं निर्मलांशे सुधार्मिकः ।
मन्दे भृगुयुते जात ज्ञानी तत्त्वविवेकवान् ॥ ४७०५ ॥

दान्तः शुचिः शठो वाग्मी निर्मलांशे सुनीतिमान् ।
किंचिद्रोगी प्रसन्नात्मा कोशसंग्रहवान् धनी ॥ ४७०६ ॥

मकरांशकगे चन्द्रे नीचे राहुसमन्विते ।
मनश्चाञ्चल्यवान् किंचिन्मन्दप्रकृतिकोपवान् ॥ ४७०७ ॥

चन्द्रे राहुयुते जातो राजचोरभयातुरः ।
निर्मलांशे वयोमध्ये भ्रातृद्वेषकलापवान् ॥ ४७०८ ॥

लग्नात् कर्मगते सूर्ये सेतुस्नानसुपुण्यवान् ।
गङ्गास्नान[2]फलप्राप्त्यै त्रिवारं सेतुयात्रिकः ॥ ४७०९ ॥

वयोमध्ये सुधर्मिष्ठस्तटाकोद्यानकारकः[3] ।
वार्धके सेतुमूलेषु कपिलादानपुण्यवान् ॥ ४७१० ॥

गङ्गातीरे सुधर्मात्मा [4]निष्काम्यार्थे सुधार्मिकः ।
गङ्गायात्रोपकारेण धर्मसिद्धियुतः[5] सुखी ॥ ४७११ ॥

---

1. पश्चात्तापिजितेन्द्रियः
2. फलाधिक्यं त्रिवारं सेतुयात्रवान्
3. सुधर्मासिस्तटाकोद्यानधर्मवित्
4. निष्फलांशे
5. यात्रोपकारादि धर्मसिद्धिप्रदः

मीने सूर्ये निर्मलांशे तुलांशे [1]दीर्घजीवितः ।
कर्माधिपदशाकाले [2]त्विदं फलमुदाहृतम् ॥ ४७१२ ॥

लग्नाधिपदशाभाग्यमुत्तरार्धे सुधार्मिकः ।
विशेषे धर्मसिद्धिः स्याल्लग्नाधिपतिदायके ॥ ४७१३ ॥

निर्मलांशे पूर्वभागे मधुमासे विवाहवान् ।
सम्पद्द्वाये द्वादशाब्दे वेदे च दशवत्सरे ॥ ४७१४ ॥

निर्मलांशे पूर्वभागे मधुमासे विवाहवान् ।
मेषांशगे मदाधीशे निर्मलांशोद्भवस्य च[3] ॥ ४७१५ ॥

उद्वाहो जन्मभूम्यां तु[4] प्राग्भागे नगरेषु च ।
मित्रत्रिकोणगे चन्द्रे दारजन्मर्क्षभं विदुः ॥ ४७१६ ॥

निर्मलांशे पूर्वभागे मधुमासे विवाहवान् ।
मेषांशगे मदाधीशे निर्मलांशो[5]द्भवस्य च ॥ ४७१७ ॥

गार्हस्थ्यगेह उद्वाहं कलत्रान्तरयोगवान् ।
लग्नाधिपदशाकाले चतुर्विंशतिवत्सरे ॥ ४७१८ ॥

त्रिंशाब्दे दारनाशः[6] स्यात् क्षिप्रेणोद्वाहयोगवान् ।
भाग्यांशगे विलग्नेशे लाभे भाग्यपसंयुते ॥ ४७१९ ॥

सुखाधिपेन संयुक्ते योगोऽयमिन्द्रनामकः[7] ।
इन्द्रयोगे तुलालग्ने भोगी स्याद्राजवल्लभः ॥ ४७२० ॥

धर्ममार्गरतो [8]नित्यमयुताधिकवित्तवान् ।
प्राकारगोपुरादीनां कर्ता धर्मयुतः[9] सुखी ॥ ४७२१ ॥

---

1. दीर्घमायुषम्
2. इदं
3. निर्मलांशस्य जातके
4. उद्वाहजन्मभागेषु
5. निर्मलांशस्य जातके
6. नाशं
7. योगोऽयमैन्द्रनामकम्
8. नित्यं अयु
9. पुरादीनि धर्मसिद्धिप्रदः

योगनाडीफलाध्याये फलं विस्तारमादिशेत् ।
लाभे मन्दे तुलालग्ने द्विकलत्रेऽपि पुत्रवान् ॥ ४७२२ ॥

[1]आयुष्मत्यस्त्रिकन्याश्च चतुष्पुत्रास्तु जीविताः ।
वार्धके पुत्रशोकेन क्लेशं प्राप्नोति भूरिशः ॥ ४७२३ ॥

जन्मदाये पितुः सौख्यं द्वितीयाब्दे श्रियावहम् ।
प्रथमाब्दे ज्येष्ठ[2]भ्रातुरुद्वाहानन्तरं सुखम् ॥ ४७२४ ॥

रन्ध्रेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
स्वदेहायासमाप्नोति पित्रादीनां मनोव्यथा ॥ ४७२५ ॥

चद्रांशगे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
जन्मदेशे [3]त्वरिष्टं स्यादमात्यादिजनावधि ॥ ४७२६ ॥

ज्ञातिवर्गे मनस्तापं प्रभुवर्गे विशेषतः ।
जन्मे शनिस्थिते काले स्वपिता व्याकुलं महत् ॥ ४७२७ ॥

भाग्यारूढाधिपेशांशदशायां चन्द्रभुक्तिषु[4] ।
जन्मदाये भाग्यवृद्धिः स्वपिता बहुभाग्यवान् ॥ ४७२८ ॥

दशाभावफलाध्याये योगनाडीदशाफले ।
निर्मलांशे पूर्वभागे फलविस्तारमादिशेत् ॥ ४७२९ ॥

इद्रयोगे प्रजातश्च[5] गर्भश्रीमान् महाधनी ।
हेमाम्बरवि[6]भूषाप्तिं वृश्चिकादित्रिमासगे ॥ ४७३० ॥

[7]सम्पद्दाये निर्मलांशे स्वगेहे स्वर्णपात्रवान् ।
विपद्दाये फलं पूर्णं क्षेमदाये विशेषतः ॥ ४७३१ ॥

प्रत्यग्दाये विशेषाप्तिर्नियुताधिकवित्तवान् ।
निर्मलांशे चक्रसन्धौ दशासन्धौच[8] कालगे ॥ ४७३२ ॥

---

1. पुत्रिकात्रयमायुष्यं
2. भ्रातृउद्वाहानन्तरं
3. अरिष्टं
4. जातके
5. प्रजातस्य
6. भूषाप्तिर्वृश्चिकादि
7. .. स्वगेहे
8. सन्धिर्दशासंधिश्च

षष्ठाष्टमाधीशभुक्तौ स्वदेहायासमादिशेत् ।
निर्मलांशे पूर्वभागे घनाधिपदशान्त्यगे ॥ ४७३३ ॥

कालमृत्युभयप्राप्तिर्मास्सु कीटादिषु त्रिषु[1] ।
इन्द्रयोगे निर्मलांशे षष्ट्यब्दे मृतिमादिशेत् ॥ ४७३४ ॥

चतुःपञ्चाशगे वर्षे ज्येष्ठभ्रातृविनाशवान् ।
तदर्धे [2]ह्यपमृत्युश्च शान्तिं कुर्याद्विचक्षणः ॥ ४७३५ ॥

षट्त्रिंशे क्लेशबाहुल्यं स्वशरीरसमं वदेत् ।
निर्मलांशे फलं सत्यं देहान्ते सद्गतिः स्मृता ॥ ४७३६ ॥

व्ययेशे भृगुसंयुक्ते लाभे सौम्येऽर्किसंयुते ।
देहान्ते पुण्यलोकाप्तिः [3]पश्चादुत्तमजन्मवान् ।
निर्मलांशे फलं सत्यं प्रत्यक्षं देवकेरलम् ॥ ४७३७ ॥

— :*: —

## ॥ कटकलग्ने कुटिलांशः ॥

## ॥ वृषभशुक्रराजयोगनाडीफलम् ॥

कुम्भांशे वृषभे शुक्रे राजयोगांशके स्थिते ।
चरलग्ने प्रजातस्य[4] सप्तविंशात् परं सुखम् ॥ ४७३८ ॥

लग्नाद्भाग्यव्ययाधीशौ[5] भार्गवेण युतेक्षितौ ।
राजयोग [6]इति ख्यातो राजा वा तत्समोऽपि वा ॥ ४७३९ ॥

राजयोग प्रजातश्च धीरश्शूरो भवेन्नरः ।
नाटकालं[7]कारकाव्यप्रियः सङ्गीतवल्लभः ॥ ४७४० ॥

---

1. वृश्चिकादित्रिमासगे
2. अपमृत्युश्च
3. पश्चादुत्तर
4. प्रजातश्च
5. द्व्यारूढौ
6. मिति
7. नाटकालंक्रिया

वदान्यः सत्यवादी च गन्धमाल्यांबरप्रियः ।
वृश्चिकांशे चरे लग्ने नीन्चे भौमे[1] प्रजायते ॥ ४७४१ ॥

लग्नात्तृतीयगे चन्द्रे रोगी दुर्बलदेहवान् ।
रक्तकासक्षयेणैव[2] योगकाले प्रपीडितः ॥ ४७४२ ॥

लग्नेशो मकरांशस्थे मूर्खप्रकृतिकोपवान् ।
[3]सिंहांशके क्रिये सूर्ये जीवे केतुसमन्विते ॥ ४७४३ ॥

विष्णुयोग [4]इति ख्यातो वैष्णवाचारभाग्यवान् ।
लग्ने कुजे व्यये मन्दे विष्णुयोगसमुद्भवः ॥ ४७४४ ॥

बाल्ये क्लेशं च दारिद्र्यं सप्तविंशसमावधि ।
विष्णुयोगे कृशाङ्गश्च[5] श्यामवर्णः कृशाकृतिः ॥ ४७४५ ॥

ब्रह्मविद्धनिकः शूरो मेधावी कलहप्रियः ।
सोदरा दश तेषां द्वौ प्रबलौ राजवल्लभौ ॥ ४७४६ ॥

[6]भगिन्यौ द्वे चिरायुष्यौ कनिष्ठभ्रातृयोगवान् ।
राजयोगांशगे शुक्रे लाभेकुम्भनवांशगे ॥ ४७४७ ॥

कनिष्ठभ्रातृमान् रागी ज्येष्ठभ्रातृसमन्वितः ।
सप्तविंशतिवर्षाणि क्लेशजीवनवान् भवेत् ॥ ४७४८ ॥

ततः पश्चाद्राजयोगं त्रिंशोपरि विशेषवान् ।
कुटिलांशे विष्णुयोगे राजयो[7]गोद्भवस्यच ॥ ४७४९ ॥

दिर्घायुषीच जननी [8]भगिन्येका ह्यभर्तृका ।
वैष्णवांशे विष्णुयोगे क्लेशिता स्वसहोदरी ॥ ४७५० ॥

---

1. भौम
2. क्षयादीजि
3. सिंह्राशे
4. विष्णुयोगस्य जातके
5. कृशाङ्गस्य
6. भगिनी द्वयमायुष्यं
7. राजयोगस्य जातके
8. जननी दीर्घमायुष्यं भगिनीद्र्वविपुत्तुकः

एका सुमङ्गली [1]मृत्युं क्षेमदाये सुकीर्तिमान् ।
कन्याचन्द्रे विष्णुयोगे हास्यावस्थां[2] गतेऽमृते ॥ ४७५१ ॥

बाल्ये क्लेशादिदारिद्र्यं कथाकार्यप्रवर्तकः ।
हास्यावस्थां[3]गते चन्द्रे सदांहास्यकथाप्रियः ।
परेङ्गितज्ञश्चतुरो मित्रवञ्चनबुद्धिमान् ॥ ४७५२ ॥

स्वकार्यचतुरः श्रीमान् शत्रुकार्यविघातकः ।
स्वराजपिशुनश्चापि[4] परकार्यविघातवान् ॥ ४७५३ ॥

हास्यावस्थाराजयोगे लग्ने पापे च[5] संस्थिते ॥ ४७५४ ॥

राजमुद्राधिकारी[6] स्याद्बहुपापयुतोभवेत् ।
हास्यावस्थां[7] गते चन्द्रे विष्णुयोगस[8]मुद्भवः ॥ ४७५५ ॥

श्रीवैष्णवमतालम्बी[9] स्वबन्धुजनपोषकः ।
राजवश्य[10]करो नित्यं स्वदारे ह्यति[11]कामुकः ॥ ४७५६ ॥

निषिद्धदिवसे काले स्वस्त्रीसङ्गरतो[12] भवेत् ।
कुळीरलग्ने कीटांशे [13]ह्युष्णप्रकृतिदेहवान् ॥ ४७५७ ॥

वातश्लेष्मविकारी[14] स्यात्किंचित्पित्तोल्बणातुरः ।
[15]परतापनपापेन पैत्यकाशप्रपीडितः ॥ ४७५८ ॥

तत्पापपरिहारार्थं ग्रहचक्रं प्रपूजयेत् ।
एकाशीति[16]पदं चक्रं पलेनैकेन निर्मितम् ॥ ४७५९ ॥

---

1. मृत्युः
2. हास्यावस्थे निशाकरे
3. हास्यावस्थे निशानाथे
4. स्वराजपिशुनश्चेति
5. पापस्य जातके
6. राजमुद्राधिकारं
7. हास्यावस्थे तिशानाथे
8. विष्णुयोगस्य जातके
9. श्रीवैष्णवमताचारं
10. राजवंश
11. अतिकामुकः
12. प्रदो
13. उष्णप्रकृति
14. विकारः
15. परोपतापपापेन
16. पलं

वेदोक्तविधिना पूजा ग्रहाराधन[1]पूर्वकम् ।
स्वराक्षरं लिखेच्चक्रेऽह्य [2]भिजिजित्यादिसंयुतम् ॥ ४७६० ॥

दैवज्ञाय[3]प्रदानेन महारोगाद्विमुच्यते ।
परतापी न राजांशे विष्णुयोगे[4] च जायते ॥ ४७६१ ॥

शिवद्रोहवशाद्रोगी[5] क्षेमदाये प्रपीडितः ।
ग्रहचक्रं [6]द्विवारं तु पूजादानं समाचरेत् ॥ ४७६२ ॥

[7]लक्षं मृत्युञ्जयं मन्त्रं जपेदीश्वरसन्निधौ ।
नवग्रहमखं चैव स्वगृह्योक्तविधानतः ॥ ४७६३ ॥

दानेन सौख्यमाप्नोति देहारोग्यं शुभावहम् ।
तदभावे शिवक्षेत्रे कोटिमृत्युञ्जयं जपेत् ॥ ४७६४ ॥

शिवलिङ्गप्रतिष्ठैव[8] रक्तकाशं प्रणश्यति ।
मेहरोगोपशान्त्यर्थं रक्तकासो[9]पशान्तये ॥ ४७६५ ॥

मधुकुम्भाज्यदानं[10]च कुर्यादारोग्यसिद्धये ।
कन्याचन्द्रे राजयोगो मकारांशे[11]च संस्थिते ॥ ४७६६ ॥

क्षेमदाये राजयोगो [12]ह्ययपरार्धे न संशयः ॥ ४७६७ ॥

स्त्रीप्रजा[13]बहुलीभावं पुंस्प्रजास्वल्पमादिशेत् ।
चतुर्थे पञ्चमे[14] भूयाद्विष्णुयोगे सुपुत्रकः[15] ॥ ४७६८ ॥

सुतेशे नीचराशिस्थे चापांशे राहुवीक्षिते ।
अधिकाङ्गसुतप्राप्तिर्दन्त[16]युक्तोऽथ वा भवेत् ॥ ६४६९ ॥

---

1. तत्क्रमात्
2. लिखेच्चक्रमभिजित्यादि विन्यसेत्
3. दैवज्ञस्य प्रदानेन रोगरोगाद्विमुच्यते
4. विष्णुयोगस्य जतके
5. वशाद्रोगं
6. द्विवारंस्यात्
7. लक्षं मृत्युञ्जयादीनि
8. प्रतिष्ठा वा
9. रक्तकाशं तथैव च
10. भाज्यदानेन किंचिदारोग्यभाग्यवान्
11. मकरांशस्य जातके
12. राजयोगमपरार्धे
13. स्त्रीप्रजाबहवश्चेति
14. गर्भे
15. सुपुत्रवान्
16. दन्तजाता

कुटिलांशे विष्णुयोगे ज्येष्ठभ्राता[1] द्विभार्यकः ।
रोगीबन्ध्यापतिश्चैवसन्तान प्रतिबन्धवान् ।
विष्णुयोगे कनिष्ठस्तु सत्कलत्रैकभार्यकः[2] ॥ ४७७० ॥

भ्रातृमूलात् प्रसिद्धिश्च बहुपुत्रार्थवान् सुखी ।
राजयोगे षोडशाब्दे [3]पित्ररिष्टमिति स्मृतम् ॥ ४७७१ ॥

विपद्दाये मृतिं चैति [4]तत ऊर्ध्वं न जीवति ।
लग्नेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४७७२ ॥

राजयोगे [5]पित्ररिष्टं मित्रप्रभुविनाशनम् ।
पश्चात् प्राबल्यमाप्नोति क्षेमदाये बुधान्तरे ॥ ४७७३ ॥

लाभे शुक्रे राजयोगे योगं [6]च वसुवत्सरम् ।
सिंहेऽर्कनन्दने काले महारोगेण कर्शितः ॥ ४७७४ ॥

मिथुने च तथा विद्यात् सूर्यभुक्तौ महद्भयम् ।
तद्दोषपरिहारार्थं दानं कुर्याद्विचक्षणः ॥ ४७७५ ॥

राजयोगे प्रजातश्च कुटिलांशसमुद्भवः[7] ।
[8]सूर्यचन्द्रौ यदैकस्थौ सिंहान्ते वक्रगे शनौ ॥ ४७७६ ॥

क्षयरो[9]गान्मृतिं विन्द्याद्राजयोगे त्वधोगतिः[10] ।
[11]अष्टाविंशे षट्त्रिंशे वा ह्येकचत्वारिवत्सरे ॥ ४७७७ ॥

कालमृत्युभयं चैति राजयोगसमुद्भवः ।
आ द्वात्रिंशादपमृत्युं[12] षट्त्रिंशाब्दान्तमेव च ॥ ४७७८ ॥

---

1. ज्येष्ठभ्रातृद्विभार्यवान्
2. कनिष्ठस्य सत्कलत्रैकभार्यवान्
3. पितारिष्टं
4. अतः
5. पितारिष्टं
6. योगं चेद्वसुवत्सरे
7. अंशस्य जातके
8. सौर्यचन्द्रमसौ काले
9. क्षयरोगं
10. अधोगति
11. एकचत्वारिंशकेऽब्दे अष्टाविंशतिवत्सरे ।
षट्त्रिंशेऽब्दे मृतिं चेति राजयोगस्य जातके ।
12. मृत्युश्च

जीविते राजयोगेषु[1] चत्वारिंशे मरिष्यति ।
विष्णुयोगे [2]पाञ्चरात्रमतानुष्ठानतत्पर: ॥ ४७७९ ॥

देहान्ते नरकं याति पतत्येव ह्यधोगतौ[3] ।
विष्णुयोगे व्यये मन्दे पुत्रसंस्कारहीनवान् ॥ ४७८० ॥

[4]सुतेन पालनं नैव ह्यन्त्यकाले न संशय: ।
व्यये मन्दे स्वपुत्रश्च मृत्युकाले विशेषत: ॥ ४७८१ ॥

ग्रामान्तरे वासमेति स्वपुत्रफलमादिशेत् ।

—:*:—

## तुलालग्ने इन्द्रांश·

इन्द्रांशगे [5]त्विन्द्रयोगे शुक्रे शनिसमन्विते ॥ ४७८२ ॥
तुलालग्ने प्रजातश्च गर्भश्रीमान् महाधनी ।
दीर्घबुद्धिर्विशालाक्षो धनिक: पुत्रमित्रवान् ॥ ४७८३ ॥

इन्द्रयोगे सुदीर्घायु: कीर्तिमान् पण्डित: सुखी ।
इन्द्रयोगोद्भव: श्रेष्ठ: कान्तश्च धनधान्यवान् ॥ ४७८४ ॥

कामी विद्वांश्च मानी च चञ्चलो धार्मिक: सुखी ।
[6]चन्द्रे राहुयुते नीचे त्विन्द्रयोगसमुद्भव: ॥ ४७८५ ॥

नीचसेवापरो नित्यं नीचराज्ये सुभाग्यवान् ।
नीचे नक्रांशगे चन्द्रे [7]त्विन्द्रयोगसमुद्भव: ॥ ४७८६ ॥

---

1. जीवितो राजयोगे तु
2. पञ्चरात्र मनुष्ठानस्य जातके
3. यान्ति पतत्येव अधोगति:
4. स्वसुतो बालकश्चैति अन्त्य
5. इन्द्रयोगे
6. चन्द्रराहुयुते नीचे इन्द्रयोगस्य जातके ।
7. इन्द्रयोगस्य जातके

दान्तः शुचिः शठो मानी भोगी गीतप्रियः सुखी ।
ग्रन्थान्तरे [1]स्वल्पपापी त्विन्द्रयोगेऽतिकामुकः ।
कालान्तरे धर्मबुद्धिर्देवब्राह्मणपोषकः ॥ ४७८७ ॥

ज्येष्ठासु सन्तुष्टमनाः प्रजातः
[2]सुनासिको वा कृशदीर्घगात्रः ।
शुचिर्महाबुद्धिरतीव भीरुः
श्रद्धान्वितो धर्मपरायणश्च ॥ ४७८८ ॥

इन्द्रयोगेन्द्रदे[3]वर्क्षे मकरांशे निशाकरे ।
नृपतेश्च प्रियो रागी वाग्मी कुशलबुद्धिमान् ॥ ४७८९ ॥

इन्द्रयोगे प्रजातस्य ज्येष्ठभ्राता[4] सुबुद्धिमान् ।
अनेकमित्रसंपन्नो भ्रातृमूलात् सुकीर्तिमान् ॥ ४७९० ॥

इन्द्रयोगे शुभे पापे गर्भाधानात् परं पितुः[5] ।
ज्ञातिद्वेषकलापेन वृत्तिच्छेदं विनिर्दिशेत् ॥ ४७९१ ॥

पितृमातृप्रपीडादि [6]गाधानान्तरं व्यथाम् ।
इन्द्रयोगे जन्मदाये जन्माब्दे [7]स्वपितुर्व्यथा ॥ ४७९२ ॥

ज्ञातिवर्गे विशेषेण पितृव्यस्तु शुभान्वितः[8] ।
पुत्रोत्सवादिसन्तोषः[9] पितृव्यस्य फलं स्मृतम् ॥ ४७९३ ॥

कश्चित् पितृव्यपुत्रस्तु[10] स्वगृहे चौर्यकृत्यवान् ।
कश्चिज्ज्ञातिजनद्वेषी[11] ज्ञातिवित्तापहारकः ॥ ४७९४ ॥

इन्द्रयोगे तुलालग्ने भाग्याधिपसमन्विते[12] ।
[13]पितरौ च चिरायुष्यौ ज्येष्ठभ्राता तथा भवेत् ॥ ४७९५ ॥

---

1. क्वचित् पापी इन्द्रयोगे
2. ...दीर्घगात्रः
3. योगेन्दु
4. प्रजातश्च ज्येष्ठभ्रातृ
5. पिता
6. आधानान्तरं व्यथा
7. स्वपिता व्यथा
8. पितृव्यस्य शुभावहम्
9. सन्तोषं
10. पुत्रस्य
11. द्वेषं
12. भाग्यारूढस्य जातके
13. पितृमातृचिरायुष्यं ज्येष्ठभ्रातुस्तथा

[1]पितृष्वसुः सुतः कश्चित् सपत्नीमातृयोगवान् ।
बहुभाग्यार्थसम्पन्नो बहुपुत्रयुतः[2] सुखी ॥ ४७९६ ॥

इन्द्रयोगे पिता बाल्ये स्वगृहे चौर्यकृत्यवान् ।
दारापवादमूलेन स्वपिता क्लेशवान् कचित् ॥ ४७९७ ॥

इन्द्रांशगे त्विन्द्रयोगे शुक्रे शनिसमन्विते[3] ।
जननी दीर्घमाङ्गल्या[4] स्वपिता धार्मिकः सुधीः ॥ ४७९८ ॥

नवमे कुजदोषेण स्वपिता मूर्खकृत्यवान् ।
मध्ये वयसि सन्तापमग्निमान्द्यप्रपीडितः ॥ ४७९९ ॥

तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ।
ग्रहचक्रप्रदानेन [5]ह्यायुरारोग्यवान् पिता ॥ ४८०० ॥

इन्द्रयोगे तुलालग्ने [6]त्वेकोने विंशवत्सरे ।
स्वपिता[7]ह्यपमृत्युं च शान्त्या शान्तिं प्रयास्यति ॥ ४८०१ ॥

तदर्धे स्वपिता ज्येष्ठभ्रातृशोकेन कर्शितः ।
जन्मदाये जीवभुक्तौ पितृव्यश्च[8] प्रपीडितः ॥ ४८०२ ॥

अपमृत्युभयं किंचित् पश्चादारोग्यमाप्नुयात् ।
इन्द्रयोगे जन्मदाये सुखेशांशत्रिकोणगे ॥ ४८०३ ॥

स्फुटयोगं गते मन्दे पितृव्यस्य [9]महाविपत् ।
ज्ञातिवर्गे सुतारिष्टं स्वपिता क्रूरमासगे ॥ ४८०४ ॥

देहायासं[10] च लभते जन्मदेशे नृपावधि ।
स्ववासदेशनृपतेः[11]स्वपितृव्यस्य चैव हि ॥ ४८०५ ॥

---

1. पितृष्वसा
2. प्रदः
3. इन्द्रयोगे शुक्रे शनिसमीपगे
4. माङ्गल्ये
5. आयुरारोग्यवान्
6. एकोने
7. अपमृत्युश्च
8. पितृव्यस्य
9. महद्विपत्
10. प्रकुर्वीत
11. स्ववासदेशान्नृपति स्वपितृव्य मथापि वा

जन्मदाये सुखेशांशे [1]त्वरिष्टं मन्दयोगके ।
पितृव्यारिष्टदोषार्थं शनिप्रार्थनमादिशेत् ॥ ४८०६ ॥

लोहप्रतिमा[2]दानेन ह्यायुरारोग्यसौख्यवान् ।
राहुभुक्त्यन्तमारभ्य गुरुभुक्ताविदं फलम् ॥ ४८०७ ॥

स्वजन्मदेशे नृपतिः क्लेशं प्राप्नोति भूरिशः ।
इन्द्रयोगे तृतीयाब्दे चतुर्थे षष्ठवत्सरे ॥ ४८०८ ॥

रन्ध्राधिपत्यदोषेण मसूरीज्वर[3]पीडितः ।
षष्ठाष्टमाधीशवारे क्रूरमासेन्द्रयोगके[4] ॥ ४८०९ ॥

क्रूरान्तरे जन्ममासे मसूरीज्वरमान्यवान् ।
तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ॥ ४८१० ॥

ऐन्द्रांशगे [5]त्विन्द्रयोगे शुक्रे शनिबुधान्विते ।
तुलालग्ने प्रजातस्य[6] सहस्रारिष्टनाशनम् ॥ ४८११ ॥

जन्मदाये च जन्माब्दे साधनेशस्य भुक्तिषु ।
नेत्रपीडामवाप्नोति क्षिप्रेणारोग्यमादिशेत् ॥ ४८१२ ॥

सिंहे शनियुते शुक्रे [7]त्विन्द्रांशे त्विन्द्रयोगके ।
बाल्ये स्वनेत्रपीडा स्यान्नागदानवशात् सुखम् ॥ ४८१३ ॥

शिरःप्रदेशे [8]जंङ्घायां हृदये वा व्रणाङ्कितः ।
लग्नाद्द्वितीयगे [9]राहौ मुखरोगः सुदुस्सहः ॥ ४८१४ ॥

बाल्ये नागप्रदानेन वक्त्ररोगो [10]निवर्तते ।
बालारिष्टभयं नास्ति नेत्रारोग्यकरं शुभम् ॥ ४८१५ ॥

---

1. मन्दयोगे अरिष्टकृत्
2. लोहप्रतिमदानेन आयुरारोग्य
3. मसूरीज्वरगण्डवान्
4. योगगे
5. इन्द्रयोगे
6. प्रजातश्च
7. इन्द्रांशे इन्द्रयोगगे
8. जाप्येवा
9. राहु
10. न विद्यते

भाग्यारूढे [1]त्विन्द्रयोगे भोगी भाग्यकुलोद्भवः ।
इन्द्रांशकगते शुक्रे कळत्रद्वययोगवान् ॥ ४८१६ ॥

ज्येष्ठभ्राता[2] तथा विन्द्यादुभौ तौ रोगशालिनौ ।
एका स्वसा क्लेशवती मध्ये[3]चैवतथापरा ॥ ४८१७ ॥

[4]द्वे भगिन्यौ सुमाङ्गल्यौ पुत्रिण्यौ च भविष्यतः ।
इन्द्रांशकगते शुक्रे [5]त्वसितेन समन्विते ॥ ४८१८ ॥

एका स्वसा सौख्यवती दत्तपुत्रवती [6]शुभा ।
ऐन्द्रांशे[7] त्विन्द्रयोगे च सिंहे शुक्रेऽर्किसंयुते ॥ ४८१९ ॥

भाग्याधिपेन संयुक्ते नरवाहनराड्भवेत् ।
वाहनद्वयवान् रागी धनिकः कीर्तिमान् सुखी ॥ ४८२० ॥

इन्द्रयोगदशाकाले [8]त्वपरार्धं इदं फलम् ।
चन्द्रलग्नद्वयाधीशदशायां गुरुभुक्तिषु ॥ ४८२१ ॥

इन्द्रयोगे [9]पित्ररिष्टं पश्चात् प्रबलयोगवान् ।
शुक्रास्तमनकाले [10]वा कुजमूढेऽथवापि च ॥ ४८२२ ॥

गोचरे वृषभे सौम्ये [11]भाग्यगे वा स्थितेऽपि वा ।
बुधे कुजयुते दृष्टे ग्रहचारफलं व्यथाम्[12] ॥ ४८२३ ॥

क्रूरमासे धरासूनौ[13] शुक्रे वास्तं गते यदि ।
ऐन्द्रांशगे [14]त्विन्द्रयोगे तत्काले क्लेशमादिशेत् ॥ ४८२४ ॥

---

1. इन्द्रयोगे
2. ज्येष्ठभ्रातृतथा विन्द्याद्वयं चेद्रोगशालिनौ
3. काचित्तथापरा
4. द्वयं चेति सुमाङ्गल्यं पुत्रिणी द्वे सहोदरी ।
5. असितेन
6. सुखी
7. इन्द्रयोगे
8. अपरार्धे
9. पितारिष्टं
10. शुक्रास्तमनकालेन
11. प्रश्नगे वास्ति ते यदि
12. व्यथा
13. धरासूनु
14. इन्द्रयोगे

देहायासं मनस्तापमर्थनाशं शिरोरुजम् ।
क्रूरकाले फलं चैति [1]त्विन्द्रयोगसमुद्भवः ॥ ४८२५ ॥

[2]यद्यष्टमे शनियुते प्रजातः
प्राप्नोति दृष्टे विपदं च दुःखम् ।
योगद्वयोश्च[3] निधनं च कश्चित्
योगोऽपरो मृत्युसमानदुःखम् ॥ ४८२६ ॥

यद्भावस्याष्टमे मन्दे यद्भावस्याष्टमेक्षिते ।
तद्भावः[4] क्लेशमाप्नोति मूर्त्यादिफलमीरयेत्[5] ॥ ४८२७ ॥

नीचे [6]चन्द्रे चेन्द्रयोगे मकरांशे च संस्थिते ।
मिथुनो[7] जीव इत्याहुर्वृषभो देहमुच्यते ॥ ४८२८ ॥

देहे पापग्रहे काले गोचरे देहजाड्यकृत् ।
जीवे तु जीवबाधा स्याद् द्वयोः पापे महाविपत्[8] ॥ ४८२९ ॥

जीवराशिगते भौमे जन्माब्दे जन्मदायगे ।
मान्द्यज्वरव्रणादीनि नेत्रपीडा क्वचित् क्वचित् ॥ ४८३० ॥

इन्द्र :—

मीनसौम्यदशारम्भे योगवान् कीर्तिमान् सुखी ।
जन्मदाये पितासौख्यं द्वितीयाब्दे शुभावहम ॥ ४८३१ ॥

---

1. इन्द्रयोगस्य जातके
2. यद्यष्ट शनियुते.......नतस्य दृष्टेऽथ वा तस्य विपत्तथापि ।
3. योगद्वयं स्यान्निधनं यथैको योगस्तथा मृत्युसमत्वमाहुः ॥
4. तद्भावं
5. यजयेत्
6. नीचेन्द्रे इन्द्रयोगे च मकरांशस्य जातके
7. मिथुनं जीवमित्याहु र्वृषभं देहमुच्यते
8. महद्विपत्

सम्पद्दाये विवाहः स्याज्ज्येष्ठभ्रातुः श्रियावहः[1] ।
सम्पद्भुक्तौ देहजाड्यं गृहे गोभूषणक्षयम् ॥ ४८३२ ॥

सम्पद्दाये पितृव्यस्य[2] कश्चित् पुत्रप्रपीडितः ।
तस्य दारवियोगेन क्लेशं प्राप्नोति भूरिशः ॥ ४८३३ ॥

लग्नाष्टमगते [3]केतावष्टमांशे च संस्थिते ।
तद्दशान्तर्दशाकाले चोराद्भीतिः कचित् कचित् ॥ ४८३४ ॥

घने [4]राहौ घनच्छेदः स्वदशान्तर्दशासु च ।
ज्ञातिकार्यकलापेन पश्चात् सौख्यं[5] विनिर्दिशेत् ॥ ४८३५ ॥

सम्पद्दाये विपद्भुक्तौ[6] स्वपितृव्यसुतामयम् ।
[7]किंचित् प्राबल्यमाप्नोति ह्येको भार्याविनाशवान् ॥ ४८३६ ॥

मातृपीडां मनस्तापं प्रबलज्ञातिनाशनम् ।
तन्मूलाद्व्याकुलं चैति [8]स्वपुत्रो नात्र संशयः ॥ ४८३७ ॥

पूर्वार्धे जातकस्यैव भ्रातृपीडां[9] विनिर्दिशेत् ।
उत्तरार्धे सौख्यमेति ज्येष्ठभ्रातृसुतोत्सवम् ॥ ४८३८ ॥

इन्द्रयोगे विपद्दाये क्षेमदाये च वा यदि ।
लाभे [10]शुक्रे प्रजातस्य निधिप्राप्तिर्न संशयः ॥ ४८३९ ॥

लाभस्थानगते काव्ये नीचांशरविवर्जिते ।
शनिदृष्टियुते वापि निधिज्ञः परदारगः[11] ॥ ४८४० ॥

इन्द्रयोगे महद्भाग्यं बुधांशे वैश्यजीवनम् ।
[12]शूद्रश्चेदेति प्राबल्यं बहुव्यापारवान् भवेत् ॥ ४८४१ ॥

---

1. विवाहं स्याज्ज्येष्ठभ्रातृश्रियावहम्
2. पितृव्यः स्यात्
3. केतौ अष्टमांशस्य जातके
4. राहुधनच्छेदं स्वदशान्तर्दशेषु च
5. स्वर्गं
6. विपभुक्तं
7. क्वचित् प्राबल्यमाप्नोति एको
8. स्वपुत्रा
9. जातकश्चैव भ्रातृपीडा
10. शुक्रप्रजातश्च विधि
11. परदारकः
12. शूद्रश्चेत् प्रबलं चेति

[1]रक्तवातज्वरं घोरं विदेशगमनं तथा ।
राजचोरभयं दुःखं केतोरन्तर्गते रवौ[2] ॥ ४८४२ ॥

सम्पद्दाये राहुभुक्तावैन्द्रांशकगते भृगौ ।
इदमेव फलं [3]चैव गुरुभुक्तौ शुभाशुभम् ॥ ४८४३ ॥

इन्द्रयोगे सर्वदाये षष्ठाधिपतिभुक्तिषु ।
क्रूरमासे व्याकुलं स्याद्देहपीडां विनिर्दिशेत् ॥ ४८४४ ॥

केत्वन्तरेऽथ वा [4]चैव शुक्रभुक्तौ दलं व्यथा ।
सम्पत्तारदशासन्धिकाले क्लेशफलं विदुः ॥ ४८४५ ॥

चन्द्रदृष्टिमहातार ताराकान्तेषु[5] राशिषु ।
इन्द्रयोगे महद्भाग्यं राजयोगो[6] भविष्यति ॥ ४८४६ ॥

[7]शुक्रपाके चेन्द्रयोगे राहुभुक्तौ महाविपत् ।
ज्वरभीतिं च लभते चन्द्रभुक्तौ तथैव च[8] ॥ ४८४७ ॥

[9]राजतं चन्द्रमभ्यर्च्य दानं कुर्याद्विचक्षणः ।
रन्ध्राधिपदशाकाले[10]त्वत्यन्तं क्रूरमादिशेत् ॥ ४८४८ ॥

स्वसमानजनक्लेशं सर्वनाडीफलं वदेत् ।
[11]सर्वयोगे चोत्तरांशे शुभाशुभफलं समम् ॥ ४८४९ ॥

इन्द्रयोगे धने [12]राहौ भोगी वर्गोत्तमांशगे ।
बाल्ये [13]रुजार्तदेहः स्यान्मध्ये प्रबलयोगवान् ।
ऋणवान् वार्धके किंचित्परवित्तापहारकः ॥ ४८५० ॥

---

1. अग्निवाह
2. रविः
3. चेति
4. चेति
5. कान्तस्य
6. योगं
7. पाके शुक्रे इन्द्रयोगे राहुभुक्तौ महद्विपत् ।
8. ज्वरगण्डं प्रकुर्वीत चन्द्रभुक्तौ तथा चरेत् ।
9. रजतं
10. अत्यन्तं
11. उत्तरं सर्वयोगे च शुभाशुभफलाफलम् ।
12. राहु
13. व्याधि तदेहः

कुलाभिमानी[1] स्वकुले प्रसिद्धो
रोगेण सन्तप्त[2]शरीरभाक् स्यात् ।
राजाधिराजैर्बहुमानितश्च[3]
विद्वज्जनैः पूजितकीर्तिमान् स्यात् ॥ ४८५१ ॥

वर्गोत्तमं विना राहौ द्वितीये ऋणवान् सुते[4] ।
वर्गोत्तमे शुभं चैति शुभयोगे सुकीर्तिमान् ॥ ४८५२ ॥

लग्नाधिपस्य यः शत्रुस्तद्भुक्तौ सर्वदायगे ।
अतीव क्लेशकार्याणि मित्रभुक्तौ धनागमम् ॥ ४८५३ ॥

समग्रहान्तरे काले शुभाशुभफलं समम् ।
[5]तात्कालिकमित्रग्रहस्यान्तर्दाये शुभाधिकम् ॥ ४८५४ ॥

शुभयोगे शुभं चैति [6]ह्यैन्द्रांशे च प्रजायते ।
ऐन्द्रांशगे [7]चेन्द्रयोगे लग्नाधिपदशासुखम् । ४८५५ ॥

भाग्याधिपदशाकाले तृतीयांशे शुभाधिकम् ।
लाभाधिपदशाकाले रन्ध्राधिपदशान्त्यगे ॥ ४८५६ ॥

मात्ररिष्टं [8]च लभते त्विन्द्रयोगसमुद्भवः ।
सर्वदाये चन्द्रभुक्तावन्तरान्तर्दशेऽथ वा ॥ ४८५७ ॥

विषचोरभयप्राप्तिः स्वगेहे नात्र संशयः ।
भौमान्तरे देहजाड्यं बलवानन्यमासके[9] ॥ ४८५८ ॥

स्वपिता व्याकुलं चैति पश्चात् सौख्यं [10]तथैव च ।
लाभाधिपदशाकाले कर्माधिपतिभुक्तिषु ॥ ४८५९ ॥

---

1. कुलाभिमाने
2. पृथर्न
3. राजाधिराजो बहुमानपूज्यो भिषाभिमनो
4. राहु द्वितीये ऋणवान् सुतः
5. तत्कालिके मित्रगेहे अन्तर्दाये
6. ऐन्द्रांशश्चैव जातके
7. इन्द्रयोगे
8. प्रकुर्वन्ते इन्द्रयोगस्य जातके
9. मासगे
10. विनिर्दिशेत्

राहुदोषवशात् क्लेशमादायादधिकव्ययम् ।
भ्रातृक्लेशं गृहच्छिद्रं लाभाधिपतिदायगे ॥ ४८६० ॥

[1]दशान्ते व्याकुलं चैति दशासन्धौ कचिद्भवेत् ।
कर्माधिपदशाकाले [2]चेन्द्रयोगोद्भवस्य च ॥ ४८६१ ॥

पुत्रप्राबल्ययोगेन नित्यं सन्तोषमादिशेत् ।
षष्ठेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ४८६२ ॥

सोदरादिजनक्लेशो[3] ज्ञातिशोको भविष्यति ।
अन्तरान्तर्दशामार्गे कर्मलाभेशदायगे ॥ ४८६३ ॥

फलं विस्तारमाप्नोति ह्यैन्द्रांशजनितस्तथा[4] ।
धनाधिपदशाकाले स्वदारादिसुतामयम् ॥ ४८६४ ॥

इन्द्रयोगे स्वपुत्रस्य[5] द्वितीयस्थग्रहान्तरे ।
इन्द्रयोगे कालमृत्युः साधनेशदशाविपत् ॥ ४८६५ ॥

इन्द्रांशकगते शुक्रे त्विन्द्रयोगसमुद्भवः[6] ।
पश्चादुत्तमजन्मा स्यान्मधुमासे मृतिं वदेत् ॥ ४८६६ ॥

योगनाडीफलं सत्यमैन्द्रांशे[7] जनितस्तथा ।
विंशोपरि सुभाग्याप्तिं [8]त्रिषष्टिपरमायुषम् ॥ ४८६७ ॥

—:*:—

1. देशान्ते व्याकुले चैति दशाद्वौ द्वौ
2. इन्द्रयोगस्य जातके
3. जनक्लेशं ज्ञातिशोकं
4. ऐन्द्रांशश्चैव जातके
5. स्वपुत्रश्च द्वितीयस्थ
6. इन्द्रजन्म योगस्य जातके
7. ऐन्द्रांशश्चैव जातके
8. सुभाग्याप्तिस्त्रिषष्टि

## ॥ मीनलग्ने शीतलांशः ॥

### ॥ शनिशुक्रफलम् ॥

सुधाषष्ठ्यंशगे मन्दे चरराशिचतुष्टये ।
शीतळांशे प्रजातश्च गौरवर्णः शुभाकृतिः ॥ ४८६८ ॥

मीने लग्ने सुते मन्दे भार्गवेण समन्विते ।
शीतलांशे प्रजातश्च[1] श्यामवर्णशरीरवान् ॥ ४८६९ ॥

हरिणांशकगे जीवे शीतलांशेऽर्कनन्दने ।
मीनलग्ने प्रजातश्च ज्येष्ठभ्रातृयुतः सुखी ॥ ४८७० ॥

स्वयं तृतीयगर्भः स्यात् पश्चाद्भ्रातृविनाशवान् ।
[2]सोदरैश्चयुतो मानी पितृभाग्यप्रतापवान् ॥ ४८७१ ॥

शीतळांशकगे मन्दे चरराशिचतुष्टये ।
शुक्रयोगे सुसंपन्नो विद्यावान् बुद्धिमान् सुखी ॥ ४८७२ ॥

केतुयोगे पिता बाल्ये क्लेशेनात्यन्तकर्शितः ।
पश्चाद्भ्रातृविहीनश्च ज्येष्ठभ्रातृविनाशवान् ॥ ४८७३ ॥

देशान्तरे भाग्ययोगं भगिनीद्वयवान् पिता ।
कलत्रद्वयवान् रागी वातप्रकृतिदेहवान् ॥ ४८७४ ॥

स्वभुजार्जितसंपन्नो नरवाहनयोगवान् ।
मन्दे केतुयुते जातः पिता वैष्णवहेतुना ॥ ४८७५ ॥

अतीव क्लेशमाप्नोति राजद्वारे कलापवान् ।
केतुशुक्रौ यदेकांशा[3]वसितेन समन्वितौ ॥ ४८७६ ॥

---

1. प्रजातस्य  2. भ्रातृभ्र'तृ
3. यदेकांशो असितेन समम् पिते

शीतलांशकगे मन्दे वैष्णवद्वेषवान् पिता ।
तन्मूलाद्व्याकुलं चैति ग्रामभूम्यर्थनाशवान् ॥ ४८७७ ॥

जन्मदाये मनस्तापं जननात् पूर्वगे तथा[1] ।
सार्धद्विवर्षपर्यन्तं[2] स्वपिता क्लेशभाग्भवेत् ॥ ४८७८ ॥

सोदरांशकगे मन्दे क्लेशं चत्वारि वत्सरम्[3] ।
पश्चाद्भाग्याभि[4]वृद्धिं च योगं जन्मदशान्त्यगे ॥ ४८७९ ॥

लग्नात् पञ्चमगे मन्दे शीतलांशे पिता व्यथाम्[5] ।
शीतज्वरभयार्तश्च [6]ह्यतिसारप्रपीडितः ॥ ४८८० ॥

जन्मदाये मनस्तापं नानाव्याकुलवान् पिता ।
सोदरोत्पत्तिनाशादिं मसूरीज्वरपीडनम्[7] ॥ ४८८१ ॥

चन्द्रक्षेत्रगदोषेण स्वपिता ज्वरपीडितः ।
तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ॥ ४८८२ ॥

लग्नात् पञ्चमगे मन्दे शीतलांशो[8]द्भवस्य च ।
तिलपात्रप्रदानेन पिता[9]रोग्यादिसौख्यवान् ॥ ४८८३ ॥

श्रीलक्ष्मीप्रतिमादानात्[10] पश्चाद्भाग्ययुतः पिता ।
राजद्वारे शुभं[11]चैव शत्रुनाशं विनिर्दिशेत् ॥ ४८८४ ॥

ग्रन्थान्तरे—

श्रीलक्ष्मीप्रतिमादानं कनकाज्यनिरीक्षणम् ।
पश्चाद्भाग्याभिवृद्धिः स्यात् पिता[12]सौख्ययुतः सुखी ॥ ४८८५ ॥

---

1. यथा
2. पर्यायां
3. वत्सरे
4. वृद्धिश्च
5. व्यथा
6. अतिसार
7. ज्वरगण्डवान्
8. शीतलांशस्य जातके
9. पितारोग्यादि
10. प्रतिमादाने पश्चाद्भाग्यप्रदः
11. चेति
12. पितृसौख्यप्रदः

या मेऽलक्ष्मीर्यच्च दौस्थ्यं सर्वाङ्गेषु व्यवस्थितम् ।
तत्सर्वं शमयाज्य त्वं श्रियं पुष्टिं च वर्धय[1] ॥ ४८८६ ॥

कांस्य[2]पात्रे प्रकुर्वीत ह्याज्यं प्रस्थचतुष्टयम् ।
निष्कमात्र[3]प्रमाणं च दक्षिणादानमाचरेत् ॥ ४८८७ ॥

दैवज्ञाय[4] प्रदानेन ह्यायुरारोग्यवान् सुखी ।
अलक्ष्मीनाशनात्[5] सद्यः पिता लक्ष्मीकटाक्षवान् ॥ ४८८८ ॥

लग्नात् पञ्चमगे शुक्रे पापद्वयसमन्विते ।
कनकाज्यप्रदानेन गृहे लक्ष्मीकटाक्षवान् ॥ ४८८९ ॥

पञ्चमाब्दात् परं भाग्यं स्वपितानित्यसौख्यवान् ।
वेदाब्दान्ते[6] कचित् सौख्यं पञ्चमाब्दे शुभाशुभम् ॥ ४८९० ॥

जन्मदाये जन्मदेशे विप्लवेन प्रजावधि ।
सम्पद्दाये शीतलांशे मन्दे भाग्याभिवृद्धयः[7] ॥ ४८९१ ॥

राजामात्य जनक्लेशे मध्यखण्डे विशेषतः ।
तृतीयांशेऽपमृत्युश्च स्वपितुः[8] पितृनाशनम् ॥ ४८९२ ॥

पितृसौख्यं ततः पश्चाज्जन्मतारदशान्त्यगे ।
पितृसौख्यं धनप्राप्तिर्भेदभ्रातृश्रियावहा[9] ॥ ४८९३ ॥

तुलांशे कटके मन्दे मीनलग्नोद्भवस्य च[10] ।
शनौ जन्मांशपर्यन्तं पितृसौख्यं न विद्यते ॥ ४८९४ ॥

कन्याशनिस्थिते काले सिंहान्त्यादौ[11] कचित् सुखम् ।
सपितुः पितृनाशः[12] स्याद्भाग्यजन्मदशान्त्यगे ॥ ४८९५ ॥

---

1. वर्धताम्
2. पात्र प्रकुर्वीत आज्यं
3. प्रदानेनदक्षिणदानमर्चचेत्
4. दवज्ञस्यप्रदानेन आयुरारोग्यवान् सुखम्
5. नाशदः
6. वेदाश्चान्ते
7. वृद्धिकृत्
8. स्वपिता
9. श्रियावहम्
10. लग्नस्य जातके
11. सिंहान्त्यादि
12. सपिता पितृनाशं

लग्नात् पञ्चमगे मन्दे भार्गवेण समन्विते ।
जन्मतारदशान्त्यादौ[1] विदेशे भाग्यवान् पिता ॥ ४८९६ ॥

कन्याशनिस्थिते काले जन्दाये श्रिया युतः[2] ।
कन्याशनिस्थिते काले गोचरे मिथुने गुरौ ॥ ४८९७ ॥

सम्पद्दाये जातकस्य मौञ्जीबन्धनमादिशेत् ।
जन्मदाये जन्मभ्रातृगोचरे लग्नगे शनौ ॥ ४८९८ ॥

मेषान्ते वृषभे जीवे विवाहोत्सवसंभ्रमम् ।
मेषे गुरुस्थिते काले जन्मदाये पितु.[3] सुखम् ॥ ४८९९ ॥

भेदभ्रातृसुतप्राप्तिः पितृसौख्यं विनिर्दिशेत् ।
मीने गुरुस्थिते काले सोदरोत्पत्तिभ्रातृमान् ॥ ४९०० ॥

स्वज्येष्ठभगिनीपीडां मीनान्त्यादौ[4] क्रिये क्वचित् ।
शीतलांशकगे मन्दे पश्चात् सोदरनाशनम् ॥ ४९०१ ॥

स्वभेदभगिनीभर्त्रा राजद्वारे प्रवेशवान् ।
सम्पद्दाये महद्भाग्यं स्वभेदभगिनीसुखम् ॥ ४९०२ ॥

तद्भर्ता प्रबलश्चैव शीतलांशोद्भवस्य च[5] ।
कश्चित् स्वभेदभगिनीभर्ता पितृवियोगवान् ॥ ४९०३ ॥

स्वभेदभ्रातृमूलेन सौख्यवान् पितृहेतुना ।
शीतलांशकगे मन्दे महाभाग्यंशगे शशी ॥ ४९०४ ॥

[6]सोदर्यौ द्वे चिरायुष्यौ भ्रातृत्रयसुपूजितः ।
भेदभ्राता चिरायुष्मान्[7] भगिनीद्वयवान् ऽमृते ।
मृतवन्ध्यापति[8]श्चैव कालान्तरसुपुत्रवान् ॥ ४९०५ ॥

---

1 दशान्त्यादि
2. श्रियावहम्
3. पिता
4. मीनान्त्यादिक्रिये
5. प्रबलं चेति शीतलांशस्य जातके
6. द्वौ सोदरी चिरायुष्यं
7. चिरायुष्यं
8. पतिश्चेति

स्वज्येष्ठभगिनीभर्ता विपद्दाये श्रिया युतः[1] ।
सम्पद्दाये तृतीयांशे भगिनीशस्तु[2] सौख्यवान् ॥ ४९०६ ॥

लग्नात् सप्तमगे मन्दे महामायांशनाडिगे ।
महामारीभयप्राप्तिर्बाल्ये सोदरनाशनम् ॥ ४९०७ ॥

मातामहीचिरायुष्या[3] मातुलद्वययोगवान् ।
[4]मातुलैको विनाशः स्यात् चिरायुष्योऽपरः स्मृतः ॥ ४९०८ ॥

लग्नेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
मातुलारिष्टमाप्नोति मातुर्माता मनोव्यथाम्[5] ॥ ४९०९ ॥

सम्पद्दाये शीतलांशे तुलांशे चापगे शनौ ।
मातामह्यास्त्वरिष्टं स्यान्मातुलश्च[6] विचारवान् ॥ ४९१० ॥

कन्याशनौ जन्मदाये मातुलस्य सुतोत्सवः[7] ।
स्वभेदभगिनी चैव ह्यायुष्मन्तं च पुत्रकम्[8] ॥ ४९११ ॥

स्वपितुर्भाग्यकालः स्यात्तुलाराहौ[9] क्रिये गुरौ ।
जन्मदाये भाग्यवृद्धी राजद्वारे शुभाधिकम् ॥ ४९१२ ॥

शनिप्रथमपर्याये जन्मराशौ महत् सुखम् ।
स्वपिता राजयोगं च विशेषेण[10] तुलाशनौ ॥ ४९१३ ॥

षष्ठेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
स्वपिता मित्रवर्गेषु क्लेशं प्राप्नोति भूरिशः ॥ ४९१४ ॥

---

1. भर्तृविपद्दाये श्रियावहम्
2. भगिनीभर्तृ
3. चिरायुष्यं
4. एको मातुलनाशं स्यान्मातुलश्चैकमायुषः ।
5. व्यथा
6. मातामही अरिष्टं स्यान्मातुलस्य
7. सुतोत्सवम्
8. पुत्रोत्पत्तिश्चिरायुषम्
9. स्वपिता भाग्यकालं स्यात् तुलाराहु
10. स्यद् विशेषं च

षष्ठाधिपदशाकाले षष्ठेशांशत्रिकोणगे ।
स्फुटयोगं गते मन्दे स्वपितुः[1] पितृनाशनम् ॥ ४९१५ ॥

ज्येष्ठभ्रातुः स्वल्पपीडा बन्धुवर्गे ह्युपद्रवः[2] ।
[3]पितृष्वसुः सुतादीनि दशान्ते व्याकुलं महत् ॥ ४९१६ ॥

अनावृष्टिहते देशे लोके दुर्भिक्षजं भयम्[4] ।
देशे राजान्तरं स्याच्च तत्काले भाग्यवान् पिता[5] ॥ ४९१७ ॥

सम्पद्दाये श्रियं नित्यं तुलान्ते वृश्चिके शनौ ।
मधुमासे शुक्लपक्षे शीतलांशे विवाहवान् ॥ ४९१८ ॥

विपद्दाये तृतीयांशे कुम्भान्ते मीनगे शनौ ।
शीतलांशे पितारिष्टं त्रयोविंशतिवत्सरे ॥ ४९१९ ॥

शीतलांशकगे मन्दे [6]ह्यापत्संन्यासवान् पिता ।
भाग्याधिपदशाकाले मृतिं च[7] क्रूरभुक्तिषु ॥ ४९२० ॥

सूर्यांशगे तत्त्रिकोणे स्फुटयोगं गते गुरौ ।
स्वपिता देहजाड्यादि क्रूरमासे मनोव्यथाम्[8] ॥ ४९२१ ॥

शीतलांशकगे मन्दे क्रूरराशिविनिर्णयः[9] ।
क्रूरमासमिति प्राहुर्योजयेत् कालवित्तमः ॥ ४९२२ ॥

कुळीरसिंहालिझषे कुम्भे नक्रे दिवाकरे[10] ।
क्रूरराशिमिति प्रोक्तं क्रूरमासं तथैव च ॥ ४९२३ ॥

गोचरे क्रूरराशीषु राहुकेतुशनैश्चराः ।
स्फुटयोगं [12]गतास्तत्र स्वजनादिप्रपीडिताः ॥ ४९२४ ॥

---

1. स्वपिता
2. क्वचित् पीडा बन्धुवर्गे उपद्रवम्
3. पितृष्वसा
4. दुर्भिक्षडाम्बरम्
5. चेति तत्काले पितृभाग्यकृत
6. आपत्
7. मृतिं चेत्
8. व्यथा
9. निर्णयम्
10. नक्र....श्चित्
11. गते काले

स्वपिता क्रूरमासेषु क्रूरराशौ शनैश्चरे[1] ।
[2]सञ्चारकाले क्लेशं च पित्रादीनां मनोऽन्यथा ॥ ४९२५ ॥

सर्वदाये फलं [3]चैव क्रूरग्रहदशान्तरे ।
पित्रादिदेहजाड्यं [4]च स्वजनारिष्टमादिशेत् ॥ ४९२६ ॥

मेषराशिगते मन्दे शीतलांशोद्भवस्य च[5] ।
पितृसौख्यं सुभाग्याप्तिः शुभखेचरदायगे ॥ ४९२७ ॥

राजयोगं [6]च लभते क्षेमदाये विशेषतः ।
चतुर्विंशात् परं भाग्यं स्वप्राबल्यं भवेद्ध्रुवम् ॥ ४९२८ ॥

[7]शुभराशौ गते चन्द्रे जीवे केन्द्रत्रिकोणगे ।
शीतलांशे राजयोगं नरवाहनवान् भवेत् ॥ ४९२९ ॥

सप्तविंशात् परं भाग्यं गृहे गोधनसङ्कुलम् ।
प्रबलेयोगलाभादि राजद्वारे सुकीर्तिमान् ॥ ४९३० ॥

राहुदाये मन्दभुक्तौ [8]केतुभुक्तौ तथैव च ।
स्वदेहायासरोगेण[9] योगकाले प्रपीडितः ॥ ४९३१ ॥

सूर्यान्तरेऽपमृत्युश्च योगकाले [10]महाविपत् ।
श्वासकासज्वरेणैव[11] देहपीडां विनिर्दिशेत् ॥ ४९३२ ॥

तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ।
क्षेमदाये मन्दभुक्तौ मित्रप्रभुविनाशनम्[12] ॥ ४९३३ ॥

ज्वरपीडा कश्चिच्चैव[13] राजान्तरवशात् सुखम् ।
शीतलांशे राहुदाये कन्याचन्द्रोद्भवस्य च[14] ॥ ४९३४ ॥

---

1. शनैश्चरः
2. सन्तानकाले क्लेशं स्यात्
3. चेति
4. स्यात्
5. शीतलांशस्य जातके
6. प्रकुर्वीत
7. शुभारू....चन्द्रे
8. केत्वन्तरमथापि च
9. रोगादि
10. महद्विपत्
11. ज्वरादीनि
12. नाशवान्
13. कश्चिच्चेति
14. सम्यक्च जातके

राजयोगफलं सत्यं मध्यखण्डे न संशयः ।
अग्रहार[1]प्रतिष्ठाता नित्यं राजोपचारवान् ॥ ४९३५ ॥

मित्रद्रोहवशाद्रोगी[2] राहुदाये प्रपीडितः ।
पश्चादारोग्यमाप्नोति दशान्ते क्लेशवान् सुखी ॥ ४९३६ ॥

कर्माधिपदशाकाले [3]कीटान्ते धनुषिशनौ ।
मातारिष्टं विजानीयाल्लाभेशांश[4]त्रिकोणगे ॥ ४९३७ ॥

शीतलांशकगे मन्दे भार्गवेण समन्विते ।
क्षेमदाये राजयोगं द्वितीयोद्वाहयोगवान् ॥ ४९३८ ॥

धनेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
दारारिष्टं [5]च लभते दुष्टराशौ तथैव च ॥ ४९३९ ॥

क्षेमदाये सिंहशनौ दारारिष्टं विनिर्दिशेत् ।
मिथुने दारपीडा स्यात्तद्वंशे जननाशनम् ॥ ४९४० ॥

क्रूरराशौ क्रूरमासे मन्दे गोचरकालगे ।
दारारिष्टं [6]च लभते क्षेमदाये न संशयः ॥ ४९४१ ॥

स्त्रीप्रजाबहुलाः सन्ति[7] कन्याचन्द्रे द्विपुत्रवान् ।
कन्याद्वये सुसन्तानं [8]द्वौ पुत्रौ चिरजीविनौ ॥ ४९४२ ॥

मीनलग्ने सुताधीशे मकरांशे च संस्थिते[9] ।
मसूरिकाज्वरेणैव पुत्रनाशेन कर्शितः ॥ ४९४३ ॥

कर्माधिपदशाकाले लाभाधिपतिभुक्तिषु ।
भेदभ्रातुररिष्टं स्याच्चतुश्चत्वारिवत्सरे ॥ ४९४४ ॥

---

1. प्रपीडादि
2. रोगं
3. वृश्चिकान्ते धनुःशनेः
4. लाभेशांशे
5. प्रकुर्वीत दुष्टराशौ च वा भवेत्
6. प्रकुर्वीत
7. बहुधश्चेति
8. पुत्रद्वयश्चिरायुषम्
9. मकरांशस्य जातके

लग्ने राहुदशाकाले रन्ध्राधिपतिभुक्तिषु ।
भेदभ्रातुः प्रपीडा स्यात् षट्त्रिंशाब्दे मनोव्यथा ॥ ४९४५ ॥

कनिष्ठभ्रातृपीडादि तुलांशे वृश्चिके शनौ ।
चापे शनिस्थिते काले कर्माधिपतिदायगे ॥ ४९४६ ॥

[1]मीनलग्ने प्रजातस्य रन्ध्राधिपतिभुक्तिषु ।
भेदभ्रातृप्रपीडा स्यात् षट्त्रिंशाब्दे मनोव्यथा ॥ ४९४७ ॥

कनिष्ठभ्रातृपीडादि तुलान्ते वृश्चिके शनौ ।
भेदभ्रातृविनाशेन क्लेशं प्राप्नोति भूरिशः ॥ ४९४८ ॥

भेदभ्रातृवधूमृत्युः स्वभर्त्रानुगमिष्यति ।
स्वसोदरस्य भार्या च स्वभर्त्रानुगमिष्यति[2] ॥ ४९४९ ॥

कर्माधिपदशाकाले शीतलांश इदं फलम् ।
स्वप्रभोश्चैव तत्काले [3]ह्यरिष्टं च विनिर्दिशेत् ॥ ४९५० ॥

प्रत्यगे प्रभुनाशः[4] स्यात् क्षेमदाये तथैव च ।
बहुस्त्रीवधपापेन [5]राजपुत्रस्य चामयम् ॥ ४९५१ ॥

जातकस्य महद्भाग्यं कर्माधिपतिदायगे ।
कनिष्ठभ्रातृभार्यादिज्ञातिवर्गे सुतामयम् ॥ ४९५२ ॥

[6]मन्देन संयुते शुक्रे ह्यारूढाल्लाभराशिगे ।
यावज्जीवं सुभाग्यं स्याद्योगमासे रणाङ्कितः[7] ॥ ४९५३ ॥

क्षेमदाये पराध्यादौ[8] योगं प्रत्यग्दशाशुभम् ।
साधनेशदशाकाले स्वभुक्तावपमृत्युमान् ॥ ४९५४ ॥

---

1. ......रन्ध्रा
2. स्वसोदरस्यैवभार्यै भर्तानुभरणं स्मृतम्
3. अरिष्टं स्याद्
4. नाशं
5. सुतायम्
6. शुक्रे शनियुते पापः आरूढात्
7. रणाङ्कितम्
8. पराध्यादि

तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ।
राशिचक्रप्रदानेन देहारोग्यं भविष्यति ॥ ४९५५ ॥

षट्पञ्चाशात् परं मृत्युर्भवेद्भार्गव[1]पक्षगे ।
तत्काले शान्ति[2]कार्येण ह्यपमृत्युर्विनश्यति ॥ ४९५६ ॥

मन्देशाक्रान्तकाले च शीतलांशस्य दायगे ।
कन्यामासे मृतिं चैति[3] तत्त्रिकोणे ह्यथापि च ॥ ४९५७ ॥

सप्तषष्टिश्च वर्षाणि परमायुश्च विन्दति ।
क्लेशं च[4] सप्तपञ्चाशे ह्यष्टचत्वारिवत्सरे ॥ ४९५८ ॥

पाके सर्वदशासन्धौ[5] क्लेशं प्राप्नोति भूरिशः ।
चन्द्रनाडीफलाध्याये शीतलांशोद्भवस्य च[6] ॥ ४९५९ ॥

राजयोगफलादीनां[7] विस्तारं मनुरब्रवीत् ।
स्वोच्चांशगे व्ययाधीशे चापे स्वोच्चांशगे गुरौ ॥ ४९६० ॥

शीतलांशे प्रजातश्च पुण्यलोकयुतो[8] भवेत् ।
[9]स्वपितुर्ब्रह्मलोकाप्तिः शीतलांशकगे शनौ ॥ ४९६१ ॥

शुक्रयोगे फलं सत्यं जीवे स्वोच्चांशसंस्थिते[10] ।
राजयोगं च लभते यमलश्चैव जायते[11] ॥ ४९६२ ॥

ततः पश्चात् पुण्यलोकं पश्चादुत्तमजन्मवान् ।
शीतलांशकगे मन्दे चोच्चग्रह[12]समन्विते ॥ ४९६३ ॥

---

1. केचित्
2. कर्मेण अपमृत्यु
3. चेति तत्त्रिकोण मथापिच
4. चत्सप्तपञ्चाशे अष्टचत्वारिवत्सरे
5. दशासंधिः
6. शीतलांशस्य जात के
7. फलादीनि
8. प्रदो
9. स्वपिता ब्रह्मलोकाप्तिः
10. जातके
11. प्रकुर्वीत यमलो जातवान् क्वचित्
12. उच्चग्रह

शुक्रयोगे पापपुण्यं समं [1]चःमनुरब्रवीत् ।
वृद्धपाराशरे ग्रन्थे[2] मन्दे शुक्रशिखीयुते ।
साधुप्रियस्तपस्वीच देहान्ते पुण्य लोकवान् ॥ ४९६४ ॥

—: * :—

## ॥ [3]धनुर्लग्ने मेषशनिकोकिलांशफलम् ॥

लग्नात् पञ्चमगे मन्दे कोकिलांशे च संस्थिते[4] ।
पश्चाद्भ्रातृविहीनश्च [5]ज्येष्ठभ्रातृविनाशवान् ॥ ४९६५ ॥

मेषे मन्दे कोकिलांशे [6]त्वेकाकी पुत्रमित्रवान् ।
धनुर्लग्ने प्रजातश्च बाल्ये क्लेशेन कर्शितः ॥ ४९६६ ॥

स्वपिता [7]रोगदेही च परगेहे निवासवान् ।
बन्धुमूलात् सुसन्तोषी [8]ह्युद्वाहानन्तरं सुखी ॥ ४९६७ ॥

द्वाविंशाब्दे पित्ररिष्टं[9] विंशेऽब्दे वा भविष्यति ।
पश्चात् स्वमातृहानिः स्यात् त्रिंशोपरि सुसौख्यवान् ॥ ४९६८ ॥

चापे चापांशके जीवे[10] कोकिलांशेऽर्कनन्दने ।
कार्पासविक्रयेणैव[11] त्रिंशोपरि सुजीवनम् ॥ ४९६९ ॥

लग्ने राहुयुते चन्द्रे मूर्खप्रकृतिकोपवान् ।
सप्तविंशात परं सौख्यं विवाहाये विवाहवान् ॥ ४९७० ॥

पुत्रोत्सवाद् परं भाग्यं क्लेशं क्षेमदेशान्त्यगे ।
प्रत्यग्दाये धनप्राप्ति[12] स्वपुत्रोद्वाहसौख्यवान् ॥ ४९७१ ॥

---

1. चेन्मनुरब्रवीत
2. पाराशरे होरे
3. धनुर्लग्नम् मेषशनिकोकिलांशम्
4. कोकिलांशस्य जातके
5. स्याज्ज्येष्ठ
6. एकाकी
7. रोगदेहः स्यात् विनाशवान
8. उद्वाहानन्तरं सुखम्
9. पितारिष्टं
10. चांशकगे मन्दे
11. कार्पासविक्रयादीनि
12. धनप्राप्तिः

साधनेशदशाकाले स्वभुक्तौ मारकं स्मृतम् ।
केत्वन्तरे कालमृत्युर्मेषमासत्रिकोणगे ॥ ४९७२ ॥

रन्ध्रेशांशे तत्रिकोणे स्फुटयोगं गते शनौ ।
देहालस्यं प्रकुर्वीत सर्वनाडीफलं वदेत् ॥ ४९७३ ॥

कोकिलांशकगे मन्दे पुरा शूद्र[1]समुद्भवः ।
पश्चाज्जन्म तथा विन्द्याद्वर्तमानं तथा भवेत् ॥ ४९७४ ॥

मेषे मन्दे कोकिलांशे पुत्रीपुत्रसमृद्धिमान् ।
धनुर्लग्ने प्रजातश्च त्रिंशद्वर्षात् परं सुखम् ॥ ४९७५ ॥

यावदायुष्यमाप्नोति तावत् कालं सुजीवनम् ।
शतद्वयधनाढ्यश्च व्यापारे जीवनं स्मृतम् ॥ ४९७६ ॥
गुरुनाडीफलाध्याये फलं विस्तारमादिशेत् ।

—:*:—

## ॥ धनुर्लग्ने घातांशशनिफलम् ॥

घातांशे वृश्चिके मन्दे धनुर्लग्न[2]समुद्भवः ॥ ४९७७ ॥

बाल्ये पितृविनाशी[3] च पश्चाद्भ्रातृविहीनवान् ।
ज्येष्ठभ्रातृविनाशेन मध्ये वयसि शोकवान् ॥ ४९७८ ॥

आयुष्मत्यौ [4]द्वे भगिन्यावेका पुत्रवती[5] शुभा ।
आन्ध्रप्रभुद्वारदेशे बाल्ये सौख्यं विनिर्दिशेत् ।
पश्चाद्वनान्तरे वासी[6] कुत्सितप्रभुसेवकः ॥ ४९७९ ॥

---

1. शूद्रस्य जन्मनि
2. धनुर्लग्न जातके
3. विनाशं स्यात्
4. भगिनीद्वय मायुष्यम्
5. सुखी
6. वासं

दारद्वये सुपुत्राप्तिम[1]मलायोगजस्तथा ।
[2]माध्ववैदीकमूलेन नरवाहनयोगवान् ॥ ४९८० ॥

क्षेमदाये महत्सौख्यं मध्यखण्डे घनागमम् ।
अपराधें सुवाहाप्तिं[3] घातांशे ग्रामलाभवान् ॥ ४९८१ ॥

मन्दे दावाग्निषष्ठ्यंशे वातप्रकृतिदेहवान् ।
दारद्वययुतो मानी राजद्वारे प्रसिद्धिमान् ॥ ४९८२ ॥

परमेशांशगे जीवे मन्दे घातांशनाडिगे ।
भाग्ययोगं [4]च लभते हरिशङ्करभक्तिमान् ॥ ४९८३ ॥

घातांशे वृश्चिके मन्दे स्थूलगात्रो महामतिः ।
मूर्खप्रकृतिमान् रागी कोपी क्षिप्रप्रसादकः ॥ ४९८४ ॥

अष्टत्रिंशात् परं भाग्यं चत्वारिंशे सुवाहनम् ।
द्विचत्वारिंशगे वापि योगवान् कीर्तिमान् सुखी ॥ ४९८५ ॥

प्रत्यब्दाये दारहानिर्बहुमित्रो बहुप्रजः ।
ज्येष्ठभ्रातृचिरायुष्यं बाल्ये कुक्षिप्रपीडितः ॥ ४९८६ ॥

मृतप्रजाबहुत्वं स्याद्भगिनीद्वयवान् सुखी ।
भेदभ्रातृयुतो मानी पितृशुश्रूषणे परः ॥ ४९८७ ॥

विद्याविघ्नयुतो[5] नित्यं पित्रार्जितधनैर्युतः ।
घतांशे वार्धके बाल्ये ज्येष्ठभार्या सुपुत्रिणी[6] ॥ ४९८८ ॥

साधनेशदशाकाले दीर्घायुःपुत्रवान् सुखी ।
द्विपञ्चाशात् परं भाग्यं पुत्रयोगं महत् सुखम् ॥ ४९८९ ॥

---

1. पुत्राप्तिरमलायोगजातके
2. वैदिकमध्व मूलेन
3. सुवाहाप्तिः
4. प्रकुर्वीत
5. प्रदो
6. सुतस्य च

शनिद्वितीयपर्याये मिथुनान्त्यादिशोकवान् ।
राशित्रयमिदं क्लेशं वैष्णवद्वेषहेतुना ॥ ४९९० ॥

कन्यादिश्रियमाप्नोति राहुदाये सुभाग्यवान् ।
भाग्यराहुदशाकाले स्वभुक्तौ[1] व्याकुलं महत् ॥ ४९९१ ॥

गुरुभुक्त्यन्तमारभ्य शनिभुक्तौ सुसौख्यवान् ।
अष्टमाधिपतौ लग्ने [2]मेषांशे चापराशिगे ॥ ४९९२ ॥

भूसुतस्य दशाक्लेशमपरार्धे [3]महाविपत् ।
रन्ध्राधिपांशदोषेण दशान्ते योगसंभवः[4] ॥ ४९९३ ॥

सिंहे चापांशगे राहौ धनुर्लग्नसमुद्भवः[5] ।
गुरुभुक्त्यन्तमारभ्य राहुदाये सुयोगवान् ॥ ४९९४ ॥

शुक्रभांशगते चन्द्रे कर्मे चापांशगे शनौ ।
धनुर्लग्ने प्रजातस्तु[6] गुरुभुक्तौ श्रियान्वितः ॥ ४९९५ ॥

प्रत्यक्तारदशान्त्यादौ साधनेशदशावधि[7] ।
स्वभुक्तौ व्याकुलं सत्यं राजद्वारे कलापवान् ॥ ४९९६ ॥

चापांशकगते सूर्ये घातांशे रविनन्दने ।
अतीव क्लेशकार्याणि पञ्चाशद्वत्सरात् परम् ॥ ४९९७ ॥

घातांशनाडिदोषेण षट्चत्वारिंशतः परम् ।
शत्रुवृद्धिर्मनस्तापं क्लेशं[8] सप्तकवत्सरम् ॥ ४९९८ ॥

सुप्रभांशकयोगेन द्विपञ्चाशात् परं सुखम् ।
शनिद्वितीयपर्याये कन्यामध्ये सुभाग्यवान् ॥ ४९९९ ॥

---

1. स्वभुक्ति
2. मेषान्ते
3. महद्विपत्
4. रन्ध्राधिपान्तदोषेण दशान्ते योगसंभवान्
5. राहु धनुर्लग्नस्य जातके
6. प्रजातस्य
7. दशान्त्यादिसाधनेशस्य जातके
8. चेत्

सिंहान्ते शत्रुनाशः[1] स्यात् कन्याराशौ च वा यदि ।
शनिवक्रगते काले शत्रुनाशं विनिर्दिशेत् ॥ ५००० ॥

देशान्तरे महद्भाग्यं बन्धुमूलात् श्रियावहम् ।
महाराजप्रसादेन योगवान् कीर्तिमान् सुखी ॥ ५००१ ॥

शोभनांशकगे शुक्रे नीचे स्वोच्चांशसंस्थिते[2] ।
तद्दशायां महत् सौख्यमान्ध्रप्रभुवशात् सुखम् ॥ ५००२ ॥

लग्नेशनाडियोगेन त्रिपञ्चाशात् परं सुखम् ।
पुनस्तद्योगमाप्नोति लग्नाधिपतिभुक्तिषु ॥ ५००३ ॥

धनाधिपान्तरे काले विशेषप्रबलं सुखम् ।
लग्नाधिपान्त्यमारभ्य भुक्तिकाले सुसौख्यवान् ॥ ५००४ ॥

मन्दे दावाग्निषष्ठ्यंशे षडब्देऽष्टाब्दतः परम् ।
क्लेशं दावाग्निदोषेण शत्रुवृद्धिवशाद्व्यथाम्[3] ॥ ५००५ ॥

स्वदेहायाससन्तापं मध्ये मध्ये क्वचित् क्वचित् ।
सन्तानोत्पत्तिनाशादि स्वपुत्रस्य विशेषतः ॥ ५००६ ॥

सुतेशनाडियोगेन साधनेशदशाशुभम् ।
दारान्तरे सुतप्राप्तिः स्वभुक्तौ नात्र संशयः ॥ ५००७ ॥

जीवान्तरे सुतारिष्टं चतुष्पाज्जीवनाशनम् ।
पशुधान्यक्षयादीनि राहुभुक्तौ [4]महाविपत् ॥ ५००८ ॥

भाग्यराहुदशाकाले स्वभुक्तौ सेतुयात्रिकः[5] ।
प्रत्यक्कारदशान्त्यादौ[6] पुण्यतीर्थफलं स्मृतम् ॥ ५००९ ॥

नित्यान्नदानवान् भोगी [7]ह्यमलायोगजस्तथा ।
साधुप्रियः सत्यवादी मित्रस्वजनपोषकः ॥ ५०१० ॥

---

1. नाशं
2. जातके
3. व्यथा
4. महद्विपत्
5. यात्रवान्
6. दशान्त्यादि
7. अमलायोगजातके

स्वप्रभांशे निशानाथे घटे चापांशके शनौ ।
धनुर्लग्ने प्रजातश्च सर्वदा बन्धुपोषकः ॥ ५०११ ॥

धनेशारूढगे शुक्रे स्वप्रभांशसमुद्भवः[1] ।
सुताधिपतिदाये [2]च बहुवित्ताम्बरातिमान् ॥ ५०१२ ॥

राजोपकारकार्यार्थं स्वहस्तधननाशवान्[3] ।
मित्रद्रोहं क्वचिच्चैति घातांशे धनदायगे ॥ ५०१३ ॥

तस्य दोषवशाच्चैति क्लेशं प्रत्यग्दशान्त्यगे ।
साधनेशदशाभुक्तौ सञ्चितार्थविनाशनम् ॥ ५०१४ ॥

लाभेशे शोभनांशस्थे घातांशे धनदायगे ।
भाग्यराहुदशाकाले योगप्राबल्यवान् भवेत् ॥ ५०१५ ॥

लग्नाधिपान्तरान्त्यादौ[4] धनाधिपतिभुक्तिषु ।
शोभनांशस्य योगेन धनलाभं महत् सुखम् ॥ ५०१६ ॥

गृहशोभनकार्याणि नित्यसन्तोषवान् सुखी ।
कल्याणोत्सवसम्पत्तिं नित्यं राजप्रसादवान् ॥ ५०१७ ॥

तत्काले मित्रवर्गाच्च[5] स्वमूलां श्रियमश्नुते ।
राजद्वारे शुभं चैव[6] गृहे गोधनसंकुलम् ॥ ५०१८ ॥

ज्येष्ठभ्रातृसुवाहाप्तिः शोभनांशोद्भवस्य च[7] ।
धनाधिपान्तरे काले साधनेशदशाशुभम् ॥ ५०१९ ॥

घातांशनाडिदोषेण राजकार्यवशाद्व्यथाम्[8] ।
योगकाले मनस्तापं धननाशं[9] क्वचित् क्वचित् ॥ ५०२० ॥

---

1. अंशस्य दायगे
2. दायेव
3. वारकः
4. अन्तरान्त्यादि
5. मित्रवर्गेषु
6. गेहे
7. शोभनांशस्य जातके
8. व्यथा
9. तापं क्वचित्

सन्तानोत्पत्तिसन्तोषं मित्रवर्गे सुशोभनम् ।
द्वीपान्तरे मित्रवर्गात्[1] क्लेशं प्राप्नोति भूरिशः ॥ ५०२१ ॥

घातांशे द्वादशे मन्दे स्वभुक्तौ क्रूरमासगे ।
स्वपुत्रदेहजाड्यादि ह्यरिष्टं दारवंशके[2] ॥ ५०२२ ॥

व्यये दावाग्निषष्ट्यंशे शनौ वित्तत्रिकोणके ।
गोचरे स्वपितुः[3] क्लेशं वासदेशप्रजावधि ॥ ५०२३ ॥

राजामात्यप्रपीडादि लोके दुर्भिक्षजं भयम्[4] ।
स्वशत्रुजननाशः स्यात् पश्चात् प्राबल्ययोगवान् ॥ ५०२४ ॥

धनेशे वृश्चिकांशस्थे गोचरे कटके शनौ ।
अतीव क्लेशकार्याणि तत्त्रिकोणे क्वचित् क्वचित् ॥ ५९२५ ॥

जीवे पञ्चमपर्याये [5]मेषादौ श्रियमश्नुते ।
वृषभे बहुभाग्याप्तिं[6] शुक्रनाडीवशात् सुखम् ॥ ५०२६ ॥

लक्ष्मीकटाक्षवान्नित्यं सुतेशे लाभराशिगे ।
भाग्याधिपेन संयुक्ते बहुभाग्य[7]युतःसुखी ॥ ५०२७ ॥

शोभनांशस्य योगेन कर्माधिपतिभुक्तिषु ।
साधनेशदशाकाले बहु कार्यप्रसाधनम् ॥ ५०२८ ॥

शन्यन्तरे क्रूरमासे साधनेशस्य दायगे ।
योगकाले महारोगं[8] शान्त्या शान्तिं प्रयास्यति ॥ ५०२९ ॥

मन्दे दावाग्नि दोषेण स्वभुक्तौ बन्धुनाशनम् ।
वातज्वरभयं किंचित् स्वगेहे शिशुनाशनम् ॥ ५०३० ॥

---

1. मित्रवर्गे
2. दारवंशे अरिष्टकृत्
3. स्वपिता
4. दुर्भिक्षडांबरम्
5. मेषादि
6. भाग्याप्तिशुक्रे
7. प्रदः
8. महद्योगं

पुत्रिकाऋतुशान्त्यादि गृहे कल्याणसंभ्रमम् ।
सौम्यान्तरे स्वतुत्रस्य पुत्रप्राप्तिः श्रियावहा[1] ॥ ५०३१ ॥

प्राबल्यमेति तद्भर्ता[2] दशामध्ये श्रियावहम् ।
स्वपुत्रश्च[3] विशेषेण योगभागरभ्यवान् भवेत् ॥ ५०३२ ॥

केत्वन्तरे राहुदाये घातांशे जनितस्य च[4] ।
विशेषधनलाभं [5]च नित्यश्रीसौख्यमादिशेत् ॥ ५०३३ ॥

गोचरे वृश्चिके मन्दे [6]घातांशे जनितस्य च ।
राहुदाये [7]ह्यरिष्टं स्याच्छान्त्या शान्तिं प्रयास्यति ॥ ५०३४ ॥

शनितृतीयपर्याये घातांशे[8] जनितस्य च ।
पुत्रसौख्यं धनप्राप्तिं भाग्यवृद्धिं श्रियावहाम्[9] ॥ ५०३५ ॥

रन्ध्रेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
अपमृत्युभयप्राप्तिः स्वरनाडीफलं वदेत् ॥ ५०३६ ॥

साधनेशदशाकाले शुक्रभुक्तौ महत् सुखम् ।
शोभनांशवशाद्भाग्यं राजप्रीतिं विनिर्दिशेत् ॥ ५०३७ ॥

षष्ठाधिपतिदोषेण दारपीडां क्वचित् क्वचित् ।
क्रूरमासे जातकस्य पुत्रिका[10]दुःखमेव च ॥ ५०३८ ॥

सूर्यान्तरे व्याकुलं स्याद्भुक्त्यन्ते देहजाड्यवान्[11] ।
राहुदाये चन्द्रभुक्तौ क्लेशं घातांशजातकः[12] ॥ ५०३९ ॥

कुजान्तरे सौख्यमेति पुत्रप्राबल्यहेतुना ।
दशावसानदोषेण राजा राष्ट्रविनाशनम् ॥ ५०४० ॥

---

1. श्रियावहम्
2. तद्भर्तृप्रबलं चेति
3. स्वपुत्रस्य
4. घातांशश्चैव जातके
5. लाभं स्यान्नित्यश्री
6. घातांशश्चैव जातके
7. अरिष्टं
8. घातांशश्चैव जातके
9. श्रियावहम्
10. बाधमेव
11. जाड्यकृत्
12. जातके

राजान्तरे स्वपुत्रस्य प्रबलोद्योगहेतुना ।
क्रूरमासं विना भाग्यं नित्यश्रीसौख्यवान् सुखी ॥ ५०४१ ॥

देहावसानदोषार्थं शान्तिं कुर्याद्विचक्षणः ।
सुप्रभांशे निशानाथे व्यये घातांशगे शनौ ॥ ५०४२ ॥

मीने शनिस्थिते काले कालमृत्यु[1]र्भविष्यति ।
नैधनेशदशाकाले [2]घातांशग्रहभुक्तिषु ॥ ५०४३ ॥

द्विसप्ततिसमादूर्ध्वं धनुर्मीने मृतिं वदेत् ।
चापायनगते सूर्ये कुलीरायनगेऽथ वा ॥ ५०४४ ॥

शुक्लपक्षे मृतिं चैति नन्दारिक्तातिथीषु च ।
कुम्भांशगे कर्मनाथे नवमे राहु[3]संस्थिते ॥ ५०४५ ॥

व्यये घातांशगे मन्दे [4]ह्यापत्संन्यासमादिशेत् ।
वृश्चिकांशे चापशनावपमृत्युभयं क्वचित् ॥ ५०४६ ॥

शोभनांशकयोगेन [5]ह्यायुयारोग्यभाग्यवान् ।
सुप्रभांशे रन्ध्रनाथे घातांशे रविनन्दने ॥ ५०४७ ॥

धनुर्लग्ने प्रजातश्च [6]त्वेकसप्तति जीवति ।
अपमृत्युभये काले मारकं[7] च न विद्यते ॥ ५०४८ ॥

सुप्रभांशकयोगेन दीर्घमायुर्भविष्यति ।
रन्ध्रेशारूढगे शुक्रे दशमे शोभनांशगे ॥ ५०४९ ॥

दीर्घायुर्योगमाप्नोति चापमृत्युः शनैरपि ।
[8]घातांशगे प्रजातश्च रन्ध्रेशारूढपांशगे ॥ ५०५० ॥

---

1. तथाश्रितः
2. घातान्ते
3. जातके
4. आपत्
5. आयुरारोग्य
6. एक
7. मारकश्च
8. भूतांशगे

स्फुटयोगं गते मन्दे नैधनेशदशाविपत् ।
व्यये मन्दे प्रजातश्च वार्धके पुत्रशोकवान् ॥ ५०५१ ॥

वार्धके पुत्रसन्तापं दशासन्धौ न संशयः ।
परमोच्चं गते[1] जीवे शोभनांशकगे भृगौ ॥ ५०५२ ॥

मन्दे घातांशके जातस्त्वेकसप्तति[2] जीवति ।
ब्रह्मलोकफलं सत्यं रन्ध्रेशे त्वीश्वरांशगे[3] ॥ ५०५३ ॥

सुप्रभांशकगे चन्द्रे हीन्द्रयातनवान् क्वचित् ।
घातांशनाडीदोषेण देहान्ते त्विद्रयातनाम्[4] ॥ ५०५४ ॥

ब्रह्मलोकं ततो गत्वाब्रह्मध्यानपरः सदा ।
पुण्यक्षेत्रे नदीतीरे वृश्चिके शनिसंस्थिते[5] ॥ ५०५५ ॥

सोमवारे मृतिश्चैव[6] भवतीति न संशयः ।
शोभनांशकगे शुक्रे ह्यन्ते[7] पुत्रात् सुखी धनी ।
मन्दनाडीफलं सत्यं प्रत्यक्षं देव केरलम् ॥ ५०५६ ॥

— :*: —

## ॥ मेषलग्ने अचलांशनाडीफलम् ॥

प्रभांशके स्थिरे सूर्ये [8]स्वसितेन निरीक्षिते ।
पितुर्जातः परोक्षस्य राहुयोगे विदेशिनः[9] ॥ ५०५७ ॥

मातामहगृहे वासं जननं च तथा भवेत् ।
स्वपिता जन्मसमये [10]देशान्तरनिवासवान् ॥ ५०५८ ॥

---

1. परमे श्चांशगे
2. एकसप्तति
3. ईश्वरांशगे
4. ह्रद्रयातना
5. जातके
6. मृतिश्चेति
7. अन्ते
8. असितेन
9. पितृजातः परोक्षश्च राहुयोगे विदेशवान् ॥
10. देशान्तेन निवासवान्

सिंहराशि[1]स्थिते सूर्ये राहुयोगे शुभेक्षिते ।
गिरिप्रान्त्येऽरण्यभागे नगरे जननं स्मृतम्[2] ॥ ५०५९ ॥

चतुर्थगर्भे संजातो ह्यथ वा पञ्चमोद्भवः[3] ।
भगिन्यो बहुलाश्च[4]स्युज्येष्ठभ्रातृविहीनवान् ॥ ५०६० ॥

सिंहांशगे क्रिये शुक्रे त्वचलांशे[5] प्रजायते ।
विप्रजन्मा सुखी नित्यं चतुर्थो गर्भजः स्मृतः[6] ॥ ५०६१ ॥

सूर्ये [7]यावत्फलानि स्युस्तावद्गर्भे प्रसूतिमान् ।
कालाधिपे राहुयुते स्वपिता सोदरैर्युतः ॥ ५०६२ ॥

प्रभांशगे दिवा सूर्ये कुम्भांशे शनिवीक्षिते ।
गुरुदृष्टियुते चैव पितरौ दीर्घजीविनौ[8] ॥ ५०६३ ॥

स्वपिता त्वसमर्थः[9] स्यात् सोदरीसोदरैर्युतः ।
तामसप्रकृतिश्चैव[10] विद्यासौख्यविहीनवान् ॥ ५०६४ ॥

प्रजांशके स्थिते सूर्ये गुरुणा च निरीक्षिते ।
सर्वसौभाग्यसंयुक्तः कामी दानरतः सुखी ॥ ५०६५ ॥

राहुयोगेऽर्किसंदृष्टे दुश्शीला स्वपितामही ।
पितृवंशे कलङ्कः स्यान्निर्दोषो मातृवंशके[11] ॥ ५०६६ ॥

अचलांशे पूर्वभागे कर्मेशे शनिसंयुते ।
गुरुदृष्टिफलं सत्यं[12] सद्गुणं मातृवंशके ॥ ५०६७ ॥

---

1. सिंहेकाले
2. अरण्यादिगिरिप्रान्ते नगरे प्रसवं स्मृतम् ॥
3. स्वयं चतुर्थगर्भःस्यादथ वा पञ्चमेषु च ।
4. भगिनी बहवश्चेति
5. अचलांशे
6. चतुर्थे गर्भजातके
7. सन्ति
8. युतश्चैव पितृमातृचिरायुषम्
9. असमर्थः
10. प्रकृतिश्चेति
11. मातृवंशगे
12. मातृवंशे शीलत्वमाप्नुयात्

राहु[1]योगफलं पित्रोः पितामह्या गुणं तथा ।
मीने नीचांशगे जीवे विकटांशे कुजेक्षिते ॥ ५०६८ ॥

वंशे कलङ्क [2]इत्याहुर्जारिणी स्वपितामही ।
स्वपितुः[3] सोदरी चैव तथैव च भविष्यति ॥ ५०६९ ॥

पितामहभ्रातृभार्या जारिणी[4]नात्र संशयः ।
माता गुणवती पूता सुप्रभांशे पतिव्रता ॥ ५०७० ॥

पितृभाग्यवती चैव भ्रातृभाग्यसमन्विता ।
भर्तृभाग्यविहीना[5] च किंचिद्भर्तृसुखान्विता ॥ ५०७१ ॥

एकभ्रातृसमायुक्ता [6]सोदर्या ह्येकया युता ।
मातृसौख्यविहीना[7] स्यात्पितृसौख्यसमन्विता ॥ ५०७२ ॥

एवंभूता सतीशेन बहुकालं सुमङ्गली ।
पितृस्थानाधिपे जीवे शन्यङ्गारकवीक्षिते ॥ ५०७३ ॥

विकटांशे प्रजातस्य[8] पितुः दीर्घायुरुच्यते ।
भाग्येशे विकटांशस्थे शन्यङ्गारकवीक्षिते ॥ ५०७४ ॥

मेषलग्ने प्रजातस्य[9] पिता दारिद्र्ययोगवान्
स्त्रीमूलाज्जीवनं चैति मातुलस्यवशात् सुखम् ॥ ५०७५ ॥

पितामहीकुले भाग्यं तन्मूलाज्जीवनं स्मृतम् ।
पितामहीभ्रातृभार्या [10]ह्यथवा स्वपितामही ॥ ५०७६ ॥

विकटांशकगे जीवे जारिणी पतिदूषणी ।
पितामहीफलं सत्यं कामी विषयलोलुपः ॥ ५०७७ ॥

---

1. राहुदृष्टिफलं पित्रोपि तामहिगुणं स्मृतम्
2. कलंक
3. स्वपिता चेति तथा भाव इतिस्मृतम्
4. जारत्वं
5. विहीनः स्यात्
6. एक
7. विहीनः
8. प्रजातश्च पितृ रादिशेत्
9. प्रजातश्च
10. अथवा

कलत्रद्वयवान् रागी बहुपुत्रार्थभाग्यवान् ।
बाल्ये दारिद्र्यमाप्नोति राजन्यद्वेषशोकवान् ॥ ५०७८ ॥

मध्ये भाग्याभिवृद्धिं [1]च ह्यन्ते पुत्रात् सुखं भवेत् ।
कीटे प्रभांशके सूर्ये [2]मेषलग्नोद्भवस्य च ॥ ५०७९ ॥

स्वपिता सौख्यहीनः स्यात्स्वार्जितं च नविद्यते ।
पितृभाग्यार्थसन्तोषी दानभाग्यसमन्वितः ॥ ५०८० ॥

किंचिद्रोग[3]शरीरी च ग्रहशङ्काप्रपीडितः ।
दुःस्वप्नवशतोदुःखमग्रहारे[4] निवासवान् ॥ ५०८१ ॥

भ्रातृप्राबल्ययोगेन मध्ये भाग्याभिवृद्धिमान् ।
ग्रन्थान्तरे भ्रातृनाशं भगिनीक्लेशवान् क्वचित् ॥ ५०८२ ॥

पाराशरमते चोक्तं[5] स्वमते भ्रातृनाशनम् ।
षष्ठे मन्दे धनाढ्यश्च वातप्रकृतिदेहवान् ॥ ५०८३ ॥

दायादिवशमाप्नोति वार्धके भ्रातृशोकवान् ।
[6]मातुलैकश्चिरायुष्मानेका मातृष्सायुषी ॥ ५०८४ ॥

तद्भर्ता राजयोगी [7]स्याद्बहुपुत्रः सुभाग्यवान् ।
कनिष्ठभ्रातृमान् रागी पितृव्येन सुखान्वितः[8] ॥ ५०८५ ॥

षष्ठे भूमिसुते मन्दे मातुलश्चाप्यपुत्रकः[9] ।
मृतप्रजोऽथ वा [10]चैव प्रतिबन्धयुतो भवेत् ॥ ५०८६ ॥

सम्पद्दाये मातुलस्तु[11] पितृमूलात् सुभाग्यवान् ।
स्वभुक्तौ वाहनप्राप्तिर्मध्यखण्डे शुभान्वितः[12] ॥ ५०८७ ॥

---

1. वृद्धिश्च अन्ते
2. सिंगलमस्य जातके
3. शरीरः स्याद्
4. आप्नोति अग्रहारे
5. मतं चेति
6. मातुलस्यैकमायुष्मेका
7. स्याद्
8. सुखावहम्
9. मातुलस्य अपुत्रकम्
10. चेति प्रतिबन्धप्रदो
11. मातुलस्य
12. शुभावहम्

मातामहस्तु[1] सन्तोषी राजद्वारे शुभाधिकः ।
प्रबलोयोगभाग्याप्तिः सम्पद्भुक्तौ न संशय ॥ ५०८८ ॥

पिता[2]महस्तु सन्तापं ज्ञातिवर्गे ह्युपद्रवम् ।
बन्धुक्लेशमवाप्नोति स्वपितुर्व्याकुलं कचित् ॥ ५०८९ ॥

चापे कुन्दांशगे चन्द्रे स्वसुतेन समन्विते ।
भूम्यात्मजेन संदृष्टे भेदमातुलयोगवान् ॥ ५०९० ॥

स्वमातुलश्च[3] दीर्घायुर्बाल्ये जठररोगवान् ।
विवाहानन्तरं भाग्यमल्पकालं कचित् सुखम् ॥ ५०९१ ॥

मित्र[4]पुत्रयुतश्चैव मातुलस्य फलं स्मृतम् ।
चापे कुन्दांशगे चन्द्रे भूसुतेन निरीक्षिते ॥ ५०९२ ॥

पूर्वभागे भ्रातृयुक्तः[5] स्वपिता च तथा भवेत् ।
उत्तरांशे च जनकः सोदरभ्रातृहीनवान् ॥ ५०९३ ॥

जातकस्य तथा विन्द्याद्भगिन्यो बहुलाः[6] स्मृताः ।
चन्द्रनाडीफलाध्याये [7]विस्तृतं भ्रातृलक्षणन् ॥ ५०९४ ॥

बुधे यावत्फलानि [8]स्युस्तावत्सङ्ख्याः सहोदराः ।
दीर्घायुषाः भविष्यन्ति[9] सुभभांशे दिवाकरे ॥ ५०९५ ॥

सूर्ये यावत्फलानि स्युस्तथा भुक्तांशसङ्ख्यकाः[10] ।
सुभभांशे प्रजातस्य स्वपितुः[11] सोदराः स्मृताः ॥ ५०९६ ॥

---

1. मातामहस्य
2. पितामहस्य सन्तोषं ज्ञातिवर्गे उपद्रवम्
3. स्वमातुलस्य
4. प्रजायोगमेति
5. योगं
6. भगिनीबहवः
7. विस्तारं
8. फलं सन्ति
9. योगमित्याहुः
10. फलं सान्ति भुक्तांशस्यैवमेव च
11. प्रजातस्य स्वपिता

ग्रहांशरश्मिसङ्ख्याश्च चिरायुष्या:[1] भवन्तिहि ।
पितृमातृभ्रातृफलं योजयेत् कालवित्तमः ॥ ५०९७ ॥

लाभेशो कुजसंयुक्ते षष्ठे गुरुनिरीक्षिते ।
स्वज्येष्ठभगिनीपीडां व्रणोपद्रवमादिशेत् ॥ ५०९८ ॥

षष्ठेशांशे तत्त्रिकोणे रन्ध्रेशांशत्रिकोणगे ।
स्फुटयोगं गते मन्दे [2]सोदराणामुपद्रवम् ॥ ५०९९ ॥

स्वज्येष्ठभगिनीयोगे षष्ठे मन्दे च संस्थिते[3] ।
शुभदृष्टि[4]विहीने च क्लेशिता ज्येष्ठसोदरी ॥ ५१०० ॥

जीवे [5]दृष्टे सुमाङ्गल्यमल्पसन्तानमादिशेत् ।
शनिनाडी[6]फलाध्याये विस्तृतं सोदरीफलम् ॥ ५१०१ ॥

व्ययेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
व्ययेशदृष्टिराशौ तु [7]ह्यरिष्टं स्वपितामहः ॥ ५१०२ ॥

स्वपुत्रारिष्टयोगश्च[8] क्षेमदाये भविष्यति ।
सम्पद्दाये सुभभांशे पूर्वोक्तशनिकालगे ॥ ५१०३ ॥

पितामहोऽरिष्टमेति पितुर्माता[9] तथा भवेत् ।
लग्नेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ५१०४ ॥

[10]मातुलेन मनस्तापं क्रूरमासे महद्भयम् ।
प्रभांशे वृश्चिके सूर्ये मेषलग्नोद्भवस्य च[11] ॥ ५१०५ ॥

---

1. सङ्ख्यानि दीर्घायुर्भविष्यति
2. सोदरस्य उपद्रवम्
3. मन्दस्य जातके
4. विहीनः स्यात् क्लेशं च
5. दृष्टिसुमाङ्गल्यं
6. फले योगे विस्तारं
7. अरिष्टं
8. योगं स्यात्
9. महारिष्टमेति पि॰ महि
10. मातुलस्य
11. मेषलग्नस्य जातके

कन्याशनौ भ्रातृपीडा चापे भ्रातृविनाशवान् ।
एकोनविंशगे वर्षे विंशे [1]जीवे प्रभांशगे ॥ ५१०६ ॥

[2]प्राप्नुतोपितरौऽरिष्टं नवमाब्दे कचिद्विपत् ।
सुखेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ५१०७ ॥

स्वपिता क्लेशबाहुल्यं सम्पद्दाये न संशयः ।
विपद्दशान्त्यमारभ्य क्षेमदाये स्वभुक्तिषु ॥ ५१०८ ॥

प्रभांशके प्रजातस्य पित्ररिष्टं[3] विनिर्दिशेत् ।
कीटे शनिस्थिते काले सम्पद्दाये पितामहः ॥ ५१०९ ॥

अरिष्टफलमाप्नोति जीविते चापगे शनौ ।
सूर्यलग्ने सूर्यकाले स्फुटयोगं गते शनौ ॥ ५११० ॥

तत्त्रिकोणेऽथ वा चेति पितृपीडां विनिर्दिशेत् ।
भेदमातुलयोगेन विपद्दाये महत् सुखम् ॥ ५१११ ॥

प्राबल्यं [4]चैव लभते ह्युद्योगं क्षेमदायगे ।
रन्ध्रेशदृष्टराशीषु रन्ध्रेशांशत्रिकोणगे ॥ ५११२ ॥

स्फुटयोगं गते मन्दे स्वजनात्सजनावधि ।
कन्याशनिस्थिते काले जन्मदेशे नृपावधि ॥ ५११३ ॥

शनिचारवशाद्रोगी पीडितोऽत्यन्तदुःखवान् ।
माग्येशे निकटांशस्थे शन्यङ्गारकवीक्षिते ॥ ५११४ ॥

अल्पभोगं [5]च लभते राजद्वारे कुयुक्तिमान् ।
कुत्सितप्रभुराज्येषु तद्द्वारि विकटोक्तिमान् ॥ ५११५ ॥

---

1. जीव
2. पितृमातारिष्टमेति
3. प्रजातश्च पित्रारिष्टं
4. स्वप्राबाल्यं प्रकुर्वीत उद्योगं
5. प्रकुर्वीत

कन्यागुरुस्थिते काले [1]ह्यथवा गुरुवक्रगे ।
मौञ्जीबन्धनमाप्नोति तत्काले पितृसौख्यवान् ॥ ५११६ ॥

बालारिष्टभयं किंचिच्छान्त्या शान्ति प्रयास्यति ।
षोडशाब्दे विवाहः[2] स्यादथवा मनुवत्सरे ॥ ५११७ ॥

स्वमातुलकुलोद्वाही[3] पुत्रपुत्रीसमृद्धिमान् ।
[4]सिंहांशके पूर्वभागे मीने जीवे प्रजायते ॥ ५११८ ॥

बालारिष्टभयं नास्ति चतुरब्दे [5]महाविपत् ।
जन्मादिसप्तमे मासे [6]ह्यष्टमैकादशेऽथ वा ॥ ५११९ ॥

मासे त्रयोदशे क्लेशं मान्द्यज्वरभयं क्वचित् ।
सम्पद्दाये द्वितीयाब्दे ज्येष्ठभ्राता शुभान्वितः[7] ॥ ५१२० ॥

सुताधिपदशान्त्यादौ[8] सुखाधिपतिदायगे ।
अचलांशे प्रजातस्य [9]मात्ररिष्टं विनिर्दिशेत् ॥ ५१२१ ॥

भूसुतस्य दशान्त्यादौ[10] राहुदाये स्वभुक्तिषु ।
पञ्चचत्वारिंशकेऽब्दे [11]ह्यपमृत्युभयं स्मृतम् ॥ ५१२२ ॥

सन्निपातभयप्राप्तिर्धनुर्मासे मृतिं वदेत् ।
प्रभांशे वृश्चिके सूर्ये चापे कुन्दांशकेऽमृते[12] ॥ ५१२३ ॥

मेषलग्ने प्रजातस्य राहुदाये मृतिं वदेत् ।
लग्नाष्टमगते [13]राहौ केतौ वा शनिवीक्षिते ॥ ५१२४ ॥

---

1. अथ वा चक्रकेतवे
2. विवाहं
3. कुलोद्वाहं
4. सिंहकाले
5. महद्विपत्
6. अष्टमैकादशीथवा
7. भ्रातृशुभावहम्
8. दशान्त्यादि
9. मात्वारिष्टं
10. दशान्त्यादि
11. अपमृत्यु
12. शशी
13. राहुः केतुर्वा

महारोगभयार्तश्च [1]ह्यन्ते दुर्गतिमादिशेत् ।
भूसुतस्य दशान्त्य:दौ[2] राहुदाये स्वभुक्तिषु ॥ ५१२५ ॥

अल्पपूर्णे मध्यकाले [3]ह्यपमृत्युर्भविष्यति ।
जीविते पञ्चशत्वारिंपरमायुश्च विन्दति ॥ ५१२६ ॥

—: * :—

## ॥ कुम्भलग्ने मालांशः ॥

[4]मालांशके तुलासूर्ये कुम्भलग्ने प्रजायते ।
श्यामवर्णशरीरी च[5] मेधावी विक्रमान्वितः ॥ ५१२७ ॥

[6]कुम्भलग्ने तुलासूर्ये मीनांशे बुधसंयुते ।
स्वयं सीमन्तपुत्रश्च नीलवर्णः शुभाकृतिः ॥ ५१२८ ॥

सूर्यांशाधिपतौ जीवे [7]स्वसितेन निरीक्षिते ।
लग्नाद्धनगते भोगी विद्याबुद्धि[8]युतः सुखी ॥ ५१२९ ॥

मालांशे मालिकायोगे द्वितीये शुभखेचरे ।
राजद्वारे प्रसिद्धश्च राजामात्यप्रसादवान् ॥ ५१३० ॥

[9]कुम्भलग्ने तुलासूर्ये मीनांशे कुम्भकालगे ।
घातांशगे प्रजातश्च[10] सोदरीसोदरैर्युतः ॥ ५१३१ ॥

बुद्धिमान् कुशलो वाग्मी [11]ह्यन्तःकोपी प्रगल्भवाक् ।
[12]कुम्भलग्ने पापकर्मा तुलासूर्ये धनाढ्यवान् ॥ ५१३२ ॥

---

1. अन्ते
2. दशान्त्यादि
3. अपमृत्युस्तथाश्रितः
4. मातुलांशे
5. शरीरः स्यात्
6. काले
7. असितेन
8. प्रदः
9. तुलालग्ने
10. प्रजातस्य
11. अन्तः
12. काले

मालांशगे कुम्भलग्ने[1] कुग्रामे जननं स्मृतम् ।
अग्रहारेऽथ वा [2]चैव जीर्णगेहे प्रसूतिमान् ॥ ५१३३ ॥

इन्द्रपश्चिमवीथ्योश्च[3] दक्षिणोत्तरभागगे ।
[4]द्वारयुक्ते गृहे चैव मालांशे प्रसवः स्मृतः ॥ ५१३४ ॥

पूर्वभागे कुम्भलग्ने भूसुतेन निरीक्षिते ।
प्रसूतिकाले जनन्या[5] बहुवेदनमादिशेत् ॥ ५१३५ ॥

सुधांशगे निशानाथे मालिकायोगजस्य च[6] ।
[7]आयुष्मन्तौ च पितरौ स्वपिता भ्रातृशोकवान् ॥ ५१३६ ॥

पितृष्वसा भाग्यवती भूषिता कनकप्रभा ।
पुत्रिणी भर्तृयुक्ता च[8] बहुकालं सुजीवति ॥ ५१३७ ॥

चन्द्रादिमालिकायोगे चन्द्रे गुरुनिरीक्षिते ।
राजलक्षणसम्पन्नो बाल्ये स्वल्प प्रपीडितः[9] ॥ ५१३८ ॥

जन्मदाये क्रूरमासे लग्नाधिपतिभुक्तिषु ।
मान्द्यज्वरभयार्तश्च मारीज्वरसुपीडितः[10] ॥ ५१३९ ॥

स्वर्क्षे मीनांशगे चन्द्रे गुरुभुक्तौ प्रजायते ।
बालारिष्टभयं किंचिच्छनिभुक्तौ न संशयः ॥ ५१४० ॥

जन्माब्दगे तृतीयाब्दे मालांशे क्रूरमासगे ।
बालारिष्टभयप्राप्तिः शान्त्या शान्तिं प्रयास्यति ॥ ५१४१ ॥

लग्नाधिपेऽष्टमे स्थाने मालिकायोगजस्य च[11] ।
रन्ध्राधिप[12]दशान्त्यादावपमृत्युभयं क्वचित् ॥ ५१४२ ॥

---

1. काले
2. चेति
3. वीथीषु
4. द्वारं चेति तथा प्रोक्तं मालांशे प्रसवं स्मृतम्
5. जननी
6. जातके
7. पितृमातृचिरायुष्यं
8. परिभर्ता स्याद्
9. प्रपीडवान्
10. प्रियादीनि मारीज्वरभयातुरः
11. जातके
12. शान्त्यादि अपमृत्यु

तद्दोषपरिहारार्थं शनिप्रार्थनमादिशेत् ।
षष्ठाष्टमव्यये चन्द्रे गुरुदृष्टिविवर्जिते ॥ ५१४३ ॥

बालारिष्टभयं सत्यं जन्मदाये न संशयः ।
षष्ठे सुधांशगे[1] चन्द्रे गुरुणा च निरीक्षिते ॥ ५१४४ ॥

बालारिष्टभयं नास्ति चन्द्रप्रार्थनमादिशेत् ।
राजतं चन्द्रमभ्यर्च्य दैवज्ञाय[2] प्रदापयेत् ॥ ५१४५ ॥

बालारिष्टं निहत्याशु गिरिर्वज्रहतो यथा ।
षष्ठाष्टमगते मन्दे स्वांशे गुरुनिरीक्षिते ॥ ५१४६ ॥

शनिप्रतिमादानेन देहारोग्यार्थसौख्यवान् ।
स्वर्क्षे नवांशगे चन्द्रे मालिकायोगजस्तथा[3] ॥ ५१४७ ॥

गुरुदृष्टे चिरायुष्मान् भवतः पितरौ तथा[4] ।
लाभेशे शनिसंदृष्टे ऋक्षसंधौ[5] प्रजायते ॥ ५१४८ ॥

पित्ररिष्टो[6]पशान्त्यर्थं दानं कुर्याद्विचक्षणः ।
सुवर्णहयदानेन[7] पितृव्यारिष्टनाशनम् ॥ ५१४९ ॥

तदभावे क्लेशमेति पितृव्यस्तु[8] न संशयः ।
ऋक्षशान्तिं प्रकुर्वीत पश्चाद्दानं समाचरेत् ॥ ५१५० ॥

स्वर्णनिष्कप्रमाणेन ह्यश्वदानादि वृद्धिदम्[9] ।
पितृव्यभवने शुक्रे तदीशे शनिवीक्षिते ॥ ५१५१ ॥

सुवर्णाश्वप्रदानेन पितृव्यारोग्यसौख्यवान् ।
तदभावे जातकस्य पिता पितृसमोऽपि वा ॥ ५१५२ ॥

---

1. सुतांशगे
2. दैवज्ञस्य
3. जातके
4. गुरुदृष्टिचिरायुष्यं पितृमातृ तथा भवेत् ।
5. ऋक्षगण्डे
6. पितारिष्टोप
7. स्वर्णघोटकदानेन
8. पितृव्यस्य
9. वृद्धिकृत्

पाके जन्मदशान्त्यादौ सम्पद्दाये विनाशनम्[1] ।
मालांशगे तुलासूर्ये निधनाधिपसंयुते ॥ ५१५३ ॥

पितृव्यस्य महारोगः[2] शान्त्या शान्तिं प्रयास्यति ।
अरोगदृढगात्रश्च[3] स्वपिता सात्त्विकः सुखी ॥ ५१५४ ॥

व्यवसायपरो नित्यं ग्रामद्रव्यापहारकः ।
कालान्तरे भ्रातृशोकं स्वपिता नात्र संशयः ॥ ५१५५ ॥

विपद्दाये फलं चैति भ्रातृशोकयुतः[4] पिता ।
जन्मदाये द्वितीयाब्दे जातकस्य महाविपत्[5] ॥ ५१५६ ॥

तृतीयाब्दे कचिच्चैति क्रूरमासे न संशयः ।
स्वपिता भगिनी भर्तृयोगेन श्रीयुतो[6]भवेत् ॥ ५१५७ ॥

मालांशगे सौख्यमेति द्वितीयाब्दे न संशयः ।
जन्माब्दगे जन्मदेशे मालांशे जन्मगेहगे ॥ ५१५८ ॥

महारोगातुरश्चैति[7] भूपतिर्नात्र संशयः ।
रन्ध्राधिपे भाग्यगते रन्ध्राधिपदशान्त्यगे ॥ ५१५९ ॥

स्वजन्मदेशे नृपतिर्महारोगातुरो भवेत् ।
तदभावे पितृव्यश्च [8]व्याप्यरोगप्रपीडितः ॥ ५१६० ॥

स्वपितामातुलक्लेशं तत्सुतो रोगसंयुतः[9] ।
नीचे मालांशगे सूर्ये जन्मनक्षत्रदायके ॥ ५१६१ ॥

स्वजन्मदेशे नृपतिः क्लेशं प्राप्नोति भूरिशः ।
मीने मन्दे पूर्वभागे कुम्भलग्न[10]समुद्भवः ॥ ५१६२ ॥

---

1. दशान्त्यादि सम्पद्दाये अरिष्टकृत्
2. महारोगं
3. अरोगदृढगात्रस्य
4. प्रदः
5. महद्विपत्
6. श्रियवान्
7. रोगातुरश्चेति
8. स्याद्व्याप्यरोग
9. तत्सुतामयशोकवान्
10. कुम्भलग्नस्य जातके

नीचे मालांशगे सूर्ये जन्मदाये नृपावधि ।
पितृव्यश्च[1] तथा विन्द्यात् स्वपिता सौख्यभाग्भवेत् ॥ ५१६३ ॥

मालांशके जन्मदाये [2]चामात्यप्राणनाशनम् ।
पितृष्व[3]सुर्भर्तृभाग्यं योगप्राबल्यमादिशेत् ॥ ५१६४ ॥

मालांशगे तुलासूर्ये [4]मीनांशे जनितस्य च ।
सोदराः सप्त संख्याश्च [5]भगिन्यौ द्वे सजीविते ॥ ५१६५ ॥

[6]आयुष्मन्तौ भ्रातरौ द्वौ शेषं नाशमितीरयेत् ।
कर्मे राहुयुते दृष्टे सोदरभ्रातृवत्सलः ॥ ५१६६ ॥

बुद्धिमान्नीतिमांश्चेति मकरांशे सुकोपवान् ।
गुरुदृष्ट्या [7]सुदीर्घायुः दैवब्राह्मणपोषकः ॥ ५१६७ ॥

वयोमध्ये भाग्यवृद्धिर्हरिशङ्करभक्तिमान् ।
षष्ठादिमालिकायोगे द्वितीये शुभखेचरे ॥ ५१६८ ॥

विपद्दाये महद्भाग्यमपरार्धे [8]श्रियायुतम् ।
दुर्दरांशगते जीवे स्वक्षेत्रेशनिवीक्षिते ॥ ५१६९ ॥

कुम्भलग्ने प्रजातश्च[9] बन्धुमूलात् सुकीर्तिमान् ।
[10]स्वपितुर्भगिनीपुत्रीभोगेन [11]श्रियमश्नुते ॥ ५१७० ॥

त्रिंशद्वर्षात् परं भाग्यं त्रिंशोपरि विशेषतः ।
दुर्दरांशकगे जीवे चतुर्थे केतु[12]संस्थिते ॥ ५१७१ ॥

लिपित्रयज्ञानमेति लेख्यविद्याविशारदः ।
राजद्वारे [13]कीर्तियुक्तः प्राधान्यप्रियान् गुणी ॥ ५१७२ ॥

---

1. पितृव्यस्य
2. अमात्य
3. पितृव्यसा भर्तृभाग्यं
4. मान........शस्य जातके
5. सप्तसंख्याश्चिभगिनीद्वयमायुषी
6. भ्रातृद्वयं चिरायुष्यं
7. गुरुदृष्टि
8. श्रियावहम्
9. प्रजातस्य
10. स्वपिता भगिनी पुत्री
11. श्रियवान् ....
12. जातके
13. सुकीर्तिश्च

विपद्दाये सुवाहाप्तिस्तृतीयांशे सुभाग्यवान् ।
बहुग्रामाधिकारी[1] च ग्रामणी व्यवसायकः ॥ ५१७३ ॥

मौञ्जीबन्धनकर्माणि सम्पद्दाये न संशयः ।
द्वादशाब्दे विवाहः[2] स्यादथवा वसुवत्सरे ॥ ५१७४ ॥

विपद्दाये फलं सत्यं योगवान् कीर्तिमान् सुखी ।
नीचे [3]मृगांशगे सूर्ये दुर्दरांशकगे गुरौ ॥ ५१७५ ॥

कुम्भलग्ने प्रजातस्तु[4] कलत्रद्वययोगवान् ।
क्षेमाधिपदशाकले स्वभुक्तौ दारनाशनम् ॥ ५१७६ ॥

क्षिप्रेणोद्वाहमाप्नोति कन्यान्ते तौलिगे शनौ ।
ज्येष्ठभार्याद्विसन्ताननाशं चैव भविष्यति[5] ॥ ५१७७ ॥

दारान्तरे सुतप्राप्तिरल्पसन्तानयोगवान् ।
भाग्याधिपदशाकाले लग्नेशांशत्रिकोणगे ॥ ५१७८ ॥

स्फुटयोगं गते मन्दे पितृव्यस्य विनाशनम् ।
पितृष्वसा दशामध्ये मीनान्ते मेषगे शनौ ॥ ५१७९ ॥

अतीव क्लेशकार्यं [6]च तत्त्रिकोणे कचित् कचित् ।
जन्मदाये पितृव्यस्य विवाहो यत्नविघ्नितः[7] ॥ ५१८० ॥

पश्चाद्विवाहमाप्नोति विपद्दाये मरिष्यति ।
भाग्याधिपदशासन्धौ मालांशे स्वपितुर्विपत्[8] ॥ ५१८१ ॥

जीविते दीर्घमायुष्यं प्रत्यग्दाये मरिष्यति ।
सूर्यांशगे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ५१८२ ॥

---

1. ग्रामाधिकारं स्यात्
2. विवाहं
3. मूलांशगे
4. प्रजातस्य
5. चैवमिति स्मृतम्
6. स्यात्
7. स्याद्विवाहं यत्नविघ्नवान्
8. दशासंधि मालांशे स्वपिता विपत्

मालांशगे [1]पितरिष्टं विपत्तारदशान्त्यगे ।
प्रत्यब्दाये मातृहानिश्चापे मन्दे च संस्थिते[2] ॥ ५१८३ ॥

दुर्दरांशकगे जीवे [3]त्वसितेन निरीक्षिते ।
द्विचत्वारिंशगे माता परलोकं प्रयास्यति ॥ ५१८४ ॥

सुधांशगे निशानाथे विप्रकालोद्भवस्य च[4] ।
परं बृहोपदेशाच्च[5] विनश्येच्च पितामही ॥ ५१८५ ॥

कर्मेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
स्वदेहायासरोगादि क्रूरमासे भविष्यति ॥ ५१८६ ॥

नैधनेशद्दशाकाले कर्माधिपतिभुक्तिषु ।
मालांशगे प्रजातस्य दक्षिणायनगे मृतिः ॥ ५१८७ ॥

मालांशकगते जीवे स्वक्षेत्रे शनिवीक्षिते ।
एकसप्ततिवर्षाणि परमायुश्च विन्दति ॥ ५१८८ ॥

तदर्धे [6]ह्यपमृत्युश्च शान्त्या शान्तिं प्रयास्यति ।
अपमृत्युभयं नास्ति [7]दीर्घायुर्नात्र संशयः ॥ ५१८९ ॥

लग्नात् कर्मगते राहौ[8] द्वितीये शुभखेचरे ।
स्थापको ह्यग्रहारस्योद्यानानां सरसां तथा[9] ॥ ५१९० ॥

लाभे शुक्रे प्रजातश्च[10] योगवान् कीर्तिमान् गुणी ।
क्षेमदाये महद्भाग्यं विपद्दाये क्वचित् क्वचित् ॥ ५१९१ ॥

धनाधिपतिनाडीषु लग्नाधिपतिनाडिगे ।
मालांशे मालिकायोगे फलं विस्तरमादिशेत् ॥ ५१९२ ॥

---

1. पितारिष्टं
2. मन्दस्य कालगे
3. असितेन
4. कालस्य जातके
5. चेति
6. अपमृत्युश्च
7. दीर्घमायुर्न
8. राहुः
9. तटाकोद्यानधर्मादि अग्रहारप्रतिष्ठवान
10. प्रजातस्य

ब्रह्मलोकफलप्राप्तिरापत्संन्यासयोगवान् ।
सूर्यनाडीफलं सत्यं प्रत्यक्षं देवकेरलम् ॥ ५१९३ ॥

— :*: —

## कन्याबुधसोमलतांशनाडी[1]फलम्

बुधे सोमलतांशस्थे स्वोच्चे चन्द्रनिरीक्षिते ।
शूद्रकाले प्रजातश्च शूद्रजन्मा सुखी भवेत् ॥ ५१९४ ॥

विप्रकाले प्रजातश्च वैश्यो वा ब्राह्मणोऽपि वा[2] ।
वैश्यकाले वैश्यवृत्तिः क्षत्रियश्च[3] तथा भवेत् ॥ ५१९५ ॥

शूद्रसङ्करजातीषु जीवनं वैश्यवृत्तिना ।
विप्रादिपञ्चजातीषु[4] योजयेत् कालवित्तमः ॥ ५१९६ ॥

हरिणांशसोमवल्ल्योः फलैक्यं[5] मनुरब्रवीत् ।
नाडीद्वयफलं चैकं ब्रह्मणा निर्मितं पुरा ॥ ५१९७ ॥

भाग्येशे हरिणांशस्थे [6]स्वसितेन निरीक्षिते ।
चत्वारिंशात् परं शोकं बाल्येऽल्पसुखवान् भवेत् ॥ ५१९८ ॥

मध्ये भाग्यसमृद्धश्च[7] विंशोपरि सुसौख्यवान् ।
[8]बुधे सोमलतांशस्थे बाल्ये मातुलनाशनम् ॥ ५१९९ ॥

स्वपिता भ्रातृहीनः स्यात् सोदरी[9]सुसमन्वितः ।
पितृष्वसुः[10] सुतः कश्चिद्देवद्रव्यापहारकः[11] ॥ ५२०० ॥

---

1. नाडी...
2. प्रजातस्य वैश्यब्राह्मणजातकम्
3. क्षत्रियस्य
4. पञ्चकं चेति
5. हरिणांशे सोमलते एकं चेत्
6. असितेन
7. समृद्धिश्च
8. बुध
9. सहोदर
10. पितृष्वसा
11. हारवान्

धर्मध्वजी वृद्धि[1]जीवी बालशिक्षाप्रदो भवेत् ।
[2]हरिणांशगते सूर्ये बुधे सोमलतांशगे ॥ ५२०१ ॥

स्वपिता रोगदेही च सम्पद्दाये मृतिं लभेत्[3] ।
सूर्यांशके[4] तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ५२०२ ॥

सम्पद्दाये [5]पित्ररिष्टं पश्चादुद्वाहमादिशेत् ।
सितांशगे सुखाधीशे बुधे सोमलतांशगे ॥ ५२०३ ॥

जननी दीर्घमायुष्यं सोदरीसोदरैर्युतः ।
विक्रमेशस्य नाडीषु [6]विस्तृतं भ्रातृलक्षणम् ॥ ५२०४ ॥

पुत्रयोगफलं चैव[7] वदेदुद्वाहलक्षणम् ।
हरौ सोमलतांशस्थे सौम्ये रन्ध्रे च संस्थिते[8] ॥ ५२०५ ॥

बहवः सोदराश्चैव सन्तानानि तथैव च[9] ।
[10]श्रीमन्तौ भ्रातरौ ज्येष्ठावेकः पुत्रविहीनवान् ॥ ५२०६ ॥

कलत्रद्वयवांश्चैव पुत्रीभिश्च[11] समन्वितः ।
सर्वज्येष्ठानुजभ्राता[12] पुत्रवान् पुत्रिमान् भवेत् ॥ ५२०७ ॥

भ्रातृप्रियः सुसन्तोषी गूढकामरतः[13] सुखी ।
स्वोच्चे कुम्भांशगे सौम्ये [14]स्वसितेन निरीक्षिते ॥ ५२०८ ॥

सर्वज्येष्ठानुजभ्रातृत्रयवान् धर्मवत्सलः ।
[15]शूद्रेण स्नेहवान् रागी बहुमित्रयुतः सुखी ॥ ५२०९ ॥

---

1. वृत्ति
2. अंशानांशकगे सूर्ये बुध
3. देहः स्यात् सम्पद्दाये मृतिं वदेत्
4. सूर्यांशगे
5. पितारिष्टं
6. विस्तारं
7. चेति
8. हरिसोमलतांशस्थे सौम्ये रन्ध्रनिरीक्षिते ।
9. चेति सन्तानं च तथा भवेत्
10. ज्येष्ठभ्रातृद्वयश्रीमानेकः
11. द्वयवांश्चेति पुत्रिका च
12. भ्रातृ
13. कामप्रदः
14. असितेन
15. सशूद्रस्नेहवान् रागी बहुमित्रप्रदः सुखी

बन्धुवर्गे सुपूज्यश्च देवब्राह्मणपोषकः ।
हरिणांशकगे सूर्ये हरिशङ्करभक्तिमान् ॥ ५२१० ॥

गुरुभक्तिरतो नित्यं सदा दीनजनप्रियः ।
वैदिको धर्मवान् साधु वैदिकाचारबुद्धिमान् ॥ ५२११ ॥

नीचांश[1]कगते सौम्ये शुभे केतौ च संस्थिते ।
कुग्रामे वासमाप्नोति [2]ह्यथ वा जननं स्मृतम् ॥ ५२१२ ॥

कालान्तरे पुण्यदेशे वासं [3]च वार्धके श्रियम् ।
ज्येष्ठभ्रातृविनाशेन क्लेशं प्राप्नोति भूरिशः ॥ ५२१३ ॥

बुधे सोमलतांशस्थे बहुसन्तानयोगवान् ।
एकपुत्रश्चिरायुष्मान्[4] पुत्रिकाः पञ्चसंख्यकाः ॥ ५२१४ ॥

ग्रन्थान्तरे गर्गमते[5] बुधे सोमलतांशगे ।
द्वौ पुत्रौ कन्यकाः पञ्च दीर्घायुष्यो[6]भवन्तिते ॥ ५२१५ ॥

मनुसंख्यार्कसंख्याश्च[7] सन्तानोत्पत्तयस्तथा ।
[8]नश्यन्ति बहवश्चैव ह्येकः पुत्रश्चिरायुषः ॥ ५२१६ ॥

[9]वृद्धपाराशरे ग्रन्थे बुधे सोमलतांशगे ।
पुरापातकदोषेण मृतपुत्रबहुत्ववान् ॥ ५२१७ ॥

एकः पुत्रश्चिरायुष्मान्[10] गर्गग्रन्थे द्विपुत्रवान् ।
स्वमते [11]ह्येकपुत्रश्च पुत्रिका पञ्च जीवति ॥ ५२१८ ॥

---

1. नीचांशगे..........शुभे केतुश्च जातके
2. अथ वा
3. वासं चेद्वार्धकश्रियः
4. चिरायुष्यं पुत्रिकाः पञ्चसंख्यकाः
5. गर्गहोरे बुधसोम
6. दीर्घमायुर्भविष्यति
7. संख्यानि सन्तानोतातात्तिमादिशेत्
8. नाशं च बहवश्चेति एकः पुत्रश्चिरायुषम्
9. वृद्धेवारांशगे होरेबुध
10. पुत्रश्चिरायुष्यं गर्गहोरे द्विपुत्रवान्
11. एकपुत्रश्च

[1]त्रिपुत्रिकाः सुमङ्गल्यः शेषं क्लेशयुतेऽपि च ।
स्वजन्मर्क्षे सुतोत्पत्तिर्दीर्घमायुश्च विन्दति ॥ ५२१९ ॥

धर्माधिपदशाकाले [2]पुत्रप्राप्तिं विनिर्दिशेत् ।
धनाधिपदशाकाले पुत्रप्राबल्यमश्नुते ॥ ५२२० ॥

अतीव सौख्यमाप्नोति पुत्रयोगं शुभावहम् ।
व्यये सोमलतांशस्थे स्वोच्चे सौम्ये सुपुण्यवान् ॥ ५२२१ ॥

स्वदशायां तु[3] सौख्याप्तिर्विपद्दाये धनैर्युतः ।
क्षेमदाये दलं सौख्यं तृतीयांशे धनक्षयम् ॥ ५२२२ ॥

प्रत्यग्दाये दले चैव दारिद्र्येण च कर्शितः ।
भाग्येशे [4]त्वसितांशस्थे क्लेशं क्षेमदशान्त्यगे ॥ ५२२३ ॥

अतीव क्लेशदारिद्र्य देशत्यागं[5] विनिर्दिशेत् ।
क्षेमाधिपदशाकाले गोचरे जन्मगे शनौ ॥ ५२२४ ॥

द्वितीये द्वादशान्त्ये वा मातृनिर्याणमादिशेत् ।
सम्पत्तारदशासन्धौ[6] सोमवल्यंशजस्तथा ॥ ५२२५ ॥

अपमृत्युभयप्राप्तिं[7] मृतप्रायोपजीवति ।
रन्ध्राधिपदशाकाले भाग्याधिपतिभुक्तिषु ॥ ५२२६ ॥

भ्रातृशोकं [8]च लभते दारिद्र्येण च कर्शितः ।
लाभाधिपदशान्त्यादौ[9] कर्माधिपतिदायगे ॥ ५२२७ ॥

मन्दे तुलान्त्यगे कीटे भ्रातृनिर्याणमादिशेत् ।
रन्ध्रेशांशे सुतेशांशे स्फुटयोगं गते शनौ ॥ ५२२८ ॥

---

1. पुत्रत्रयं सुमाङ्गल्यं क्लेशवती भवेत्
2. पुत्रसंख्याविनि
3. स्वदशान्त्यादिसौख्याप्तिर्विपद्दाये धनाप्तिमान्
4. असितांश
5. दरिद्रं
6. संधिसोमवल्यंशजातके
7. भयप्राप्तिः
8. प्रकुर्वीत दारिद्र्येण च अतः परम्
9. दशान्त्यादि

हरिणांशे प्रजातस्य भ्रातृशोकं विनिर्दिशेत् ।
तत्त्रिकोणे मनस्तापं भ्रातृपुत्रवशाद्व्यथाम्[1] ॥ ५२२९ ॥

सहोदरसुतादी[2]नामरिष्टं च विनिर्दिशेत् ।
बुधांशगे तत्त्रिकोणे षष्ठेशांशत्रिकोणगे ॥ ५२३० ॥

स्फुटयोगं गते मन्दे [3]ह्यतिमित्रजनावधि ।
लाभाधिपदशाकाले स्वमित्रजननाशनम् ॥ ५२३१ ॥

कर्माधिपदशाकाले पूर्वोक्तस्फुटमार्गतः ।
कर्मेशांशे तत्त्रिकोणे व्ययेशांशत्रिकोणगे ॥ ५२३२ ॥

स्फुटयोगं गते मन्दे सहोदरमनोव्यथा ।
केत्वंशगे तत्त्रिकोणे सोमवस्यंश[4]जस्य च ॥ ५२३३ ॥

स्फुटयोगं गते मन्दे देशाधिपतिनाशनम् ।
भूपतिःसमनाशो वा जन्मदेशे जनावधि ॥ ५२३४ ॥

अमात्यजनशोकादिं शनि[5]चारेण योजयेत् ।
जीवास्त[6]मनकाले वा शुक्रास्तमयकालके ॥ ५२३५ ॥

क्रूराब्दके[7] क्रूरमासे देहायासं विनिर्दिशेत् ।
रन्ध्रेशांशे तत्त्रिकोणे [8]चापराशौ च संस्थिते ॥ ५२३६ ॥

क्रूराब्दगे क्रूरमासे स्वजनारिष्टमादिशेत् ।
स्वदेहायासमथवा मित्रवर्गे विशेषतः ॥ ५२३७ ॥

बन्धुवर्गे प्रपीडादिं योजयेत् कालवित्तमः ।
मीने नीचांशगे चन्द्रे स्वोच्चे कुम्भांशगे बुधे ॥ ५२३८ ॥

---

1. व्यथा
2. सुतादीनि अरिष्टं
3. अतिमित्र
4. जातके
5. शनिवारेण
6. जीवास्तमानगे काले शुक्रास्तमयकालगे
7. क्रूराब्दगे
8. चापाक्रान्तस्य कालगे

कर्माधिपदशासौख्यं लाभाधिपदशाऽन्य[1]थाम् ।
उत्तरार्धे शुभं किंचित् पञ्चाशद्वत्सरान् परम् ॥ ५२३९ ॥

सर्वदाये राहुभुक्तावतीव क्लेशमादिशेत् ।
चन्द्रभुक्तौ क्वचिच्चैव[2] कुजभुक्तौ शुभाशुभम् ॥ ५२४० ॥

सूर्यदाये राहुभुक्तावतीव क्लेशमादिशेत् ।
चन्द्रदाये विशेषेण राहुभुक्तौ महाविपत्[3] ॥ ५२४१ ॥

तद्दोषपरिहारार्थं शान्तिं कुर्याद्विचक्षणः ।
पञ्चपञ्चाशगे वर्षे षट्पञ्चाशे च[4] वत्सरे ॥ ५२४२ ॥

अन्तर्दशारिष्टशान्तिं कारयेद्विधिवत् क्रमात् ।
वृषभान्ते चक्रसन्धौ[5] चक्रदानं समाचरेत् ॥ ५२४३ ॥

साधनेशदशाकाले [6]त्वष्टमर्क्षेशभुक्तिषु ।
चक्रसन्धौ च संप्राप्ते [7]ह्यपमृत्युर्भविष्यति ॥ ५२४४ ॥

ज्येष्ठभ्रातृवियोगादिस्वजनारिष्टमादिशेत् ।
तत्काले जातकस्यापि मारकश्च[8] न विद्यते ॥ ५२४५ ॥

मीने नीचांशगे चन्द्रे स्वोच्चे कुम्भांशगे बुधे ।
साधनेशदशान्त्यादौ[9] नैधनेश दशाविपत् ॥ ५२४६ ॥

नैधनेश दशाकाले ह्यष्टमर्क्षेश[10]भुक्तिषु ।
कुलीरचक्रे निर्याणं चन्द्रर्क्षमासकोणके[11] ॥ ५२४७ ॥

---

1. दशाऽन्यथा
2. क्वचिच्चेति
3. विशेषं स्याद्राहुभुक्तौ महद्विपत्
4. पञ्चाशस्य वत्सरे
5. चक्रसंधि
6. अष्टमर्क्षेश
7. चक्रसंधिश्च संप्राप्ते अपमृत्युस्तथाश्रितः
8. जातकश्चेति मारकं च
9. दशान्त्यादि
10. अष्टमर्क्षे च
11. चन्द्रेशे मासकोणगे

रविशुक्रौ बुधांशस्थौ बुधे सोमलतांशके[1] ।
निधनाधिपते[2]श्चक्रे भाग्यक्षीणं विनिर्दिशेत् ॥ ५२४८ ॥

तृतीयांशे स्वल्पसौख्यं[3] गेहे कल्याणसंभ्रमम् ।
सुपुत्रोद्वाहसौख्याप्तिं मेषांशे वृषभे गुरौ ॥ ५२४९ ॥

ग्रन्थान्तरे त्रिपञ्चांशे स्वपुत्रोद्वाहसंभ्रमम् ।
शुक्रेशर्क्षे[4] तृतीयांशे मध्यखण्डे न संशयः ॥ ५२५० ॥

कर्माधिपदशाकाले भाग्याधिपतिचक्रके[5] ।
अतीव भाग्यवृद्धिः स्याद्‌व्रणमोचनमादिशेत् ॥ ५२५१ ॥

लाभाधिपदशान्त्यादौ[6] कर्माधिपदशासुखम् ।
धनधान्याभिवृद्धिं च पुनर्योगं समश्नुते[7] ॥ ५२५२ ॥

धनाधिपदशाकाले [8]स्वष्टमर्क्षेशभुक्तिषु ।
कालमृत्युभयप्राप्तिर्देहान्ते पुण्यलोकवान् ॥ ५२५३ ॥

लग्ने जीवे व्यये मन्दे दशमे राहुसंस्थिते[9] ।
अतीव क्लेशदारिद्र्ये[10] देशत्यागं विनिर्दिशेत् ॥ ५१५४ ॥

व्ययेऽशुभसंयुक्ते वा कर्तरीयोगजस्तथा[11] ।
मध्यमायुरिति ख्यातः पुत्रभावेऽतिचञ्चलः ॥ ५२५५ ॥

सशुभे कर्तरीयोगे चन्द्रे पूर्णबलैर्युते[12] ।
राजयोगं च लभते दत्तपुत्रयुतो[13] भवेत् ॥ ५२५६ ॥

---

1. बुधेशांशौ बुधसोम
2. निधनाधिपतिश्चक्रे
3. क्वचित्सौख्यं
4. शुक्रे चर्क्षे
5. चक्रगे
6. दशान्त्यादि
7. धनधान्याभिवृद्धिः स्यात् पुनरायोगमश्नुते
8. अष्टमर्क्षेश
9. जातके
10. दारिद्र्यं
11. अशुभांशे व्यये वापि कर्तरीयोगरीतितः
12. शुभांशे कर्तरीयोगे पूर्णचन्द्रस्य जातके
13. प्रकुर्वीत दत्तपुत्रप्रदो भवेत्

लग्ने पापे व्यये सौम्ये दशमे राहुसंस्थिते[1] ।
मध्ये वयसि भाग्याप्तिं[2] वार्धके क्लेशमादिशेत् ॥ ५२५७ ॥

चत्वारिंशे मनस्तापमपमृत्युं तथैव च[3] ।
अथवा भाग्यनाशं च[4] क्लेशं प्राप्नोति भूरिशः ॥ ५२५८

लग्ने शुभे व्यये पापे पापांशे पापकर्तरी ।
शौर्यकृत्यपरो नित्यं[5] रागी विश्वासघातकः ॥ ५२५९ ॥

लग्ने नीचे व्यये पापे स्वोच्चांशे नीचकर्तरी ।
उग्रकार्यपरो नित्यं[6] महारोगेण कर्शितः ॥ ५२६० ॥

चन्द्रात् पञ्चमगे पापे चन्द्रावियोगजस्तथा[7] ।
त्रिंशोपरि सुभाग्याप्तिं योगवान् रोगवान् भवेत् ॥ ५२६१ ॥

सुतेशे नीचराशिस्थे व्यये पापद्वयाश्रिते ।
यमलोत्पत्तिनाशं च भाग्यारिष्ट[8]मतः परम् ॥ ५२६२ ॥

[9]तत्पूर्वे भ्रातृशोकश्च स्वप्रभोश्च महाविपत् ।
गोचारे शनिदोषेण स्वराजभ्रातृनाशनम् ॥ ५२६३ ॥

दारद्वयविनाशेन क्लेशं प्राप्नोति भूरिशः ।
रन्ध्राधिपदशासंधौ[10] कर्माधिपतिभुक्तिषु ॥ ५२६४ ॥

इदमेव फलं सत्यं योगमामरणं भवेत्
कर्माधिपदशाकाले पुण्यतीर्थाटनं शुभम् ॥ ५२६५ ॥

मारकस्थानदोषेण स्वभुक्तौ [11]मृतिमादिशेत् ।
क्षयावस्थां गते चेन्दावसितेन[12] निरीक्षिते ॥ ५२६६ ॥

---

1. जातके
2. भाग्याप्तिः
3. अपमृत्युस्तथाश्रितः
4. भाग्यनाशाप्तिः
5. प्रदो
6. प्रदोनित्यं
7. योगजातके
8. स्याद्भाग्यारिष्टम्
9. तत्पूर्वे भ्रातृशोकं स्यात्स्वप्रभोश्च
10. संधि
11. मितमादिशे
12. क्षयावस्थे निशानाथे

लग्नाज्जामित्रगे जीवे मूलार्शःक्षयरोगवान् ।
द्वात्रिंशे ह्यपमृत्युश्च[1] शान्त्या शान्तिं प्रयास्यति ॥ ५२६७ ॥

चत्वारिंशे मनस्तापं देहारोग्यं सुखासुखम् ।
कालचक्रादिदोषेण [2]ह्येकचत्वारिवत्सरे ॥ ५२६८ ॥

क्षेमदाये मृतिं सत्यं स्वभुक्तौ नात्र संशयः ।
अन्तर्दशादिमार्गेण फलमन्यद्विचार्यताम् ॥ ५२६९ ॥

व्यये पापद्वये पीडां देहान्ते नरकं व्रजेत् ।
चेष्टा केन्द्रफलाध्याये चन्द्राधियोगजस्य च ।
मित्रोपतापपापेन सन्ततिक्षोणमादिशेत् ॥ ५२७० ॥

—।※।—

## वृश्चिकलग्ने चन्द्रत्रिकोणभावफलम्

स्निग्धांशगे निशानाथे शीतलांशकगे गुरौ ।
सुमदांशे प्रजातश्च[3] श्यामवर्णः कृशाकृतिः ॥ ५२७१ ॥

[4]तृतीयगर्भे संजातो ह्यथवा च चतुष्टये ।
[5]लाभे गुरुयुते श्रीमान्ज्येष्ठभ्रातृसमन्वितः ॥ ५२७२ ॥

शीतलांशकगे जीवे लग्नात् केन्द्रत्रिकोणगे ।
[6]आयुष्मन्तौ च पितरौ सोदरीसोदरैर्युतः ॥ ५२७३ ॥

स्वक्षेत्रगे सुते जीवे चतुर्ग्रहयुतेक्षिते ।
स्थिरलग्ने पजातस्य [7]चेन्द्रयोग इति स्मृतः ॥ ५२७४ ॥

---

1. अपमृत्युश्च
2. एकचत्वारिवत्सरे
3. प्रजातस्य
4. तृतीयगर्भे स्यादथवा च चतुष्टयम् ।
5. भवे भ्रातृयुते
6. पितृमातृचिरायुष्यं
7. इन्द्रयोगमिति स्मृतम्

शीतलांशे त्विन्द्रयोगे वृश्चिके च प्रजायते[1] ।
गर्भश्रीमान् महान् भोगी ज्येष्ठभ्रात्रा सुकीर्तिमान् ॥ ५२७५ ॥

[2]दारिद्र्यं स्वपिता बाल्ये पितृनाशेन कर्शितः ।
मध्ये भ्रातृवियोगेन क्लेशं चैति द्विभार्यकः[3] ॥ ५२७६ ॥

शीतलांशकगे जीवे [4]स्वपितुः सोदरीद्वयम् ।
एका पुत्रवती चैव बहुकालं सुमङ्गली ॥ ५२७७ ॥

पुत्रशोकवती [5]चैका वैधव्येन च कर्शिता ।
[6]आयुष्मन्तौ मातुलौ द्वौ मातामहश्चिरायुषः ॥ ५२७८ ॥

[7]स्निग्धांशके तुष्टमनाः प्रजातः
स्यादल्पमित्रः कृशदीर्घगात्रः ।
शुचिर्महाबुद्धिरतीव भीरु-
र्वृद्धान्वितो धर्मपरायणश्च ॥ ५२७९ ॥

स्निग्धांशगे निशानाथे राहुयोगे शनीक्षिते ।
नालवेष्टनमाप्नोति बालारिष्टभयं क्वचित् ॥ ५२८० ॥

राजोपजीवी शूरश्च [8]चेन्द्रयोगे सुबुद्धिमान् ।
दान्तः शुचिः शठो वाग्मी भोगवान् दैवचिन्तकः ॥ ५२८१ ॥

शीतलांशकगे जीवे शन्यङ्गारकवीक्षिते ।
सुमदांशे प्रजातश्च[9] बाल्ये मान्द्यज्वरातुरः ॥ ५२८२ ॥

मसूरिकाभयं किंचिज्जन्मदाये [10]ह्युपद्रवम् ।
चन्द्राष्टमेशदोषेण मृतप्रायोपजीवति ॥ ५२८३ ॥

---

1. इन्द्रयोगे वृश्चिके लग्नजातके
2. स्वपिता बाल्यदारिद्र्यं
3. द्विभार्यवान्
4. स्वपिता
5. चैव
6. मातुलद्वयमायुष्यं मातामही चिरायुषी,
7. स्निग्धान्तसन्तुष्ट
8. इन्द्रयोगे
9. प्रजातस्य
10. उपद्रवम्

चन्द्रारिष्ट[1]विनाशाय चन्द्रपार्थनमादिशेत् ।
राजतं चन्द्रमभ्यर्च्य दानं कुर्याद्विचक्षणः ॥ ५२८४ ॥

जन्मदाये द्वित्रिवारं बाल्ये देहे प्रपीडितः[2] ।
तद्दोषपरिहारार्थे दानं कुर्याद्विचक्षणः ॥ ५२८५ ॥

[3]सवस्त्रां चान्द्रप्रतिमां कांस्यपात्रोपरि स्थिताम् ।
सिततण्डुलशाकादिनवनीतयुतां तथा[4] ॥ ५२८६ ॥

मनुः—

अमृतायोक्तमन्त्रेण सितपुष्पैः[5] स्वहस्तकैः ।
राजतं चन्द्रमभ्यर्च्य दैवज्ञाय[6] प्रदापयेत् ॥ ५२८७ ॥

महारोगक्षयादेश्च बालारिष्टशतादपि[7] ।
क्षिप्रेणारोग्यमायुष्यं पित्रोश्चैव शुभाधिकम् ॥ ५२८८ ॥

लग्ने राहुयुते चन्द्रे शन्यङ्गारकवीक्षिते ।
जलाग्निविषभीतश्च मसूरीज्वरपीडितः[8] ॥ ५२८९ ॥

इन्द्रयोगे निशानाथे लग्ने मन्दे[9] शुभेक्षिते ।
पूर्णधेनुप्रदानेन दीर्घमायुश्च विन्दति ॥ ५२९० ॥

[10]मातापित्रोः सुतस्यापि सहसारिष्टनाशनम् ।
ज्येष्ठभ्रातुः सुदीर्घायुरिन्द्रयोगोद्भवस्य च[11] ॥ ५२९१ ॥

[12]विदांशके विलग्नेशो दशमे बहुकीर्तिमान् ।
बाल्ये स्वल्पसुखं चैव विपदाये सुकीर्तिमान् ॥ ५२९२ ॥

---

1. प्रशमनं
2. प्रपीडवान्
3. राजतप्रतिमां वस्त्रं कांस्यपात्रोपजीवितम्
4. नवनीतं प्रदानकृत्
5. अमृतायनमात्रेण सितपुष्टि
6. दैवज्ञस्य
7. क्षयादीनि वालारिष्टशतैरपि
8. भीतिञ्च मसूरीज्वरगण्डवान्
9. शनि
10. पितृमातृसुतश्चैव
11. योगस्य जातके
12. निदांशके

सूर्यकालाधिपे चन्द्रे सिंहांशे नीचराशिगे ।
स्वपिता मनसि क्लेशं योगभङ्गवशाद्व्यथाम्[1] ॥ ५२९३ ॥

तृतीयाब्दे जन्मदाये स्वपिता भाग्यमश्नुते ।
पितामहारिष्टदेशे योगप्राबल्यमादिशेत् ॥ ५२९४ ॥

—:*:—

## कटकलग्ने धनदांशफलम्

धनदांशे पूर्वभागे कुलीरे [2]च प्रजायते ।
पूर्वपश्चिमवीथ्योश्च देवालयसमीपके[3] ॥ ५२९५ ॥

बहुवृक्षसमीकर्णे जलसंयुतदेशके[4] ।
नदीप्रान्त्ये पुरे जातः [5]सीमन्ततनयः स्मृतः ॥ ५२९६ ॥

अथवा च द्वितीयश्च[6] पूर्वभागे प्रजायते ।
उत्तरांशे प्रजातश्च पञ्चमोऽयं प्रकीर्तितः[7] ॥ ५२९७ ॥

लग्नेशे स्वोच्चराशिस्थे लग्ने गुरुयुतेक्षिते[8] ।
लग्नेशे गुरुसंदृष्टे समगात्रस्वरूपवान् ॥ ५२९८ ॥

मितांशे मितभाषी च मितनिद्रोऽतिजाग्रकः[9] ।
राजसेवापरो नित्यं बहुभ्रातृजनान्वितः ॥ ५२९९ ॥

वाचालकः सत्यवादी दिव्यनामा [10]सुरूपवान् ।
नानाशास्त्रकलाभिज्ञो वेदान्ताद्वैत[11]कोविदः ॥ ५३०० ॥

---

1. व्यथा
2. लग्नजातके
3. वीथीषु देवालयसमीपगे
4. समीकर्णे जलसंयुतहृहदे
5. प्रथमे गर्भजातकम्
6. द्वितीयस्य
7. प्रजातस्य पञ्चमे गर्भजातकम्
8. स्थिते
9. जाग्रतः
10. दिव्यनाम स्वरूवपान्
11. संभ्रमः

गीतवाद्यरसाभिज्ञो [1]ह्यन्यस्त्रीसङ्गलोलुपः ।
[2]विद्वत्सभायाः कर्ता च काव्यनाटकवल्लभः ॥ ५३०१ ॥

सत्कथाश्रवणो नित्यं देवब्राह्मणपोषकः ।
यथार्थवादी तत्त्वज्ञः कलाशास्त्रविचक्षणः ॥ ५३०२ ॥

निषिद्धदिवसे काले [3]ह्यन्यस्त्रीसङ्गचित्तवान् ।
अदृष्टशाली धर्मात्मा राजयोग[4]युतो भवेत् ॥ ५३०३ ॥

रक्तवर्णो मध्यगात्रः कुब्जदेहस्वरूपवान् ।
दुष्टेषु दुष्टबुद्धिश्च क्रूरेषु क्रूरकृत्यवान् ॥ ५३०४ ॥

पितृभाग्यविहीनश्च स्वभुजार्जितवित्तवान् ।
सर्वशास्त्रार्थतत्त्वज्ञो मन्दांशे सुखनायके ॥ ५३०५ ॥

सर्वेषामुपकारी च शौर्यहास्य[5]सुकीर्तिमान् ।
सत्कथाश्रवणो नित्यं श्रीमान् दीनजनप्रियः ॥ ५३०६ ॥

विष्णुव्रतोपवासी[6] च विष्णुगानरसप्रियः ।
देवालयतटाकादे[7]रुत्कृष्टधर्मसिद्धिमान् ॥ ५३०७ ॥

सन्मार्गवृत्तिनिरतो [8]ह्यश्वान्दोल्यादिभाग्यवान् ।
युग्मांशकस्य योगेन जीवनं राजसेवया ॥ ५३०८ ॥

लग्नेशे कुजसंदृष्टे [9]चेष्टसत्कर्मसिद्धिमान् ।
राजान्तरफले[10] चैव राजमुद्राधिकारकः ॥ ५३०९ ॥

वित्तस्थानाधिपे सूर्ये चतुर्थे भृगुसंयुते ।
स्वसुतेन युते दृष्टे कुजराहुसमन्विते ॥ ५३१० ॥

---

1. अन्यस्त्री
2. विद्याविद्यककर्ता
3. अन्यस्त्री
4. प्रदो
5. हास्यश्चकीर्तिमान्
6. वासेन
7. कादि उत्कृष्ट
8. अश्वान्दोल्यादि
9. इष्टसत्कर्म
10. फलं चेति राजमुद्राधिकारवान्

दयावान् वन्दितःशूरः साधुबन्धुजनान्वितः ।
वीरः साहसिको दक्षश्चायुताधिकवित्तवान् ॥ ५३११ ॥

धनदांशे प्रजातश्च कुबेरसदृशो भवेत् ।
भ्रातृस्थानाधिपे सौम्ये खोच्चे गुरुयुतेक्षिते ॥ ५३१२ ॥

पापमध्यगते वापि [1]ह्येकभ्राता चिरायुषः ।
शेषं नाशमिति प्राहुर्धनदां[2]शोद्भवस्य च ॥ ५३१३ ॥

वाहेशे वाहनेसंस्थे बहुखेचरसंयुते ।
स्वमाता विधवा भूत्वा यौवने मृति[3]माप्नुयात् ॥ ५३१४ ॥

बाल्ये पितृविनाशः[4] स्याद्धनदांशोद्भवस्य च ।
स्वोच्चे देवगुरौ निशाकरयुते स्वोच्चांशके भार्गवे
भौमे मेषगते तथा दिनमणौ लाभे च कर्क्युद्भवः ।
धीमान् धर्मपरायणो गुणनिधिः[5] श्रीमान् प्रसिद्धो महान्
अश्वान्दोलनवाहनादिविभवैर्नित्यश्रियं[6] मन्दिरे ॥ ५३१५ ॥

सुतेशे सुखराशिस्थे[7] पापग्रहसमन्विते ।
सूर्यपुत्रेण संदृष्टे कारके नीचराशिगे ॥ ५३१६ ॥

काकवन्ध्या भवेद्भार्या गर्भगोले[8] कृमिस्तथा ।
दत्तपुत्रादियोगं च धनदांशे न संशयः ॥ ५३१७ ॥

षष्ठेशे नीचराशिस्थे [9]ह्यङ्गारकयुतेक्षिते ।
ज्ञातिशत्रुविहीनः स्यादुदरामयरोगवान् ॥ ५३१८ ॥

मेहरोगशरीरी[10] च सदारोगेण कर्शितः ।
तद्दोषपरिहारार्थं [11]यथोक्तांशान्तिमाचरेत् ॥ ५३१९ ॥

---

1. एकभ्रातुश्चिरायुषम् 2. धनदांशस्य जातके
3. आदिशेत् 4. विनाशं स्याद्धनदांशस्य जातके
5. कीर्तिः स्यादधियोगजातमनुजः 6. नित्यप्रियो
7. सु.......पाप 8. गोळकमंवदेत्
9. अङ्गारक 10. शरीरश्च
11. शान्त्यशान्ति प्रयास्यति

भानुवारव्रतं कुर्यात् स्नात्वा सम्यग्विचक्षणः ।
द्वादशादित्यनामानि[1] वारे वारे प्रपूजयेत् ॥ ५३२० ॥

भानुवारे निराहारं पूर्वजन्माघनाशनम् ।
असाध्यमेह[2]रोगादेः गुल्मरोगस्य नाशनम् ॥ ५३२१ ॥

भानुव्रतारम्भकाले दैवज्ञाय[3] प्रदापयेत् ।
रौक्मपत्रेण[4]संवेष्ट्य चतुरङ्गुलमात्रतः ॥ ५३२२ ॥

[5]लिङ्गं मारकतं पूज्य देहारोग्यकरं शुभम् ।
सुवर्णं[6] च यथाशक्ति कल्पोक्तविधिमार्गतः ॥ ५३२३ ॥

ध्यानमावाहनादीनि [7]पूजान्ते दानमाचरेत् ।
दिवाकर नमस्तुभ्यं प्राप्यज्ञानप्रणाशन[8] ॥ ५३२४ ॥

त्रयीमयार्क विश्वात्मन् ग्रहनाथ नमोऽस्तु ते ।
द्वादशादित्यवारान्त्ये मण्डलान्त्ये च वा यदि ॥ ५३२५ ॥

दिवाकर[9]प्रसादेन देहारोग्यं न संशयः ।
जामित्रस्थाधिपे मन्दे वित्ते पाप[10]निरीक्षिते ॥ ५३२६ ॥

[11]स्वक्षेत्रेकारके स्वोच्चे ह्येकदारम् विनिर्दिशेत् ।
भावाध्याये दारफलं रन्ध्रनाडीषु [12]कथ्यते ॥ ५३२७ ॥

स्थिरराशिगते मन्दे कारके चरराशिगे ।
अन्यस्त्रीभोगसँल्लापी[13] सत्कलत्रे च भाग्यवान् ॥ ५३२८ ॥

---

1. नामादि
2. मेर्षुरोगादिं गुल्फयोगे विनाशनम्
3. दैवज्ञस्य प्रजायते
4. प्रदानेन
5. मरकतं लिङ्गदानेन देहारोग्यं शुभावहम्
6. सुवर्णेन
7. पूजादानं
8. प्रणाशवान्
9. प्रदानेन
10. माव
11. कारके स्वोच्चस्वक्षेत्रे वा
12. योजयेत्
13. सल्लापं

धनदाशे प्रजातश्च द्विसप्ततिसमायुषः ।
जन्मतारदशाकाले [1]ह्यल्पार्थो ह्यल्पभाग्यवान् ॥ ५३२९

संपत्तारदशाकाले क्रूरवेधग्रहान्तरे ।
देहायासं मनस्तापं विद्यालाभं कचित् सुखम् ।
ब्रह्मोपदेशकाले तु[2] दशान्ते राजनिष्ठुरम ॥ ५३३० ॥

भ्रातृसौख्यं देहजाड्यं राजमूलाद्धनव्ययम् ।
विपत्तारदशाकाले [3]ह्यपमृत्युर्भविष्यति ॥ ५३३१ ॥

—: * :—

## तुलावर्गे मनोहरांशः

इन्द्रयोगे तुलालग्ने तुलांशे [4]च प्रजायते ।
मनोहरांशगे जातो गर्भश्रीमान् महाधनी ॥ ५३३२ ॥

दीर्घबुद्धिर्विशालाक्षो धनिकः कीर्तिमान् सुखी ।
कर्मेशे लाभराशिस्थे कुन्दांशस्तनवांशगे ।
गुरुदृष्टियुते चैव[5] राजजन्मा सुखी भवेत् ॥ ५३३३ ॥

—: * :—

## ॥ गर्भोत्पत्तिलक्षणम् ॥

आश्विजे कृष्णपक्षे तु चतुर्थ्यां सौम्यवासरे ।
रोहिण्यां मकरे लग्ने गर्भोत्पत्तिर्न संशयः ॥ ५३३४ ॥

आधानलग्नाद्दशमं जन्मलग्नं विनिर्दिशेत् ।
पुराब्रह्मकुले जातस्त[6]पस्वी विष्णुपूजकः ॥ ५३३५ ॥

---

1. अल्पसारेऽप्याल्प
2. कालेन
3. काले......
4. चैव जातके
5. युतश्चैव
6. विष्णुपूजां स्तपस्थितः

दृढभक्तः[1] प्रसन्नात्मा सदा धर्मपुराणवित् ।
अन्नदानपरो नित्यं कुटुम्बी बहुपोषकः ॥ ५३३६ ॥

बहुपुत्रार्थसंपन्नो बहुकालं सुजीवति ।
एकषष्टितमे वर्षे त्वनायसमृतिं वदेत्[2] ॥ ५३३७ ॥

इह जन्मनि जननं[3] तुलालग्ने भविष्यति ।
मनोहरांशे पूर्वार्धे त्विन्द्रांशे च प्रजायते[4] ॥ ५३३८ ॥

राजजन्मा सुखी नित्यं गर्भसीमन्तसंभवः[5] ।
लग्नेशे लाभराशिस्थे लग्ने कुजसमन्विते ॥ ५३३९ ॥

रन्ध्रस्थानगते मन्दे [6]त्वेकाकी भ्रातृहीनवान् ।
मनोहरांशे पूर्वार्धे त्विन्द्रांशे चेन्द्रयोगके[7] ॥ ५३४० ॥

महानदीप्रान्त्यदेशे देवालयसमीपके[8] ।
[9]प्राकारैः शोभिते रम्ये ह्युन्नतप्रान्त्यपट्टणे ॥ ५३४१ ॥

पूर्वपश्चिमवीथ्योश्च ह्युत्तरद्वारमन्दिरे[10] ।
जननं तस्य च[11] प्राहुः पूर्वभागे न संशयः ॥ ५३४२ ॥

रूपवान् मतिमान् वाग्मी प्रसन्नमुखनेत्रवान् ।
अदृष्टशाली धर्मात्मा श्यामवर्णः शुभाकृतिः ॥ ५३४३ ॥

मितोन्नतिर्मध्यगात्रः कमलायतलोचनः ।
मिताशी मितभाषी च मितनिद्रोऽतिबुद्धिमान्[12] ॥ ५३४४ ॥

---

1. दृढभक्तिः
2. षष्ट्याः परं वर्षे अनायसमृतिप्रदः
3. प्रजातस्य
4. इन्द्रांशे योगजातके
5. सुखं नित्यं सीमन्ते गर्भजातके
6. एकाकी
7. पूर्वादि.......
8. समीपगे
9. प्राकारं पट्टणं संस्थे उन्न त
10. वीथीषु उत्तरद्वारदेहले
11. तदिति
12. मितनिद्रोऽतिजाग्रतः

[1]चक्राङ्कितकरश्चैव पादयोश्चक्रशोभितः ।
राजा तु पृथिवीपालो बहुभृत्यजनान्वितः ॥ ५३४५ ॥

वाचालकः सत्यवादी नानाशास्त्रविशारदः ।
दिव्यनामाङ्कितवरो देवब्राह्मणपोषकः ॥ ५३४६ ॥

यथार्थवादी तत्त्वज्ञो [2]ह्यन्यस्त्रीसङ्गलोलुपः ।
स्वभुजार्जित[3]वित्तश्च ह्युपायैः कार्यसाधकः ॥ ५३४७ ॥

सज्जनप्रियवादी च दुर्जनानां [4]निषूदनः ।
बन्धुपूज्योऽतिमतिर्मालिप्यालेख्यविशारदः ॥ ५३४८ ॥

चतुर्विद्यासुनिपुणः स्वकार्ये च विचक्षणः ।
धनार्जनपरो नित्यं तटाकोद्यानधर्मकृत्[5] ॥ ५३४९ ॥

अग्रहार[6]प्रतिष्ठायामत्यन्तादरवान् सदा ।
शिवविष्ण्वोः सदा भक्तो देव्यां चैव विशेषतः[7] ॥ ५३५० ॥

वैदिकप्रियवान् रागी [8]ह्यन्यालोचनवान् प्रियः ।
सभापूज्यो गुणग्राही [9]चोपायैः कार्यसाधकः ॥ ५३५१ ॥

बाल्ये कष्टमवाप्नोति पञ्चमाब्दात् परं सुखम् ।
कर्मेशे लाभराशिस्थे भाग्येशे कर्मसंयुते ।
[10]यस्यां नाड्यां प्रजातोऽपि भाग्यवंशे प्रसूतिमान् ॥ ५३५२ ॥

—: ❀ :—

---

1. हस्तपादौ चक्ररेखौ पादौ पाणीषु शोभितः
2. अन्यस्त्री
3. वित्ताभिरूपायात्
4. जनो भवेत्
5. धर्मवान्
6. प्रतिष्ठादि अत्यन्त
7. विष्णुसदाभक्तिविशेषो देविभक्तिमान्
8. अन्यालोचन
9. उपायात्
10. यस्यनाडी प्रजातो

## ॥ तुलालग्ने इन्द्रयोगः ॥

योगांशगे विलग्नेशे लाभभाग्यपसंयुते ।
कर्माधिपेन संदृष्टे योगोऽयं चेन्द्रनामकः[1] ॥ ५३५३ ॥

इन्द्रयोगे तुलालग्ने भोगी स्याद्राजवल्लभः ।
धर्ममार्गरतो नित्यं कुबेर इव जायते ॥ ५३५४ ॥

प्राकाराट्टादिनिर्माता धर्मसिद्धियुतः[2] सुखी ।
जन्मादिषष्ठगे वर्षे कुलीरे रविसंयुते ॥ ५३५५ ॥

तस्मिन् मासे महत् सौख्यं राजमुद्राधिकारवान् ।
राज्याधिपत्यं [3]सत्कीर्तिं चेन्द्रयोगे न संशयः ॥ ५३५६ ॥

मनोहरांशे पूर्वार्धे लग्नेशे राहुसंयुते ।
लग्नकेन्द्रगते भौमे मसूरी[4]मुखलाञ्छनः ॥ ५३५७ ॥

लग्ने कुजेऽष्टमे मन्दे पञ्चमे केतुसंयुते ।
[5]जन्माब्दे रोगभीतिश्च द्वितीयाब्दे महाविपत्[6] ॥ ५३५८ ॥

लग्नादष्टमगे मन्दे विषूचीज्वरपीडितः[7] ।
अतिसारप्रपीडादिं सन्निपातज्वरं क्वचित् ॥ ५३५९ ॥

रन्ध्रे चायुष्कारको[8] हि दीर्घमायुश्च विन्दति ।
लग्ने पापसमायुक्ते षट्पञ्चाशात् परं व्यथा ॥ ५३६० ॥

सुखेशे रन्ध्रभावस्थे लग्ने भौमसमन्विते ।
बाल्ये शुनकभीतिश्च वसुवर्षात् परं क्वचित् ॥ ५३६१ ॥

---

1. नामकम्
2. प्रकारगोपुरादीनि धर्मसिद्धिप्रदः
3. कीर्तिश्च इन्द्र
4. मसूरि
5. जन्मा...रोग
6. महद्विपत्
7. ज्वरगण्डवान्
8. आयुष्कारकोरन्ध्रेषु

मातृस्थानाधिपे मन्दे चन्द्रात् पञ्चमसंस्थिते ।
कारके मातृभावस्थे बाल्ये मातृविनाशवान् ॥ ५३६२ ॥

लग्नाच्चतुर्थगे चन्द्रे तदीशे मृत्युराशिगे ।
स्वमाता मृत्युमाप्नोति ह्युपमात्रा तु रक्षितः[1] ॥ ५३६३ ॥

माता गुणवतीपूता पतिभक्तिपरायणा ।
सात्त्विकी धर्मबुद्धिश्च सर्वैश्वर्यसमन्विता ॥ ५३६४ ॥

पितृस्थानाधिपे सौम्ये कारकेण समन्विते ।
कर्माधिपेन संदृष्टे स्वपिता राजयोगवान् ॥ ५३६५ ॥

पूर्वभागे प्रजातस्य पिता भूपतितुल्यवान् ।
एकाकी स्वपिता कामी राजमानेन तोषितः ॥ ५३६६ ॥

राजद्वारे प्रसिद्धश्च [2]ह्यश्वाध्यक्षः स्वतन्त्रवान् ।
धनाढ्यो बुद्धिसंपन्नो देवब्राह्मणपोषकः ॥ ५३६७ ॥

विनीतो मृदुवाग्धीरो युवतीकामुकः सुधीः ।
असितेन युते दृष्टे प्रचुरः शत्रुवर्गवान् ॥ ५३६८॥

सङ्गीतसाहित्य[3]कलास्वभिज्ञो
राजाङ्गनादिप्रियभोगवांश्च[4] ।
गम्भीरचेताः स्वपिता दयालु-
र्भाग्यांशयोगे फलमाहुरार्याः ॥ ५३६९ ॥

पितृभावाष्टमे चन्द्रे तदीशे व्ययराशिगे ।
जन्मतारदशाकाले युग्मे मन्दसमन्विते ॥ ५३७० ॥

स्वपितारिष्टमाप्नोति तत्काले नात्र संशयः ।
ततः पश्चाज्जातकश्च[5] योगं प्राप्नोति भूरिशः ॥ ५३७१ ॥

---

1. उपमाता च रक्षिता
2. अश्वाध्यक्षः
3. मुखादभिज्ञः
4. भोगवान्तः
5. जातकस्य

राजमुद्राधिकारी च विद्याबुद्धियुतः सुखी ।
मातृस्थाने निशानाथे युग्मांशे रविवीक्षिते ॥ ५३७२ ॥

चन्द्रात् कर्मगते भौमे सापत्नीमातृयोगवान् ।
[1]मात्ररिष्टात् परं चैव पितुर्दारद्वयं वदेत् ।
सापत्नीमातृमूलेन जातकस्य सुखं भवेत् ॥ ५३७३ ॥

—: * :—

## ॥ अवतारयोगः ॥

सूर्यात् केन्द्रगते भौमे चन्द्रात् केन्द्रगते कुजे ।
लग्नात् केन्द्रगते सौम्ये योगः स्यादवतारकः ॥ ५३७४ ॥

फलम्—

[2]श्रीमत्करे चाङ्कितपुण्डरीक-
श्रीचक्रदण्डाङ्कितपाणिपादः ।
श्रीवत्सवक्षःस्थलगात्रयष्टिः
श्रीमन्महाकीर्तिगुणाभिरामः ॥ ५३७५ ॥

धर्मदानपरो नित्यं सर्वभूतदयापरः ।
व्रतानुसेवी वाग्मी च कालज्ञानी भवेन्नरः ॥ ५३७६ ॥

— :*: —

## ॥ हरिहरब्रह्मयोगः ॥

[3]गोपुरांशकगे शुक्रे गुरौ पारावतांशगे ।
पारावतांशके चन्द्रे योगो हरिहराभिधः[4] ॥ ५३७७ ॥

---

1. माताारिष्टात् परं चव पितृदार
2. श्रीमच्छपांशुकुज....श
4. गोपुरांशंकगे
5. हराभिधः

आरोग्यभाग्यधनधान्यसमावृतोऽसौ
लोके प्रधानपुरुषो विजयी नरेन्द्रः ।
कल्याणवाक्कमलनेत्रगुणाभिरामो
भोक्ता गुणैः सकुलबन्धुजनैर्वृतोऽसौ ॥ ५३७८ ॥

[1]शक्त्या पाणिपदाम्बुजोऽमृतवपुः कामातुरो भोगवान्
[2]प्रख्यातोऽखिलभूमिनाथनिचयैर्वन्द्यो महादानकृत् ।
कालज्ञः कमलाभिरामनयनो देवप्रियो भक्तिमान्
आ चन्द्रार्कगुणाभिरामविभवः प्रख्यातकीर्तिर्भुवि ॥ ५३७९ ॥

—:*:—

## ॥ महालक्ष्मीयोगः ॥

पारावतांशगे जीवे कर्मेशे च तथा स्थिते ।
गोपुरांशकगे शुक्रे लक्ष्मीयोग इतीरितः ॥ ५३८० ॥

पारावतांशगे सूर्ये कर्मेशेन युतेक्षिते ।
वाहने शुभसंयुक्ते लक्ष्मीयोग इतीरितः ॥ ५३८१ ॥

फलम्—

गुणाभिरामो बहुदेशनाथो
विद्यामहाकीर्तिमनोऽभिरामः ।
दिगन्तविश्रान्तनृपालवन्द्यो
राजाधिराजो बहुदारपुत्रः ॥ ५३८२ ॥

कीर्त्याक्रान्तजगत्त्रये नृपचयैर्वन्द्यो भवेद्भूमिपो
देवब्राह्मणसाधुपूजनिरतो देवालयस्थापकः ।
लोके स्यात् परदारसक्तमनसो सर्वोपकारी महान्
लक्ष्मीयोगसमुद्भवो गुणनिधिर्दानाय वारां[3] निधिः ॥ ५३८३ ॥

---

1. शुक्त्या
2. प्रख्यातः किल
3. दानात् सुवाणी

## ॥ कुबेरयोगः ॥

दशमभवननाथः केन्द्रकोणे सुखे वा
भवति धनदतुल्यो राजराजाधिपो वा ।
हयगजनरनाथो नृत्तगीतापनोदो
भवति च सुकलत्रः[1] षोडशाच्चैव वर्षात् ॥ ५३८४ ॥

फलम्—

एतद्योगवशात् सौख्यं पञ्चमाब्दात् परं सुखम् ।
राजमुद्राधिकारी च राजयोगो[2] भवेद्ध्रुवम् ॥ ५३८५ ॥

जन्मादिषोडशे वर्षे [3]त्वतीव श्रियमश्नुते ।
भावैश्चतुर्भिर्बलिभिर्धनभाग्याय कर्मभिः ॥ ५३८६ ॥

सम्पूर्णविभवे गेहे[4] कुबेर इव जायते ।
दारस्थानाधिपे भौमे भावात् केन्द्रत्रिकोणगे ॥ ५३८७ ॥

दाराद्भाग्यं गते जीवे सत्कलत्रसमन्वितः ।
दारेशे लग्नभावस्थे कारके लाभराशिगे ॥ ५३८८ ॥

दारे गुरुयुते दृष्टे बहुदारसमन्वितः ।
दारेशे [5]त्विन्द्रयोगस्थे कारके गोपुरांशगे ॥ ५३८९ ॥

बहुभार्यानरं विन्द्याद्राजयोगसमुद्भवम्[6] ।
मनोहरांशगे जातः पञ्चसङ्ख्याः कलत्रवान् ॥ ५३९० ॥

अथ वा सप्तसङ्ख्याश्च पूर्वभागसमुद्भवः[7] ।
शुक्रे राहुयुते जातो दारसङ्ख्याः[8] फलं तथा ॥ ५३९१ ॥

---

1. सुकलत्रैः
2. राजयोगं
3. अतीव
4. विततं ..कुबेर
5. इन्द्रभावस्थे
6. योगस्य जातके
7. सङ्ख्यानि पूर्वभागस्य जातके
8. दारतुल्यफलं

दारेशे लग्नभावस्थे पापांशे चन्द्रकेन्द्रगे ।
कुटुम्बे शनिसंयुक्ते नानाजातिवधूपतिः ॥ ५३९२ ॥

कुटुम्बेशे लग्नगते कुटुम्बे शनिवीक्षिते ।
कारके राहुसंयुक्ते स्वभार्यारिष्टमादिशेत् ॥ ५३९३ ॥

दाराद्भाग्यं गते जीवे चन्द्रात् कर्मगते कुजे ।
बाल्ये विवाहमाप्नोति समीपे सद्गृहेऽपि च[1] ॥ ५३९४ ॥

सम्पत्तारदशान्त्यादौ[2] विपदाये स्वभूक्तिषु ।
विवाहोत्सवकार्याणि राजयोगसमुद्भवः[3] ॥ ५३९५ ॥

विवाहानन्तरं भाग्यं राजयोगयुतः[4] सुखी ।
षोडशाब्दात् परं चैव राजश्रीविजयान्वितः[5] ॥ ५३९६ ॥

स्वश[6]क्त्या राज्यलाभं च बहुकीर्तिः प्रतापवान् ।

—: * :—

## ॥ काहलयोगः ॥

विलग्ननाडीस्थितराशिनाथ-
स्तद्राशिनाथो यदि केन्द्रसंस्थः ।
निशाकरात् केन्द्रगतो यदि स्या-
द्योगो महान् काहलसंज्ञकोऽसौ ॥ ५३९७ ॥

फलम्—

श्रीमान् काहलसंज्ञके विजययुग्दानार्द्रपाणिः सदा
कामी भोगसमन्वितो बहुयशाः स्यादष्टविंशात् परम् ।

---

1. संग्रहे यदि
2. दशान्त्यादि
3. योगस्य जातके
4. प्रदः
5. विजयप्रदः
6. स्वदन्सा

विद्यावादविनोदसङ्ग[1]रसिकः स्त्रीणां पतिर्नायकः
सौभाग्यात्मजमित्रबन्धुधनवान् राजा भवेद्धार्मिकः ॥ ५३९८ ॥

गजवाजिभटैर्युक्तो भूपालो दानमण्डलः ।
करोत्यसौ तुलादानं धर्मी[2] स्यान्मण्डलेश्वरः ॥ ५३९९ ॥

—*—

## ॥ शङ्खयोगः ॥

पूर्वपक्षे दिवा जन्म चन्द्रकेन्द्रसमन्विते ।
लग्नेशे राहुसंयुक्ते योगःशङ्ख[3] इतीरितः ॥ ५४०० ॥

त्रिचतुःपञ्चराशिस्थे शुभखेचरसंयुते ।
बुद्धिस्थानगते पापे योगः शङ्ख इतीरितिः ॥ ५४०१ ॥

फलम्—

श्रीमान् शङ्खभवो विचक्षणमतिर्वेदान्तविद्धार्मिको
लोके स्याद् बहुनायकः क्षितिपतिर्मार्ताण्डतेजद्युतिः ।
अन्यैर्भूपतिभिर्दिगन्तरगतैः संस्तूयमानः सदा
स्त्रीणां नायक ऋद्धिमान् खलभुवि त्वाकल्पपुण्यादिकृत् ॥ ५४०२ ॥

[4]पुण्यकृत् कृशदेही च चार्वङ्गः प्रियवाग्भवेत् ।
मनोवेगी महाधीरः शङ्खयोगे भवेन्नरः ॥ ५४०३ ॥

—*—

## ॥ भेरीयोगः ॥

मन्दात् षष्ठाष्टमे भौमे भौमात् षष्ठाष्टमे शनौ ।
गुरोः षष्ठाष्टमे सूर्ये भेरीयोग इतीरितिः ॥ ५४०४ ॥

---

1. गोष्ठि
2. धर्मः
3. योगसञ्ज्ञया
4. पुत्तलः

फलम्—

मेरीयोगे वाद्यघोषी समन्ता
न्मत्तेभानां वाजिनां सङ्घ घोषैः ।
सद्भिश्चायं स्तूयमानो नृपालो
दीर्घायुः स्याद्भूमिपालैः सुवन्द्यः ॥ ५४०५ ॥

—*—

## ॥ पुत्रभावः ॥

पुत्रस्थानाधिपे मन्दे शुभक्षेत्रे शुभांशके ।
कारके बलसंयुक्ते पुत्रप्राप्तिर्न संशयः ॥ ५४०६ ॥

सुतेशे रन्ध्रभावस्थे सुते केतुसमन्विते ।
सुतेशे कुजसंदृष्टे पुत्रविघ्नकरो भवेत् ५४०७ ॥

कारके बलसंयुक्ते कालान्तरसुपुत्रवान् ।
भाग्येश्वरे कर्मगते कारके भाग्यसंस्थिते ॥ ५४०८ ॥

भाग्यांशे शुभसंयुक्ते कालान्तरसुपुत्रवान् ।
[1]कारके पापसंयुक्ते ह्यन्यदारसुतोद्भवः ॥ ५४०९ ॥

पुत्रद्वयं चिरायुष्यं पुत्रिका च तथा भवेत् ।
पुत्रेशे यौवनांशस्थे कारके यौवनांशगे ॥ ५४१० ॥

पुत्रसंख्या विनिर्दिष्टा बलाबलविचिन्तनात्[2] ।
दारेशाद्भाग्यराशिस्थे कारके बलसंयुते ॥ ५४११ ॥

भार्यांशे शुभसंयुक्ते स्वदारे पुत्रलाभवान्[3] ।
कारके मिथुनांशस्थे द्वित्रिसन्तानयोगवान् ॥ ५४१२ ॥

---

1. अन्यदार
2. विनिर्दिष्टबलाबलविचिन्तयेत्
3. स्वभार्भे पुत्रलाभकृत्

आदौ स्त्रीभावमाप्नोति पश्चात् पुत्रस्य लाभवान्[1] ।
केतुयुक्त[2]वशेनैव स्त्रीप्रजारिष्टमादिशेत् ॥ ५४१३ ॥

क्षेमतारदशाकाले दशाधिपतिभुक्तिषु ।
गोचरे मिथुने जीवे स्वदारे पुत्रलाभवान्[3] ॥ ५४१४ ॥

स पुत्रः प्रबलश्चैव राजयोगोद्भवस्य च[4] ।

—*—

## ॥ मत्स्ययोगः ॥

भाग्यनाथस्थितेशांशे गुरुर्वा भृगुजोऽपि वा ।
स्वक्षेत्रे बलसंयुक्तो[5] मत्स्ययोग इतीरितः ॥ ५४१५ ॥

कालज्ञः करुणाकरो गुणनिधिः कान्ताभिरामो नृपः
चार्वङ्गः स्थिरधीर्मनोहरतनुर्विद्याविनोदप्रियः ।
पुत्रैर्दारसमन्वितो बहुधनैः संयोजितः सर्वदा
राजाध्यक्षसमानदेश विभवः श्रीमत्स्ययोगोद्भवः ॥ ५४१६ ॥

—*—

## ॥ कलानिधियोगः ॥

लग्नेशे केन्द्रभावस्थे गुरुशुक्रयुतेक्षिते ।
चरलग्ने दिवा जातो योगोऽयं सकलानिधिः ॥ ५४१७ ॥

फलम् :—

दाता महीदानकृतार्द्रहस्तो
लोके प्रसिद्धश्च गुणाभिरामः ।

---

1. लाभकृत्
2. वशाभ्रष्टं
3. लाभकृत्
4. तत्पुत्रप्रबलं चेति राजयोगस्य जातके ।
5. संयुक्ते

स्वबन्धुपोषी तु[1] विशालनेत्रः
श्रीमत्स्यरेखाङ्कितहस्तपादः ॥ ५४१८ ॥

षष्ठाष्टमव्ययेशानामंशनाथाः[2] शुभा यदि ।
सिंहं दृष्ट्वा पलायन्ते शत्रवो द्विरदा यथा ॥ ५४१९ ॥

रोगस्थानाधिपे जीवे स्वक्षेत्रे बलसंयुते ।
शुभांशे शुभसंयुक्ते [3]ह्यरोगदृढगात्रवान् ॥ ५४२० ॥

विलग्नाष्टमकर्मेशाः केन्द्रलाभत्रिकोणगाः ।
[4]शनिश्च बलवांस्तस्य पूर्णमायुर्विनिर्दिशेत् ॥ ५४२१ ॥

रन्ध्रेशे लाभराशिस्थे रन्ध्रे मन्दसमन्विते ।
[5]शुभांशे स्वांशगे वापि वर्षषष्टिं सुजीवति ॥ ५४२२ ॥

रन्ध्रेशे राहुसंयुक्ते लग्ने कुजसमन्विते ।
रन्ध्रे मन्दसमायुक्ते मध्यमायुर्विनिर्दिशेत् ।
चतुःपञ्चाशगे वर्षे देहायासं विनिर्दिशेत् ॥ ५४२३ ॥

—*—

## ॥ रुद्रासनयोगः ॥

षष्ठाष्टमव्ययस्थं स्याल्लग्नमुच्चग्रहं यदि ।
तस्य रुद्रासनपदं निर्दिष्टं पूर्वसूरिभिः ॥ ५४२४ ॥

योगेऽस्मिन् सार्वभौमत्वं वदन्ति यवनादयः ।
एतद्योगवशात् सौख्यमा जन्म सुखभाग्यवान् ॥ ५४२५ ॥

राज्याधिपत्यसौख्यं च षोडशाब्दात् परं सुखम् ।
जन्मतारदशाकाले जन्माब्दे जन्ममासगे ॥ ५४२६ ॥

---

1. स्वबन्धुरक्षेऽति
2. व्ययेशानमंशनाथशुभा
3. अरोग
4. शनैश्च
5. शुभशांस्वांशगे वापि षष्टिवर्षः सुजीवति ।

[1]मात्ररिष्टमवाप्नोति तत्काले नात्र संशयः ।
जन्माब्दे रन्ध्रमासे च मान्द्यज्वरभयं क्वचित् ॥ ५४२७ ॥

द्वितीयाब्दे मनस्तापं स्वपिता रोगपीडितः ।
जातकस्य भयं किंचिच्छुभाशुभफलं समम् ॥ ५४२८ ॥

कर्माधिपदशाकाले रन्ध्राधिपतिभुक्तिषु ।
गोचरे मिथुने मन्दे तत्काले पितृनाशनम् ॥ ५४२९ ॥

जातकस्य महाकष्टं शुभाशुभफलं समम् ।
राज्यस्थानं पञ्चमं स्यात्तत्त्रिकोणगते शनौ ॥ ५४३० ॥

राज्यक्षोभादिकार्याणि स्वराज्ये कलहो[2] भवेत् ।
जन्मतारदशाकाले [3]त्विदं फलमुदाहृतम् ॥ ५४३१ ॥

द्यूनाधिपे लग्नगते द्यूनाधिपदशा सुखम् ।
स्वप्राबल्यं [4]च लभते जातकस्य महत् सुखम् ॥ ५४३२ ॥

[5]इन्द्रांशकगते भौमे त्विन्द्रयोगसमुद्भवः ।
मनोहरांशके जातो भूपतिर्नात्र संशयः ॥ ५४३३ ॥

सम्पत्तारदशाकाले स्वभुक्तौ रोगपीडितः ।
स्वराज्ये कलहं चैव राजोपद्रवमादिशेत् ॥ ५४३४ ॥

सम्पत्तारदशाकाले राहुभुक्तौ महत् सुखम् ।
राज्येशे कुजसंदृष्टे राज्याधिपतिनाशनम् ॥ ५४३५ ॥

अन्यद्राज्यमवाप्नोति तत्काले नात्र संशयः ।
पञ्चमाब्दात् परं सौख्यं जातकस्तु[6] महत् सुखम् ॥ ५४३६ ॥

नष्टराज्यधनप्राप्ती राजमुद्राधिकारवान् ।
सिंहे राहुफलं सत्यं शुभग्रहयुतेक्षिते ॥ ५४३७ ॥

---

1. मात्रारिष्टम्
2. कलहं
3. इद
4. प्रकुर्वीत जातकस्य
5. इन्द्रा....शगे भौमे इन्द्रयोगस्य जातके ।
6. जातकस्य

तद्भुक्तौ सौख्यमाप्नोति तद्दशायां महत् सुखम् ।
जन्मादिषष्ठिवर्षे च [1]त्विदं फलमुदाहृतम् ॥ ५४३८ ॥

सम्पत्तारदशाकाले षष्ठाधिपतिभुक्तिषु ।
षष्ठेशे बलसंयुक्ते तद्भुक्तौ सौख्यमादिशेत् ॥ ५४३९ ॥

देहारोग्यं महत् सौख्यं धनधान्यादिसम्पदः ।
वस्त्रवाहनभूषाढ्यः सर्वसौख्ययुतो[2] भवेत् ॥ ५४४० ॥

ब्राह्मणप्रभुमूलेन जातकश्च[3] महत् सुखम् ।
जन्मादिसप्तमे वर्षे गुरुभुक्ताविदं फलम् ॥ ५४४१ ॥

धनाधिपदशाकाले सुखाधिपतिभुक्तिषु ।
सुखेशे रन्ध्रभावस्थे मन्दभुक्तौ महद्भयम् ॥ ५४४२ ॥

ज्वरस्फोटव्रणादीनि रोगबाधाभयं वदेत् ।
दुष्टजन्तुभयं चैव [4]धन्यस्थलनिवासकृत् ॥ ५४४३ ॥

मन्दे स्वांशगते चैव देहारोग्यं महत् सुखम् ।
नूतनगृहनिर्माणं ग्रामभूम्यादिलाभवान्[5] ॥ ५४४४ ॥

जन्मादि चाष्टमे वर्षे मन्दभुक्ताविदं फलम् ।
धनाधिपदशाकाले भाग्याधिपतिभुक्तिषु ॥ ५४४५ ॥

भाग्येशे कर्मराशिस्थे तद्भुक्तौ सौख्यमादिशेत् ।
विद्याबुद्धियुकीर्तिश्च देहपुष्टिकरो भवेत् ॥ ५४४६ ॥

भाग्यवृद्धिमवाप्नोति राज्यलाभं महत् सुखम् ।
लाभाधिपेन संयुक्ते धनलाभं विशेषतः ॥ ५४४७ ॥

कर्माधिपेन संदृष्टे कर्मसाम्राज्ययोगवान् ।
शुभशोभनकार्याणि गृहे लक्ष्मीकटाक्षवान् ॥ ५४४८ ॥

---*---

1. इदं
2. प्रदो
3. जातकस्य
4. धन्य
5. लाभकृत्

## ॥ कर्मसाम्राज्ययोगः ॥

कर्माधिपे केन्द्रगते धनलाभेशवीक्षिते ।
चरलग्ने प्रजातस्तु[1] कर्मसाम्राज्ययोगवान् ॥ ५४४९ ॥

फलम्—

साम्राज्ययोगे धनिकः प्रतापी
विख्यातकीर्तिर्बहुमानपूज्यः ।
सन्मार्गवाञ्शत्रुनृपालसेवी
कामी सदा भूपतिकार्यदक्षः ॥ ५४५० ॥

एतद्योगवशात् सौख्यं सत्कर्माचारबुद्धिमान् ।
अष्टमाब्दात् परं चैव योगं षोडशवत्सरे ॥ ५४५१ ॥

सम्पत्तारदशाकाले केतुभुक्तौ शुभाशुभम् ।
विद्याबुद्धिसुकीर्तिश्च सर्वसौख्ययुतो[2] भवेत् ॥ ५४५२ ॥

धनाधिपदशाकाले रन्ध्राधिपतिभुक्तिषु ।
गोचरे सिंहगे मन्दे तद्भुक्तौ कष्टमादिशेत् ॥ ५४५३ ॥

देहरोगं मनस्तापमुष्णादिज्वरपीडनम् ।
आत्मबन्धुजनारिष्टं कलहाद्राजविग्रहम्[3] ॥ ५४५४ ॥

शुक्रे स्वांशगते चैव देहारोग्यं महत् सुखम् ।
विद्याबुद्धियुतश्चैव बन्धुकल्याणसम्पदम् ॥ ५४५५ ॥

जन्मादिदशमे वर्षे राजयोगयुतः[4] सुखी ।
धनाधिपदशाकाले लाभाधिपतिभुक्तिषु ॥ ५४५६ ॥

दशाधिपेन संदृष्टे चन्द्रभुक्तौ महत् सुखम् ।
जन्मादि[5]रुद्रवर्षे च चन्द्रभुक्ताविदं फलम् ॥ ५४५७ ॥

---

1. प्रजातस्य
2. प्रदो
3. कलहं राजविड्वरम्
4. प्रदः
5. वर्षाणि

सम्पत्तारदशाकाले [1]त्विदं फलमुदाहृतम् ।
इन्द्रयोगे विपद्दाये शुकराहुसमन्विते ।
प्रभूतधनलाभं च राजयोगं लभेद्ध्रुवम्[2] ॥ ५४५८ ॥

—*—

## ॥ अखण्डसाम्राज्ययोगः ॥

लाभेशधर्मेशधनेश्वराणां
कलानिधिः केन्द्रगृहस्थितो[3] वा ।
स्वपुत्रलाभेषु च[4] दैत्यमन्त्री
[5]ह्यखण्डसाम्राज्यपतित्व मेति ॥ ५४५९ ॥

योगे तत्र प्रजातो बहुगजतुरगस्यन्दनान्दोलिकाद्यैः
क्षोणीदुर्गाधिनाथो गुणगणजलधिः सत्कलत्रैरुपेतः ।
अन्यस्त्रीसक्तचित्तो जयति जनपतिः प्रत्यहं भोगशाली
नानासाम्राज्ययुक्तो[6]लसति स पुरुषः कीर्तिमान् धर्मनिष्ठः ॥ ५४६० ॥

एतद्योगवशात् सौख्यं षोडशाब्दात् परं सुखम् ।
स्वमित्रराज्यलाभं च विपद्दाये न संशयः ॥ ५४६१ ॥

विपत्तारदशाकाले स्वभुक्तौ सुखमादिशेत ।
लभते[7] विजयं राज्यं विवाहोत्सवसंभ्रमम् ॥ ५४६२ ॥

दिव्याम्बरसुभूषाप्ति महैश्वर्य सुसम्पदाः[8] ।
शुभग्रहयुतो राहुः प्रेक्षितो वा शुभेन च[9] ॥ ५४६३ ॥

---

1. इदं
2. भवेद्
3. स्थिते
4. यदि
5. अखण्ड
6. जयतु
7. करोति
8. सुभूषाप्तिर्महदैश्वर्यसम्पदा
9. शुभग्रहयुतेक्षिते

प्रभूतधनलाभं च स्वराज्ये सुखमादिशेत् ।
त्रयोदशाब्दे सौख्यं च राहुभुक्ताविदं फलम् ॥ ५४६४ ॥

राहुदाये जीवभुक्तौ गोचरे तौलिगे शनौ ।
तद्भुक्तौ राजयोगं च शौर्यधैर्यपराक्रमम्[1] ॥ ५४६५ ॥

लक्ष्मीकटाक्षचिह्नानि शत्रुनाशं जयं तथा ।
देवब्राह्मणभक्तिश्च दानधर्मविशेषकृत् ॥ ५४६६ ॥

देवोत्सवादिकार्याणि देवतादर्शनं तथा ।
तटाक गोपुरादीनां निर्माणं देवमन्दिरे[2] ॥ ५४६७ ॥

वाग्मी चातुर्यबुद्धिश्च देहकान्तिर्यशो भवेत् ।
महदैश्वर्यसम्पन्नो राजयोगयुतः[3] सुखी ॥ ५४६८ ॥

शुभशोभनकार्याणि दिव्यस्त्रीसङ्गमं तथा ।
षष्ठाधिपत्यदोषेण किंचिद् व्याकुलसंभवम् ॥ ५४६९ ॥

विप्रवर्गे विरोधं च देहपीडां क्वचित् क्वचित् ।
पूर्वार्धे सौख्यमाप्नोति [4]ह्यपरार्धे इदं फलम् ॥ ५४७० ॥

जन्मादिषोडशे वर्षे गुरुभुक्ताविदं फलम् ।
षोडशाब्दे धनुर्मासे[5] स्वप्राबल्यं महत् सुखम् ॥ ५४७१ ॥

स्वतन्त्रराज्यलाभं च राजयोगसमुद्भवः[6] ।
विपत्तारदशाकाले राज्याधिपतिभुक्तिषु ॥ ५४७२ ॥

गोचरे लाभगे मन्दे मन्दभुक्तौ महत् सुखम् ।
स्वतन्त्रराज्यलाभं च राजमुद्राधिकारवान् ॥ ५४७३ ॥

---

1. पराक्रमः
2. पुरादीनि निर्माणं देवमान्दिरम्
3. महदैश्वर्य सम्पत्तिराजयोग प्रदस्सुखी
4. अपरार्धे 5. धनुर्मासं
6. राजयोगस्य जातके

रुद्रासनाभिधे योगे योगः साम्राज्यजस्तथा[1] ।
विपद्दाये मन्दभुक्तौ योगं प्राप्नोति भूरिशः ॥ ५४७४ ॥

बहुकीर्तिप्रतापं च बहुराज्य[2]युतः सुखी ।
बहुदेशप्रसिद्धश्च बहुद्रव्यादिलाभवान्[3] ॥ ५४७५ ॥

नानाकार्येषु निपुणो [4]ह्यष्टैश्वर्यसमन्वितः ।
शुभशोभनकार्याणि दारसौख्यं विशेषतः ॥ ५४७६ ॥

अन्यस्त्रीसङ्गवान् कामी भोगभाग्ययुतः सुखी ।
दानधर्मपरो नित्यं देवब्राह्मणपोषकः ॥ ५४७७ ॥

अग्रहारप्रतिष्ठाता देवमन्दिरकारकः[5] ।
रन्ध्रस्थानगता[6]द्दोषात् किंचिद् व्याकुलसंभवम् ॥ ५४७८ ॥

मातृबन्धुजनारिष्टं देहपीडां कचिद्भयम् ।
एकोनविंशगे वर्षे मन्दभुक्ताविदं फलम् ॥ ५४७९ ॥

—※—

## ॥ चामरयोगः ॥

वर्गोत्तमगते सूर्ये लग्नेशे शुभराशिगे ।
लग्नात् कर्मगते सौम्ये योगश्चामरसंज्ञिकः ॥ ५४८० ॥

फलम् —

राजा भवेद्भूपतिवंशजानां
दिगन्तविश्रान्तमहीपतीनाम् ।

---

1. रुद्रासनपदे योगे साम्राज्ये योगजातके ।
2. प्रदः
3. बहुदेशप्रसिद्धिश्च बहुद्रव्यादिलाभतः
4. अष्टैश्वर्य
5. प्रतिष्ठादि निर्माण देवमन्दिरम्
6. रन्ध्रस्थानगते दोषं

किरीटकोटिस्थितरत्नभाभिः[1]
प्रकाशमानाङ्घ्रिविराजमानः ॥ ५४८१ ॥

योगेऽस्मिंश्चामरे जातो दीर्घायुर्दीर्घ[2]बुद्धिमान् ।
बहुदेशाधिनाथश्च धर्मिष्ठो वेदवित् सुखी ॥ ५४८२ ॥

विपत्तारदशाकाले भाग्याधिपतिभुक्तिषु ।
कर्माधिपेन संदृष्टे सौम्यभुक्तौ शुभं वदेत् ॥ ५४८३ ॥

देवद्विजाराधनतत्परत्वं[3]
कृतार्थलाभं प्रियकौशलं च ।
देशाधिपत्यं नरवाहनं च
राहोर्दशायां बुध भुक्तिकाले ॥ ५४८४ ॥

लाभभाग्येश्वरौ युक्तौ कर्माधिपतिवीक्षितौ[4] ।
सुखाधिपेन संदृष्टौ भाग्ययोग इति स्मृतः[5] ॥ ५४८५ ॥

तटाकगोपुरादीनां निर्माता धर्मकः सुखी[6] ।
देवोत्सवादिकार्याणि बन्धुकल्याणसम्पदः ॥ ५४८६ ॥

दानधर्मपरो नित्यं देवब्राह्मणपूजनम् ।
दिव्यक्षेत्रादिसञ्चारं [7]बुधभुक्तौ विशेषतः ॥ ५४८७ ॥

दिव्यस्त्रीभोगमाप्नोति पुराणश्रवणादिकम् ।
नीचांशे पापसंयुक्ते [8]त्वसितेन युतेक्षिते ॥ ५४८८ ॥

देहपीडां मनस्तापं बन्धुवर्गे विशेषतः ।
अन्योन्यकलहं किंचिन्मातृबन्धुविनाशनम् ॥ ५४८९ ॥

---

1. कोटीरमणिप्रभावैः सर्वासु भाग्यान्वितसौख्यमेति
2. दीघायुर्धनबुद्धिमान्
3. तत्परश्च
4. लाभभाग्येश्वरेयुक्ते कर्माधिपतिवीक्षिते ।
5. संदृष्टे भाग्ययोगमितिस्मृतम्
6. पुरादीनि धर्मसिद्धि प्रदस्सुखी
7. ज्ञानभुक्ति
8. असितेन

गोचरे द्वादशे मन्दे [1]त्वेकविंशतिवत्सरे ।
विपद्दाये सौम्यभुक्ताविदं फलमुदाहृतम् ॥ ५४९० ॥

विपत्तारदशाकाले केतुभुक्तौ महत् सुखम् ।
गोचरे जन्मगे मन्दे देहपीडां क्वचिद्भयम् ॥ ५४९१ ॥

कलहं शत्रुभीतिं च[2] मित्रवर्गे क्वचिद्भयम् ।
शुभग्रहेण संदृष्टे सत्कर्माचारसिद्धिमान् ॥ ५४९२ ॥

चित्रविद्याविनोदं च पुराणश्रवणादिकम् ।
तीर्थयात्रागमं चैव प्रबलप्रभुदर्शनम् ॥ ५४९३ ॥

स्वगृहे शुभकार्याणि पुत्रदारादि सम्पदः ।
दानधर्मजपादीनि देवतागुरुभक्तिमान्[3] ॥ ५४९४ ॥

पापक्षेत्रगते केतौ पापचित्तः क्वचित् क्वचित् ।
अन्यस्त्रीसङ्गमं चैव कलहं मित्रबन्धुषु ॥ ५४९५ ॥

शुभाशुभफलं चैव राजयोगयुतो[4] भवेत् ।
विपत्तारदशाकाले रन्ध्राधिपतिभुक्तिषु ॥ ५४९६ ॥

गोचरे नक्रगे मन्दे चतुर्विंशतिवत्सरे ।
राज्यसौख्यं यानलाभं धनस्त्रीलाभमेवच ॥ ५४९७ ॥

उत्साहकीर्तिसम्पन्नो दिव्याभरणलाभवान्[5] ।
मणिविद्रुममुक्तादिदिव्यवस्तुसमागमम् ॥ ५४९८ ॥

स्वराज्ये सुखमाप्नोति बन्धुकल्याणसम्पदः ।
दशाधिपेन संयुक्ते [6]ह्यन्यस्त्रीसौख्यदायकः ॥ ५४९९ ॥

उत्तमस्त्रीलाभमेव नानाजातिवधूपतिः ।
बहुद्रव्यव्ययं चैव बहुकार्यार्थसाधकः ॥ ५५०० ॥

---

1. एकः
2. भीतिश्च
3. भक्तिदः
4. प्रदो
5. सम्पत्तिर्दिव्याभरणलाभतः
6. अन्य

नानादेशप्रसिद्धश्च नानाश्रमविशारदः ।
[1]महान्तं राजयोगं च महालक्ष्मीकटाक्षवान् ॥ ५५०१ ॥

शुक्रे राहु सुसंयुक्ते[2] स्त्रीमूलात् कलहं क्वचित् ।
अपवादभयं किंचिद्देहपीडां क्वचिद्भयम् ॥ ५५०२ ॥

आप्तबन्धुजनक्लेशं दुष्टकर्मादिसंभवम् ।
गुरुदृष्टिवशात् सौख्यं राजयोगयुतो[3] भवेत् ॥ ५५०३ ॥

मनोधैर्यं महोत्साहमिदं फलमुदाहृतम् ।
लाभस्थानगते [4]राहौ लाभाधिपतिभुक्तिषु ॥ ५५०४ ॥

भाग्याधिपेन संयुक्ते सूर्यभुक्तौ महत् सुखम् ।
स्वबन्धुदारपुत्राणामारोग्यं भूषणादिकम् ॥ ५५०५ ॥

दिव्यवस्तुफलप्राप्तिं राजपूज्यो जयावहः[5] ।
राज्याधिपतिसन्मानं बहुकीर्तियुतः[6] सुखी ॥ ५५०६ ॥

देवोत्सवादिकार्याणि [7]सञ्चारं वनगह्वरे ।
मनोधैर्यं महोत्साहं प्रबलप्रभुदर्शनम् ॥ ५५०७ ॥

अनेककार्यसिद्धिं च राजयोगयुतो[8] भवेत् ।
सप्तविंशति[9]वर्षे च त्विदं फलमुदाहृतम् ॥ ५५०८ ॥

विपत्तारदशाकाले कर्माधिपतिभुक्तिषु ।
गोचरे नक्रगे मन्दे चन्द्रभुक्तौ शुभाशुभम् ॥ ५५०९ ॥

सुखभोगी भवेन्नित्यं स्वराज्ये सुखमाप्नुयात् ।
परस्त्रीसङ्गवान्नित्यं देशग्रामाधिकारिताम्[10] ५५१० ॥

---

1. राजयोगं च महती महालक्ष्मीकटाक्षकृत् ।
2. युतश्चैव
3. प्रदो
4. राहु
5. पूज्यजयावहम्
6. प्रदः
7. बन्धुवर्गादिसञ्चरन्
8. सिद्धिश्च राजयोगप्रदो
9. वर्षाणि इवं
10. विपत्यता

तटाकारामधर्मे च[1] देवब्राह्मणपूजनम् ।
दायेशात् षष्ठगे चन्द्रे सौम्ये रविसमन्विते ॥ ५५११ ॥

देहपीडां मनस्तापं मातृबन्धुविनाशनम् ।
दुष्टकर्मादिसंप्राप्तिं शत्रुपीडां[2] कचिद्भयम् ॥ ५५१२ ॥

अपवादभयं किंचिदष्टाविंशतिवत्सरे ।
विपत्तारदशाकाले धनाधिपतिभुक्तिषु ॥ ५५१३ ॥

गोचरे मेषगे मन्दे [3]त्वेकोनत्रिंशवत्सरे ।
देहपीडां मनस्तापं कलहं [4]राजविग्रहम् ॥ ५५१४ ॥

आप्तबन्धुजनारिष्टं धनधान्यव्ययं तथा ।
सुखसौख्यविहीनं च कुटुम्बे रोगपीडनम्[5] ॥ ५५१५ ॥

कलहं बन्धुवैषम्यं यत्नकार्यविघातकृत् ।
इन्द्रासनपदे भौमे मनोधैर्यं महत् सुखम् ॥ ५५१६ ॥

मनोह्लादं महोत्साहं विद्याभरणलाभतः ।
शत्रुनाशं जयं चैव शुभाशुभफलं समम् ।
विपत्तारदशाकाले [6]त्विदं फलमुदाहृतम् ॥ ५५१७ ॥

—: * :—

## ॥ गुरुदशाफलम् ॥

### कूर्मयोगः

तृतीयैकादशे जीवे स्वक्षेत्रे बलसंयुते ।
लग्नाधिपे लाभगते कूर्मयोग इतीरितः ॥ ५५१८ ॥

---

1. धर्मश्च
2. प्राप्तिः शत्रु
3. एकोन
4. राजविड्वरम्
5. पीडितः
6. इदं

चरलग्ने तदीशे तु स्थिरराशिस्थिरांशगे ।
गुरुशुक्रयुते दृष्टे कूर्मयोग इतीरितः ॥ ५५१९ ॥

फलम्—

विख्यातकीर्तिर्भुवि राजपूज्यो
[1]धर्मे रतः सत्त्वगुणप्रधानः ।
नित्यं सुखी [2]सात्त्विककार्यकर्ता
श्रीकूर्मयोगे मनुजाभिरामः[3] ॥ ५५२० ॥

क्षेमतारदशाकाले जीवे मूलत्रिकोणगे ।
जीवाद्भाग्यं गते शुक्रे शुभांशे राजयोगवान् ॥ ५५२१ ॥

भङ्गः—

गुरोः षष्ठाष्टमे पापे शुक्रे राहुसमन्विते ।
चन्द्रादष्टमगे शुक्रे योगभङ्गं विनिर्दिशेत् ॥ ५५२२ ॥

जीवदाये मध्यखण्डे रन्ध्राधिपतिभुक्तिषु ।
स्वराज्ये नष्टमाप्नोति मनःक्लेशं महद्भयम् ॥ ५५२३ ॥

दशान्ते सौख्यमाप्नोति राजयोगयुतः[4] सुखी ।
क्षेमतारदशाकाले स्वभुक्तौ सर्वसम्पदः ॥ ५५२४ ॥

गोचरे मेषगे मन्दे जन्मादित्रिंशवत्सरे ।
तत्काले राजवैरं च यत्नकार्यविघातवान्[5] ॥ ५५२५ ॥

मित्रवर्गविरोधं च धननाशं मनोभयम् ।
आत्मबन्धुजनक्लेशं पुत्रदारादिपीडनम् ॥ ५५२६ ॥

---

1. धर्माधिकः 2. सामजकारकर्ता
3. मनुजेन देशः 4. प्रदः
5. निष्ठुरं यत्नकार्यविघातकृन्

पूर्वार्धे व्याकुलं चैति [1]ह्यपरार्धे महत् सुखम् ।
गोचरे मिथुने जीवे सर्वसौख्ययुतः[2]सुखी ॥ ५५२७ ॥

[3]महान्तं राजयोगं च बहुकीर्तिः प्रतापवान् ।
गोचरे वृषभे मन्दे दुर्भिक्षं राष्ट्रनाशनम् ॥ ५५२८ ॥

हाहाकारं जगत् सर्वं क्षामक्षोभादिबाधया ।
स्वराज्ये सुखमाप्नोति [4]त्वेकविंशतिवत्सरे ॥ ५५२९ ॥

क्षेमतारदशाकाले राज्याधिपतिभुक्तिषु ।
गोचरे वृषभे मन्दे मन्दभुक्तौ महत् सुखम् ॥ ५५३० ॥

नगरग्रामनाथश्च सेनानीर्नृपवन्दितः ।
परोपकारनिरतो नूतनप्रभुदर्शनम् ॥ ५५३१ ॥

कलत्रपुत्रसौख्याप्तिं बन्धु[5]वर्गे महत् सुखम् ।
शुभशोभनकार्याणि ह्यन्यस्त्रीसङ्गसौख्यवान्[6] ॥ ५५३२ ॥

गुरोः षष्ठगते मन्दे लग्नादष्टमगेऽपि वा ।
पापग्रहयुते दृष्टे पापभुक्तौ महद्भयम् ॥ ५५३३ ॥

वातरोगादिपीडां च ह्यन्यप्रभुविरोधताम्[7] ।
कलहं मित्रमूलेन [8]ह्यात्मबन्धुविनाशनम् ॥ ५५३४ ॥

[9]बहुमूलाद्द्रव्यनष्टं शुभाशुभफलं समम् ।
चतुस्त्रिंशतिवर्षे च त्विदं[10] फलमुदाहृतम् ॥ ५५३५ ॥

क्षेमाधिपदशाकाले भाग्याधिपतिभुक्तिषु ।
गोचरे मिथुने मन्दे सौम्यभुक्तिः शुभप्रदा[11] ॥ ५५३६ ॥

---

1. अपरार्धे
2. प्रदः
3. राजयोगं च महती
4. एक
5. सौख्याप्तिः
6. अन्यस्त्रीसुखसौख्यदः
7. कृत्
8. आत्म
9. नानामूलाद्
10. वर्षेण इदं
11. भुक्तिश्शुभप्रदः

शुभसन्तोषकार्याणि बन्धुवर्गे महत् सुखम् ।
दारपुत्रादिसौख्यं च दिव्यस्त्रीभोगमिच्छति ॥ ५५३७ ॥

स्वराज्ये सुखमाप्नोति प्रभूतधनलाभवान्[1] ।
दानधर्मजपादीनि षट्कर्मज्ञानसिद्धिमान् ॥ ५५३८ ॥

देवोत्सवादिकार्याणि देवतादर्शनं तथा ।
प्रयाणं शुभदं चैव यत्नकार्यार्थसिद्धिकृत् ॥ ५५३९ ॥

गुरोः षष्ठाष्टमे सौम्ये पापग्रहयुतेक्षिते ।
बन्धुवर्गे मनस्तापो[2] मित्रवर्गे तथा भवेत् ॥ ५५४० ॥

अन्यप्रभुविरोधं च स्वराज्ये कलहं तथा ।
आत्मबन्धुजनक्लेशं [3]बहुमूलधनव्ययः ॥ ५५४१ ॥

कर्माधिपेन संदृष्टे राजयोगो[4] भवेद्ध्रुवम् ।
मनोधैर्यं महोत्साहं षट्त्रिंशतिवत्सरे ॥ ५५४२ ॥

षष्ठाधिपदशाकाले राज्यस्थः केतुभुक्तिषु ।
गोचरे कटके मन्दे [5]केतुभुक्तौ महद्भयम् ॥ ५५४३ ॥

स्वराज्ये कलहं चैव भृत्यवर्गविरोधजम्[6] ।
यातायातभयं चैव स्थानभ्रंशं महद्भयम् ॥ ५५४४ ॥

कलहं [7]शत्रुभीतिं च ह्यादायादधिकव्ययम् ।
शौर्यधैर्यविहीनश्च [8]दुर्घटः कार्यसंभवः ॥ ५५४५ ॥

मूत्ररोगभयं चैव सप्तत्रिंशतिवत्सरे ।
षष्ठाधिपदशाकाले रन्ध्राधिपतिभुक्तिषु ॥ ५५४६ ॥

गोचरे [9]ह्यष्टमे मन्दे शुक्रभुक्तौ महद्भयम् ।
शुक्रे राहुयुते चैव चन्द्रलग्नाष्टमस्थिते ॥ ५५४७ ॥

---

1. लाभतः
2. मनस्तापं
3. नानामूल
4. राजयोगं
5. भुक्ति
6. वर्गे विरोधकृत्
7. भीतिश्च आदायात्
8. वुर्धटाः
9. अष्टमे

तत्काले व्याकुलं चैति राज्यनाशं धनक्षयम् ।
अकस्मात् कार्यनष्टं च लाभद्रव्यविहीनताम्[1] ॥ ५५४८ ॥

देहजाड्यं मनःक्लेशं बहुकार्यार्थचिन्तनम् ।
अपमानभयं किंचिद्यत्नकार्यविघातजम्[2] ॥ ५५४९ ॥

सिंहे शनिस्थिते काले लोके दुर्भिक्षजं भयम्[3] ।
हाहाकारं जगत् सर्वं क्षामक्षोभादिबाधितम् ॥ ५५५० ॥

शुक्रे स्वांशगते चैव [4]अपरार्धे क्वचित् सुखम् ।
मनोधैर्यं महोत्साहं शुभाशुभफलं समम् ॥ ५५५१ ॥

षट्त्रिंशात् परं चैव [5]त्वेकचत्वारिवत्सरे ।
क्षेमाधिपदशाकाले लाभाधिपतिभुक्तिषु ॥ ५५५२ ॥

गोचरे कलने मन्दे सूर्यभुक्तौ महत् सुखम् ।
प्रबलप्रभुमूलेन [6]यत्नकार्यार्थसिद्धिमान् ॥ ५५५३ ॥

विक्रमं साहसं सौख्यं राजसन्मानवैभवम् ।
धनलाभं यशोवृद्धिं सद्गोष्ठीप्रियभाषणम् ॥ ५५५४ ॥

स्वर्णसूत्रोतवस्त्रादिभूषणानां सुलाभवान्[7] ।
कर्माधिपेन संदृष्टे मित्रप्रभुवशात् सुखम् ॥ ५५५५ ॥

दायेशाद्रन्ध्रराशिस्थे स्वकार्ये तामसो[8] भवेत् ।
देहपीडां मनस्तापं क्वचित् सौख्यं शुभाशुभम् ॥ ५५५६ ॥

क्षेमताारदशाकाले कर्माधिपतिभुक्तिषु ।
गोचरे कलने मन्दे क्रूरग्रहनिरीक्षिते ॥ ५५५७ ॥

---

1. विहीनता
2. कृत्
3. डाम्बरम्
4. अपरार्थे
5. एक
6. कृत्
7. भूषणादिषु लाभतः
8. स्वकार्यं तामसं

पूर्वार्धे व्याकुलं चैति मातृबन्धुविनाशनम् ।
दुष्टकर्मादिसंप्राप्तिं[1] यातायातं धनव्ययम् ॥ ५५५८ ॥

अनाचारो मनःपीडां यत्नकार्यविनाशनम्[2] ।
देहालस्यं मन्दबुद्धिं[3] पूर्वार्धोक्तं फलं विदम् ॥ ५५५९ ॥

शशाङ्के मिथुनांशस्थे तदंशे गुरुसंयुते ।
गोचरे मिथुने जीवे गोचरे तौलिगे शनौ ॥ ५५६० ॥

अपरार्धे महत् सौख्यं राजसन्मानवैभवम् ।
नूतनप्रभुसन्मानं यत्नकार्यार्थलाभतः ॥ ५५६१ ॥

नष्टराज्यधन[4]प्राप्तिं महदैश्वर्यसम्पदः ।
अर्थयोगमवाप्नोति स्वराज्ये सुखमाप्नुयात् ॥ ५५६२ ॥

स्वतन्त्रराज्यलाभं च बहुकीर्तिप्रतापवान् ।
द्विचत्वारिंशगे वर्षे युग्मादिद्वयमासगे ॥ ५५६३ ॥

तत्त्रिकोणगते मासे तत्काले सौख्यमादिशेत् ।
प्रबलप्रभुमूलेन पत्रिकागमनं तथा ॥ ५५६४ ॥

राज्यलाभं महत् सौख्यं महालक्ष्मीकटाक्षवान्[5] ।
चन्द्रे कुजयुते दृष्टे दुष्टजन्तुभयं क्वचित् ॥ ५५६५ ॥

भाग्याधिपेन संदृष्टे भाग्यवृद्धिं महोत्सवम् ।
लाभाधिपेनसंदृष्टे धनलाभंविशेषतः ॥ ५५६६ ॥

द्विचत्वारिंशगे वर्षे [6]त्विदं फलमुदाहृतम् ।
क्षेमतारदशाकाले दाराधिपतिभुक्तिषु ॥ ५५६७ ॥

---

1. संप्राप्तिः
2. अनाचारमनःपीडां यत्नकार्यविरोधकृत् ।
3. पूर्वार्धे इदं फलम्
4. प्राप्तिर्महदैश्वर्यसम्पदम्
5. कृत्
6. इदं

गोचरे तौलिगे मन्दे कुजभुक्तौ महत् सुखम् ।
आयुरारोग्यपुत्राप्तिं[1] राज्यबन्धुसमन्वितः ॥ ५५६८ ॥

स्वदारपुत्रलाभं च बहुकीर्तिप्रतापवान् ।
मनोधीरो महोत्साही राजयोगयुतो[2] भवेत् ॥ ५५६९ ॥

द्वितीयद्यूनदोषेण[3] देहजाड्यं कचिद्भयम् ।
व्रणोष्णादिज्वराद्भीतो दारबन्धुविनाशवान्[4] ॥ ५५७० ॥

इन्द्रासनगते भौमे राजभोगयुतो[5] भवेत् ।
यत्नकार्यार्थसिद्धिं च योगं प्राप्नोति भूरिशः ॥ ५५७१ ॥

[6]पापांशकस्थिते भौमे प्रयाणं कलहं क्वचित् ।
मित्रबन्धुविरोधं च कोपाधिक्यं भयं तथा ॥ ५५७२ ॥

त्रिचत्वारिंशगे वर्षे त्विदं[7] फलमुदाहृतम् ।
क्षेमतारदशाकाले लाभस्थराहुभुक्तिषु ॥ ५५७३ ॥

गोचरे तौलिगे मन्दे राहुभुक्तौ महत् सुखम् ।
दशाधिपेन संदृष्टे स्वराज्ये सुखमाप्नुयात् ॥ ५५७४ ॥

भाग्यवृद्धिं महोत्साहं दारपुत्रादिसंपदम् ।
शुभसन्तोषकार्याणि प्रयाणं शुभदं लभेत्[8] ॥ ५५७५ ॥

सत्कर्मधर्मकीर्तिं च राजयोगयुतो[9] भवेत् ।
रन्ध्राधिपेन संयुक्ते गोचरे तौलिगे शनौ ॥ ५५७६ ॥

अपरार्धे कचित् कष्टं देहपीडां कचिद्भयम् ।
अन्यप्रभुविरोधं च कलहं राजविग्रहम्[10] ॥ ५५७७ ॥

---

1. पुत्रार्थं
2. मनोधैर्यं महोत्साहं राजयोगप्रदो भवेत्
3. नाथेन
4. विनाशनम्
5. प्रदो
6. पापांशे कुजसंयुक्ते
7. इदं
8. भवेत्
9. कीर्तिश्च राजयोगप्रदो
10. विड्वरम्

आत्मबन्धुजनक्लेशं दशासन्धाविदं फलम् ।
पञ्चचत्वारिंशकेऽब्दे [1]त्विदं फलमुदाहृतम् ।
क्षेमतारदशाकाले शुभाशुभफलं समम् ॥ ५५७८ ॥

॥ गुरुदशाफलं सम्पूर्णम् ॥

—※—

## ॥ शनिदशाफलम् ॥

रुद्रासनयोगः—

[2]षष्ठाष्टमव्ययेशास्ते लग्नादुच्चंगता यदि ।
तस्य रुद्रासनो योगो निर्दिष्टः[3] पूर्वसूरिभिः ॥ ५५७९ ॥

योगेऽस्मिन् सार्वभौमत्वं वदन्ति यवनादयः ।
एतद्योगवशात् सौख्यं प्रत्यग्दाये विशेषतः ॥ ५५८० ॥

[4]महान्तं राजयोगं च पुत्रदारादिसम्पदः ।
स्वराज्ये सौख्यमाप्नोति पूर्वार्धे सर्वसौख्यवान्[5] ।
अपरार्धे देहकष्टं तुलालग्नोद्भवस्य[6] हि ।
प्रत्यक्तारदशाकाले सुखाधिपतिभुक्तिषु ॥ ५५८१ ॥

गोचरे चापगे मन्दे स्वभुक्तौ राजयोगवान्[7] ।
महदैश्वर्य[8] संपन्नो महालक्ष्मीकटाक्षवान् ॥ ५५८२ ॥

यत्नकार्यार्थसिद्धिं च दारपुत्रादिवर्धनम् ।
कुजदृष्टियुते मन्दे[9] देहजाड्यं महद्भयम् ॥ ५५८३ ॥

---

1. इवं
2. षष्ठाष्टमव्ययस्थंस्याल्लग्नमुच्चगंह यदि ।
3. रुद्रासनपदं निर्दिष्टं
4. राजयोगं च महती
5. सौख्यतः
6. लग्नस्य जातके
7. कृत्
8. संप्राप्तिर्महा
9. मन्दयुते दृष्टे

अपमृत्युभयं किंचिद्दारवर्गे विशेषतः ।
तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत् ॥ ५५८४ ॥

मन्दे स्वांशगते चैव देहारोग्यं महत् सुखम् ।
स्वराज्ये सुखमाप्नोति [1]ह्यष्टचत्वारिवत्सरे ॥ ५५८५ ॥

राज्याधिपदशाकाले भाग्याधिपतिभुक्तिषु ।
गोचरे नक्रगे मन्दे तत्काले सुखमाप्नुयात् ॥ ५५८६ ॥

सर्वसौभाग्यसम्पत्तिः पुत्रदारादिवर्धनम् ।
बहुकीर्तिप्रतापौ[2] च स्वराज्ये सुखमादिशेत् ॥ ५५८७ ॥

नीचांशे बुधसंयुक्ते [3]शत्रुवर्गान्महद्भयम् ।
अन्यप्रभुविरोधं च धनमूलाद्विषादवान्[4] ॥ ५५८८ ॥

आत्मबन्धुजनक्लेशं भुक्त्यन्ते कष्टमादिशेत् ।
कर्माधिपेन संदृष्टे राजयोगयुतो[5] भवेत् ॥ ५५८९ ॥

अनेकधर्मसिद्धिश्च ज्ञानं[6] भक्तिर्यशो भवेत् ।
एकपञ्चाशगे वर्षे [7]त्विदं फलमुदाहृतम् ॥ ५५९० ॥

राज्याधिपदशाकाले राज्यस्थकेतुभुक्तिषु ।
स्वराज्ये कलहं चैव भृत्यवर्गे विरोधवान्[8] ॥ ५५९१ ॥

अन्यप्रभुविरोधं च यातायातभयं तथा ।
देहजाड्यं [9]मनःक्लेशमात्मवर्गे महद्भयम् ॥ ५५९२ ॥

शुभाशुभफलं चैव द्विपञ्चाशकवत्सरे ।
सुताधिपदशाकाले रन्ध्राधिपतिभुक्तिषु ॥ ५५९३ ॥

---

1. अष्टचत्वारि
2. प्रतापं
3. शत्रुवर्गे
4. कृत्
5. प्रदो
6. ज्ञानी
7. इदं
8. कृत्
9. क्लेशमात्म

गोचरे कुम्भगे मन्दे शुक्रभुक्तौ शुभाशुभम् ।
देहपीडां मनस्तापं कार्यविघ्नं धनक्षयम् ५५९४ ॥

कलहं शत्रुभीतिं च [1]ह्यादायादधिकं व्ययम् ।
आत्मबन्धुजनारिष्टं दारवर्गे विशेषतः ॥ ५५९५ ॥

कुटुम्बकलहं सत्यं शुभाशुभफलं समम् ।
शुक्रे स्वांशगते चैव राजयोगयुतः[2] सुखी ॥ ५५९६ ॥

रन्ध्रचक्रदशाकाले रन्ध्रस्थमन्ददायगे ।
लग्नरन्ध्रेशभुक्तौ तु त्रिपञ्चाशकवत्सरे ॥ ५५९७ ॥

दक्षिणायनगे सूर्ये सिंहादित्रय[3]मासगे ।
शुक्लपक्षे मन्दवारे दिवाकाले मृतिं वदेत्[4] ॥ ५५९८ ॥

इह जन्मनि पुण्यात्मा ह्यन्ते विष्णुपदं व्रजेत्[5] ।
मनोहरांशके सत्यं प्रत्यक्षं देवकेरलम् ॥ ५५९९ ॥

—*—

## ॥ मिथुनलग्ने कामिन्यंशः ॥

कामिन्यंशे पूर्वभागे युग्मलग्ने प्रजायते ।
शूद्रजन्मा सुखी नित्यं तार्तीयो गर्भसंभवः[6] ॥ ५६०० ॥

लग्नेशो लाभराशिस्थे लाभेशो धैर्यराशिगे ।
कामिन्यंशे पूर्वभागे ज्येष्ठभ्रातृविहीनवान् ॥ ५६०१ ॥

पश्चाद्भ्रातृयुतो मानी पूर्वभागे न संशयः ।
सुखेशो लाभराशिस्थे चापांशे शुभसंयुते ॥ ५६०२ ॥

---

1. भीतिश्च आदायाद्  2. प्रद:
3. स्वयं  4. मृतिप्रदः
5. सुपुण्यात्मा अन्ते विष्णुपदं ययौ  6. सुखं नित्यं तृतीये गर्भजातकम्

जननं पश्चिमे भागे पूर्वस्यां दिशि जायते[1] ।
[2]पुरे प्राकाररम्ये च नद्याश्चोत्तरशोभिते ॥ ५६०३ ॥

तन्मन्स्थे जननं [3]तस्य पूर्वभागे न संशयः ।
लग्नेशे गुरुसंदृष्टे देवालयसमीपगे ॥ ५६०४ ॥

पूर्वपश्चिमवीथ्योश्च ह्युत्तरस्यां प्रजायते[4] ।
देवताप्रार्थनेनैव[5] शिवानुग्रहहेतुना ॥ ५६०५ ॥

जननं च तथा[6] प्राहुः पूर्वभागे न संशयः ।
भाग्येशे लाभराशिस्थे बुधशुक्रसमन्विते ॥ ५६०६ ॥

कर्माधिपेन संदृष्टे पुरा क्षत्रकुलोद्भवः ।
वर्गोत्तमांशगे मन्दे सेनानाथोऽथ[7] मन्त्रिणः ॥ ५६०७ ॥

अष्टभार्यायुतःसौख्यं पञ्चपुत्रयुतो[8] भवेत् ।
एकषष्टितमे वर्षे त्वतिसार[9]ज्वरे मृतिः ॥ ५६०८ ॥

इह जन्मनि युग्मे च कामिन्यंशे[10] प्रजायते ।
रूपवान् मतिमान् वाग्मी प्रसन्नमुखनेत्रवान् ॥ ५६०९ ॥

अंदृष्टशाली धर्मात्मा रक्तवर्णः शुभाकृतिः ।
मिताशी मितभाषी च मितनिद्रो विचक्षणः[11] ॥ ५६१० ॥

राजसेवापरो नित्यं बहुभृत्यजनान्वितः ।
वाचालकः सत्यवादी नानाशास्त्रविशारदः ॥ ५६११ ॥

दिव्यनामाङ्कितश्चैव वेदान्ते ज्ञानसिद्धिमान्[12] ।
सत्कथाश्रवणं नित्यं देवब्राह्मणपोषकः ॥ ५६१२ ॥

---

1. प्रकृतं पूर्वके दिशि
2. ग्रामारपट्टणं संस्थे उत्तरे नदिसंस्थिते
3. तस्याः पूर्वभागे प्रजायते
4. वीथिषु उत्तरे भागजातकम्
5. प्रार्थनं चैव
6. इति
7. नायको सेव
8. सुखी
9. एकषष्टात्परं वर्षे अतिसार
10. इह जन्मे प्रजातस्य युग्मलग्ने
11. निद्रातिजाग्रतः
12. दिव्यनामाङ्कितपरो वेदान्ते वेदसिद्धिमान्

यथार्थवादी तत्त्वज्ञो [1]ह्यन्यस्त्रीसङ्गलोलुपः ।
पितृभाग्यविहीनश्च स्वभुजार्जितवित्तवान् ॥ ५६१३ ॥

चक्ररेखाङ्कितपदपाणिभिस्तु सुशोभितः[2] ।
सज्जनप्रियवादी च दुर्जनानां शठो भवेत् ॥ ५६१४ ॥

सोदरावसुसंख्याश्च तेषामेकश्चिरायुषः[3] ।
शेषं नाशमिति प्राहू राजयोग[4]युतो भवेत् ॥ ५६१५ ॥

धनेशे स्वोच्चराशिस्थे तदीशे लाभराशिगे ।
शुभग्रहयुते दृष्टे [5]स्वसंख्याधनलाभवान् ॥ ५६१६ ॥

भावैश्चतुर्भिर्बलिभिर्धनभाग्याय कर्मभिः ।
सम्पूर्णवित्तगेहे च[6] कुबेर इव जायते ॥ ५६१७ ॥

धनराशेस्तु देशे वा[7] धनेशस्याथ वा यदि ।
द्रव्यवृद्धि[8]र्भवेत्तस्मिन्नङ्गे सर्वदिक्ष्वपि ॥ ५६१८ ॥

सर्वाष्टवर्गे यत्र स्याद्विग्राशीषु फलोन्नतिः ।
तस्मिन् देशे द्रव्यवृद्धिर्भविष्यति न संशयः ॥ ५६१९ ॥

लाभस्थानं गते काव्ये नीचांशकविवर्जिते ।
शनिदृष्टियुते वापि निधिप्राप्तिर्न संशयः ॥ ५६२० ॥

शुक्रे शनियुते जातो भोगी स्याद्राजवल्लभः ।
अन्यस्त्रीसङ्गवान् कामी पश्चात्पापी जितेन्द्रियः ५६२१ ॥

शुक्रे शनियुते जातो ज्ञानी तत्त्वविवेकवान् ।
वेदान्तज्ञानसम्पन्नो धनदांशे सुकीर्तिमान् ॥ ५६२२ ॥

---

1. अन्यस्त्री
2. हस्तपादौ चक्ररेखापादौपाणिसुशोभितः
3. सोदरावसुसंख्याति एकभ्रातृचिरायुषम्
4. प्रदो
5. असंख्या
6. सम्पूर्णवित्तं सततं
7. धगेन राशिदेशे वा
8. द्रव्यवृत्तिः

इन्द्रयोगे विपद्दाये क्षेमदायेऽथ वा यदि ।
लाभे शुक्रे प्रजातश्च[1] बहुवित्ताधिकारवान् ॥ ५६२३ ॥

कर्मेशेन युते दृष्टे निधिप्राप्तिर्न संशयः ।
लग्नेशे गुरुसंदृष्टे भाग्यारूढे सुभाग्यवान् ॥ ५६२४ ॥

आयुष्मन्तौ च पितरौ[2] सोदरीभ्रातृसंयुतः ।
षोडशाब्दात् परं भाग्यं भूमौ स्थापितवित्तवान् ॥ ५६२५ ॥

धनेशांशे तत्त्रिकोणे स्फुटयोगं गते गुरौ ।
लाभेशदृष्टिराशौ तु धनलाभमुदीरयेत् ॥ ५६२६ ॥

[3]धनायकर्मनाथानां स्फुटयोगांशभुक्तिषु ।
तद्दशायां महद्भाग्यं विशेषधनलाभवान्[4] ॥ ५६२७ ॥

विपद्दाये क्षेमदाये त्वसंख्याधनलाभवान्[5] ।
बहुकीर्तिप्रतापौ च त्विष्टसत्कर्मसिद्धितः[6] ॥ ५६२८ ॥

कामिन्यंशे पूर्वभागे [7]त्विदं फलमुदाहृतम् ।
विक्रमे कुजसंयुक्ते वीक्षिते वा प्रजायते ॥ ५६२९ ॥

कामिन्यंशे पूर्वभागे सत्यवादी विचक्षणः ।
भ्रातृभावगताः क्रूराः शौर्यायुर्धनबुद्धिमान् ॥ ५६३० ॥

भ्रातृस्थानाधिपे सूर्ये भावकेन्द्रत्रिकोणगे ।
स्वोच्चग्रहेण संयुक्ते सोदरीभ्रातृसंयुतः ॥ ५६३१ ॥

द्वन्द्वलग्ने नरो जातश्चरराशिगते शनौ ।
त्रिचतुर्बिन्दुसंयुक्ते सोदरोत्तरनाशनम् ॥ ५६३२ ॥

---

1. लाभे शुक्रे प्रजातस्य
2. पितृमातृचिरायुष्यं
3. संज्ञायकर्मनाथानां
4. कृत्
5. धनलाभतः
6. प्रतापं च दृष्ट
7. इदं

भौमेन सूर्यपुत्रेण भ्रातृस्थाननिरीक्षिते ।
सोदरोत्पत्तिनाशं च लभते[1] नात्र संशयः ॥ ५६३३ ॥

ओजराशौ च पुरुषो[2] युग्मे योषिच्च नश्यति ।
भावेशे कारके वापि [3]द्विभार्याफलमादिशेत् ॥ ५६३४ ॥

भौमे तृतीयगे पश्चाद्युग्मांशे स्त्रियमादिशेत्[4] ।
ओजेषुपुरुषः पश्चान्नास्ति तस्यापि जीवितम् ॥ ५६३५ ॥

भ्रातृनाथनवांशेन[5] भातृसंख्यां विनिर्दिशेत् ।
[6]कारकस्य नवांशेन भ्रातृसङ्ख्यां विनिर्दिशेत् ॥ ५६३६ ॥

रविचन्द्रौ यदेकस्थावेकांशकसमन्वितौ ।
द्विमातृभ्यां पोषितोऽपि[7] सपत्नीमातृयोगवान् ॥ ५६३७ ॥

भेदभ्रातृयुतो मानी ऋतुसङ्ख्याः सहोदराः ।
अथ वा ऋषिसङ्ख्याश्च[8] भेदभ्रातृफलं स्मृतम् ॥ ५६३८ ॥

चापाजसिंह[9]राशीषु वर्गोत्तमकुजेसिते ।
बहुवित्ताधिकारी च शौर्यधैर्यपराक्रमी[10] ॥ ५६३९ ॥

स्वनामदेवताभक्त्या स्थिरचित्तः प्रतापवान् ।
मातृस्थानाधिपे सौम्ये लाभस्थानं गते[11] यदि ॥ ५६४० ॥

गुरुशुक्रयुते दृष्टे मातुर्दीर्घायुरादिशेत् ।
कारके स्वोच्चराशिस्थे तदीशे लाभराशिगे ॥ ५६४१ ॥

---

1. नाशं स्याल्लभते
2. पुरुषो ओजराशौ च युग्मे योषी च नाशनम्
3. विभार्या
4. पश्चाद्युग्मेषु
5. भ्रातुर्नाथनवांशस्थे
6. कारके यन्नवांशस्थे सङ्ख्यायां भ्रातृनिश्चयम् ।
7. द्विमातृभिर....सापत्नी
8. सङ्ख्यानिः
9. सिंहराशौ च तस्मिंनशे
10. पराक्रमः
11. गतो

मातृस्थाने राहुयुते मातृसौख्यं विनिर्दिशेत् ।
वाहेशो भाग्यनाथो वा गुरुशुक्रयुतेक्षितौ[1] ।
राजपूज्यो वदान्यश्च सर्वैश्वर्यसमन्वितः ॥ ५६४२ ॥

[2]लग्नेशवाहेशसुतेश्वरा हि
भाग्येऽथ वा कर्मणि संस्थिता वा ।
सद्धर्मवान् वाहनलाभगश्च
शुक्रेण युक्ताश्चतुरङ्गयानम्[3] ॥ ५६४३ ॥

भाग्येश्वरेणापि युते सुतेशे
देवेन्द्रपूज्येन युते [4]च दृष्टे ।
वैशेषिकांशे यदि वा बलाढ्ये
सर्वार्थभाग्यान्वितवाहयुक्तः[5] ॥ ५६४४ ॥

भूसूनुराशौ यदि वा सुतेशे
राज्यार्थसौख्याभरणार्थलाभम् ।
सेनाबहुत्वं समुपैति जातो-
[6]ऽश्वसङ्घयानादियुतः प्रसिद्धः ॥ ५६४५ ॥

मातृस्थाने राहुयुते कारके रविसंयुते ।
तदीशे शनिसंयुक्ते स्वमाता दीर्घजीविनी ॥ ५६४६ ॥

माता गुणवती पूता पतिभक्तिपरायणा ।
कामिन्यंशे पूर्वभागे [7]युग्मलग्नसमुद्भवः ॥ ५६४७ ॥

सुखे राहुसमायुक्ते सुपुत्रः कुलदीपकः ।
ग्रामभूम्यादिलाभं च गृहक्षेत्राभिवृद्धिमान्[8] ॥ ५६४८ ॥

---

1. क्षिते
2. लग्नश्च वाहश्च सुतश्च नाथो
   भाग्यश्च नाथे यदि कर्मणो वा ।
3. युक्ते चतुरन्तयानम्
4. युतेन
5. वाहनः स्यात्
6. असङ्घय
7. मिथुने लग्नजातके
8. कृत्

महाराजप्रसादेन [1]त्विष्टसिद्धिसुखावहा ।
अश्वं चान्दोलिकालाभं छत्रचामरवैभवम् ॥ ५६४९ ॥

सुतेशे [2]शनिसंयुक्ते गजान्तैश्वर्ययोगवान् ।
[3]क्रीडावस्थां गते चन्द्रे रतिक्रीडासुखी भवेत् ॥ ५६५० ॥

दिव्यस्त्रीभोगयुक्तश्च[4] सदा गाम्भीर्यचित्तवान् ।
लिपित्रयप्रवीणश्च कीर्तिमान् बन्धुपोषकः ॥ ५६५१ ॥

चन्द्रलग्नाष्टमाधीशदशायां पापभुक्तिषु ।
अतीव क्लेशकार्याणि [5]मात्ररिष्टं विनिर्दिशेत् ॥ ५६५२ ॥

कर्मेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
कर्मेशदृष्टिराशौ तु मातृनिर्याणमादिशेत् ॥ ५६५३ ॥

क्षेमतारदशाकाले लाभाधिपतिभुक्तिषु ।
गोचरे वृश्चिके मन्दे तुलादिद्वयमासगे ॥ ५६५४ ॥

अथ वा मीनभासे च [6]मातरिष्टं विनिर्दिशेत् ।
पुत्रस्थानगते [7]शुके परिपूर्णबलान्विते ॥ ५६५५ ॥

दृष्टे देवेन्द्रगुरुणा पुत्रप्राप्तिर्न संशयः ।
[8]अन्नदानपरो नित्यं पञ्चमे शुभसंयुते ॥ ५६५६ ॥

तदीशे गोपुरांशस्थे तीव्रबुद्धिः प्रतापवान् ।
[9]राजमन्त्री भवेज्जातो वाक्पतौ बलसंयुते ॥ ५६५७ ॥

लाभे मन्दे युग्मलग्ने द्विकलत्रः सुपुत्रवान् ।
[10]पुत्रिके द्वे चिरायुष्यौ चत्वारः सूनवः स्मृताः ॥ ५६५८ ॥

---

1. इष्टसिद्धिसुखावहम् 2. शुक्र
3. क्रीडा...वस्थगे 4. भोगमित्याहुः
5. मातारिष्टं 6. मात्रारिष्टं
7. जीवे परिपूर्णबलान्वितः 8. अन्नपानपरो
9. राजा 10. पुत्रिकाद्वयमायुष्यं पुत्रयोगं चतुष्टयम् ।

कामिन्यंशे पूर्वभागे गुरौ पारावतांशगे[1] ।
हंसयोगे सुते जीवे स्वदशायां महत् सुखम् ॥ ५६५९ ॥

भाग्याधिपान्तरे काले योगं प्राप्नोति भूरिशः ।
नवमन्दिरनिर्माता ग्रामभूम्यादिलाभवान्[2] ।
नरवाहनभूषाप्ति[3] स्त्रीप्रजालाभमादिशेत् ॥ ५६६० ॥

—: * :—

## ॥ योगसारावली ॥

[4]भाग्याधिपे लाभगते बलाढ्ये
कर्माधिपे राज्यगृहस्थिते[5] चेत् ।
राज[6]प्रसादाच्च सुवाहनाप्ति-
र्गजान्तलक्ष्मीकरयोगवान् स्यात् ॥ ५६६१ ॥

मण्डलेश्वरसन्मानं गजवाजिधनागमम् ।
हेमाम्बरसुभूषाप्तिं बहुवाहनसंयुतः[7] ॥ ५६६२ ॥

गुरुसंयुतराशीशे[8] गुरोः केन्द्रत्रिकोणगे ।
एकद्वित्रिफलैर्युक्तो गार्हस्थ्यधनलाभवान् ॥ ५६६३ ॥

गुरोः केन्द्रगते शुक्रे लग्नाल्लाभत्रिकोणगे ।
अन्योन्ययुतदृष्टौ च राजा वा तत्समोऽपि वा[9] ॥ ५६६४ ॥

पूर्वादिषु चतुर्दिक्षु यदृक्षं तु फलाधिकम्[10] ।
तदृक्षे फललाभादि वाहनाम्बरभूषणम् ॥ ५६६५ ॥

---

1. पादांशनाडिगे
2. निर्माणग्रामभूम्यादिलाभकृत्
3. भूषाप्तिः
4. रज्याधिपे
5. स्थितश्चेत्
6. प्रसादद्वि
7. भूषाप्तिर्बहुवाहनचिन्तयेत्
8. राशीशः
9. युतदृष्टश्चे राजा
10. फलाधिके

मन्दिरं तत्र कर्तव्यमन्यक्षेत्रे विनश्यति ।
गुरोस्तु पञ्चमस्थाने[1] यावद्बिन्दुसमन्विते ॥ ५६६६ ॥

तावत् पुत्रादिलाभश्च[2] पापदृष्टे मृतिर्भवेत् ।
पुत्रेशो यन्नवांशस्थे कारके[3] यन्नवांशके ॥ ५६६७ ॥

पुत्रसंख्या विनिर्दिष्टा भावकारकनायकैः ।
सप्तसंख्यासुतप्राप्तिरथवा वसुसंख्यकाः[4] ॥ ५६६८ ॥

आहत्य नवसंख्याकाः[5] पुत्रभावफलं स्मृतम् ।
असितेन युते दृष्टे पुत्रारिष्टं विनिर्दिशेत् ॥ ५६६९ ॥

पुंप्रजाः पञ्चसंख्याश्च स्त्रीप्रजास्तिस्र एव च[6] ।
सुतेशांशे तत्त्रिकोणे कारकांशत्रिकोणगे ॥ ५६७० ॥

स्फुटयोगं गते जीवे पुत्रलाभं विनिर्दिशेत् ।
रोगस्थानाधिपे भौमे भाव[7]केन्द्रत्रिकोणगे ॥ ५६७१ ॥

मित्रक्षेत्रे शुभांशस्थे [8]ह्यरोगदृढगात्रवान् ।
सिंहराशिगते भौमे चापांशे शुभसंयुते ॥ ५६७२ ॥

लग्नात् तृतीयगे वापि कार्यसाधक[9]धैर्यवान् ।
षष्ठाष्टमव्ययेशाना मंशनाथाः शुभा यदि[10] ॥ ५६७३ ॥

सिंहलग्ने पलायन्ते शत्रवो द्विरदा इव ।
षष्ठस्थानाधिपे भौमे लग्नाद्विक्रमसंस्थिते ॥ ५६७४ ॥

षष्ठीशेन युते दृष्टे शत्रुहन्ता प्रतापवान् ।
कुजेन मेहरोगश्च रविणाग्रन्थिरामयः[11] ॥ ५६७५ ॥

---

1. गुरोस्थितसुतस्थाने
2. लाभं स्यात्
3. नरके
4. संख्यया
5. संख्यानि
6. संख्यानि स्त्रीप्रजात्रयमेवच
7. भावे
8. अरोग
9. साहसे
10. अंशनाथशुभायदि
11. मेहरोगेण रविणा ग्रन्थिरोगकृत्

चन्द्रेण वातरोगश्च रोगचिन्तादिकं वदेत्[1] ।
षष्ठेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥ ५६७६ ॥

अतीव क्लेशकार्याणि देहजाड्यं महद्भयम् ।
षष्ठे रन्ध्राधिपे सौम्ये चापांशे कुजसंयुते ।

कुजक्षेत्रगते वापि तद्भुक्तौ रोगसंभवः[2] ॥ ५६७७ ॥
दारेशे सुतराशिगे बलयुते तद्राशिनाथेक्षिते[3]
भौमक्षेत्रगतेन्दुजे भृगुयुते भार्याधिपेनेक्षिते[4] ।
दीर्घायुर्धनवान् द्विदारसहितो ग्रामाधिपः पण्डित

स्त्यागी योगसमन्वितो दिवि भुवि ह्यास्थानकोलाहलः[5] ५६७८ ॥
एतद्योगवशात् सौख्यमाजन्म सुखभाग्यवान् ।

बहुदारयुतः श्रीमानन्यस्त्रीसक्तचित्तवान् ॥ ५६७९ ॥
दारद्वययुतो मानी दारतुल्ये तथा स्मृते[6] ।

तन्मूलाद्भाग्यसंपत्तिस्तत्पुत्रः प्रबलो[7] भवेत् ॥ ५६८० ॥
अन्यस्त्रीगुणसंयुक्ता पतिभक्तिपरायणा[8] ।

सात्त्विकी बुद्धिसंयुक्ता बहुभाग्यसमन्विता[9] ॥ ५६८१ ॥
आचारशीला विदुषी भर्तृप्रीतिकरा शुभा[10] ।

पुत्रीपुत्रसमायुक्ता[11] दारतुल्य फलं स्मृतम् ॥ ५६८२ ॥

दारेशे पञ्चमस्थाने तदीशे लाभसंयुते ।
दाराधिपेन संदृष्टे कलत्रद्वययोगवान् ॥ ५६८३ ॥

---

1. वातरोगेण रोगचिन्ताधिकं भवेत्
2. संभवम्
3. क्षेत्र.......
4. भौमक्षेत्रपतेन्दुजे भृगुयुते भार्याधिपे संयुते
5. यदि भुवि आस्थानकोलाहलः
6. दारतुल्ये तथा भवेत्
7. प्रबलं
8. गुणशाली वा पतिभक्तिपरायणी
9. संयुक्तो बहुभाग्यसमन्वितः
10. आचारशीलवाग्मी च भर्तृप्रीतिकरश्शुभः
11. समायुक्तो

शुक्रे शनियुते जातो [1]दारतुल्याङ्गनाद्वयम् ।
कलत्रेशे सुतस्थाने सुतेशे शनिसंयुते ॥ ५६८४ ॥

नीचग्रहयुते दृष्टे ज्येष्ठभार्या ह्यपुत्रिणी[2] ।
कोपिनी मूर्खशीला च जातकस्य विरोधनी[3] ॥ ५६८५ ॥

पुरापातकदोषेण ज्येष्ठभार्या [4]मृताभवेत् ।
मन्दे नीचांशसंयुक्ते पत्न्यादुर्मरणं भवेत्[5] ॥ ५६८६ ॥

कूपाश्च मरणं चैति ह्यथ वा विषभक्षणात्[6] ।
राहुदाये मन्दभुक्तौ द्वाविंशाब्दात् परं मृतिः ॥ ५६८७ ॥

दारतुल्यसुखं चैव भाग्यवृद्धिर्महत् सुखम् ।
कारकेवलसंयुक्ते ह्यन्यस्त्रीसङ्गलोलुपः[7] ॥ ५६८८ ॥

वेदसंख्या कलत्रस्य ह्यथ वा सप्तसंख्यकाः[8] ।
दारस्थानाधिपे जीवे युग्मांशे चरराशिगे ॥ ५६८९ ॥

दारद्वयं स्वजातौ च[9] कारकेण युतेक्षिते ।
अन्यजातौ कलत्रस्य[10] दारद्वयफलं स्मृतम् ॥ ५६९० ॥

बुधेन वैश्यजातिश्च वेश्यास्त्री भृगुनन्दने ।
शनिना दुष्टजातिश्च दारतुल्य[11]फलं स्मृतम् ॥ ५६९१ ॥

सुखे राहुसमायुक्ते म्लेच्छस्त्रीसङ्गचित्तवान् ।
कर्माधिपेन संदृष्टे महात्मा स्वान्तशुद्धिमान्[12] ॥ ५६९२ ॥

---

1. दारः तुल्यफलद्वयम्
2. अपुत्रिणी
3. मूर्खप्रकृतकोपी च जातकस्य विरोधकृत्
4. मृतिप्रदः
5. दुर्मरणे दारनाशनम्
6. कूपेन मरणं कृत्वा अथवा विषभक्षणम्
7. अन्यस्त्रीसञ्चारवान्
8. संख्यया
9. स्वजातिश्च
10. अन्यजाति
11. दारसौख्यफलं
12. अन्तरशुद्धिमहात्मवान्

कलत्रेशे [1]पूर्णबले तुङ्गवक्रादिहेतुभिः ॥ ५६९३ ॥

बहुभाग्यसमायुक्तो राजयोगसमुद्भवः[2] ।
राहुदाये राहुभुक्तौ विवाहोत्सवसंभ्रमम् ॥ ५६९४ ॥

अष्टादशात् परे[3] वर्षे मेषे मिथुनसिंहयोः ।
तस्मिन् काले विवाहः स्याद्युग्मलग्नोद्भवस्य च[4] ॥ ५६९५ ॥

द्वितीयभार्याभवनं नवमं च प्रकीर्तितम् ।
तदीशेऽशुभसंयुक्ते द्विभार्यालाभमादिशेत् ॥ ५६९६ ॥

स्वजन्मदेशे भवनं पञ्चविंशात् परं शुभम् ।
स्वभार्या रक्तवर्णा च मूर्खप्रकृतिशालिनी ॥ ५६९७ ॥

भर्तृप्रीतिकरा[5] स्वल्पं पुत्रीपुत्रसमन्विता ।
पुत्रद्वययुता चैव पुत्रिकाद्वयसंयुता[6] ॥ ५६९८ ॥

स्त्रीप्रजा नाशमाप्नोति युग्मलग्नोद्भवस्य च[7] ।
[8]दारतुल्यञ्जनायाश्च वेदसङ्ख्यासुतोत्सवम् ॥ ५६९९ ॥

स्त्रीप्रजा नाशमाप्नोति पुम्प्रजादीर्घमायुषम् ।
[9]गुणशीला भाग्यवती भयभक्तिसमन्विता ॥ ५७०० ॥

द्वितीयदारतुल्या च पुत्रीपुत्रयुता भवेत्[10] ।
पुत्रिकाद्वयलाभश्च ह्येकः पुत्रश्चिरायुषः[11] ॥ ५७०१ ॥

वाचालश्च चमत्कारयुक्तिसाहसबुद्धिमान् ।
महाभाग्यवती चैव दारतुल्यफलं स्मृतम् ॥ ५७०२ ॥

---

1. बहुगुणे
2. नरं विन्द्याद्राजयोगस्य जातके
3. परं
4. विवाहं स्याद्युग्मलग्नस्य जातके
5. प्रीतिकरं
6. युतश्चैव पुत्रिका च तथा भवेत्
7. युग्मलग्नस्य जातके
8. प्रथमं दारतुल्यं स्याद्
9. गुणशाली
10. तुल्यस्यात् पुत्रपुत्रीयुतो भवेत्
11. लाभं च एकःपुत्रश्चिरायुषम्

दारारिष्टदशाकाले फलमेवमुदाहृतम् ।
जीवदाये चन्द्रभुक्तौ दारारिष्टं महद्भयम् ॥ ५७०३ ॥

देहजाड्यं [1]च लभते तत्काले शान्तिमाचरेत् ।
जीवदाये राहुभुक्तौ स्वभार्या [2]रोगिणी भवेत् ॥ ५७०४ ॥

जातकस्य महत् कष्टं देहजाड्यं भविष्यति ।
तद्दोषपरिहारार्थं राहुप्रार्थनमाचरेत् ॥ ५७०५ ॥

मन्ददाये मन्दभुक्तौ दारतुल्यविनाशनम् ।
स्त्रीप्रजा नाशमाप्नोति जातकस्य महद्भयम् ॥ ५७०६ ॥

भावत्रिकोणगे मन्दे भावादष्टत्रिकोणगे ।
स्फुटयोगं गते सौरौ[3] भावहानिर्न संशयः ॥ ५७०७ ॥

विलग्नाष्टमकर्मेशाः केन्द्रलाभत्रिकोणगाः ।
शनिश्च बलवान् यस्य[4] पूर्णमायुर्विनिर्दिशेत् ॥ ५७०८ ॥

रन्ध्रेशो लाभराशिस्थे लाभेशे विक्रमस्थिते ।
शुभग्रहयुते दृष्टे यावज्जीवान्तसौख्यवान् ॥ ५७०९ ॥

अष्टमाधिपतौ लाभे बुधशुक्रसमन्विते ।
कर्माधिपेन संदृष्टे जीवनं सुकरं भवेत् ॥ ५७१० ॥

भाग्यरन्ध्राधिपे मन्दे लाभस्थानगते यदि ।
शुभग्रहयुते दृष्टे सर्वसौख्ययुतो [5]भवेत् ॥ ५७११ ॥

रन्ध्रेशो नीचराशिस्थे तदीशे चन्द्रकेन्द्रगे ।
वर्गोत्तमांशगे मन्दे यावज्जीवं सुभोगवान्[6] ॥ ५७१२ ॥

नीचभङ्गे राजयोगे चक्रवर्तिसमो भवेत् ।
पञ्चविंशात् परं भाग्यं धनिकः कीर्तिमान् सुखी ॥ ५७१३ ॥

---

1. प्रकुर्वीत
2. स्वदारे देहरोगकृत्
3. सौरि
4. बलवन्तश्च
5. प्रदो
6. जन्मदायुषभोग

रन्ध्रेशभाग्येशसुतेशनाथा[1]
लग्नेशयुक्ता यदि लाभसंस्थाः[2] ।
[3]पुत्रस्थकर्माधिपवीक्षिता हि
साम्राज्ययोगं मुनयो वदन्ति ॥ ५७१४ ॥

योगे साम्राज्यके[4] जातः षोडशाब्दात् परं सुखम् ।
अतीव प्रियवान् योगी योगं षोडशवत्सरम्[5] ॥ ५७१५ ॥

तदन्ते चापमृत्युं च[6] समरे देहतापवान् ।
शुभग्रहयुते मन्दे [7]ह्यतीव श्रियमश्नुते ॥ ५७१६ ॥

जन्मदाये महत् सौख्यं पितृमातृसुखावहम् ।
विद्याबुद्धिसुकीर्तिश्च[8] धनधान्यविवर्धनम् ॥ ५७१७ ॥

सम्पद्दाये श्रियोऽवाप्तिं गृहे लक्ष्मीकटाक्षजाम्[9] ।
जातकस्तु[10] महत् सौख्यं वस्त्रवाहनभूषणम् ॥

विद्याबुद्धिसुकीर्तिश्च[11] स्वपित्रादि महत् सुखम् ।
विपत्तारदशाकाले [12]ह्यतीव श्रियमश्नुते ॥ ५७१८ ॥

राजद्वारे प्रसिद्धिं च[13] मित्रप्रभुवशात् सुखम् ।
दिने दिने वृद्धिमेति सितपक्षे शशी यथा ॥ ५७१९ ॥

सर्वाध्यक्षः स्वतन्त्रश्च प्रबलो राजकर्मणि ।
मान्दिग्रहयुतो राहुक्रूरभुक्तौ महद्भयम् ॥ ५७२० ॥

राहुदाये राहुभुक्तौ गोचरे वृश्चिके शनौ ।
तद्भुक्तौ सौख्यमाप्नोति विवाहोत्सवसंभ्रमम् ॥ ५७२१ ॥

---

1. नाथे
2. युक्ते यदि लाभसंस्थः
3. कर्माधिपे वीक्षितपञ्चमस्थे
4. साम्राज्यगे
5. वत्सरे
6. मृत्युश्च
7. अतीव
8. कीर्तिश्च
9. श्रियावाप्तिर्गृहे लक्ष्मीकटाक्षकृत्
10. जातकस्य
11. कीर्तिं च
12. अतीव
13. प्रसिद्धिश्च

पश्चिमोत्तरभागे च[1] प्रयाणं राजदर्शनम् ।
नूतनोद्योगलाभं च धनलाभं विशेषतः ॥ ५७२२ ॥

राहुदाये जीवभुक्तौ गोचरे चापगे शनौ ।
तद्भुक्तौ सौख्यमाप्नोति मित्रप्रभुवशात् सुखम् ॥ ५७२३ ॥

ब्राह्मणप्रभुमूलेन चोद्योगं प्रबलं तथा ।
राजद्वारे सुकीर्तिं च ह्यन्यस्त्री[2]भोगमिच्छति ॥ ५७२४ ॥

बहुकीर्तिप्रतापौ[3] च धनलाभं विशेषतः ।
सत्कर्मधर्मसिद्धिं च जीवभुक्तौ न संशयः ॥ ५७२५ ॥

विपत्तारदशाकाले रन्ध्राधिपतिभुक्तिषु ।
गोचरे मकरे मन्दे [4]त्वेकविंशात् परं व्यथाम् ॥ ५७२६ ॥

घातपातभयं चैव शत्रुचोराग्निजं भयम्[5] ।
अन्यप्रभुविरोधं च राजद्वारे कलापनम्[6] ॥ ५७२७ ॥

आत्मबन्धुजनारिष्टं यातायातभयं तथा ।
शुभग्रहयुते मन्दे शत्रुनाशं जयं तथा ।
मित्रप्रभुवशात् सौख्यं यत्नकार्यार्थसिद्धिदम्[7] ॥ ५७२८ ॥

—: * :—

1. तद्भागे
2. सुकीर्तिं अन्यस्त्री
3. प्रतापं
4. एकविंशात् परं व्यथा
5. भीतिकृत्
6. कृत्
7. सिद्धिदः

## ॥ अनुबन्धः ॥

# APPENDIX

खपञ्चेन्दुमिता नाड्यश्चरमे व्यत्यये स्थिरे ।
षट्सप्ततिं समारभ्य द्विस्वभावेषु राशिषु ॥ ५७२९ ॥

1. वसुधा 2. वैष्णवी 3. ब्राह्मी 4. कालकूटा 5. शङ्करी 6. सुधाकरसमा 7. सौम्या 8. सुरा 9. माया 10. मनोहरा 11. माध्वी 12. मञ्जुस्वना 13. घोरा 14. कुम्भिनी 15. कुटिला 16. प्रभा 17. परा 18. पयस्विनी 19. माला 20. जगती 21. जर्झरी 22. ध्रुवा 23. मुसला 24. मुद्गला 25. पाशा 26. चम्पका 27. दामिनी 28. मही 29. कलुषा 30. कमला 31. कान्ता 32. काला 33. करिकरा 34. क्षमा 35. दुर्धरा 36. दुर्भगा 37. विश्वा 38. विशीर्णा 39. विह्वला 40. अनिला 41. भीमा 42. सुखप्रदा 43. स्निग्धा 44. सोदरा 45. सुरसुन्दरी 46. अमृतप्राशिनी 47. काला 48. कामदकरवीरणी 49. गह्वरा 50. कुण्डिनी 51. कान्ता 52. विषाख्या 53. विषनाशिनी 54. निर्मदा 55. शीतला 56. निम्ना 57. प्रीता 58. प्रियविवर्धनी 59. मानघा 60. दुर्भगा 61. चित्रा 62. विचित्रा 63. शिरजीविनी 64. भूपा 65. गदाहरा 66. नाळा 67. गाळवी 68. निर्मला 69. नदी 70. सुधा 71. अमृतांशुगा 72. काळी 73. कालिका 74. कलुषाङ्कुरा 75. त्रैलोक्यमोहनकरी 76. महामाया 77. सुशीतळा 78. सुखदा 79. सुप्रभा 80. शोभा 81. शोभना 82. शिवदा 83. शिवा 84. बला 85. ज्वाला 86. गदा 87. गाढा 88. सूतना 89. सुमनोहरा 90. सोमवल्ली 91. सोमलता 92. मङ्गळा 93. मुद्रिका 94. सुधा 95. मेळा 96. अपवर्गा 97. पश्यता 98. नवनीता 99. निशाचरी 100. निवृतिः 101. निर्गता 102. सारा 103. समगा 104. समदा 105. समा 106. विश्वम्भरा 107. कुमारी 108. कोकिला 109. कुञ्जराकृतिः 110. इन्द्रा 111. स्वाहा 112. स्वधा 113. वह्निः 114. पीता 115. यक्षा 116. अचलप्रभा 117. सारिणी 118. मधुरा 119. मैत्री 120. हरिणी 121. हारिणी 122. मरुता

123. धनञ्जया 124. धनकरी 125. धनदा 126. कच्छपा 127. अम्बुजा 128. ईशानी 129. शूलिनी 130. रौद्री 131. शिवाशिवकरी 132. कला 133. कुन्दा 134. मुकुन्दा 135. परता 136. कदली 137. स्मरा 138. बसिता 139. कोदळा 140. कोकिलांशा 141. कामिनी 142. कलशोद्भवा 143. वीरप्रसूः 144. सङ्गरा 145. शतयज्ञा 146. शतावरी 147. स्रग्वी 148. पाटलिनी 149. नागपङ्कजा 150. परमेश्वरी

एता नाड्यः समाख्याताः प्रोक्ता या ब्रह्मणे पुरा ।
नाडीफलमविज्ञाय न शक्यो लग्ननिर्णयः ॥ ५७३० ॥

अज्ञाते च पुनर्लग्ने मृषा [1]वाङ्न फलप्रदा ।
तस्मान्नाड्या परीक्षेत कुर्याज्जातकनिर्णयम्[2] ॥ ५७३१ ॥

राजयोगो भाग्ययोगः[3] परजातकलक्षणम् ।
अङ्गभङ्गादि[4]योगाश्च विपरीतजनिस्तथा ॥ ५७३२ ॥

दरिद्रजातकश्चैव कर्मजीवनमेव च[5] ।
लोकयात्रापरिज्ञानं दशानां निर्णयं तथा ॥ ५७३३ ॥

अन्तर्दशाविचारश्च दशारिष्टफलं तथा ।
दशारिष्टप्रशमनं वृत्तिलक्षणमेव च ॥ ५७३४ ॥

तथा लोकान्तरप्राप्तिरुच्यतेऽसद्गुरोर्मते ।
आयुर्दायपरिज्ञानमपमृत्योश्च लक्षणम् ॥ ५७३५ ॥

परिव्राजकयोगश्च पदभ्रंशकरस्तथा ।
[6]द्विजन्मकुलयोगश्च पुत्राणां जननं तथा ॥ ५७३६ ॥

---

1. वाग्देवधर्मभवेत् 2. नाडीं परिक्षेत कुर्याज्जातकलक्षणम्
3. राजयोगं भाग्ययोगं 4. योगैश्च विपरीतजनस्तथा
5. दारिद्रजातकश्चैव कर्मजीवमतः परम् ।
6. बिजन्मकुलयोगश्च पुत्रबजननं तथा ।

देवतोपासनाक्त्वमुपास्या[1] देवतास्तथा ।
पित्रोर्मरणकालं च परित्यक्तजनस्तथा[2] ॥ ५७३७ ॥

पितृकर्मकरत्वं च प्रोच्यते भार्गवे मते ।
स्वदेशकालभेदेन स्वदेशनृपलक्षणम् ॥ ५७३८ ॥

राष्ट्रसौख्यं च भङ्गं च दुर्भिक्षं च सुभिक्षकम् ।
महावातविधानं च प्रोक्तं साम्बशिवे मते ॥ ५७३९ ॥

—※—

## ॥ ग्रहाणां स्वरूपकथनम् ॥

चतुरश्रो नृपो भानुर्द्युमणिश्च दिवाकरः[3] ॥ ५७४० ॥

[4]वह्निस्त्वर्कश्च उग्रस्तु जगदानन्दकारकः ।
[5]पीतः पशुः स्वर्णवर्णश्चतुष्पात् पूर्वदिक्पतिः ॥ ५७४१ ॥

निशाबलशशी गौरो युवा [6]वायव्यदिक्पतिः ।
क्षारः शुभस्तपस्वी च श्लेष्मलो जलरूपधृक्[7] ।
[8]क्षयवृद्धितनुः प्राज्ञो मृदुवाक् चारुलोचनः ॥ ५७४२ ॥

[9]भौमो वह्न्याकृतिस्तीक्ष्णो कोणो दक्षिणदिक्पतिः ।
नरो युवा चतुष्कोणः क्षत्रियः कनकः परः ॥ ५७४३ ॥

[10]वक्रश्च रक्तरूपी च क्रूरनेत्रः कृशोदरः ।
बुधो ग्राम्यशुभो [11]नित्यं धीरो धातुत्रयात्मकः ॥ ५७४४ ॥

---

1. उपासनार्थं च
2. जनं
3. चतुरश्र नृपो भानुर्द्युमध्यं च दिके स्थितः ।
4. वन्यादिस्त्वर्ध उग्रश्च जगदाश्रय उग्रधीः ।
5. पित्तः पशुः स्वर्गवर्णश्चतुष्पात् सूर्यदिक्पतिः
6. वासी न
7. शुभतपस्वी च परार्ह श्लेष्मलो जलम्
8. यश्च कृशतनुः
9. भौमे वन्याकृतो उग्रो मध्यालो दक्षिणाधिपः ।
10. व्यग्रो वरधावनीरक्तः
11. नीलं श्वद्धो

[1]प्राज्ञः श्यामोत्तरस्येशः सङ्गी सर्वरसप्रियः ।
[2]तारापुत्रोऽतिमेधावी धीरोहास्यरसप्रियः ॥ ५७४५ ॥

[3]विप्रो जितेन्द्रियः प्रीतो यागकृच्चसुरालये ।
[4]कफप्रधानो मधुरो भावज्ञश्च सुधार्मिकः ॥ ५७४६ ॥

[5]स्वर्णाधिपो मध्यवयाः वैदिकश्चेशदिग्पतिः ।
शुक्रः शुभो [6]जलमयो राजसो सरसप्रियः ॥ ५७४७ ॥

योषिन्मध्यवयो विप्रः [7]श्यामवर्णोऽग्निदिक्पतिः ।
[8]गीतप्रियः स्निग्धतनुर्द्वीपवासी सुलोचनः ॥ ५७४८ ॥

शनिः शूद्राङ्गनासक्तः [9]पश्चिमाशापतिस्तथा ।
क्रूरव्रती पङ्गुपादो वृद्धो स्थूलतनुस्तथा[10] ।
राहुः शीर्षाधिभुजगः शनिवद्न्नीचरः[11] ॥ ५७४९ ॥

शिखी भौमसमश्लेष्मा चित्रवर्णस्तु चञ्चलः[12] ।
त्रिंशद्भागात्मकं लग्नं होरा तस्यार्धमुच्यते ॥ ५७५० ॥

राशित्रिभागो द्रेक्काणं नवांशो नवमांशकः ।
द्वादशांशो द्वादशांशस्त्रिंशांशस्त्रिंशदंशकः ॥ ५७५१ ॥

चरे स्वपुत्रनवपाः स्थिरे धर्मस्वपुत्रपाः ।
पुत्रधर्म[13]स्वपाज्ञेया द्रेक्काणं विन्यसेत् क्रमात् ॥ ५७५२ ॥

---

1. प्रभाते चोत्तरस्येशः खङ्गः
2. श्मशानास्थ्यष्टवान् प्रांशुः पापो हास्यरसप्रियः ।
3. विप्रो जितं शुभः प्रीतो याचदीश्च सुरालयम् ।
4. षाद्विपाभ्यामिमधुरी मावविवत्तसुधार्मिकः ॥
5. स तु धातुर्मध्यवयाः प्रभातं चेष्टचेष्टितः ।
6. जलं रूपं
7. पराह्नामूलमग्निदिक्
8. जलावनिः स्निग्दरुचिः द्विपात् कान्तमुलोचनः ।
9. पश्यं सन्ध्याखगस्थितः
10. चित्तपरो वृद्धोऽस्थूलपरो नलः
11. शनिवह्निजवीशरः
12. बहुरूपोऽतिचचलः
13. नृपा

मेषसिंहधनुषी [1]स्वजादयः मृगवृषकन्यामकरादयः ।
तौलिकुम्भमिथुने तुलादयः
कर्किकीट[2]मीने कटकादयः ॥ ५७५३ ॥

[3]केन्द्राणि लग्नदशसप्तचतुर्थभानि
तस्मात् परं पणपरं च वदन्ति तज्ज्ञाः ।
आपोक्लिमं च परतो यदि तत्र भावाः
कष्टा वदन्तिरिपुरन्ध्रव्ययस्तृतीयाः ॥ ५७५४ ॥

इन्दुस्थमेव शशिलग्नमिति प्रसिद्धं
लग्नादियद्गृहगतस्तनुपश्च तावत् ।
[4]आरूढचन्द्रतनुपा यदि लग्नमेव
पश्यन्ति पापरहिताः स तु दीर्घजीवी ॥ ५७५५ ॥

भावलग्नम्—

वारपस्यांशमारभ्य घटिकानां तु पञ्चकम् ।
प्रयाति लग्नपर्यन्तं भावलग्नमुदाहृतम् ॥ ५७५६ ॥

चन्द्रायुर्लग्नम्—

चन्द्रांशकं समारभ्य घटिकाभिस्तु पञ्चकम् ।
उदयादिविनाडीभिरायुर्लग्नं प्रकल्पयेत् ॥ ५७५७ ॥

होरालग्ननिर्णयः—

होरालग्नं [5]समाख्यातं सार्धद्विघटिकात्मकम् ।
[6]दिवारात्रिप्रमाणेन क्रियते लग्ननिर्णयः ॥ ५७५८ ॥

---

1. स्वजादयः वृषकन्या
2. वृश्चिकमीने
3. लग्नं केन्द्रं द्वितीयं पणपरं तृतीयमापोक्लिमम् ।
चतुर्थं केन्द्रं जातस्य जन्मसमयोदयं विलग्नम् ॥
4. आरूढमस्तुतनुयो
5. तदा सार्धं द्विघटिकामितान् कालान्
6. विलग्नभाक् प्रयाति लग्नं तन्नाम होरलग्नमिहोच्यते ।

दिवामानं च रात्रिमानं च ज्ञात्वा प्रत्येकं प्रत्येकं द्वादशधा विभज्य ओजयुग्मानुसारेण जन्मलग्ने [1]सिद्धे ओजक्रमेण ओजे युग्मे व्युत्क्रमेण इष्टजन्मकालघटितांशेन यल्लग्नं भवति [2]तत् होरालग्नं भवति ॥ ५७५९ ॥

घटिकालग्नम्—

सूर्योदयं समारभ्य चैकैकघटिकाक्रमात् ।
प्रयाति लग्नपर्यन्तं नाडीलग्नमुदाहृतम् ॥ ५७६० ॥

विलग्नघटिकालग्नं [3]होरालग्नं तथैव च ।
उच्चग्रहे[4] राजयोगो लग्नद्वयमथापि वा ॥ ५७६१ ॥

दशारम्भलग्नम्—

अथ चन्द्रेण ऐश्वर्ययोगप्रकारस्तु—
चन्द्रनक्षत्रपतयस्तुङ्गराशिमुपाश्रिताः ।
नीचराशिगता वापि प्रदिशन्ति श्रियं[5] नृणाम् ॥ ५७६२ ॥

लग्नान्नेयाः पञ्च पञ्च घटिकाः स्थिरकादितः ।
नक्षत्राधिपतौ केतौ कल्पयेल्लग्नव्युत्क्रमात्[6] ॥ ५७६३ ॥

केतुव्यतिरिक्तनक्षत्राधिपतिषु[7] क्रमेण गणयेत् केतौ व्युत्क्रमेण गणयेत् । प्रथमनक्षत्राधिपतेः स्वराश्युच्चनीचचरराशिस्थिति[8] यदि भवति तदा ऐश्वर्ययोगो द्रष्टव्यः ॥ ५७६४ ॥

घोरांशको राक्षसदेवभागौ[9]
कुबेररक्षोगणकिन्नरांशाः ।

---

1. ओजक्रमेण युग्मे
2. तदा
3. होरालग्नानि पश्यति
4. ग्रहो
5. प्रदिशन्ति
6. लग्नमुत्क्रमात्
7. नक्षत्राधिपतेः
8. राशिपान्
9. देवभागा

भ्रष्टः कुलघ्नो गरलाग्निसंघौ[1]
मायांशकः प्रेतपुरीशभागः[2] ॥ ५७६५ ॥

[3]अपां पतिर्देवगणेशभागौ
लोकाहिभागावमृतांशुचन्द्रौ[4] ।
मृद्वंशकः कोमलपद्मनाभौ
लक्ष्मीशवागीशदिगम्बरांशाः ॥ ५७६६ ॥

देवार्धभागो[5] कविनाधभागो
क्षितीश्वरांशः कमलाकरांशः ।
क्रमेण मन्दात्मजमृत्युकाला
दावाग्निघोरौ[6] यमकण्टकांशः ॥ ५७६७ ॥

सुधामृतांशौ परिपूर्णचन्द्रो[7]
द्विषः प्रदिग्धाकुलनाशमुख्याः ।
वंशक्षयोत्पातककालरूपा
सौम्यांशमृद्वंशसुशीतळांशाः ॥ ५७६८ ॥

दंष्ट्राकराळेन्दुमुखीपुरीश्री-
कालाग्निदण्डायुधनिर्मलांशाः ।
शुभाशुभांशावतिशीतलांशो[8]
सुधापयोधिभ्रमणेन्दुराकाः ॥ ५७६९ ॥

ज्ञेयाः क्रमाद्व्यत्ययमेव युग्मे
शुभान्वितांशा[9] यदि शोभनाप्तिः ॥ ५७७० ॥

क्रूराः षष्ट्यंशगाः सर्वे नाशयन्तीह खेचराः[10] ।
यदि पूर्णबलैर्युक्ताः स्वोच्चमूलत्रिकोणगाः ॥ ५७७१ ॥

---

1. संघो
2. भागाः
3. आसां पतिर्देवगणेशभागा
4. भागानमृतांशुचन्द्रो
5. भागा
6. घोरा
7. चन्द्रे
8. अतिशीतलांशौ
9. शुभान्वितांशौ
10. नाशयन्ति खचारिणः

ज्ञात्वा योगं च नाडीं [1]गृहपतिपदवीं प्रापयित्वा तदंशं
नीत्वा [2]सम्यग्विशेषं बलमपि च गुणं वीक्ष्य भावान्तरङ्गम् ।
चक्रं ज्ञात्वा दशां च प्रति फलविषयां प्राकृतां[3] चापि वीक्ष्य
ब्रूयाच्चेष्टामवस्थां निजनिचयफलं चिन्तनीयं वचोभिः ॥ ५७७२ ॥

कालज्ञानं विना लोके यो नरः फलबोधकः ।
तत्फलं व्यर्थमाप्नोति तैलहीनप्रदीपवत् ॥ ५७७३ ॥

काशब्देन तु कारणं त्रिजगतां पश्चाललयं चेत्यतः
[4]मालाभिर्गदितं हितत्रयमयं ब्रह्मैव कालात्मकम् ।
तज्ज्ञानं कमलोद्भवाद्यमुदितं पुण्यैकलब्धं सतां
यस्तद्वेत्ति स तत्त्वविद् स च मुनिर्ब्रह्माह्वयः कालवित् ॥ ५७७४ ॥

सूचिस्तीक्ष्णमुखाम्बुजद्वयदलैर्वेधस्फुटस्तं च तां
विज्ञेयं लवमात्रतत्रदशगं प्रोक्तं निमेषात्मकम् ।
तत्सप्ताद्विदशावधिर्निगदितो गुर्वक्षरोच्चारकृत्
प्राणस्य दशदः षडस्य विनुता लोको विनाडी इति ॥ ५७७५ ॥

—✱—

1. परिजन
2. सम्यग्वियोल दिशति रमर्ति
3. पुरुषमपि प्राकृतं भेदमीक्ष्य
4. ते मात्रान्मुदितं हितत्रि

## अंशकविवरणम् ॥

—*—

तुलालग्ने विकृतांशः ।

सिंहलग्ने किन्नरांशः ।

वृश्चिकलग्ने दुर्दरांशः ।

मिथुनलग्ने मुद्गरांशः ।

स्थिरलग्ने मुद्गरांशः ।

मिथुनलग्ने मुद्गरांशः ।

सिंहलग्ने शिवङ्कर्यंशः ।

मकरलग्ने कालिकांशः ।

मिथुनलग्ने मुद्गरांशः।

मीनलग्ने चिरजीवांशः ।

सिंहलग्ने ईशानांशः ।

सिंहलग्ने नालांशः ।

कुम्भलग्ने कमलांशे शनिः ।

कुम्भलग्ने चम्पकांशः ।

सिंहलग्ने कामिनीयोगः ।

मेषलग्ने मोहनांशराहुफलम् ।

मेषलग्ने मालिन्यंशब्राह्मण्यंशयोर्गुरुः ।

वृषभलग्ने अबलांशनाडी ।

तुलालग्ने जगत्यंशागदांशगुरुफलम् ।

तुलालग्ने मोहनांशः ब्रां - क्ष - वै ।

मकरलग्ने गोप्रियांशः - वैश्यः ।

सिंहलग्ने कुटिलांशः ।

वृश्चिकलग्ने समांशब्राह्मण्यंशयोगः ।

युग्मलग्ने इन्द्रांशे वैश्यजातकम् ।

मेषलग्ने कुलीरांशः पद्मनाडीकुटिलांशः ।

धनुर्लग्ने चम्पकांशः - ग्रां - ग्रामणी ।

कटकलग्ने धनञ्जयांशः ।

कन्यालग्ने क्षेमांशः सिंहचन्द्रफलं ग्रां - ।

वृषभलग्ने वित्तांशनाडीफलं - ग्रां - ।

मकरलग्ने सुरांशः यमलयोगः दशानाडीफलम् ।

रविनाडीफलं स्थिरराशिचतुष्टयस्य जातिनिर्णयः ।

वृश्चिकलग्ने विश्वांशनाडीफलम् ।

तुलालग्ने ऐन्दवांशनाडीफलम् ।

धनुर्लग्ने वृषभांशत्रिमहांशचापगुरुः ।

कटकलग्ने सुरगांशः चन्द्रनाडी ।

मकरलग्ने सचिवांशनाडीफलम् ।

मीनलग्नमिथुनबुधकुन्दांशनाडीफलम् ।

कन्यालग्ने धनदांशे वर्गोत्तमतुलाबुधनाडीफलम् ।

कुम्भलग्ने अगदांशः ।

मीनलग्ने कमलांशः ।

तुलालग्ने निर्मलांशः ।

वृषभशुक्रराजयोगः ।

कटकलग्नकुटिलांशनाडीफलम् ।

तुलालग्ने इन्द्रांशे इन्द्रयोगे सिंहशुक्रफलम् ।

मेषलग्ने शीतलांशे शनिशुक्रफलम् ।

धनुर्लग्ने मेषशनिकोकिलांशः ।

वृश्चिकलग्ने घातांशः ।

मेषलग्ने अचलांशः ।

कुम्भलग्ने मनोहर्यंशमालांशतुलाशनिः ।

तुलालग्ने कन्याबुधसोमलतांशनाडी ।

वृश्चिकलग्ने समदांशशीतलांशगुरुनाडीफलम् ।

तुलालग्ने विकृतांशः ।

सिंहलग्ने मनोहरांशकिन्नरांशौ ।

वृश्चिकलग्ने कुटिलांशकुन्तलांशौ ।

अष्टकवर्गफलम् ।

मिथुनलग्ने मुद्गरांशे चन्द्रशोध्यावशिष्टम् ।

जन्मनक्षत्रवारफलम् ।

दशाक्रमः—कुम्भलग्ने चित्रिण्यंशकुन्तलांशयोश्चक्रम् ।

मिथुनलग्ने लक्ष्मीषष्ट्यंशः ।

सिंहलग्ने शिवङ्कर्यंशः ।

मकरलग्ने कालिकांशः ।

मिथुनलग्न मुद्गरांशः ।

कुम्भलग्ने रजत कालदण्डदानम् ।

मीनलग्ने धनदांशः ग्रां ।

सिंहलग्ने ईशानांशफलम् ।

कुम्भलग्ने कमलांशशनिः ।

कुम्भलग्ने षष्ठशनि चम्पकांशः ।

सिंहलग्नफलं कुम्भलग्ने मन्दरांशमेषगुरुफलम् ।

वृषभलग्ने मालिन्यंशः ।

वृषभलग्ने अबलांशनाडी ।

तुलालग्ने जगत्यंश मोहनांशशुक्रकुजबुधफलम् ।

मकरलग्ने नागप्रियांशशनिनाडीफलम् ।

सिंहलग्ने बहुधान्यंशे मिथुनसूर्यनाडीफलम् ।

सिंहलग्ने कुटिलांशः ।

वृश्चिकसमांशफलं ब्राह्मयंशयोगः ।

मिथुनलग्ने चन्द्रांशफलम् ।

सिंहलग्ने सर्वांशमुद्गरांशस्य सूर्यनाडी ।

मेषलग्ने कुलीरांशपद्मनाडी ।

धनुर्लग्ने चम्पकांशनाडी ।

कर्कलग्ने धनञ्जयांशः ।

हरिणांशः ।

कटकलग्ने कुबेरांशनाडी ।
कन्यालग्ने क्षेमांशः ।
वृषभलग्ने वित्तांशनाडीफलम् ।
तुलालग्ने शक्त्यंशे चन्द्रफलम् ।
वृषभलग्ने विष्णुदासांशः
मकरलग्ने सुरांशे यमलः ।
स्थिरलग्नचतुष्टये रविनाडीफलम् ।
तुलालग्ने ऐन्दवांशनाडी ।
वृषभलग्ने निर्मलांशनाडी ।
कुम्भलग्ने विश्वम्भरांशनाडी ।
धनुर्लग्ने प्रभांशत्रिग्रहेचापगुरुः ।
धनुर्लग्ने प्रभांशनाडी ।
कटकलग्ने उरगांशनाडी ।
मकरलग्ने सचिवांशनाडी ।
मीनलग्ने मिथुनबुधकुन्दांशनाडी ।
कन्यालग्ने धनदांशवर्गोत्तमनाडी ।
मीनलग्ने कमलांशः ।
तुलालग्ने निर्मलांशः ।
कटकलग्ने कुटिलांशनाढी ।
तुलालग्ने इन्द्रांशयोगः ।
मीनलग्ने शीतलांशशनिशुक्रफलम् ।
धनुर्लग्ने मेषशनिकोकिलांशवृश्चिकशनितुलांशश्च ।
मेषलग्ने अबलांशनाडी ।
कुम्भलग्ने महामायैंशकूलांशतुलारविः ।
मिथुनलग्ने कुन्दांशनाडी ।
वृषभलग्ने वित्तांशनाडी ।
मकरलग्ने सुन्दर्यंशः ।
चरलग्ने त्रैलोक्यांशः ।
कुम्भलग्ने बहुग्रहयोगः ।

मीनलग्ने पङ्कजांशः ।
कटकलग्ने चंपकांशः ।
वृषभलग्ने काहलांशः ।
वृषभलग्ने सुधांशः ।
निशाकरांशः ।
तुलालग्ने प्रभांशमीनगुरुः ।
कुम्भलग्ने दुर्दरांशे मीनगुरुः ।

Library IIAS, Shimla
S 294 167 Ac 99 I D-Ac 99 I
00006434